No. १५३२

Title तत्व चिन्तामणि प्रकाशे ऽनुमान परिच्छेदः

Author म॰म॰ श्री रुचिदत्तः

Extent २६१ Age ५

Subject न्याय वैशेषिकं

प. 51-56

D. 273

तत्त्वचिंतामणि प्रकाशे ऽनुमानपरिच्छेदः

अनुमानप्रकाशोऽवा

१५२२

२६९ पत्रे

न्याय भट्ट०

पत्र ८ खंडित

श्रीसरस्वतीविनायकाभ्यांनमः ॥ प्रणायकलकृकाल्लेभीषणांमीतिकृतोः प्रकटयतिसमस्तान्म
ययाकायमस्मिन् । ममयमयभवान्यागाढमालिंग्यमानोद्घटयतुघनविघ्नध्वंसमस्माकमीशः ।
॥१॥ निशम्यसकलंशास्त्रंनानागुरुमुखांबुजात् ॥ अनुमानप्रकाशोयंरुद्रविदत्तेनतन्यते ॥२॥
संगतिंदर्शयन्नेवशिष्यावधानार्थमिदानीमनुमाननिरूपणंक्रियतइतिप्रतिजानीते· प्रत्यक्षे
ति· अत्रप्रत्यक्षस्यानुमानंप्रतिसाक्षात्परंपरयावाहेतुत्वमुपजीव्यत्वं· यद्यप्यनुमानोपनीतप्र १
त्यक्षेऽनुमानस्योपजीव्यत्वंप्रमाण्यग्राहकत्वेनवतत्रतस्योपजीव्यत्वं· तथापि नप्रत्यक्षत्वावच्छे पि४
देनेदंतथा· प्रत्यक्षत्वमानत्वावच्छेदेनैवतथेति· वक्ष्यवादीति· तथाबाल्यवादिविप्रतिपत्तिनिरा
सपूर्वकानिरूपणातयाप्रथममनुमानंशिष्यजिज्ञासाविषयइतिउपमाननिरूपणात्पूर्वभावोऽनु
माननिरूपणास्येतिभावः । यद्यपिप्रथममक्लिष्टेनवक्तुविप्रतिपत्तिनिरासःकर्तुंशक्यतइतिवेपरि

३२

त्यमर्हः॥ तथापि यत्रोपमानं परैरंतर्भावनीयं यतो वास्माभिर्बहिर्भावनीयं तदनुपदर्शनेनोपमानमपि
न विचारयितुं शक्यत इति अनुमानप्राथम्यं॥ अथानुमानं निरूप्यत इति पाठे अथ शब्दस्यैवायमर्थः। पूत्य
क्षानंतरमनुमानस्योद्देशात्तल्लक्षणानंतरमनुमानलक्षणं क्रियत इति वार्थः। तत्र॥ अनुमाने निरू
पणीये॥ क्रियाद्वाराकरणं लक्षयितुं प्रथमं क्रियालक्षणमाह॥ व्याप्तीति॥ व्याप्तिविशिष्टं वत्तत्पक्षध
र्मताज्ञानं वेति कर्मधारयः व्याप्तिवैशिष्ट्यवत्तद्विषयकत्वं॥ तत्प्रकारकत्वमिति यावत्॥ एवं च व्याप्तिप्र
कारकपक्षधर्मताज्ञानजन्यज्ञानत्वं पर्यवस्यति॥ ननु विशकलितं व्यभिचाराभावं सहचारं च स्मरतः
पक्षवन्निकृतौ तदुभयवैशिष्ट्यभानाद्यत्रानुमितिस्तत्राव्याप्तिः। व्याप्तेस्तत्र पूर्वानुपस्थितत्वेनाप्रकार
त्वात्॥ न च ततोनुमितिर्न भवत्येवेति वाच्यं॥ अनुभवविरोधादिति चेत्॥ न॥ व्यभिचारज्ञानविरोधिप्रकारता
व्याप्तिविषयकत्वस्यैव व्याप्तिप्रकारकपदेन विवक्षितत्वात्॥ तादृशश्च प्रकारो व्याप्तिघटकयत्समान

संगतिरत्रोर्थः॥

४ धिकरणात्यंताभावाप्रतियोगित्वादिरूपः। अतएवप्र[illegible]यत्वप्रकारकव्याप्तिज्ञानान्नानुमितिः। तज्ज्ञा
नस्यचव्याप्तिविशिष्टपक्षधर्मताज्ञानत्वेनजनकत्वंविवक्षितं· तेनतदनुव्यवसायेतज्जनितस्मरणेन्या
यजन्यवाक्यार्थज्ञानादौचनातिव्याप्तिः। यत्तुव्याप्तिविशिष्टश्चेतिभावप्रधानोनिर्द्देशः द्वंद्वश्चसमासः।
एवंचव्याप्तिविशिष्टत्वपक्षधर्मत्वप्रकारकज्ञानजन्यत्वंपर्यवस्य[illegible]तितन्नतुच्छं वह्निव्याप्यधूमवानयमि
त्यादिपरामर्शेव्याप्तेर्व्याप्यप्रकारत्वेपितद्वैशिष्ट्यस्याप्रकारकत्वात्· पक्षधर्मत्वस्यचसंसर्गरूपतयास २
र्वथैव[illegible]प्रकारत्वादव्याप्तेः। नचैतादृशपरामर्शादनुमितिर्नभवत्येवेतिवाच्यं अनुभवविरोधात् लाघ
व्या ३ वेनतादृशस्यैवहेतुत्वाच्च· अतएवव्याप्तिविशिष्ट[illegible]सोपक्षधर्मश्चेतिकर्मधारयोत्तरत्वप्रत्ययेनव्या
प्तिविशिष्टत्वसामानाधिकरण्यापक्षधर्मतालभ्यते· तथाचव्याप्तिवैशिष्ट्यसमानाधिकरणेन
पक्षधर्मत्वंयज्ज्ञानंविषयीकरोतिवह्निव्याप्यधूमवानयमित्याद्याकारंतत्तृतीयलिंगपरामर्शात्मकं

तज्जन्यंज्ञानमनुमितिरित्यर्थइत्ययास्तंउक्तपरामर्शस्यव्याप्तिविशिष्टत्वस्यचसामानाधिकरण्यवि
षयत्वात्तद्वैशिष्ट्यस्याप्रकारतयातत्संबंधागोचरत्वात्‌·उक्तन्यायेनैवपक्षधर्मतासामानाधिकर
ण्याविषयत्वाच्चतस्मादुक्तएवकर्मधारयोनुसर्तव्यः।एवंचव्याप्तिविशिष्टपक्षधर्मेत्यत्रयदिकर्मधा
रयस्तदाभ्रमानुमित्यव्याप्तिस्तत्प्रतिपाद्याभेदस्यतत्रबाधितत्वात्‌·नचात्रप्रमेयत्वसंग्राह्येतिवाच्यं·भ्रमा
नुमितौधर्म्यंशप्रमानुपसंहारापत्तेः।यदिचद्वंद्वस्तदाप्रमानुमित्यव्याप्तिःतत्प्रतिपाद्यभेदस्यबाधि
तत्वादित्यादिकंदूषणमलग्नकंवदितव्यं·केचित्तुसमस्यमानपदार्थयोरभेदेपिपदार्थतावच्छेदकभे
दादेवद्वंद्वस्यसाधुत्वंयथाप्रमेयप्रमेयेत्यादिसूत्रेएवंचात्रापिसएवसमासइत्याहुः।नन्वेवमपिविशे
षदर्शनजन्यसंशयविपर्ययान्तरप्रत्यक्षेऽतिव्याप्तिस्तस्यव्याप्तिविशिष्टपक्षधर्मताज्ञानत्वेनैवतत्रजनक
त्वादितिचेत्‌·अत्रकेचित्‌·विशेषदर्शनस्यतत्त्वेनजनकत्वंकिंतुभ्रमविरोधिप्रत्यक्षविशेषदर्शनत्वे[illegible]दिन

त्य२

3 अन्यथा शाब्देपीतत्त्वभ्रमानंतरं श्वेतस्य व्याप्यशंखत्वरूपविशेषदर्शनं श्वैत्यप्रत्यक्षापत्तेरिति तन्न· एवमपि सं
शयोत्तरप्रत्यक्षेऽतिव्याप्त्यवारणात्· न हि तत्रापि तस्य तत्त्वेन जनकत्वं· व्याप्यदर्शनमात्रस्य भ्रमसाँ [illegible] विरो
धित्वेपि संशयमात्रविरोधित्वात्· अन्येतु· संशयोत्तरप्रत्यक्षे विशेषदर्शनं परामर्षरूपं न जनकं· किंतु करा स्रा२
दिपुरुषत्वव्याप्यं अयं वकरादिमानिति ज्ञानद्वयात्मकमेव तत एव तदुपपत्तौ तत्कल्पने मानाभावात्· तप
वनतत्रातिव्याप्तिरिति· तन्न· यत्र दैववशात्प्रथममेव तादृशः परामर्षस्तत्र तदन्यप्रत्यक्षे तथाप्यति
व्याप्तेः। लाघवेन तादृशपरामर्षस्यैव कारणत्वाच्च· अन्यथाऽनुमितावपि ज्ञानद्वयस्यैव कारणत्वापत्ता ३
वसंभवापत्तेः। अन्येतु सिसाधयिषाविरहदशायां सिद्धेरनुमानेतरसाधकमानस्य वानुमितौ प्रतिबंधकत्व
सर्व२ मितिं जन सिद्धं तथा च सिसाधयिषाविरह[सह]कृतसिद्ध्यनुमानातिरिक्तसि[illegible]ँकरणान्यान्याभावः पक्षता· प
वं प्रत्यक्षादौ सिसाधयिषाविरहसहकृतस्यानुमानातिरिक्तस्य प्रत्यक्षस्यैव साधकमानस्य सत्त्वेन तत्र प

द्वि२

क्षताविरहादुक्तलक्षणागमनान्नतत्रातिव्याप्तिः। नवसिसाधयिषाविरहेसतिसिद्धिसायामेवनय
क्षतानत्वनुमानातिरिक्तसाधकमानदशायामपीतिवाच्यं॰ तर्हि पक्षतासत्वेतत्रानुमित्यापत्तेः। प्र
त्यक्षसामग्र्याप्रतिबंधादितिचेत्॰ तर्हिप्रत्यक्षसामग्र्यांसत्यामनुमित्सादशायामनुमितिर्नस्यात्॰ अ
नुमित्सयाहिपक्षतैवापादनीया॰ साचप्रत्यक्षसामग्रीसत्वेप्यनुमितिंप्रत्यप्रयोजिकैवत्वयाकृतेति॰
तदपिन॰ सिसाधयिषाविरहसहकृतसिद्ध्यभावस्यैवपक्षतात्वेनतत्रतत्सत्वात्॰ नवैवंतत्रानुमितिः
स्यादित्युक्तमितिवाच्यं॰ समानविषयसिसाधयिषाविरहसहकृतानुमानातिरिक्तसाधकमानस्य
प्रतिबंधकत्वात्ननुपतएवसिसाधयिषाविरहसहकृतसिद्धिवत्तथाभूतसाधकमानस्यापिप्रतिबंध
कत्वमतएवविनिगमनाविरहादुभयान्यान्याभावपक्षतेतिचेत्॰ भवेदेवंयदितदुभयान्यान्याभावत्वे
नकारणात्वंस्यात्ननैवंयेनयत्रयस्यप्रतिबंधकत्वंतदवच्छिन्नाभावत्वेनतत्रतदभावस्यप्रयोजकत्वात्॰

५ अन्यथा मणिमंत्राद्यन्यान्याभावत्वेन दाहादिप्रयोजकत्वेमण्याद्यभावकूटस्यहेतुत्वमिति सिद्धांते
व्याकुप्येत॰ एवं च तथाभूतसिद्धित्वेन तथाभूतसाधकमानत्वेन वानुमितौ प्रतिबंधकत्वमिति तादृश
साधकमानाभावत्वेन तादृशसिद्ध्यभावत्वेन वा भावद्वयस्य कारणत्वं भवति नत्वेकस्य तदुभया
न्यान्यत्वावच्छिन्नविशिष्टाभावस्य कारणीभूताभावस्य वपक्षतात्वौचित्यात्॰ ननु तथापि कार
णत्वाविशेषे तादृशसिद्ध्यभाव एव पक्षता न तु तादृशसाधकमानाभाव इत्यत्र किं विनिगमकं॰ ४
येन संशयोत्तरप्रत्यक्षस्थले पक्षता स्यादिति चेत्॰ न॰ उभयोः कारणत्वे किं पक्षपदप्रवृत्तिनिमि ना॰५
त्तमिति प्रश्नस्य फलितोर्थः। अत्र लाघवाद्योग्यत्वेन प्रथमोपस्थितत्वाच्च॰ तादृशसिद्ध्यभाववत्त्वमित्यु
त्तरं॰ तादृशसाधकमानाभावश्च पक्षपदाप्रतिपाद्योपि पक्षतावदनुमितौ कारणमिति संशयोत्तरप्रत्य
क्षस्थले पक्षतासत्त्वेपि तदभावान्नानुमितिरिति युक्तमुत्पश्यामः। अपि च मास्तु संशयोत्तरप्रत्यक्षस्थले

गा

पक्षतातथापितस्याः पृथक्कारणत्वेनकारणत्वावच्छेदकत्वेमानाभावात्पक्षधर्मतापदेनसाध्याधि
करणत्वाभिमतधर्मिधर्मताविवक्षणीया · नज्ञानजन्यत्वंवत्तत्रापीत्यतिव्याप्तिर्वज्रलेपायितैवेति
यत्तुसंशयोत्तरप्रत्यक्षेविशेषदर्शनस्यनतत्वेजनकत्वं · प्रत्यक्षप्रतिबंधकीभूतस्यविशेषदर्शनाभा
वविशिष्टस्यसंशयस्यविशेषणाभावप्रयुक्तमभावमापादयतस्तत्रतस्योपयोगित्वेनान्यथासि
द्धत्वादिति · तन्न · संशयस्यहिप्रतिबंधकत्वंतत्कोटिकज्ञानमात्रेतन्मात्रकोटिकज्ञानेवा · नाद्यः
संशयानंतरमपिसंशयांतरोदयात् · नांत्यः तन्मात्रकोटिकज्ञानानुत्पत्तिर्हितत्रापरकोटिज्ञा
नसामग्रीसत्वप्रयुक्ता · ननुतदुभयकोट्यारोपरूपसंशयरूपप्रतिबंधकसत्वप्रयुक्ता · मानाभा
वात्तस्मान्यथाघटपटसमूहालंबनेनप्रतिबंधादितिपदितदैतदत्रापितुल्यं · तस्माद्यथाघटपटो
भयज्ञानसामग्र्याउभयज्ञाने कालेघटमात्रगोचरज्ञानेतत्समूहालंबनस्यप्रतिबंधकत्वाभ्युप

5 गमापत्तिः।तत्सत्वेतदनुपत्तेः।पटज्ञानसामग्रीसमावेशात्पटगोचरत्वेनन घटमात्रगोचरंतत्रज्ञानं
२ननुसमूहालंबन४नमेकज्ञानसामग्र्यामेकमात्रज्ञानंतथाउभयकोट्यारोपसामग्र्यांसत्यांउभया
रोपरूपःसंशयः।एककोटिकज्ञानसामग्रीवैकल्येचैकमात्रकोटिकज्ञानं·नत्वेकस्यापरत्रप्रति
[illegible]वंधकत्वमितिश्रुयमेवविशेषोयदेकधर्मिगतत्वेनभासमानयोःस्थाणुत्वपुरुषत्वयोर्विरोधभा
नसामग्र्याविरोधोपिप्रकाश्यतइतितदुभयारोपस्संशयत्वमापाद्यते·एकस्मिन्धर्मिण्यवभासमानवि ५
रोधिनानाकोटिकज्ञानस्यैवसंशयत्वात्·घटपटोभयज्ञानेतुनतथेतितस्यनिश्चयत्वमेव·अतएवय
त्रैस्थाणुत्वपुरुषत्वयोर्वि रोधभ्रमस्तत्रस्थाणुःपुरुषश्चेति[illegible]निश्चयएवभवति·वह्निशि शीशावइतिस्यातत्सम्बे=
शपावेतिवत्·ननुपक्षतासहकृततद्धीजन्यत्वंविवक्षितं·तथाचसंशयोत्तरप्रत्यक्षस्थलेपक्षतायाःसत्वे
प्यजनकत्वान्नातिव्याप्तिः।नचैवंपक्षताजन्यत्वमेवास्त्विति वाच्यं·तत्वेनजनकत्वस्याविवक्षिततयासि

साधयिषाविरहकृतसिद्ध्यभावरूपायाः पक्षताया योग्यत्वेन तद्बोधकप्रत्यक्षेऽतिव्याप्तिः। न च पक्षतासहकृतव्याप्तिधीजन्यत्वमेव वाच्यं। व्याप्तिधीविषयकपक्षताविषयकसमूहालंबनसंभवेनातिव्याप्तिः पक्षतासहितपरामर्षसत्वेवानुमितेरेवोत्पत्तेस्तदुभयगोचरसमूहालंबनानुव्यवसायाभावान्नातिव्याप्तिरितिवेत्तन। बाधसत्प्रतिपक्षावतारकाली न परामर्षेणापक्षतासहकृतेन जनिते तदुभयविषयकसमूहालंबने तथाप्यतिव्याप्तिः। न च परामर्षांशे तत्त्वेन जनकत्वं विवक्षितमनुव्यवसीयते तु न तथेति नोक्तदोष इति वाच्यं। पक्षतासहकृतेत्यस्य वैयर्थ्यापातात्। तावन्मात्रेणासामंजस्यादित्यनुपदमेव वक्ष्यते। किं च पक्षताया व्याप्तिकरणासिसाधयिषागर्भत्वेनावश्यमग्रे निवेश्यतयाऽयोग्यत्वेन व्यर्थविशेषणत्वव्याप्तेरिति। अत्रोच्यते। विशेषदर्शनस्य प्रत्यक्षमात्रे हेतुत्वं। संयोगेऽन्नरप्रत्यक्षेवा। संशयोत्तरैककोटिकमात्रप्रत्यक्षेवा। नाद्यो व्यभिचारात्। न द्वितीयः। संशयानंतरं वि

शेषदर्शनंविनासंशयांतरस्याप्यनुदयप्रसंगात्॰नत्तृतीयः।एवंहिविशेषदर्शनेसतिएकमात्रकोटि
6 कज्ञानंभवतु॰उभयकोट्यारोपरूपसंशयानुत्पादःकथं॰उभयकोट्यारोपसामा[illegible]एवसंशयहेतुत्वेन
तत्सत्वेनतदवश्यंभावात्॰कार्याभावस्यसामग्रीविरहप्रयोज्यत्वनियमात्॰अथैककोटिव्याप्यदर्शन
स्यैवतद्धर्मिकापरकोटिज्ञानप्रतिबंधकतयाऽपरकोटिज्ञानसामग्रीविरहादेवनसंशयइतिचेत्॰न
तैवमपरकोटिज्ञानसामग्रीविरहेसामान्यसामग्रीतएवतन्मात्रैककोटिकज्ञानमस्तुनतुतन्मात्रको ६
टिकज्ञानेप्रत्यक्षत्वंकार्यतावच्छेदकं॰तत्कोटिकव्याप्यदर्शनत्वंचकारणतावच्छेदकंमानाभावात्॰य
थापटादिज्ञानसामग्रीविरहेसतिघटज्ञानसामान्यसामग्रीतएवघटमात्रगोचरंज्ञानं॰नतुतज्ज्ञानत्वा
वच्छिन्नंप्रतिविशेषसामग्र्यंतदपिकल्प्यते॰तथाचविशेषदर्शनस्यापरकोटिज्ञानप्रतिबंधकत्वेनाप
योगोनतुजनकत्वेनेतिनोक्तातिव्याप्तिः।नचैवंविशेषदर्शनकालएवपुरुषप्रत्यक्षापत्तिः।इष्टापत्तेः॥

विशेषदर्शनहेतुजन्यत्वमतद्वैतन्मते व्याप्यविषयकव्यापकप्रत्यक्षोपगमात्तन्ननु यदि व्याप्यदर्शनस्य
परकोटिज्ञानप्रतिवंधकत्वं तदाऽश्वैत्यव्याप्यशंखत्वदर्शने सति पीतप्रत्यक्षं न स्यादिति चेत्‌ • न • तत्कोटि
प्रत्यक्षसामग्रीकालीनतत्कोटिव्याप्यदर्शनस्यानन्यगत्या प्रतिवंधकत्वेन स्वीकारात्‌ • श्वैत्यप्रत्यक्षसा
मग्र्याश्च तत्राभावात्‌ • नन्वेवं विशेषदर्शनस्याहेतुत्वे वाध्यवाधकव्यवस्थावधारणात्वानवधारणात्व
विभागश्च ज्ञानेन स्यात्‌ • सामग्र्या वैचित्र्यफलावैचित्र्यादिति चेत्‌ • न • विशेषदर्शनाव्यवहितोत्तरोप
त्तिकत्वेनापि वाधकत्वसंभवात्‌ अवधारणात्वं वज्ञानतत्कोटिविषयत्वे सति अपरकोटिव्यवच्छेदकवि
षयत्वं • अपरकोटिव्यवच्छेदभानसामग्रीसमाजादर्थसमाजमाहिम्नैवोपपन्नं न विशेषसामग्र्यंतरं कल्प
यातीति • अस्तु वा विशेषदर्शनस्य हेतुत्वं तथापि न तत्त्वेन • किंतु संशयविरोधिदर्शनत्वादिनैव • अन्यथा स्था
णुपुरुषसंशयानंतरं अयं न स्थाणुरित्याप्तवाक्यात्पुरावर्त्तिनि स्थाणुत्वाभावावगतो पुरुषत्वव्याप्यद

7

शीतं विनापुरुषप्रत्यक्षानुदयप्रसंगात्॰ नचैवमेवेतिवाच्यं॰ स्थाणुत्वाभावनिश्चयेनसंशयेनिरस्तेइंद्रिय
सन्निकर्षादौसत्यपिनपुरुषप्रत्यक्षमित्यस्यानुभववाधितत्वात्॰ संशयविरोधित्वेनचप्रयोजकत्वेविप
रीतनिश्चयस्यापिसंशयविरोधित्वात्ततः पुरुषप्रत्यक्षाविरोधइतिवयंपश्यामः। नचैवमग्रिमज्ञानपद
वैयर्थ्यं॰ अन्यत्रपरामर्शस्यतत्वेनाजनकत्वादितिवाच्यं॰ सत्प्रतिपक्षस्थलेप्रकृतसाध्यहेत्वोः किंतत्वमि
तिजिज्ञासायामतिव्याप्तिवारकत्वात्॰ तत्रपरामर्शस्यसत्वेनेवजनकत्वात्॰ प्रकृतसाध्यहेत्वोः किंत
त्वमितिज्ञांजिसाजनिकाव्याप्तिपक्षधर्मोपस्थितिः प्रकरणासमेइत्यादिग्रंथेनतथैवग्रंथिकृताग्रद 7
र्शितत्वात्॰ यद्वाभ्रमानुमितावतिव्याप्तिवारणाया...मज्ञानपदंप्रमापरं॰ प्रमाणलक्षणायप्रमाया
एवात्रलक्ष्यत्वात्॰ प्रथमज्ञानपदस्यैवतदर्थंप्रमापरत्वेभ्रमांशप्रमानुपसंग्रहापत्तेः। गंधप्रागभावाव
च्छिन्नघटेगंधवानित्यादौवाधानवतारेजायमानानुमितावतिव्याप्त्यापत्तेश्च॰ अग्रिमज्ञानपदवैि

जि३

र्भावेनानुमितिसामान्यलक्षणमपिस्मा वितमितिसामान्यलक्षणानभिधानेकथं विशेषलक्षणा
भिधानमितिदूषणमलग्नकं वेदितव्यं·केवलव्यतिरेकिणिव्यतिरेकसहचारेणान्वयव्याप्तिरवगत्य
तद्गतिमतेनेतल्लक्षणपुरणायनान्नतल्लिंगकानुमितावव्याप्तिरितिदृष्टव्यं अन्यत्तु·।व्याप्तिविशिष्टप
देनात्रसाध्यगावरसाधनसमानाधिकरणात्यंताभावप्रतियोगित्वधीविराधिधीविषया व्याप्तिवैशि
ष्ट्यं विवक्षितं·अन्वयिनिलिंगेऽन्वयव्याप्तेःसाक्षाद्वैशिष्ट्यंतथाव्यतिरेकिणितुव्यतिरेकव्याप्तेस्तत्
प्रतियोग्यभावप्रतियोगित्वारूपंपरंपरावैशिष्ट्यंतथा·तदेवचतत्रव्यतिरेक्यनुमितिजनकलिंगपरा
मर्षविषय इतिनतज्जन्यानुमितावव्याप्तिरित्याहुः·नन्वनुमितित्वं गृहीतंवा·आद्येतद्देवलक्षणम्
स्तु·कृतंतद्ग्रहाधीनप्रकृतलक्षणेन·अंत्येऽनुगतधर्मग्रहं विनातत्रोक्तज्ञानजन्यत्वग्रहासंभवोतिवे रि२
त्·न·अनुमितित्वं गृहीतमेव·किंतुलक्ष्यतावच्छेदकतया पयोगि·नह्येकमेवलक्षणं लक्ष्यतावच्छेदकं

मणि३ 8

वेद्दतभेदसाधनेतयोरभेदेऽन्वयव्याप्तिग्राहकेणोवपक्षतावच्छेदकावच्छिन्ने साध्यसिद्धिसंभवेनसिद्धसा
धनात।व्यतिरेकिस्यपन्वयव्याप्तिरेव गृह्यतद्दतिमतनैतल्लक्षणाभिधानात्·यथानुतन्मतंनाप्युक्तंतथा
ग्रेवक्ष्यते·त्वगाणवैरणिन्यायेनावच्छेदकग्रहं विनापिहेतुत्वग्रहसंभवाच्च·ननुव्याप्तिज्ञानत्वेनतज्ज्ञानज
न्यत्वस्यपक्षधर्म्मताज्ञानत्वेनतज्ज्ञानजन्यत्वस्यवा अनुमितिलक्षणत्वसंभवे पुक्तलक्षणगौरवमि
तिचेत्·न·तदुभयरूपेणतदुभयज्ञानस्यानुमितिजनकत्वासिद्धेः।नहिव्याप्तिपक्षधर्मताभयविषय ८
कपरामर्षस्यव्याप्तिज्ञानत्वेनपक्षधर्मताज्ञानत्वेनवाजनकत्वं·समुदितविषयत्वेनैवतस्यतथात्वात
अन्यथाऽन्यतरवैफल्यमेवस्यात्·नचपरामर्षजनकव्याप्तिस्मृतिद्वाराद्वितीयलिंगपरामर्षस्यपक्षध
र्मताज्ञानत्वेनतत्रहेतुत्वमितिवाच्यं·यत्रधूमादौव्याप्तिवैशिष्ट्यग्रहानंतरमेवपक्षधर्म्मताग्रहस्तत्र तत्त्वे
नतद्धेतु[redacted]स्यानुमितावजनकत्वात्·व्याप्तिज्ञानत्वेनयथाव्याप्तिज्ञानस्यनानुमितिकरणत्वं

तथाग्रेवक्ष्यते॰ तदुभयरूपेणाजनकत्वसंभवेपिप्रकृतलक्षणेतयोरप्रवेशेनव्यर्थविशेषणत्वाद्यनव
काशान्निवृत्तिसर्वमवदातं केचित्तु विशिष्टपदंवैशिष्ट्यपरं॰ तथाचव्याप्तिवैशिष्ट्यविषयकज्ञानस्यपक्षध
र्मताविषयज्ञानस्यचयत्रव्यापारव्यापारिभावापन्नतयाकारणत्वंतदनुमितिः। एवंचोक्तप्रत्यक्षा
दौनातिव्याप्तिः। एवंचान्वयिनिव्यतिरेकिण्यपितज्ज्ञानंतथे तिनकश्चिद्दोषइतिवदंति॰ तन्नविश
कलितव्यभिचाराभावसहचारस्मरणानंतरंयत्रलिंगेतदुभयवैशिष्ट्यंपक्षेचलिंगवैशिष्ट्यंयुगप
देवभासते तज्ज्ञानजन्यानुमितावव्याप्तेः। तत्रपरामर्षपूर्वंव्याप्तिज्ञानाभावात्॰ नचैवंव्याप्तिज्ञानस्यक
रणत्वमपिनस्यादत्रैवव्यभिचारादितिवाच्यं॰ यथाश्रुतस्यतस्याग्रेदूष्यत्वेनेष्टापत्तेः। तदिति॰ व्याप्ति
विशिष्टपक्षधर्मताज्ञानजन्यप्रमाणैकेणामित्यर्थः। यद्वा॰ अनुमानंअनुमानपदवाच्यंप्रमाणमित्यर्थः। तेननपौनरुक्त्यं॰
॥नवाऽनुमा नाभासस्साधारण्यं॰ ननुतत्करणमनुमानलक्षणंनसंभवति लिंगस्यातीतानागतत्वेना

इत्यनुमितिलक्षणं३

कारणत्वादित्यत आह· तन्नेति· अनुमानप्रमाणमसहमानश्चार्वाकः प्रत्यवतिष्ठते· अथेति·
अनुमानप्रमाणत्वाभिमतं धूमादिनप्रमाणं· व्यभिचारसंशयविषयत्वात्संप्रतिपन्नवदित्यर्थः।
9 नचव्यभिचारसंशयस्यायोग्यतासंशयपर्यवसन्नतयाशक्येन व्याप्तिग्रहः स्यादितिवाच्यं· तेनशब्द
प्रमाणस्याप्यनंगीकारात· अयोग्योपाधीति· नचातींद्रियोपाधिसंशयस्तज्ज्ञानात्तज्ज्ञानं च
नप्रत्यक्षेण तस्यातींद्रियत्वात· अतिरिक्तप्रमाणाभ्युपगमेवापसिद्धांतादितिवाच्यं· तस्यानादि ८
वासनातउपस्थितावदोषादितिभावः। ननुभूयसहवासदर्शनात्तन्निरासोभविष्यतीत्यत आह·
शतशइति· नचकोटिस्मरणादिविरहाद्यत्र नव्यभिचारसंशयस्तत्रानुमानप्रमाणं सिद्धमिति
वाच्यं· धूमादिदर्शनेनुमित्यभावेपिसंभावनातः प्रवृत्त्युपपत्तावन्यत्रापितत्प्रमाणत्वे मानाभा
वादितिभावः। संभावनामात्रादिति· उत्कटकोटिकसंशयमात्रादित्यर्थः। एवंसतिप्रमाणबुद्धिसम

र्थयतिसंवादेनेति॰ स्मृतिवदितिभावः।इतीतिहेतौ॰ तथाचयत्तानुमानंनप्रमाणमतोनाप्रत्यक्षंश
ब्दादिकमपिप्रमाणं॰ शब्दस्यानुमानाधीनप्रथमसंकेतग्रहमूलकत्वात्॰ उपमानस्यचानुमानमूल
कातिदेशवाक्यरूपशब्दमूलकत्वादित्यर्थः।अतोनोपक्रमोपसंहारविरोधः।संप्रतिशब्दादिप्र
माण्ये विवादाभावादप्रत्यक्षमनुमानपरं॰ सामान्यशब्दस्यविशेषपरत्वादित्यप्याहुः।अनुमान
मप्रमाणमित्यनुमानविधयामतेशब्दविधयावाआद्येआह॰ अप्रमाणेति॰ अप्रमाणसाधर्म्येव्यभिचा
रसंशयविषयत्वादितथाचानुमानेनेवानुमानाप्रमाण्यसाधनेव्याघातइत्यर्थः।अंत्यआह॰ एतद्वा
क्यस्येतितयोःसंदेहविपर्यासयोः।तथाचैतद्वाक्यप्रयोगार्थंपरकीयसंदेहादिज्ञानायानुमानमव
श्यमुपेयमितिभावः।नन्वेवंत्सर्वसंभावनयैवान्यथासिद्धमितिदूषणांतरमाह॰ अनुमानमिति॰ अनुमा
नप्रमाणमितिवाक्यस्यप्रामाण्यपक्षेशब्दप्रामाण्यसिद्धिः।अप्रामाण्यपक्षेत्वनुमानस्यैवसिद्धेर्नाप्र

त्यक्तंप्रमाणमित्यनेनव्याघातइत्यर्थः। यद्वा· एतद्वाक्यस्यप्रामाण्यंयदिनिश्चितंतदातन्निश्चाय
10 कत्वेनैवानुमानंस्वीकृतंअप्रामाण्यंचेत्तथाप्यनुमानमप्रमाणमितिव्याघातइत्यर्थः। स्वमतावष्टं
भेनदूषणांतरमाह· अपिचेति· नन्वयोग्योपाधिकेशंकयाव्यभिचारसंशयाद्व्याप्तिग्रहाभावा
द्दैवनानुमानमित्यतआह· व्याप्तीति· निरूपणप्रयोजकत्वेनाहअनुमितिहेत्विति। संयोगा
दिसाध्यकसद्धेतावव्याप्तेर्लक्षणांतरमाहसाध्यवदिति· एवंसाध्याभाववदितिव्यर्थमित्यप
रितोषादाह· साध्यवदिति· ननुयत्किंचित्साध्यवत्प्रतियोगिकान्योन्याभावसामानाधिकर १०
ण्यंधूमादावपीत्यव्याप्तिरित्यस्वरसादाह· सकलेति· सकलपदमशेषपरंतत्त्वनेकाशेषपरमतो
ऽत्रैकएवसाध्याभाववान्तत्रनसाकल्यप्रसिद्धिरितिध्येयं· ननुसंयोगादिसाध्यकसद्धेताव
व्याप्तिरित्यनुशयेनाह· साध्यवदन्येति· साध्यवत्त्वावच्छिन्नप्रतियोगिकान्योन्याभाववद्वृत्तित्वमि

त्यर्थः । अन्योन्याभाववद्व्याप्यवृत्तिरिति नोक्तदोषः अत्र वृत्तिमत्त्वे सतीति विशेषणं अतो नाकाशादा
वतिव्याप्तिः । केवलान्वयिनीति । केवलान्वयिधर्मसाध्यकइत्यर्थः । नापीति । अत्र साध्यासामानाधिकरण्यं
साध्यसामानाधिकरण्यनिषेधः । साध्यवैयधिकरण्यं तु विशङ्कमहिम्ना साध्याधिकरणाभिन्नाधिकरण
त्वमिति नाभेदः । प्रथमपक्षे साध्याधिकरणानधिकरणत्वं विवक्षायां व्यभिचारिसाधारण्यापत्त्या साध्या
नधिकरणाधिकरण[illegible]त्वानधिकरणत्वं वाच्यं द्वितीयपक्षस्य साध्यानधिकरणानधिकरणत्व एव पर्य
वसानादुभयपक्षे तदेव तात्पर्यविषयं वर्णयित्वा दूषयति । तदुभयमपीति । यद्वा साध्यासामानाधिकरण्यं ना४
साध्यवन्मात्रावृत्तित्वं । साध्यवैयधिकरण्यं तु साध्यानधिकरणावृत्तित्वं एवं चोभयलक्षणस्य साध्यानधि
करणानधिकरणत्व एव पर्यवसानमित्याह । तदुभयमपीति । तत्र केवलान्वयिनीत्यर्थः । यथाकथं
चित्साध्याभावप्रसिद्धिमात्रेणैव प्रकृतसंगतिरिति मन्वानः शङ्कते । अथेति । ननु प्रतियोगिमत्ति कथं तद

भावे [illegible] तस्मात् व्यधिकरणेति॰ प्रतियोगितावच्छेदकावच्छिन्नसामानाधिकरण्यमभावस्य विरुद्धं ननु
प्रतियोगिसामानाधिकरण्यमात्रमिति भावः। पराभिमानं खंडयति॰ तर्हीति साध्यतावच्छेदकावच्छिन्न
साध्याभावासामानाधिकरण्यमव्यभिचारो वाच्यः तथा वा प्रसिद्धिरिति भावः। तद्वैशिष्ट्येति॰ प्रतियोगि
नि प्रतियोगितावच्छेदकधर्मवैशिष्ट्यज्ञानस्याभावधीहेतुत्वादिति भावः। अन्यथेति॰ प्रतियोगिधीमात्र
स्याभावधी [illegible] हेतुत्वे इत्यर्थः। ननु व्यधिकरणधर्मवैशिष्ट्यज्ञानं भ्रमरूपं संभवत्येव॰ नहि [illegible] प्रतियो
गितावच्छेदकधर्मप्रकारकप्रतियोगिप्रमात्वेन तद्धेतुत्वं गौरवात् किंतु तादृशप्रतियोगिज्ञानत्वेन ला ११
घवात्॰ अत एव निर्विकल्पकादप्यभावधीः न वास्य व्यधिकरणधर्मावच्छिन्नस्य प्रतियोगिनः सर्व
थाऽसत्त्वेनासत्ख्यात्यापत्तिः। वाच्यत्वमात्रस्यैव प्रतियोगित्वात्तत्र च व्यधिकरणधर्मावच्छेदकः। तद्वै
शिष्ट्यज्ञानं च तत्रान्यथाख्यातिरूपमेव॰ अथ वाच्यत्वं न क्वचित्समवेतमिति विशेषदर्शने सत्येव वाच्यत्वं

समवायितया घटे नास्तीति प्रतीतेस्तेनाभ्युपगमः। अन्यथा तादृशाभावप्रतिपत्ता तस्य केवलान्वयि
त्वगुरूक्त्यासंभवात्। तथा च तादृशभ्रमस्यापि तत्राभावाज्ञकथं तदभावधीरिति चेत्तन प्रतियोग्यधिकरण
संसर्गज्ञानतद्व्यधिकरणधर्मावच्छिन्नप्रतियोगिज्ञानस्याहार्यस्यैव तत्रोपयोगित्वात् आहार्यज्ञा
नस्य विशेषदर्शनाप्रतिबध्यत्वात्। अत एवाभावज्ञानमपि तद्देशे आहार्यमेव। अन्यथा व्यधिकरण
धर्मस्य प्रतियोगिनि बाधनिश्चये तद्विशिष्टवैशिष्ट्यज्ञानानुपपत्तेः। अथ प्रतियोग्यधिकरणसंसर्ग
ज्ञानस्य निषेधधीप्रतिक्षेप्यविषयासंजकत्वे मात्रेणोपयोगादाहार्यस्यापि तस्याभावप्रतीतावनुप
योगित्वमुचितं। प्रतियोगितावच्छेदकवैशिष्ट्यज्ञानस्य त्वभावरूपससंबंधिकपदार्थज्ञाने संबंधिता
वच्छेदकावच्छिन्नसंबंधिज्ञानत्वेनोपयोगित्वादनाहार्यस्यैव तस्यान्वयव्यतिरेकाभ्यां तत्र प्रयोजकत्वम
भ्युपेयमिति चेत्त। न अनाहार्यतादृशज्ञानत्वेन हेतुत्वे गौरवात्। नन्वेवमाहार्यघटपटादिज्ञानेपि तत्सं

भक्त॰ म्ह॰ अनु॰

12 योगप्रत्यक्षत्वापत्तिरिति चेत॰ न॰ संयोगादिप्रत्यक्षे संबंधितावच्छेदकप्रकारिकानाहार्यसंबंधिप्रत्यक्ष
रूपविशेषसामग्र्या अवश्यकल्पनीयत्वात्तदभावादेव तदभावोपपत्तेः। अन्यथानाहार्यघटपटस्मर
णादिज्ञाने सति तत्संयोगप्रत्यक्षापत्तिः। न यानाहार्यत्वं सामान्यसामग्र्यामेव विशेषणमस्तीति वाच्यं
विशेषसामग्र्यां तद्विशेषणस्यावश्यकत्वात्। अन्यथानाहार्यघटपटस्मरणोत्राहार्यघटपटप्रत्यक्षस्य
सति तत्संयोगप्रत्यक्षतापत्तिः। अथ गवि शशीयशृंगाभावनिश्चयो नानुपलब्धिमात्रादतीन्द्रियोच्छे १२
दापत्तेः किंतु योग्यानुपलब्धेः। योग्यता च शशीयत्वावच्छिन्नशृंगस्य तदुपलंभकसामग्रीरूपा वाच्या॥
सा च तादृशशृंगस्यापारमार्थिकतया दोषघटितैव वाच्या॰ तथा च न तस्यां सत्यां तादृशशृंगानुपल
ब्धिः। तदनुपलब्धौ न सति कथं तादृशशृंगाभावो गवि प्रतीयते तस्माद्विशशशृंगं नास्तीत्याकारापि
यद्धीस्तदा गोशृंगाधिकरणकशशीयत्वप्रतियोगिकाभावविषयतया कथंचिदुपपादनीयेति चेत्॥

यथा१

न॰प्रतियोग्युपलंभकसामग्र्यादेर्दोषभिन्नाया अवश्यवाच्यत्वात्॰अन्यथाप्रतियोगिग्राहकदोषाभावे
घटाद्यभावग्रहोपि न स्यात्॰तत्सद्भावे तदनुपलब्धेरेवाभावात्॰नच प्रकृते दोषभिन्नात् तदुपलंभकसाम
ग्री नास्त्येवेति वाच्यं चक्षुरादेरेव तथात्वात्॰न हि दोषमात्रादेव शशीयत्वावच्छिन्नशृंगोपलब्धिः अपि
च॰नैयायिकानुपलब्धिरभावग्राहिका॰संयोगाद्यभावस्याप्रत्यक्षतापत्तेः किंतु यत्र क्रियत्त्वमनुप
रा।५ लंभविरोधीत्याद्याकांक्षायां प्रकृते प्रस्त्येव॰गविशशीयत्वावच्छिन्न [illegible] शृंगस्यानुपलब्धिविरोधित्वात् सत ५
६यतु अधिकरणे प्रतियोगिसंसर्गारोपपूर्वकैव निषेधप्रतीतिरुत्पद्यते॰नच गविशृंगसंसर्गारोपसंभव
ति॰तस्य तत्र सत्त्वादेव॰तथाच तत्र कथं शृंगाभावः प्रतीयतेति॰तदपि न॰न हि प्रतियोगिसंसर्गारोप
त्वेन तत्र हेतुत्वं किंतु भ्रमप्रमासाधारणेन प्रतियोगिसंसर्गज्ञानत्वेन लाघवात्॰अन्यथा घटवति त
दभावभ्रमानुपपत्तेः।तद्वति तत्संसर्गज्ञानस्यानारोपरूपत्वात्॰नच गविशृंगस्य प्रतियोगिन उपल

13

ध्वेरनुपलब्धिरेवनास्तीतिवाच्यं॰प्रतियोगितावच्छेदकावच्छिन्नप्रतियोग्यनुपलब्धेरभावग्राहकत्वात्
तस्याबाधाभ्यामपिसत्वादिति॰नन्वत्रयद्विशाशीयत्वंप्रतियोगितावच्छेदकंतदाशशीयमिहनास्ती
तिप्रतीत्यापत्तिः।अथशृंगत्वंतदपिन।तदवच्छिन्नस्यगविसत्वेनतदवच्छिन्नाभावासंभवात्शशशृं
गत्वंचाप्रामाणिकमितितवापिसंमतमितितादृशप्रतीतिरसिद्धैवेतिचेत्॰नशशीयत्वस्यैवप्रति
योगितावच्छेदकत्वात्शृंगत्वमानसामग्र्याचप्रतियोगिनिशृंगत्वमपिभातमितिशशीयमिहना १३
स्तीत्येवनप्रतीतिः।नहिप्रतियोगितावच्छेदकमात्रमेवप्रतियोगिनिभासते॰प्रमेयोघटोनास्तीत्यत्र
तादृशस्यापिप्रमेयत्वस्यघटेभानात्॰।अत्रब्रूमः॥यदिनविशशीयंशृंगं[illegible]नास्ती
तिप्रतीत्याव्यधिकरणधर्मावच्छिन्नप्रतियोगिकाभावोभ्युपेयस्तदापटत्वावच्छिन्नेघटेघटत्वंनास्तीति
प्रतीत्याव्यधिकरणधर्मावच्छिन्नाधिकरणताकप्रतिरिक्तोभावोभ्युपेयस्यात्॰नचेष्टापत्तिरपसि

च्छेदतात्तन्याधिकरणाभेदवत्तदवच्छेदकभेदोऽपिनाभावभेदप्रयोजकइतिवाच्यं·क्लृप्ताभावेनैवत्त
त्तत्रप्रतीत्युपपत्तेरन्यत्रतथात्वेपिप्रकृतेप्रतीतेः क्लृप्तत्वेनानुपपत्त्यातत्कल्पनात्· किंच· प्रतए
वतत्रनाभावभेदोऽतएवप्रतिवंद्धिः। अथघटेघटत्वस्यसत्वात्तद्विशेषणाक्षीतिन्यायेनतत्प्रतीते
र्घटेपटत्वाभावमात्रविषयत्वमितिचेत्त· कृतेवं·गविशृंगस्यसत्वात्तत्प्रतीतेःसविशेषणाक्षीतिन्या
येनशृंगेशशीयत्वाभावमात्रविषयत्वमितितुल्यं· अतएवपाकरक्तेघटेइदानीमयंनश्यामइति
धीः प्रश्यामविशेषणस्याभावमवगाहतेयद्विगविशृंगासत्वेपिप्रतियोगितावच्छेदकावच्छिन्नस्याभा
वविरोधित्वात्शशीयत्वावच्छिन्नशृंगाभावोनविरुद्धस्तदाघटेघटत्वावच्छिन्नेघटत्वसत्वेपिअधि
करणतावच्छेदकावच्छिन्नप्रतियोगितावच्छेदकावच्छिन्नसत्वस्याभावविरोधित्वात्पटत्वावच्छिन्नघ
टेघटत्वाभावोपिनविरुद्धः। यद्वियातिप्रसंगतयाव्यधिकरणानाधिकरणतावच्छेदकंतदाप्रतियोगि

तावच्छेदकेपितुल्यं·तदिदंवक्ष्यति·नह्यतिप्रसक्तमवच्छेदकं·अन्यथावस्तुत्वादेरपिघटाभावप्रतियोगि
त्वावच्छेदकत्वापत्तेः। नचैवंवायोरूपयावद्विशेषाभावप्रत्यक्षताभ्युपगमोविरुध्येततत्त्वत्प्रतियोगिका
16 ज्ञानादितिवाच्यं·तावताह्यतिप्रसक्तधर्मप्रकारकप्रतियोगिज्ञानस्याप्यभावधीहेतुतास्तु·नत्वतिप्र
सक्तस्यावच्छेदकत्वमिति·पृथिवीरूपत्वाद्यवच्छिन्नयावद्विशेषाभावप्रत्यक्षताभिप्रायकंतदित्यन्ये॥
वस्तुतस्तुशृंगस्यप्रतियोगिनोगविसत्वात्कथंतदभावः प्रतियोगितदभावयोरेकत्रविरोधात्·नचप्र
ता॰४ तियोगित्वावच्छेदकावच्छिन्नस्यतद्विरोधित्वंतादृशश्चतत्रनास्तीतिवाच्यंलाघवेनप्रतियोगित्वेनैव १४
तत्रविरोधित्वात्·ननुतदवच्छेदकावच्छिन्नत्वेनगौरवात्·अतएवघटवतिघटपटौनस्तइतिप्रतीत्या
व्यासज्यवृत्तिप्रतियोगिकोविद्यमानघटप्रतियोगिकोभावोनसिद्ध्यतीतिवक्ष्यते·नन्वेवमपितादृशा
न्योन्याभावोस्तु·प्रतियोगित्वावच्छेदकस्यतद्विरोधित्वात्·तस्यव्याधिकरणस्यतत्रासत्त्वादितिचेत्·

न॰पुतियोगितादात्म्यस्यविरोधित्वात्॰अतएवतादात्म्यावच्छिन्नपुतियोगिकोऽन्योन्याभावइतिसिद्धांतः।
अतएवनसंयोगादवदन्योन्याभावोव्याप्यवृत्तिः॰अन्यथासंयोगस्यतथात्वेनतस्यव्याप्यवृत्तित्वापत्तेरिति
ननुतादृशाभावेकथमेषापुतीतिरित्यतआह॰गवीतिगवाधिकरणत्वेनदृश्यमानेयतयाऽश्वंगपुत्तियोगि
काभावपुमानास्ति॰उक्तन्यायेनपुमाणाभावात्इतिभावः॰नचशुक्तौरजतभूमानंतरमिदंरजतमिदंना
स्तीतिपुतीत्याव्यधिकरणधर्मावच्छिन्नाभावसिद्धिरितिवाच्यंतत्रेदंत्वस्यैवावच्छेदकत्वात्॰नहिभूमेण
तदवच्छेदकत्वंगृह्यतइतिवस्तुत्वपितथा॰भ्रमोच्छेदापत्तेः।अनवच्छेदकस्यापिरजतत्वस्यपुमेयत्वबद्धावा
विरोधादितिदिक्अथेति॰ननुसाध्यासमानाधिकरणत्वंसाध्यानधिकरणाधिकरणत्वं॰साध्याधिक
रणानधिकरणत्वंवा॰नाद्यः॰केवलान्वयित्यपुसिद्धेः॰केवलान्वयिनीत्यग्रिमग्रंथविरोधाच्च॰नांत्यः॰साधि
करणापदवैयर्थ्यापत्तेः।साध्याधिकरणानधिकरणत्वानधिकरणत्वस्यसाध्यसामानाधिकरण्यमात्रप

र्यवसन्नतयाव्यभिचारिण्येति व्याप्तेश्चेति· अत्र वदंति· अत्यपक्षाश्रयणेन पूर्वप्रतीकं साध्यसामानाधि
धरण्यमात्रपर्यवसन्नं· एताव्यभिचारिसाधारणमत एव तस्मिन्सति साधिकरणत्वमित्युक्तं· तथा
15 यसतिसप्तमीमहिम्ना साध्यसामानाधिकरण्यविशिष्टेन साधिकरणावेशिष्ट्यस्य लाभात्· साध्य
सामानाधिकरण्यावच्छिन्नमधिकरणसंबंधलक्षणं साधिकरणत्वं लभ्यते· तदवच्छिन्नत्वं च व्याप
कीभूतनत्कत्वमेव· तस्यैव चाधिकरणसंबंधः साध्यसामानाधिकरण्यावच्छिन्नाभवति यस्याधि
करणतायाः साध्याधिकरणता व्यापिका भवति· व्यभिचारिणस्त्वधिकरणतायाः साध्याधिकर १५
णतानव्यापिका व्यभिचारस्थल एव तस्य साध्यसामानाधिकरण्यं विनाधिकरणसंबंधसत्वादितिभ
वति व्यभिचारिव्यवच्छेद इति· एवं चात्र यद्यपि साध्यानधिकरणत्वं न विवक्षितं· तथाप्यक्षरार्थतासंभ
वमात्रेण तदप्यग्रे दूषणाय विकल्पयिष्यतीति ध्येयं· अन्येतु· सत्यं तस्याधिकरणाधिकरणसाध्यक

नधिकरणा२ स्वा१

कत्वं स्वाधिकरणानधिकरणसाध्यकत्वोभयाभावे सतीति पर्यवसितोर्थो विवक्षितः। व्यासज्यवृत्तिप्रति
योगिकाभावोप्रयणात्। इदं च द्वित्वरूपभिन्नत्वं स्वाधिकरणानधिकरणसाध्यकत्वमात्रवति विरुद्धे पि
गतमतस्तद्वारणाय साधिकरणपदं तदर्थः साध्याधिकरण्याधिकरणत्वं। तेन तद्व्युदासः। न च स्वाधि
करणानधिकरणसाध्यकत्वाभावत्वमेवास्तु। लाघवात्तस्य च विरुद्धेऽसंभवात्तद्वारणार्थं साधिकरण
पदमप्यकिंचित्करमिति वाच्यं। उभयाभावस्यातिरिक्तत्वेन तत्र व्यर्थविशेषणत्वानवकाशात्। एवं च सा
धिकरणपदमपि स्वार्थकमेवेत्याहुः। स्वेति। स्वं साधनत्वेनाभिमतं। नहीति। विरोध्यनंतरं व्याप्यवृत्तिर्वृत्ति
३३ शेषः। अधिकरणेति। एकस्यैव द्रव्यकर्मादिवृत्तित्वाद्यवच्छेदभेदेन। व्याप्यवृत्तित्वव्याप्यवृत्तित्वोपपत्तेर्न
नानात्वकल्पने मानाभावादित्यर्थः। एकदेशिमतेन दूषयति। मूलेति। अत एवापरितोषाद्दोषांतरमा
ह। साधनवन्निष्ठेति। यस्य साधनस्य साध्यवदित्यत्र साध्यसाधननिष्ठव्याप्यव्यापकभावगर्भ एव संबंधः

16 षष्ठ्यर्थइतिभावः।ननुयत्पदार्थेसाध्यवत्तासंबंधाधाराधेयभावएवसंबंधःषष्ठ्यर्थोभविष्यतीत्यनुशयेनाह·
साध्यसाधनयोरिति·व्याप्तियोगित्वंसाध्यत्वं·व्याप्त्याधारत्वंसाधनत्वमित्यात्माश्रयइतिभावः।ननुसा
ध्यसाधनपदस्थानेय = प्रति = त्पदप्रक्षेपान्नात्मदोषइत्यतोदोषांतरमाहवह्निमदिति·ननुसाधन
समानाधिकरणान्योन्याभावप्रतियोगितानवच्छेदकसाध्यसामानाधिकरण्यमर्थः।नचविशेषा
भावप्रतियोगितावच्छेदकःसामान्यधर्मइत्यतआहविशेषेति·तथाचवह्निसामानाधिकरण्यान्योन्या १६
भावप्रतियोगितानवच्छेदकंधूमवत्त्वमपिविशेषान्योन्याभावविशेषस्यैवावच्छेदकत्वात्·सामान्या
न्योन्याभावस्याभावात्तथाचव्यभिचारिसाधारण्यमित्यर्थः।नापीति·साधनसमानाधिकरणाय
वन्तोधर्मास्तावद्भिःप्रत्येकंनिरूपितंयद्वैयधिकरण्यंतदनधिकरणंत्वंयत्साध्यंतत्सामानाधिक
रण्यमित्यर्थः।अत्रव्यभिचारिवारणाययावदिति·अत्रवैयधिकरण्यंतदनधिकरणाधिकरत्वं·त

दधिकरणानधिकरणत्वं वा · आद्यदोषमाह · साधनेति यत्तु वह्नेर्धूमसमानाधिकरणमहानसत्वाद्य
नधिकरणायःपिंडाधिकरणतया धूमे वह्निव्याप्तिविरहप्रसंगात् तदनधिकरणत्वाधिकरणत्वविव
क्षायामप्रयोक्तिसंभवाभाव एवेति · तन्न · अयःपिंडस्य महानसत्वाद्यनधिकरणत्वेपि धूमसमानाधि
करणद्रव्यत्वाद्यधिकरणतया धूमसमानाधिकरणयावद्धर्मानधिकरणत्वाभावात् अंत्यदोषम
रा ५ हमहानसे दाविति · तदधिकरणानधिकरणत्वं यदि तद्वन्निष्ठात्यंताभावप्रतियोगित्वं · यदि वा त
द्वन्निष्ठान्योन्याभावप्रतियोगितावच्छेदकत्वमुभयथापि वह्नेस्तदधिकरणानधिकरणत्वाद्धूम
दावुक्तलक्षणाभाव इत्यर्थः · ननु व्याप्तिविरहोन्नायकत्वमुपाधित्वमित्यात्माश्रय इत्यत आह उपा
धिश्चेति · न च व्यापकत्वमपि व्याप्तिप्रतियोगित्वं येन तद्दोषतादवस्थ्यमित्याह व्यापकत्वं त्विति · ननु
यत्र व्यभिचारिणो नोपाधिस्तत्रातिव्याप्तिरित्यत आह · व्यभिचार इति · अतिव्याप्तिमुक्त्वाव्याप्तिमाह ·

अन्योन्येत्ति॰घटघटान्योन्याभावयोः कपालेसत्वेनवृत्तेरित्यर्थः संयोगाद्यभावप्रतियोगित्वापत्तिश्च
आकाशादेर्घटात्यंताभावप्रतियोगित्वापत्तिरित्यपिदूषणम । तदृष्टव्यंतथेति॰ अनुयोगित्वमपि
त्ति दृष्टांतार्थे प्रतियोगित्वस्यैवप्रकृतत्वात॰ अन्योन्याभावप्रतियोगिसाधारणंलक्षणंकृत्वा
17 प्रकृतेतावतापिसंगतेःसंसर्गाभावप्रतियोगिमात्रलक्षणमाह॰ नन्वभावस्यविरुद्ध इत्यत्रषष्ठ्यर्थः
संबंधत्वमात्रंवाप्रतियोगित्वंवा॰नाद्यःसमानाधिकरणयोर्घटाभावपटाभावयोःपरस्परंप्रतियो १३
गित्वापत्तेः । नांत्यः आत्माश्रयादितिचेत॰न॰ स्वरूपसंबंधविशेषस्यैवषष्ठ्यर्थत्वात॰नचैवंसएव
प्रतियोगित्वमस्तुलाघवादितिवाच्यं॰तावन्मात्रस्यान्योन्याभावप्रतियोगिन्यपिगतत्वात॰संसर्गा
भावप्रतियोगित्वमात्रस्यैवात्रलक्ष्यत्वात॰पूर्वलक्षणविशेषप्रसंगाद्वृत्तिभावः । व्यधिकरणत्वा
दिति॰हेतुवृत्तिव्याप्तित्वेनाभिमतस्यनिरुक्तनिषेधस्यहेतावृत्तेः । पक्षधर्मताव्यधिकरणत्वा

र१

पक्षधर्मतासमानाधिकरणव्याप्तेरेवानुमितिं गत्वादित्यर्थः ॥ यावदव्यभिचारीति । यावतां साध्यमव्य
भिचारीत्यर्थः ॥ साध्येति यद्यप्युक्तलक्षणे साध्याव्यभिचारित्वं न प्रविष्टं तथापि साध्यव्यापकाव्यभिचारि
त्वापक्षया स्येव लघुत्वाद्गमकत्वं एतल्लाघव पुरस्कारा[illegible]वान्यान्याभावगर्भव्याप्तेरेव गमकत्वमिति सि
द्धांते वक्ष्यतीति भावः ॥ इत्यापत्तिमाशंक्याह । तन्नेति । लीलावतीकारमतमाशंकतेनापीति । कृत्स्नेन
साधनेन साध्यस्य संबंधान व्याप्तिरित्यर्थः ॥ एकेति एकव्यक्तिके लिंगेऽशेषानेकरूपस्य कार्त्स्न्यस्याभा
वादित्यर्थः ॥ नन्वशेषत्वमात्रं कृत्स्न पदेन विवक्षितमिति नोक्तदोष इत्यत आह । नानेति । विषमेति । अयो
गोलकीयवह्निना समं धूमस्य संबंधाभावादित्यर्थः ॥ इदं द्रव्यं सत्वादित्यत्रातिव्याप्तिरपि वोद्धव्या । नयेति ।
यावदित्याश्रयविशेषणमशेषमात्रार्थकं तेनायं एतत्संयोगी एतत्वादित्यत्र न यावदर्था भाव इति बो
द्धव्यं । तच्चाप्रसिद्धमिति । यद्यपि धूमादिसाधनसमानाधिकरणयावद्धर्मीणां प्रत्यक निरूपितं सामाना

18 धिकरण्यंवह्न्यादावेवप्रसिद्धंतदाश्रयवोक्तलक्षणमपिसुस्थं॰तथापियावत्वादृशधर्माणांसाकल्य
निरूपितस्यसामानाधिकरण्यस्यविवक्षितत्वेदूषणमिदमितिभावः।वस्तुतस्तु॰यत्किंचित्साधनस
मानाधिकरणयावद्धर्मसमानाधिकरणसाध्यसामानाधिकरण्यंव्यभिचारिसाधारणमितिदूषणमत्र
दृष्टव्यं॰साधनेति॰साधनसमानाधिकरणसकलमहानसत्वादेरेकाधिकरणाप्रतीतेरित्यर्थः।नापि
स्वाभाविकेति॰स्वभावजन्यत्वेघटत्वादौद्रव्यत्वाद्यव्याप्यत्वापत्तिः।स्वभावाश्रितत्वेशब्दादेराकाश १८
व्याप्यत्वापत्तिः।आदिपदग्राह्यंवस्वभावाश्रयत्वंतत्रचाकाशस्यशब्दादिव्याप्यत्वापत्तिरित्यर्थः।अव्या
प्तीति॰अव्याप्तिसहिताऽतिव्याप्तिरितिमध्यमपदलोपिसमासात्समाधेयं केवलेति॰अविनाभावविशि
साध्येनविनानभवतीतिवासाध्येननविनाभावइतिवा॰उभयत्रापिकेवलान्वयिनिसाध्याभावाप्रसि
द्ध्यातदसिद्धेरित्यर्थः।संबंधमात्रमिति॰सामानाधिकरण्यमात्रमित्यर्थः किमिदंसंबंधत्वंव्याप्तिस्व

रूपं·व्याप्तिपदप्रवृत्तिनिमित्तं वा·आद्येआह·लिंगेति·येनरूपेणव्याप्तेर्ज्ञानमनुमानहेतुस्तेनरूपेणत-
न्निरूपणमिहप्रस्तुतं·तच्चनसंबंधत्वमात्रमतस्तदभिधानेऽर्थान्तरमित्यर्थः।अंत्यआह·नपीति·संबंधेति·
म ३ एवं प्रयर्थान्तरंतदवस्थमेवेत्यपिदूषणमत्रबोद्धव्यं·केवलान्वयिसाध्यसंबंधःकेवलान्वयिसाध्यसा
सामानाधिकरण्यमित्यर्थः।तदपिनेत्यापाततः।वस्तुतस्तुयदिकेवलान्वयिसाध्यसामानाधिकर
ण्यमात्रज्ञानंकेवलान्वय्यनुमितिप्रयोजकंतदाव्यभिचारभ्रमेप्यनुमित्यापत्तिः।तादृशज्ञानस्यतदाप्य
क्षतेः।यदिचतत्रसाध्यवदन्यावृत्तित्वमपिप्रयोजकंतदातदेवास्तु·किंकेवलान्वयित्वविशेषसामग्र्यंतरक निश्च
ल्पनयानवच्छापत्तिः।केवलान्वयिनितस्याप्रसिद्धेरितिदूषणमत्रद्रष्टव्यं·तथात्वात्सकलसाध्यवदन्यत्वा
त्वनद्येकंसकलसाध्यवदित्यर्थः।सर्वत्रेति·यद्यपिस्वाभाविकःसंबंधइत्यादौसाध्यादिपदंनास्ति·तथा
पिसाध्येनसाधनस्यतादृशःसंबंधोव्याप्तिरिति·तत्रापितदंतर्भावआवश्यकइतिभावः।सिसाधयिषावि

षयत्ववेत्यत्रघमगर्जितस्थलेऽव्याप्तिर्वोद्धव्या। महानसीयवह्नावितिः वाधावतारङ्दंवोद्धव्यं· एवंसाधन
त्वमपिनसिद्धिकरणत्वंवाच्यं· महानसीयधूमेतदभावादित्यपिद्रष्टव्यं· स्वार्थेति· नह्निकथायांपरकी
19 यव्याप्तिस्वरूपप्रश्नोत्तरदानार्थमेवेहतन्निरूपणं किंतुस्वार्थानुमानार्थमपि· तेनविनापरंप्रतिस्वयम
नुमानोपन्यासासंभवेनस्वस्यैवकथायामप्रवेशादित्यर्थः। प्रतियोगीति· प्रतियोग्यसमानाधिकरण
२५ स्ययदवच्छिन्नसमानाधिकरणत्वंयत्याभावस्यप्रतियोगितावच्छेदकंयन्नभवतितदवच्छिन्नेनयेनकेनापि १८
सहतदवच्छिन्नस्यसामानाधिकरण्यंतदवच्छिन्नेनसहव्याप्तिरित्यर्थः। एवंह्निसर्वस्यधूमस्यसर्वेणवह्निना
सहैकाव्याप्तिरुक्ताभवतीतिनात्रावच्छेदकपदवैयर्थ्यशंकापीतिध्येयं· नवायंधूमवान्वह्नेरित्यत्रातिप्र
संगः प्रमेयत्वेनधूमस्यतथात्वादितिवाच्यं· तेनरूपेणधूमेवह्निव्यापकत्वस्यवृत्वात्तु· धूमत्वेनरूपेण
तस्यतथात्वात्· अवच्छेदकत्वमनतिरिक्तदेशावृत्तित्वं· नत्वयच्छित्तिप्रत्ययजनकत्वमतोजनकत्वस्यव्या

प्तिरूपनियमगर्भत्वान्नात्माश्रयः।एतच्चावच्छेदकत्वंव्याप्तिनिरूपणार्थंप्रकृतेविवक्षितं·नतुसर्वत्र·घट तेन१
जनकतावच्छेदकंदंडत्वंनतुतत्समनियतंरूपवद्दंडत्वादिकमितिसिद्धांतोनव्याहन्यतइतिध्येयं·अत्रप
ववह्निसामानाधिकरण्यात्यंताभावप्रतियोगितावच्छेदकंधूमत्वंलाघवात्·नप्रमेयधूमत्वादिगौरवात्·
एवंवतादृशात्यंताभावप्रतियोगितानवच्छेदकप्रमेयधूमत्वाद्यवच्छिन्नधूमसामानाधिकरण्यंवह्नावपी
त्यतिव्याप्तिरितिपरास्तं·उक्तावच्छेदकत्वस्यप्रमेयधूमत्वादावपिसत्त्वात्·अवच्छेदकत्वंविशेषणता
विशेषायथावनेसिंहनादइत्यत्रवनस्यत्यप्याहुः·प्रतियोगित्वंचाकरएवस्फुटंनचतस्यापिस्वरूपसंबं
धत्वसंबंधत्वस्यविशिष्टबुद्धिनियामकत्वेनात्माश्रयशंकापि·प्रतियोगित्वरूपसंबंधस्यव्याप्तिग्रहविषय
त्वेपिप्रतियोगित्वत्वरूपसंबंधत्वस्याविषयत्वात्·प्रतियोगितानवच्छेदकत्वंद्विलाघवात्पृथमोपस्थिति
कत्वाच्चप्रतियोगितावच्छेदकान्योन्याभावोननुप्रतियोगितावच्छेदकात्यंताभावोगौरवात्·अभाव

20 प्रत्यक्षस्यप्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिज्ञानसाध्यत्वेनतदवच्छेदकत्वत्वावच्छिन्नतदवच्छेदकत्व
ज्ञानेतद्धितरावृत्तित्वस्यापेक्षणात्प्रतियोग्यसमानाधिकरणत्वमत्यंताभावविशेषणांसंयोगादिसाध्य
कद्रव्यत्वादिनिष्ठव्याप्त्यावव्याप्तिनि णाय·नन्वियमव्याप्तिर्न्ननिश्चिता·द्रव्यत्वस्यसंयोगसामान्या
त्यंताभावसामानाधिकरण्यानिश्चयात्·गगनादावपिद्रव्येकिंचिदवच्छेदेनपरमाण्वादिसंयोगोनभू
तोनभावीनवर्त्तमानइत्यस्यप्रमाणाभावेननिश्चेतुमशक्यत्वात्·अत्रसंयोगसामान्यात्यंताभावस्य २०
संदिग्धत्वात्·नचसर्वत्रैवद्रव्येयावत्संयोगविशेषाभावसत्त्वेनतत्सामान्याभावानुमानमितिवाच्यं·ए
कावच्छेदेनयावत्तद्विशेषाभावस्यतथापिनिश्चेतुमशक्यत्वात्·एकावच्छेदकावच्छिन्नस्यैवतस्यसामा
न्याभावव्याप्तत्वात्·अन्यथाघटत्वादौक्वापिप्रदेशेनसंयोगरहितस्तत्रापितत्सामान्यात्यंताभावस्य
सत्त्वेभावाभावयोरेकावच्छेदेऽपिनोवृत्तिःस्यादितिमह म्यंनवसंदिग्धाव्याप्तिवारणायतद्विशेषणा

ट्टेष१

पादानमिति वाच्यं। संदिग्धव्यर्थविशेषणापत्तेरिति चेत्। न। अयमेतत्संयोगी एतत्त्वादित्यादावव्याप्तिनिश्चये
न तद्वारणार्थं तदुपादानात्। न च तत्र व्याप्तिसत्त्वेन संयोगाभावावच्छिन्नप्रदेशेपि तदनुमानापत्तिरिति वाच्यं।
बाधेन तत्रानुमितिप्रतिबंधात्। यथा गंधप्रागभावावच्छिन्नो घटो गंधवानित्यत्रेति वक्ष्यते। ननु सामानाधिक
रण्यं समानेनाधिकरणेन संबंधः। संबंधत्वं च विशिष्टधीनियामकत्वं जनकत्वगर्भं तच्च व्याप्तिगर्भमित्या
त्माश्रयं इति चेत्। न। नियामकस्य संबंधस्य व्याप्तिधीविषयत्वेपि नियामकत्वरूपतत्संबंधत्वाविषयत्वात्।
४४ संसर्गविधयैव तत्र तज्ज्ञानाभ्युपगमात् प्रकारत्वे वा तस्य संयोगादिनैव रूपेणातथात्वात्। ननु संबंधत्वे।
तज्ज्ञानानां तु संबंधज्ञानत्वेन जनकत्वमिति नानुगमः। यद्वा संबंधत्वं न विशिष्टधीजनकत्वं। किंतु विशे
षणविशेष्यान्यविशिष्टधीविषयत्वं। विशिष्टधीश्च विशेषणत्वधीत्वं वा स्वरूपसंबंधविशेषो ऽन्यथा समूहा
लंबनभेदानुपपत्तेः। स्वरूपसंबंधश्च स्वरूपेणैव भासते न तु संबंधत्वेनेति नात्मदोषः। विशेषणता विशे

एवतदित्यप्याहुः अत्यंताभावपदंचविरोधिपरं·नतुसंसर्गाभावविशेषपरं·तेनायंघटोघटात्यंताभा
ववान्प्रमेयत्वादित्यत्रव्यभिचारिण्यभावप्रतियोगिकाभावानभ्युपगमेनप्रमेयत्वसमानाधिकर-
णात्यंताभावाप्रतियोगिघटात्यंताभावसमानाधिकरणत्वेनातिव्याप्तिरितिदूषणमलग्नकंवेदि
तव्यं·विरोधित्वंच ननियमघटितं·किंत्वेकावच्छेदेन सद्भानवस्थितत्वं·एतेनसंसर्गाभावघटितम
त्यंताभावत्वंसंसर्गाभावत्वंचप्रतियोग्यारोपजन्यज्ञानविषयाभावत्वंचनियमघटितमित्यात्माश्रय २१
इतिनिरस्तं·अतएवजातौव्यक्तेः कालिकीव्याप्तिःस्यात्·प्रलयेतद्ध्वंससत्वेनतदत्यंताभावाभावा
त्·नित्यत्वेनतत्रापितदभ्युपगमेनित्ययोरपिकालिकीव्याप्तिर्नस्यात्प्रलयेतदत्यंताभावस्यापि
सत्वेनपरस्परसमानाधिकरणात्यंताभावप्रतियोगित्वादित्यपिदूषणंपरास्तंवेदितव्यं·कालिक
व्याप्तौध्वंसस्यविरोधित्वेनातिप्रसंगाभावेनतदत्यंताभावयोःसत्वासत्वयोस्तदानीमविचारणीय

त्वात्‌· वस्तुतस्तु प्रतियोगिसमवायिदेशएवतयोर्विरोधात्प्रलयकालेव्यक्तिध्वंससत्वेपितदत्यंता
भावसत्वमप्युपयुक्तं· अन्यथानित्यत्वभंगापत्तिः।नचैवंनित्ययोरपिनकालिकव्याप्तिःस्यादित्युक्तमि
तिवाच्यं·तदात्यंताभावसत्वेपितस्यप्रतियोगिसमानाधिकरणत्वात्‌·कालिकव्याप्तौतस्यविरो
धित्वाभावाच्च·अत्यंताभावपदेनविरोधित्वस्योक्तत्वात्तेनचव्यक्तिध्वंसस्यापिप्रतियोगिसमवायिदे
शवृत्तित्वेनप्रतियोगिसमानाधिकरणत्वादुक्तातिप्रसंगस्तदवस्थएवेतिवाच्यं·ग्राह्यसंबंधेना
सामानाधिकरण्यस्योक्तत्वात्‌।अस्तिवतद्ध्वंसेतथा·प्रतियोग्यसमानकालत्वात्समानकालत्वस्य
ग्राह्यत्वात्‌·तस्माद्दैशिकव्याप्तौप्रतियोग्यसमानदेशत्वंकालिकव्याप्तौप्रतियोग्यसमानकाल
त्वंप्रतियोग्यसामानाधिकरण्यत्वंपर्यवस्यतीतिनोक्तदोषः।ननुधूमवतिमहानस्तादौसमवायसंबं

22

धावच्छिन्नवह्न्यभावमादायाव्याप्तिरितिचेत्‌ · न · ग्राह्यसामानाधिकरण्यप्रविष्टसाध्यसंबंधावच्छि
न्नाभावस्य विवक्षितत्वात्‌ भवति च धूमवह्न्योरेकाधिकरणकसंयोगस्य ग्राह्यतायां संयोगावच्छि
न्नाभावस्तथा · ननु समवायावच्छिन्नाभावोपि · तदभावस्य वह्निसमानाधिकरणत्वेन प्रतियोगीत्या
दिपदेन तन्निवारणासंभवाच्च · न च ग्राह्यसामानाधिकरण्यप्रविष्टसंबंधेन तदसामानाधिकरण्य
मवश्यं वाच्यं · अन्यथा प्रतियोगितदभावयोः कालेसामानाधिकरण्यमादायासंभवः स्यादिति २२
वाच्यं · धूमवह्निव्याप्तौ संयोगस्यैव तत्प्रविष्टतया तेनैव संबंधेन तदभावस्य वह्निसमानाधिकरण
त्वात्‌ · नहि वह्निर्ह्रदादौ संयोगेन नास्तीति · नन्वयं घट धूमरूपद्वयवान्‌ · माक्तिमत्वादित्यत्रातिव्या
प्तिः । द्वित्वस्य व्यासज्यवृत्तित्वेन वह्निसमानाधिकरणाभावप्रतियोगितानवच्छेदकत्वादितिचेत्‌ ·
न · घटाभावधूमाभावयोर्वह्निसमानाधिकरणतया तादृशाभावप्रतियोगितात्वेनानुगतप्र

तियोगितयासहद्वित्वस्यानतिरिक्तवृत्तित्वात्· अवच्छेदकपदस्य प्रकृतेऽनतिरिक्तवृत्तित्वार्थक
त्वात्। एकसत्त्वे द्वित्वावच्छिन्नप्रतियोगिकाभावानभ्युपगमे विघटधूमोभयाभाववति द्वित्वावच्छि
न्नतदुभयाभावाभ्युपगमाच्चातस्य सामान्याभावतुल्ययोगक्षेमत्वात्। ननु वह्निमानं वह्न्याकाशरू यं३
पद्वित्वाश्रयवान् एतत्त्वादित्यत्र तथाप्यतिव्याप्तिः। वह्नेर्हेतुसमानाधिकरणात्यंताभावाप्रतियो
गित्वेन तद्द्वित्वस्य हेतुसमानाधिकरणाभावप्रतियोगित्वातिरिक्तवृत्तितया तदनवच्छेदकत्वात्·
वह्निसत्त्वे तद्द्वित्वावच्छिन्नाभावासंभवाच्चेति चेत्· न· द्वित्वस्य तथात्वेपि हेतौ तदवच्छिन्नसामानाधिक
रण्याभावादेवातिव्याप्त्यसंभवात्· नहि तद्द्वित्वावच्छिन्नं वह्निमात्रं किं त्वाकाशमपि· द्वित्वस्योभय
त्रपर्याप्तेः। ननु तथापि यत्र निर्घटं वह्निमंतं पर्वतं पक्षीकृत्यायं वह्निघटरूपद्वयवान्· एतद्धूमवत्त्वा
दिति साधयति तत्रातिव्याप्तिरिति चेत्· न· तत्रापि तद्द्वित्वावच्छिन्नघटसामानाधिकरण्याभावादेवाति

व्याप्त्यसंभवात्· अन्यथा तस्य सद्धेतुत्वादेव· नन्वेवमपि यत्र सैव धूमवह्निव्यक्तिस्तद्घटाधिकरणं नीयते
तदा तद्व्यक्तित्वावच्छिन्नसामानाधिकरण्यस्यापि सत्त्वादुक्तदोषस्तदवस्थ एवेति चेत्· न· स्वाधिकरणत्वाव
२३ च्छेदेन तदवच्छिन्नसामानाधिकरण्यस्य विवक्षितत्वात्· प्रकृते च निर्घटेपि वर्तते तद्धूमसत्त्वेनातथात्वात्
न चैतावतैव व्यभिचारिव्यवच्छेदे किं पूर्वप्रतीकेनेति वाच्यं· यत्किंचिद्वह्न्यधिकरणत्वावच्छेदेन धूमसामा
नाधिकरण्यसत्त्वेन व्यभिचारिसाधारण्यात्· यदि चैकसत्त्वेपि द्वयमिह नास्तीति प्रतीत्या द्वित्वावच्छिन्ना २३
भावः स्वीक्रियते एव प्रतियोगितावच्छेदकावच्छिन्नस्यैवाभावविरोधित्वादिति मतं तदा सर्वं समंजसमे
वेति संक्षेपः। ननु व्याप्तेर्यत्र ज्ञानमननुगतत्वेन तद्विषयकपरामर्शस्यापि तथात्वादननुगतानुमितिं प्रति क
हेतुता० तथावक थं नानुमितित्वमाकस्मिकं पक्षतादेरपि यत्त्वादिघटितत्वेनाननुगतत्वादिति चेत्· अत्र केचित् व्याप्तेरन
पं॥२ नुगतत्वेपि तज्ज्ञानानां व्याप्तिपदवाच्यतावच्छेदकावगाहित्वेन हेतुत्वमिति नोक्तदोष इत्याहुः· अन्ये तु

संवंधज्ञानत्वेनतज्ज्ञानानांहेतुत्वंनचैवमतिप्रसंगः।परामर्शरूपविशेषसामग्रीविलंबेनानुमित्यनु
त्पत्तेरित्याहुः।वस्तुतस्तुतत्तद्व्याप्तिज्ञानानांतत्तदनुमितिविशेषप्रतिजनकत्वं·नचैवमनुमितित्वमाकस्मि
कं·तद्धिकारणप्रयोज्यत्वमप्रामाणिकत्वंवा·आद्ये·इष्टापत्तेः नित्यवृत्तिमनस्त्वादीनामिवतथा
त्वाविरोधात्·नचकार्यमात्रवृत्तिजातेःकारणप्रयोज्यत्वनियमः।अप्रयोजकत्वात्द्वितीयत्व
सिद्धेः।अनुगतमतेरेवप्रमाणत्वसंभवात्·तस्माद्यथाप्रत्यक्षत्वस्यनित्यवृत्तितयाकार्यत्वानव
च्छेदकत्वेऽनुगतमतेःप्रत्यक्षत्वंजातिरेवमत्रापीतिनन्वेवंसामान्यंयदिनविशेषाभावप्रतियोगिता
वच्छेदकंतदातदभावप्रतियोगितावच्छेदकंनेत्या[illegible]गतंविशेषाभावकूटातिरिक्तस्यसामान्याभाव
स्याभावात्·एवंचवह्निसमानाधिकरणात्यंताभावप्रतियोगितावच्छेदकधूमत्वावच्छिन्नसमानाधिक
रणत्वाद्वह्नेर्धूमव्याप्यतापत्तिरित्यतआह·सामान्येति·तथाचवह्निसमानाधिकरणयोगोलकीयसा

मान्याभावप्रतियोगितावच्छेदकत्वाद्रूपत्वस्य नोक्तदोष इत्यर्थः। अन्यथेति· विशेषाभावकूटस्यैव सा
मान्याभावरूपत्वे विशेषाभावकूटस्य वायौ निश्चितत्वेन संशयविषयत्वायोगाद्वायौ रूपं न वेति संशयो न
स्यादित्यर्थः। किंत्वित्तु वायौ रूपं न वेति संशयो रूपत्वावच्छिन्नप्रतियोगिकत्वेनाभावमवगाहते· रूपविशे
षाभावसमूहस्य न त इति तादृशसंशयानुपपत्त्याऽतिरिक्तरूपसामान्याभावस्तद्विषयोऽभ्युपेय इत्यर्थ
इत्याहुः। तन्न: विशेषाभावकूटस्य निश्चितत्वादित्यग्रेतनग्रंथस्य प्रकृतासंगतत्वापत्तेः। तत्र तदनिश्च २४
येपि तस्य रूपत्वावच्छिन्नप्रति

योगिकत्वविरहादेवतादृशसंशयविषयत्वशंकानवकाशात्· तादृशसंशयस्यरूपत्वावच्छिन्नप्रति
योगिकत्वेनाभावानवगाहनात्· अन्यथावायौनरूपमितिनिश्चयस्यैवरूपत्वावच्छिन्नप्रतियोगिका
भावप्रमाणत्वसंभवेसंशयोपदर्शनानर्हत्वात्· नन्वेतावंत्येवरूपाणीतिबुद्धौसत्यामसत्यांवासंश
याभावआपाद्यते· आद्येइष्टापत्तिः। द्वितीयेत्वतिरिक्तसंभावनयातदादायसंशयोपपत्तिरितिचे
त्· न· अतिरिक्तसंभावनाविरहदशायामपिरूपविशेषाभावकूटेवायौनिश्चितेतत्ररूपंनवेतिसंश
यस्यानुभवसिद्धत्वात्· अथनिश्चितोपिविशेषाभावकूटोरूपाभावत्वेनरूपेणानिश्चितः संशयवि
षयोस्त्वितिचेत्· न· रूपाभावत्वंहिरूपत्वोपलक्षितप्रतियोगिकाभावत्वं· रूपत्वावच्छिन्नप्रतियोगि
काभावत्वंवा· आद्यंतुनिश्चितमेवविशेषाभावप्रतियोगिसमूहेरूपत्वस्यनिश्चयात् द्वितीयंतुस्या
दा[illegible]यदिरूपत्वमभावप्रतियोगितावच्छेदकंभवेत्· तद्भिन्नविशेषाभावप्रतियोगितावच्छेदकमतिप्र

पि १

४ स्यस्यानधिकरणघटत्वं (स्यपा) यवच्छेदेनाभावस्यसत्त्वादितिमतं। तत्रायत्राधिकरणेयद्धर्मावच्छेदेनविशेषाभावकूटोवर्त्तते तत्रतदवच्छेदेनसामान्याभावप्रतीतिर्भ्रमइति॥ नलनमत्रापि। घटद्वये ८

नः१

सत्त्वात्॰ तत्तद्रूपत्वस्यैवतथात्वात्नापिसामान्याभावप्रतियोगितावच्छेदकं॰ तस्यात्वयाऽभ्युपगमा
त्॰ अभ्युपगमेवापर्यवसितंविवादेन॰ यत्तु यदि यावद्विशेषाभावा एवसामान्याभावव्यवहारप्रतीति
विषयास्तदासमुदितेघटद्वयेरूपमिहनास्तीतिप्रतीत्यापत्तिः। यावद्रूपविशेषाभावस्यतत्रापिसत्त्वा
25 त्॰ तद्घटद्वयवृत्तिरूपविशेषयोरपितत्रैवघटद्वयेप्रत्येकं यावद्विशेषाभावाभावेसमुदितेपितथात्व
मेव॰ प्रत्येकोभयातिरिक्तस्यसमुदायस्यानभ्युपगमात्॰ अभ्युपगमेवातत्ररूपसामान्याभावप्रती २५
तेरिष्टत्वात्॰ नचयथाद्वित्वसमानाधिकरणायावद्विशेषाभावादृतिप्रतीतिस्तथाद्वित्वसमा
नाधिकरणंरूपंनास्तीत्यपिप्रतीतिःस्यादितिवाच्यंअत्रकिंद्वित्वेरूपसामान्याभावसामानाधिकर
ण्यधीविषयत्वमापाद्यते॰ रूपेद्वित्वसामानाधिकरण्याभावधीविषयत्वंवा॰ नाद्यः। इष्टापत्तेः। विशे
षाभावकूटस्यैवसामान्याभावरूपत्वात्॰ नान्त्योबाधात्॰ अन्यथाऽतिरिक्तसामान्याभावपक्षेपिवायुघ

टवृत्तिद्वित्वसमानाधिकरणोरूपसामान्याभावइतिप्रतीतिवत्तद्वित्वसमानाधिकरणंरूपंनास्ती
त्यपिप्रतीतिःस्यात्·यत्तु·प्रत्येतव्यशरीरस्ययावद्विशेषाभावस्यनानाधिकरणेपिसत्वेनतत्प्रतीती
तिवारणमशक्यमिति·तन्न·प्रत्येतव्यस्ययावद्रूपविशेषाभावस्यप्रत्येकघटादिवृत्तित्वेननानाधि
करणावृत्तित्वाभावात्·प्रत्येतव्यैकदेशोद्विनानाधिकरणावृत्तिर्नतुप्रत्येतव्योपि·यत्तुसमूहस्य
सामान्याभावप्रतीतिविषयत्वेनरूपाभाववृत्त्येकत्वोल्लेखिनीतत्प्रतीतिनस्यादिति·तदपिन।
एवंह्याद्यक्षणेघटेरूपाभावइतिप्रतीतिर्नस्यात्·नहितत्रसामान्याभावस्तद्विषयः·कस्यचित्प्राग
भावेनकस्यचिदत्यंताभावेनतावत्प्रतियोगिकैक्याभावासंभवात्·अन्यथातस्याभ्रांतत्वप्रसंगः·नचैवं
तत्रापिआद्यक्षणेघटेरूपाभावप्रतीत्यनंतरंरूपसामान्याभावसत्त्वापत्तिरितिवाच्यं·प्रतियोगिवत्प्रा
गभावस्यापिसामान्यात्यंताभावविरोधित्वेनतत्रतन्निश्चयस्यैवतत्प्रतिबंधकत्वात्·तस्माद्यथाकरमेवग्रा

ह्यं॰ तच्च तत्रापि रूपत्वोपलक्षितयावदभावत्वेनानिश्चितेन विशेषाभावानामेव संशयविषयत्वमस्त्विति
वाच्यं॰ वायौ रूपं न वेति संशयेन यावत्तत्तस्य कोटित्वेनानुल्लेखात् रूपप्रतियोगिकाभावरूपत्वेनैव
तस्य तत्कोटित्वानुभवाच्च तस्माद्रूपप्रतियोगिकाभाव एव संशयकोटिः विशेषाभावाश्च निश्चिता
एवेति॰ संशयस्य सामान्याभावमवलंबते॰ यत्तु प्रतीतिभेद एव सामान्याभावे मानं इह रूपं नास्तीति
रूपत्वावच्छिन्नाभावोऽवगम्यते॰ नीलरूपं नास्तीत्यादिना विशेषाभाव इति॰ तत्तुच्छं॰ यावद्विशेषाभा
वानामेव तद्विषयत्वात् यथा घटो नास्तीति सामान्यतः प्रतीतेर्घटविशेषा एव विषया इति॰ यद २६
प्युक्तं॰ रूपाभावप्रतीतौ बहूनां विषयत्वे कारणात्वे वा गौरवमित्येकस्यैव सामान्याभावस्य विष
यत्वं कारणात्वं च लाघवात्॰ यथा क्षितिसकर्तृकानुमानमेकमेवेश्वरं॰ यथा वा संबंधानुमानमेक
मेव समवायं विषयीकरोतीति॰ तदपि न॰ दृष्टांते हि सर्वस्यैव कल्प्यत्वेन लाघवादेकस्यैव कल्प्यत
इत्युचितं॰ अत्र तु यावद्विशेषाभावानां क्लृप्तत्वात्॰ प्रतीतेस्तद्विषयत्वेनैवोपपत्ते

वह्न्युक्तसामान्याभावकल्पने गौरवं· अन्यथोक्तयुक्त्याघटोस्तीतिप्रतीत्यावच्छेदकघटवत्यपिगेहे एक एव
घटो विषयीक्रियेत· न चेष्टापत्तिः। विनिगमकाभावात्· किंचैवं यावद्विशेषाभावः प्रतीतिपथं नावतरे
देव· सर्वत्र तत्सहवर्तितसामान्याभावस्यैव विषयत्वसंभवादितिदिक्· अन्ये तु· प्रतियोगिभेदेनाभावभे
दाभ्युपगमे घटप्रतियोगिकानां चतुर्णामप्यभेदः स्यादिति तत्कालतत्संसर्गतादा[illegible]वच्छेदकभे
देन भेदः सर्वसंमत इति सामान्यस्यावच्छेदकस्य सत्वे तदवच्छिन्नाभावस्यावश्यकः। बाधकाभावे संबंधि
कपदार्थमात्रस्यैव संबंधितावच्छेदकभेदेन भेदकल्पनादित्याहुः। सामान्यव्याप्तिमुक्त्वा विशेषव्याप्ति
माह· यद्वेति· एवं लाघवमिति हृदयं· ननु पृथिवीत्वादौ गंधादिव्यक्तिव्याप्यत्वमेवं न स्यात् सर्वस्यैव गंधा
देः पृथिवीत्वादिसमानाधिकरणात्यंताभावप्रतियोगित्वात्· न च गंधवत्त्वाद्युपाधेरेव तत्र साध्यत्वं न तु
गंधादिव्यक्तेरिति वाच्यं· गंधाननुमानापत्त्यानुभवविरोधात्· व्यक्तिसाध्यकानुमानोच्छेदप्रसंगाच्चेति·

न्या.७
२५

अत्र ब्रूमः। तादृशात्यंताभावप्रतियोगितावच्छेदकं यन्न भवति तदवच्छिन्नेन सामानाधिकरण्यमित्यर्थः
नचैवं पूर्वलक्षणाभेदः। तत्र क्वचित्तदवच्छिन्नेन केनापि सामानाधिकरण्यं हेतुतावच्छेदकावच्छिन्नस्य सर्व
स्यैव व्याप्तिरित्यर्थः। अत्र तु समानाधिकरणयोरेव व्याप्तिरित्यर्थ इति महान्भेदः। तथा चायोगोलकी
२७ यवह्निरत्र मतेन व्यापक इत्यपि ध्येयं। अन्यथा धूमत्ववह्नित्वपुरस्कारेणोतद्व्याप्त्यनभिधानेऽनुमित्यनु २७
त५ पयोगापत्तेः। तदिदं वक्ष्यति एवं तत्तद्वह्निधूमयोरेव व्याप्तिः स्यान्न तद्धूमत्ववह्नित्वावच्छेदेन न च तदनु
मानोपयोगीति। व्यभिचारज्ञानप्रतिबंधकत्वानापत्तेश्च। अत्यंताभावगर्भलक्षणप्रतियोगिवैयधिक
रण्यप्रवेशाद्गौरवमित्यत आह। यदिति। यत्समानाधिकरणान्योन्याभावप्रतियोगितावच्छेदकं यत
दवच्छिन्नं[illegible]न भति। तदवच्छिन्नेन येन यस्य सामानाधिकरण्यं तयोर्व्याप्तिरित्यर्थः। नचैवं साध्यसामाना
धिकरण्यमित्येवास्तु किं पूर्वप्रतीकेनेति वाच्यं। गंधादिव्यभिचारिणि द्रव्यत्वेऽतिव्याप्तिवारकत्वात्। स्वेति।

स्वसमानाधिकरणान्योन्याभावप्रतियोगितानवच्छेदकयद्धर्मावच्छिन्नवत्त्वं स्वस्य तद्धर्मावच्छिन्नव्या
प्यत्वमित्यर्थः। नन्वेवं पर्वतीयवह्निग्रहं विना पर्वतीयधूमव्याप्यग्रहे कथं तस्यादनुमितिरिति चेत्र न सामा
न्यलक्षणया वह्निनिरूपितधूमनि[ष्ठ]व्याप्तित्वेन तद्व्याप्तेरेव ग्रहात्तत्संबंधिद्वयस्य प्रत्यक्षत्वे संबंधस्या
पि प्रत्यक्षत्वात्। वह्नित्वधूमत्वादिना सकलवह्न्याद्युपस्थितौ सर्वासां व्याप्तीनां ग्रहः इत्यप्याहुः। धूममात्र
स्येति। अत एव वह्निनिरूपितधूमव्याप्तित्वेनानुगतव्याप्यन्यूनानतिरिक्तवृत्तितया धूमत्वस्य व्याप्यता
वच्छेदकत्वमिति भावः। नन्वत्यंताभावगर्भलक्षणे इदं संयोगिसत्त्वादित्यत्रातिव्याप्तिरित्यत आह। क
र्मणीति। नन्वेवमधिकरणभेदेनाभावभेदाभावाद्ग[ुण]वसंयोगाभावः कर्मणि प्रतियोग्यसमाना
धिकरणः स एव द्रव्यत्वसमानाधिकरण इति। द्रव्यत्वेपि संयोगव्याप्तिर्नस्यादिति चेत्र। न। प्रतियोग्य
सामानाधिकरण्यस्वरूपविशेषवैशिष्ट्यावच्छेदेन यत्समानाधिकरणत्वस्वरूपविशेषवैशिष्ट्यस्यात्यंताभाव

विवक्षितत्वात्·नन्वेकस्यैवप्रतियोगिसामानाधिकरण्यं·तद्वैयधिकरण्यंचविरुद्धमित्यवच्छेदभेदेनत
द्रष्टव्यं·तथाचावश्यकत्वात्त र्भमेवलक्षणमस्तुकिंतज्ज्ञानधीनज्ञानेनप्रतियोग्यसमानाधिकरणत्व
रूपविशेषणेनत्याशयवानाह·यद्वेति·साधनसामानाधिकरण्यावच्छेदनप्रतियोगिवैयधिकरण्याव
वच्छेदकावच्छिन्नत्वविवक्षणीयंतेननोक्तव्याप्तिस्तदवस्थेतिध्येयं·अन्योन्याभावोप्यव्याप्यवृत्तिरित्यभि
मानेनप्रसंजितामव्याप्तिमुद्धरति·नवेति·अभेदस्येति·ननुप्रत्यभिज्ञानवलेनवृक्षत्वेनाभेदेपिसंयोग २८
वत्त्वेनवृक्षेतद्भेदोस्तु·मूलेवृक्षःकपिसंयोगवान्नाग्रेइत्यवाधितप्रतीतेःसंयोगतदभावयोरिवाव
वच्छेद भेदेनाविरोधात्किंचसंयोगाभावेनसंयोगवदन्योन्याभावान्यथासिद्धौघटान्यो न्याभा
वोपिनसिद्ध्येत्·घटत्वात्यंताभावेनैवतत्प्रतीत्यन्यथासिद्धेरितिचेत्·अत्राहुःघटत्वत्वज्ञानंविनाघट
त्वात्यंताभावज्ञानंनसंभवति·तच्चघटान्यावृत्तित्वगर्भं·घटान्यत्वंचघटत्वात्यंताभावत्वमेवेत्याशङ्क

यादस्त्ववतित्वित्क्रोघटान्योन्याभावद्कृतुघटादिसंयोगस्यावच्छेदकस्यभा नध्रौत्येएतत्तएवावश्यकत्वा
त्तद्बुद्ध्यन्यथासिद्धोनतद्धतितदन्योन्याभावः स्वीकरणीयइति·वस्तुतोमूलेसंयोगवच्छिन्नाद्धत्ताद्यारवा
हो२ यांसंयोगाभावावच्छिन्नोरे· ऽभिन्नइत्यभेदप्रतीतिसत्वेभेदप्रतीतिर्विरोधान्नभवितुमर्हतीत्यनन्यगत्या
तस्याभिन्नविषयत्वंकल्प्यते·तदिदमुक्तं·अभेदस्यावाधितप्रत्यभिज्ञानादिति·संबंधत्वेनेतिसंयोगत्वादि
नेत्यर्थः।एवंचयथानानानुगमस्तथोक्तप्राक्यद्वा·संबंधत्वंनव्याप्तिघटितमितिमतेनेदंबोद्धव्यं·अथेति·
नवात्यंताभावगर्भलक्षणप्रतियोग्यस मानाधिकरणपदेनेवाभिमतसिद्धिरितिवाच्यं·तस्यप्रतियोगि
तावच्छेदकावच्छिन्नासामानाधिकरण्यपरत्वात्तस्यवतत्रापिसत्वादितिभावः।तादृशेति·प्रतियोगिनि
वक्लोसतितदभावासंभवादितिभावः।नचप्रतियोगितावच्छेदकभेदेनाभावभेदव्यवस्थापनाद्वित्वाव
च्छिन्नप्रतियोगिकाभावआवश्यकइतिवाच्यं·तावताहितदुभयाभाववतिद्वित्वावच्छिन्नाभावःसिध्यतु·

२

नत्वेकसत्वेनवप्रतियोगितावच्छेदकावच्छिन्नस्याभावविरोधित्वादेकसत्त्वेपिद्वयाभावेनविरुद्ध इति
वाच्यं·लाघवात्प्रतियोगित्वेनैवविरोधात्प्रतीतेरपराभावविषयत्वेनैवोपपत्तेः।सविशेषणेहीति
५३ न्यायात्·स्वगीस्त [illegible] इतिवदंत·केचित्तुव्यासज्यवृत्तेरपिप्रतियोगितावच्छेदकत्वंस्वीक्रियतएव·
29 प्रतियोगितापरंनव्यासज्यवृत्तीत्याहुः।तादृशाभावप्रतियोगितावच्छेदकंयन्नभवतितदवच्छिन्नसा
मानाधिकरण्यमित्यर्थः॥व्याप्तिसंक्रान्ता तादृशाभावाभ्युपगमेपिनेतिप्रौढिवादेनाह·अभ्युपगमेवेति २९
यावत्साधनाव्यापकाव्याप्यसाध्यसामानाधिकरण्यपर्यवसितमनौपाधिकत्वमाह·तन्नेति·स्वंसा
धनंव्यभिचारिएयति व्याप्तिवारणायां [illegible] पावदिति·अवच्छेदकावच्छिन्नेतिसंपातयातं·एतदेवेति·स्वं
साधनंव्यभिचारियभ्यस्तेस्वव्यभिचारिणः स्वाव्यापकाइतियावत्तद्व्यभिचारितदव्याप्यंयत्साध्यंत
त्सामानाधिकरण्यमितिभावः।ध्वंसोविनाशीजन्यत्वादित्यत्रविनाशसामग्र्यादिकंविनाशित्व

प्रकारकप्रमाविशेष्यत्वादिकं च साध्यव्यापकं साधनाव्यापकमस्तीति न तत्रातिप्रसंगः। यावत्साध्य
व्यापकव्याप्यत्वपर्यवसितमनौपाधिकत्वमाह॰ यावदिति॰ अत्र यत्पदं साध्यपरं॰ सोपाधावतिव्याप्तिवा
रणाय यावदित्यत्यंताभावप्रतियोगिविशेषणं॰ तदपि व्यतिरेकि धर्मपरं॰ तेन तादृशप्रमेयत्वाद्यभा
वाप्रसिद्ध्यानकोपि दोषः। न चैवं केवलान्वयिसाध्यके हेतौ साध्यव्यापकस्य व्यतिरेकिणो धर्मस्याप्र
सिद्धिरिति वाच्यं॰ आकाशाद्यत्यंताभावस्य तत्रापि सत्त्वात्॰ नन्वेवं तत्प्रतियोगिकात्यंताभावस्तत्रा
काशादिरेव स्यात्तदसामानाधिकरण्यं च तदधिकरणानधिकरणत्वमेव वाच्यं॰ तथा च पुनरप्यप्रसिद्धिः।
आकाशाद्यधिकरणाप्रतीतेः। न च तदनधिकरणाधिकरणत्वमेव तदर्थः। वह्नेरपि धूमव्यापकाद्रे
धनाद्यत्यंताभावानधिकरणमहानसाद्यधिकरणत्वेन सोपाधिसाधारण्यापत्तेरिति चेत्॰ न॰ तादृ
शात्यंताभावे। सामानाधिकरण्यं सामानाधिकरण्याभावो पस्येत्यर्थात्। तदेव त्यस्य तादृशात्यंताभा

त्पं ता १ यावत्साध्यव्यापकप्रतियोगिकयावदत्यंताभावसामानाधिकरण्यम्। नापि व्यतिरेकधर्मे सविषये गोपाद्याप्ति। अन्ये तु यावदित्रिवरमात्यंताभाव विशेषणं। तथा च साध्यव्यापकप्रतियोगि

वनिष्ठसामानाधिकरण्याभावकत्वमेवानोपाधिकत्वमित्यर्थो बोद्धव्यः। तेनात्यंताभावनिष्ठसामाना
धिकरण्याभावस्य हेतुनिष्ठानोपाधिकरूपत्वं विरुद्धमिति दूषणमलग्नकं बोद्धव्यं· यत्तु तदधिकरणा न र
३० नधिकरणत्वमेव विवक्षितं· तदर्थश्च तदनधिकरणता व्यापिकाया रधिकरणतायास्तत्वं· वृत्त्यधिक
रणतायाश्चाद्धेधनात्यंताभावाऽऽगर्भत्वेन गौरवात्· अपदार्थव्याख्यानस्योभयत्रापि तुल्यत्वात्तव
स्कृतस्तु तत्प्रतियोगिकात्यंताभावासामानाधिकरण्यमित्यत्र सामानाधिकरण्यमित्यनेन अ-प्र ३०
तियोगिनि देना ना नन्व्यत्यासनस्व समानाधिकरणात्यंताभावाप्रतियोगिकायावन्तोऽत्यंताभावा
स्तदसामानाधिकरण्यमित्यर्थः। नन्वेवं साध्यव्यापकोपस्थापकपदस्यासर्वपरतायां किंचित्परत्वेना
नाविशेषणावच्छिन्नेकप्रतियोगिकयावदत्यंताभावासामानाधिकरण्यवतः सोपाधेरपि संग्रहप्र
संगः। यथा यावन्ति पाकसंपादकानि तावन्ति ते जातानीत्यत्र पाकपदस्य यत्र किंचित्पाकपरत्वं प्र

नधिकरणतानवच्छेदिका। अयोगोलके व्यभिचारादिति। तत्रा अपदार्थतासाविषयी यो तु यावत्साध्यव्यापिका धिकरणतानवच्छेदिका यदधीकरणताया इतोगविषयेऽतो
त्यघ्नात। छिदेतेसित्सालीयो त्यंताभावादि६

न्यथाऽसंभवात्· यथानायावद्वह्न्योपलंभकसत्वेघटाभावोपलब्धिरित्यत्रघटपदस्ययत्किंचिद्घटपर
त्वं· तथैवव्युत्पत्तेरन्यथासंभवादेवेतिचेत्तन्न· तत्रतथैवतात्पर्यग्राहकमात्रपाकाद्युपस्थितेः। अत्रतु
साध्यव्यापकत्वाश्रयप्रतियोगित्वंयावतितावदत्यंताभावेतात्पर्यमितितावदुपस्थितिः। अन्यथाप्र
तिबंधकाभावकूटस्यकारणत्वमित्यादौकागतिः। तत्रापियावत्त्वस्यैवकूटपदार्थत्वेनवदुक्तरित्यैकप्र
तिबंधप्रतियोगिकयावदभावस्यहेतुत्वेऽन्यतमप्रतिबंधकसत्वेपिकार्यापत्तेः दुत्तरग्रंथस्तुसाध्यव्या
पकत्वगर्भलक्षणोद्भूत्यैवंपरतयानेयः। अतएवसाध्यव्यापकत्वेइतिवकुत्रचुग्रंथेषुपाठः संगच्छतइ
त्याहुः· यत्संबंधितेतियत्साध्यसंबंधितावच्छेदकरूपवत्त्वंयस्यसाधनस्यतस्यतत्संबंधितातत् साधनस्यउ
साध्यव्याप्तिरित्यर्थः। धूमसंबंधितावह्नेरपीत्यत उक्तंअवच्छेदकरूपवत्त्वमिति· संबंधितावसामा
नाधिकरण्यं· तेनघटकारणतालक्षणातत्संबंधितावच्छेदकदंडत्वावच्छिन्नेदंडेघटव्याप्यत्वंनापद्य

साध्य३

तद्वतिध्येयं·नन्ववच्छेदकत्वंनावच्छिन्नप्रत्ययजनकत्वंजनकत्वस्यनियमगर्भतयाऽन्योन्याश्रयात्·ना
प्यन्यूनानतिरिक्तदेशावृत्तित्वंधूमत्वस्यापिवह्निसामानाधिकरण्यन्यूनदेशावृत्तित्वात्·आलोकादौ
वह्निसमानाधिकरणेऽवृत्तेः।नापितदनतिरिक्तदेशावृत्तित्वंइदंसुखिआत्मत्वादित्यादौव्यभिचारिंग नि३
31 तत्वात्·आत्मत्वस्यसुखसमानाधिकरत्वेनात्मत्वत्वस्यसुखसामानाधिकरण्यातिरिक्तवृत्तित्वात्·न
वसाध्याभावसामानाधिकरण्यावृत्तित्वंतत्र·आत्मत्वंत्वीश्वरात्मनिसुखाभावसमानाधिकरणमेवे ३१
तिवाच्यं·केवलान्वयिन्यभावात्·नापिसाध्यसामानाधिकरण्याभावाधिकरणावृत्तित्वंआत्मत्वंत्वीश्व
रात्मत्वावच्छेदेनसुखसामानाधिकरण्याभावाधिकरणमेवेतिवाच्यं·एवंह्ययमेतत्कपिसंयोगीएतद्वृक्ष
त्वादित्यादावव्याप्तिः।एतद्वृक्षोऽपिमूलावच्छेदेनैतत्कपिसंयोगसामानाधिकरण्याभावाधिकर
णत्वात्·एतद्वृक्षत्वेसंयोगसामानाधिकरण्यसत्त्वात्कथंतदभावइतियदितदैतदात्मत्वेपितुल्यं·अव

स्मा २

च्छेदभेदेन विरुद्धयोरप्येकत्र वृत्तिर्न विरुद्धेन्यपि तुल्यमिति चेत्· अत्र ब्रूमः· अधिकरणैकदेशानवच्छेदेन
साध्यसामानाधिकरण्याभाववदन्यत्वं यत्तित्वं तत्त्वं विवक्षितं एतद्व्यक्तित्वे वाधिकरणैकदेशमूलावच्छे
देनैव सामानाधिकरण्याभाववत्त्वमिति विशिष्टव्यतिरेकस्य तत्रापि सत्वान्नाव्याप्तिः आत्मत्वेत्वीश्य
रस्वरूपाधिकरणावृत्तित्वावच्छेदेनैव साध्यसामानाधिकरण्याभाववत्त्वं न तु तदेकदेशावच्छेदेनेति न तत्रा
तिव्याप्तिः। केवलान्वयिनि तादृशसामानाधिकरण्याभाववत्त्वं गगनादौ प्रसिद्धमिति ध्येयं· नन्वयम
भिधेयवान् प्रमेयवत्वादित्यादिव्याप्त्यावव्याप्तिः प्रमेयत्वस्य नानादृशसामानाधिकरण्याभाववति गग
नादौ वृत्तिः। न च तत्र व्याप्तिरेव नेति वाच्यं· तत्रानुमानप्रवृत्तेर्निःकलंकत्वेन प्रमेयत्वाद्यवच्छेदेनैव
गृह्यमाणायावृत्तिमतिप्रमेये ऽभिधेयव्याप्तेरवश्यवाच्यत्वादिति चेत्· न वृत्तिमत्प्रमेयत्वमादायैव तत्रो
क्तलक्षणासत्वात्· वृत्तिमत्वभागस्य व्यभिचारावारकत्वात् प्रमेयत्वमात्रेणैव तत्र व्याप्तिनिरूपणं· न

सप्रमेयत्वमात्रमतिप्रसक्तनयानतन्निरूपकमितिवाच्यंव्यर्थविशेषणत्वरहितत्वेसतिव्यभिचारित्वा
वन्नत्वमेववह्निधर्मस्यव्याप्तिनिरूपकत्वेतंत्रं·नत्वनतिप्रसक्तत्वमपिगौरवान्न·नचात्रवह्निमत्प्रमेयत्वस्यै
वतथात्वेतदवच्छिन्नस्यैवव्याप्यत्वंस्यान्नगगनादेरितिवाच्यंदृष्टापत्तेः।एतेननीलधूमत्वस्यापितथा
त्वात्तेनापिरूपेणतत्रव्याप्तिग्रहापत्तौनीलधूमस्यापिलिंगत्वेनोपन्यासेनीलत्वस्यवैयर्थ्यंनस्या ३२
दितिनिरस्तं·तद्रूपपुरस्कारेणापिधूमेनिरूढवह्निव्याप्तिसत्वेपिगौरवात्तेनरूपेणतद्ग्रहापत्त्यभावा
त्तथाभूतधर्मान्तराघटितशरीरत्वेसतीत्यपिविशेषणमत्रेत्यप्याहुः·यत्तुयदाश्रयसमानाधिकर
णात्यंताभावप्रतियोगिनीसाध्यसंबंधितानभवतितदवच्छेदकं·ईश्वरात्मन्यात्मत्वसमानाधिकरणा
त्यंताभावप्रतियोगित्वेवतत्संबंधिनेतिनातिप्रसंगइति·तन्तुच्छं·अत्रहिसंबंधिता[illegible]सा
मान्यंविवक्षितंसामानाधिकरण्यंवा·नाद्यः।इदंत्वेघटव्याप्यत्वापत्तेः।नांत्यः।धूमेपिवह्निव्याप्यताना

पत्तेः। वह्निसामानाधिकरण्यस्य धूमत्वाश्रयसमानाधिकरणात्यंताभावप्रतियोगित्वात्। न ह्निधूमत्वा
श्रयाधिकरणे महानसादौ वह्निसामानाधिकरण्यं किंतु धूम एवेति। यदपि। साध्यासहवृत्त्यसहवृत्तित्ववि
वक्षितत्वं आत्मत्वं साध्यासहवृत्तीश्वरत्वसहवृत्तीति नोक्तदोष इति। तदपि न। केवलान्वयिनि यद्यपि साध्या
सहवृत्तिराकाशादिः प्रसिद्धस्तथा तदसहवृत्तित्वं तदधिकरणा[illegible]नधिकरणत्वं तच्चाप्रसिद्धमेव न वा ग्रि
मासहवृत्तिपदस्य तदधिकरणाधिकरणत्वमर्थः। धूमासहवृत्त्ययोगोलकत्वाद्यनाधिकरणमहान
साद्यधिकरणवह्निवृत्तितया वह्नित्वस्य वह्नावपि धूमव्याप्यतापत्तेः। न च तदनधिकरणाधिकरणमात्र
वृत्तित्वं हि तत्र। वह्नित्वं च धूमासहवृत्त्ययोगोलकत्वाद्यधिकरणाधिकरणेऽपि वह्नौ वर्त्तत इति वाच्यं। मा
त्रपदव्यवच्छेद्यस्य तदधिकरणाधिकरणत्वस्य केवलान्वयिन्यप्रसिद्धेः। तत्राकाशादेरेव साध्यासहवृत्ति
त्वात्। यन्मते एतद्व्याप्तिज्ञानमनुमितिजनकं तन्मते व्यभिचारज्ञाने सत्यपि एतज्ज्ञानस्य निःप्रत्यूहत्वात् क

33

धंनानुमितिः। ग्राह्याभावज्ञानस्यैव विरोधित्वादिति वित्यं· अत्रं न्येतु· अवच्छेदकत्वं स्वरूपसंबंधविशेषः संयो
गादिष्वपि शाखादौ स एवावच्छेदकत्वं संयोगस्य वृक्षे समवायः संबंधो ऽवच्छेदके विशेषणता विशेषइति
गुणकिरणावल्यामभिधानात्· एतद्व्याप्तिग्राहकं चान्वयव्यतिरेकाभ्यामभिव्यवरित सामानाधिकरण्या
दिज्ञानं तेन व्यभिचारज्ञाने सति तज्ज्ञानाभावेन ग्राहकाभावान्नैतद्व्याप्तिग्रह इत्याहुः। अथ वेति· संबंधि
ताव्याप्तिरिति पूर्वलक्षणार्थः। तदवच्छेदकरूपवत्त्वं व्याप्तिरित्येतल्लक्षणार्थ इति न पौनरुक्त्यमिति ध्येयं· ३३
अवच्छेदवत्त्वं च पूर्वोक्तमेव ग्राह्यं· न चात्र मते धूमत्वस्यैव व्याप्तित्वपर्यवसाने धूमत्वं कथमवच्छेदकमभे
दादिति वाच्यं· उपहितानुपहितभेदेन तयोरुपपत्तिः। आर्द्रेंधनेति· जनकत्वादिसंबंधेनार्द्रेंधनादेर्वह्न्याधे
धूमादिसामानाधिकरण्यावच्छेदकत्वादित्यर्थः। यद्यप्यार्द्रेंधनपुंजवद्वह्नित्वं विशिष्टं तथा· तथापि वि
शिष्टस्यावच्छेदकत्वे विशेषणस्यापि तत्त्वमिति भावः। अत्रैवोपष्टंभकत्वेन प्राभाकरमतमाह· अत एव

उपा३

उपश्रभकांतरमा स्।। अतएवेति।१

त्ति· अत्रोपाधौ आर्द्रेंधनादाविदं लक्षणं ध्रुवमित्यर्थः। अन्यथा तस्यानुपाधित्वे तत्संग्राहकमिदमुपाधिलक्ष
णमतिव्यापकं स्यादित्यर्थः। ननु भवेदप्येवं यदि तत्रावच्छेदकमावश्यकं स्यादित्यत आह व्यभिचारिणीति·
अत एवेति· विरोधभंजनार्थं साध्यसंबंधितावच्छेदकस्यावश्यकत्वादेवेत्यर्थः अन्यथेति· व्यभिचारोपपा
दकत्वेनोपाध्यकल्पने अनुमानदूषकत्वेन वतत्कल्पने स्फुटव्यभिचारेण तदनुमानं न शक्येत· अप्रयो
जकत्वात्· तथा चोपपादकं विना उपपाद्यानुपपत्तिरूपतर्कसत्ता विव्याप्यभिचारेण तदनुमानमित्यर्थः·
५६ अत एवेति· अत एव साध्ये संबंधितावच्छेदकत्वमुपाधिरत एव तद्रूपलक्षणाव्याप्तिः। उपाधिनिष्ठेति शेषः
साधनाभिमते चकास्तीत्युपाधिरसावुक्त इत्यर्थः· एतद्ध्यानंतरोक्तलक्षणानुसारेण दूषयं· नन्वेवं हेतौ स्वरति
स्वव्याप्यसंजकत्वमुपाधित्वमिति पर्यवसितं· तथा च विषमव्याप्तौ अप्युपाधिव्यवहारविषय इत्यर्थः स्या
द्र्धनादेरुपाधित्वं न स्यात्· न चेष्टापत्तिः। दूषनेन शास्त्रे तस्याप्युपाधित्वव्यवहारा तथा च शास्त्रे

दित्यत आह लक्षणमिति। शास्त्रे उपाधि
व्यवहारनिमित्तं।१

कमलेन१

पुरिभाविते तन्निमित्तवशाद्विषमव्याप्तोप्युपाधिव्यवहारविषय इत्यर्थः । जपाकुसुमादिसाधारणस्वव
त्तिधर्मोपि संक्रामकत्वरूपप्रवृत्तिनिमित्तयोगात्परं विषमव्याप्तो नोपाधिपदशक्य इत्याह विषमव्याप्
३५ स्येति · प्रवृत्तीति · उक्तप्रवृत्तिनिमित्तेत्यर्थः । नन्वेवं तेनैव रूपेण दूषकतापि स्यादिति विषमव्याप्तो
न दूषणं स्यादित्यत आह · दूषकतावेति · एतच्च विषमव्याप्तसाधारणमेवेति भावः । नन्वेवं व्यभिचारोन्ना
यकत्वमेवोपाधिलक्षणमस्तु · किं लक्षणांतरेणेत्यत आह · नचेति · अप्रयोजकेति · अप्रयोजकत्वसा ३८
ध्यव्यापकव्यभिचारित्वयोरित्यर्थः · नन्वस्तु निरुक्ता व्याप्तिस्तथापि तज्ज्ञानसंभवान्नानुमानं प्रमा
णमित्यभिप्रेत्य मीमांसकमुखेन चार्वाको भूयोदर्शनस्य व्याप्तिग्राहकत्वमपाकरोति सयमिति · सकृ
द्दर्शनगम्यत्वं वसुखनिरस्यमेवेति भावः । अन्यथेति · व्याप्तिज्ञानवद्व्याप्यभावज्ञानस्यापि तेन जननाप
त्तेः । तत्संस्काराविषयभानं तुल्यत्वादित्यर्थः । ननु व्यभिचारविशेषितः सहचारविशेषितः सहचार एव

व्याप्तिः। तथाचप्रत्यभिज्ञायामिवविशेष्यांशेसमानविषयत्वमस्त्येवेतिविकल्प्यदूषणांतरमाह॰
किंवेति॰ आद्यदोषमाह॰ एकत्रेति॰ द्वितीयआह॰ द्रव्यत्वेति॰ यद्यपिप्रथमदूषणेनैवद्वितीयविकल्प
[illegible]नि[illegible]रासस्संभवति॰ तथापिएकत्रघटेपाकेनरूपरसवाकुल्यसंभवाद्दूषणांतरमुक्तं॰ तृती
यआह॰ एकत्रेवेति॰ ननुभूयस्त्वंवकृत्त्वंतच्चानुगतमस्त्येवेत्यतआह॰ अपिवेति॰ तर्कसहकृतमि
ति॰ भूयोदर्शनमितिशेषः। तथेति॰ व्याप्तिग्राहकमित्यर्थः। ननुभूयोदर्शनंनसाक्षाद्व्याप्तिग्रा
हकं॰ किंतुतर्कोत्थापनद्वाराव्याप्तिप्रयोजकमित्यतआह॰ नवेति॰ व्युत्पन्नस्येति॰ तर्कमूलभूतव्या
प्तिज्ञानवतइत्यर्थः। नवैवमेवेति॰ सकृद्वारदर्शनादिसहकृतस्तर्कएवव्याप्तिग्राहकोऽस्त्वित्यर्थः॰ व्या
प्तिग्रहेति॰ अन्यथाशिथिलमूलत्वेनतस्यव्याप्तिग्राहकत्वा[illegible]भावात्॰ तथाचतर्कमूलव्याप्तिरपित
र्कांतरेणग्राह्येत्यनवस्थेतिभावः॰ शंकतेजातिमात्रस्येति॰ अतोनानवस्थेति॰ तद्वदेवान्यत्रापिकयि

त्रिताव द्वमि २

तर्कमूलव्याप्तिज्ञानेतर्कानपेक्षणादितिभावः·केचित्तु·यत्रक्वचिदेवानुमानेऽनवस्थापरीहारोपमित्य
प्याहुः।शंकते·सामान्येति·ततः किमित्यतआह·सामान्यरूपतावेति·तथाचसामान्यत्वेनज्ञानंसमा
३५ नव्यक्तिभानंविनाने ज्ञानार्थंभूयोदर्शनापेक्षेतिभावः।ननुसामान्यतयेतिनिषेधविशि
ष्टात्·ज्ञानस्यप्रत्यासत्तित्वमनुमतं·अन्यथातत्प्रकारकज्ञानानुपपत्तिः।पूर्वाज्ञातस्याप्रकारत्वादिति
सामान्य ५ भावः।इदंचाभ्युपेत्योक्तं·वस्तुतोमयाप्रत्यासत्तिर्नाभ्युपेयतइत्याह·तदनभ्युपगमाच्चेति·अयोग्ये ३५
ति·तथाचानौपाधिकत्वज्ञानंनव्याप्तिधीहेतुरितिभावः।मतांतरंशंकते·अथेति·पूर्वमनौपाधिक
त्वज्ञानस्यकारणत्वंपुरस्कृत्यशंकितमधुनासाध्याद्विसहचरितधर्मीणामुपाधित्वसंशयस्यव्य
भिचारसंशयद्वाराव्याप्तिप्रतिबंधकत्वमितितन्निरासस्यप्रयोजकत्वंपुरस्कृत्यशंकतइतिनपौ
नरुक्त्यं·अयोग्येति।तथाचतत्संशयस्याप्रतिबंधकत्वमेव वाच्यमतः किंतदुच्छेदार्थंभूयोदर्शनेनेन

त्तिभावः। सवेति। अयोग्योपाधिसंशयाध्यंनव्यभिचारसंशयोच्छेद इत्यर्थः। उक्तमिति। उक्तमिति
वेति भावः। ननु यत्रायोग्योपाधिशंकानजातातत्रैव भूयोदर्शनापेक्षा स्यादित्यत आह। अपि वे
ति। संस्कारजन्यत्वे स्मृतित्वापत्तिरित्याशंक्याह। स्मरणास्यवेति। पुमाणांतरतापत्तेरिति। पदसा
धारणासहकार्यो साध्यमनो वह्निगोचरपुमां जनयति तस्यैव पुमानंतरत्वनियमादिति भावः। सक्व
दर्शनगम्यत्वमुपपादयति। तथा हीति। आधीराधेयभावानुपपत्तेराह। तत्कालेति। तन्मते काल
३६ स्य वह्निरिंद्रियवेद्यत्वात् न वाक्षुषत्वादि विरोध इति ध्येयं स्वप्रकाशरूपमित्यनेन वाक्षुषत्वमुप
पादितं। वह्नेर्जन्यज्ञानविषयस्यैव वाक्षुषत्वादिति भावः। स्वमते दृष्टांतमाह। दीर्घत्वेति। उपाधि
स्मरणोसतीति। यादृशी सामग्री परमते उपाध्यभावग्राहिका तादृश्येव तद्धेतोरेवेति न्यायेनानु
मितिहेतुरित्यर्थः। व्याप्तीति। अधिकरणज्ञानस्य वस्तुत उपाध्यगोचरस्यापि तत्त्वापुकारकतया

भाव।

नोपाध्यभावत्वप्रकारकसंशयनिवर्त्तकत्वं समानप्रकारकनिश्चयस्यैव संशयविरोधित्वात्· तथा
च भूयोदर्शनादिना तादृशनिर्णयानंतरं तच्छंकाप नीयइत्यर्थः। अभ्युपेत्य तत्प्रकारकनिर्णयानं
38 तरमपि तत्प्रकारकसंशयमुपपादयति· यद्वेति· स्वतः प्रामाण्यवादिनाप्यनुभूयमानस्य प्रमाण्य
संशयस्य कथंचिदुपपादनीयत्वादिति भावः। प्रत्यक्षेति· तन्मते ऽलौकिकप्रत्यक्षाभावेन प्रत्यक्षमा
त्रव्यवतथात्वमिति भावः यद्यप्यसत्यर्थपरस्य ज्ञानमात्रमसंभवि तथाप्यत्र प्रत्यक्षस्य परामिप्रत ३६
त्वात्तदेव खंडितमिति ध्येयं· स्वैकदेशिमतं दूषयितुमुपन्यस्यति·। केचित्त्विति· प्रथममतइति· क्वचिद्व
ह्निं विनापि धूमः स्यादिति शंकायां वह्नित्वावच्छेदकत्व संशयस्यैव प्रतिबंधकत्वादिति भावः। नैया
यिकसुखेन मीमांसकमास्कंदतीमेवमिति। किंत्विति· यावत्वादेः प्रथमदर्शनेन गृहीतुमश
क्यत्वादित्यर्थः· व्याप्तिज्ञानं हेतुरिति· अनुमितावितिशेषः। विशेषणेति· यद्यपि विशेषणज्ञान

जन्यत्वं विशिष्टज्ञाने परैर्न मन्यते तथापि विशेषणतावच्छेदकप्रकारकज्ञानं वि---------ना गिशिरे
वैशिष्ट्यज्ञानं न स्यादिति भावः। ननूपाधिस्मरणे सतीत्यादिना तद्धेतोरेवेति न्यायेनोपाध्यभाववत्त्वप्रकार
कज्ञानसामग्र्येव हेतुरित्युक्तं· तथा च कथमुपाध्यभावज्ञानादनुमितिः स्यादित्योपादनमित्यपरितोषा
दाह· वस्तुतस्त्विति· सहचारादीत्यादिपदेन व्यतिरेकित्वादिपरिग्रहः। आशयमविद्वानाशंकते· अथे
ति· व्यभिचारसंशय इत्यव्यभिचारघटितव्याप्तिपक्षे अनौपाधिकत्वादिव्याप्तिपक्षे तदभावसंशयो द्रष्ट
व्यः। आशयमुद्घाटयति· नेति· किं चेति· यद्यपि तादृशग्राह्यसंशयस्य तन्निश्चयप्रतिबंधकत्वे योग्यता
संशयस्यापि शाब्दज्ञानकारणत्वं न स्यात्· तस्यापि ग्राह्यसंशयपर्यवसन्नत्वात्· विशेषादर्शनसहि
तत्वाच्च· तथापि व्यभिचारादिसंशये सति न व्याप्तिनिश्चय इति सर्वसिद्धमित्यनन्यगत्या विशिष्यापि त
स्य प्रतिबंधकत्वं कल्पनीयमेव· अत एवानुपदमेव सिद्धांते ज्ञानं निश्चयः शंका वेत्यनेन व्यभिचारसंश

यस्यप्रतिबंधकत्वमिति भावः। एवं न भूयोदर्शनं न सकृद्दर्शनं न वा तर्को व्याप्तिग्राहक इति व्याप्तिज्ञाना
भावान्नानुमानं प्रमाणमित्यभिप्रायेणाह· एवमिति· अत्रोच्यत इति सहचारज्ञानत्वेनैव हेतुत्वं· ननु भू
37 योदर्शनत्वेन न सकृद्दर्शनत्वेन वा· तत्र तदुभयसाधारणं· यदेव यस्य व्यभिचारज्ञानविरहसाहित्यं
तदेव तेन व्याप्तिग्राह्येत्यर्थः। ननु सहचारदर्शनस्य हेतुत्वे मानाभावः। न च विशेषणाज्ञानत्वेन तस्य ३७
हेतुत्वं· सहचारविशेष्यक व्याप्तिग्रहे व्यभिचारात्· सहचारज्ञानत्वेन तद्धेतुत्वस्य तथाप्यनुपादाना
च्च· किंचैवं व्याप्तिघटकपदार्थान्तरस्यापि विशेषणत्वेन त[illegible]ने ज्ञामपि कारणत्वेनाव्येत· यदि चै
यं व्याप्तिप्रत्यक्षे विशेषसामग्री निरुक्तेति तज्ज्ञानं· तदा सहचारज्ञानेऽपि तुल्यं· तस्माद्व्यभिचारज्ञाना
दिप्रतिबंधकाभावे सति व्याप्तीन्द्रियसन्निकर्षादेर्व्याप्तिनिश्चयो न तु तदपेक्षेति चेत्· अत्राहुः अगृही
तसहचारस्य सर्वथा व्याप्त्यग्रहात्तस्य तत्रान्वयव्यतिरेकाभ्यां तस्य हेतुत्वं· अत एव सहचारभ्रमेणापि स

द्वेपिव्याप्तिग्रहमहइति· ननुतथापितस्यतत्त्वेननहेतुत्वंसहचारविशेषणाकव्याप्तिग्रहेविशेषणज्ञान
त्वेनैवहेतुत्वात्· अव्यभिचारविशेषणाकेचतद्ग्रहेपवअन्यथासिद्धत्वादितिचेत्· न· अव्यभिचारांशग्र
हएवतद्धेतुत्वाभ्युपगमात् सहचारांशग्रहस्यान्यथासिद्धेः· व्यभिचारज्ञानविरहस्यापितत्रैवहेतु
त्वाच्च· विशिष्टग्रहस्यचसामान्यसामग्रीतएवोपपत्तेरिति· वस्तुतोव्यतिरेकसहचारज्ञानस्यान्वय
व्याप्तिग्राहकत्वमित्यग्रेस्फुटं· तस्यचनविशेषणज्ञानत्वेनहेतुत्वं· व्यतिरेकसहचारस्यान्वयव्याप्तौ
विशेषणत्वाभावात्· नापिसहचारज्ञानत्वेनातिप्रसंगात्· किंतुव्यभिचारज्ञानविरोधिसहचार
ज्ञानत्वेनतच्चान्वयव्यतिरेकसहचारसाधारणं· यद्यपिसहचारज्ञानस्यनव्यभिचारज्ञानविरोधि
त्वंमहानसादौवह्निप्रयोगोल्लोकेव्यभिचारग्रहात् तथापिसहचार[illegible]ग्रहविषयीभूताधिक
रणेव्यभिचारज्ञानविरोधित्वमस्त्येव· नहियत्रैवाधिकरणेसाध्यसाधनयोस्तदभावयोर्वासहचारो

र्झ्नंसहचारग्र
६।८

गृह्यते तत्रैवव्यभिचारज्ञानं संभवति· अन्वयसहचारग्रहे साध्यात्यंताभावस्य व्यतिरेकसहचारग्रहे सा
धनस्य तत्राग्रहात्· साधने साध्यात्यंताभावसामानाधिकरण्यग्रहस्य व्यभिचारग्रहत्वादिति· व्यभिचा
38 रज्ञानं वयादृशं केवलान्वयिसाधारणं प्रतिबंधकत्वेन हेत्वाभासग्रंथे निर्वक्तव्यं तद्विरहो तत्र हेतुत्वेन
बोद्धव्यः। उपलक्षणं चैतत् अव्याप्यत्वादिज्ञानविरहसहकृततेत्यपि बोद्धव्यं· न चैतदपि विशेषादर्श
ने सति साधारणधर्मदर्शनं तथा संशायकमेव स्यात् न तु निश्चायकमिति वाच्यं· क्वचिदस्मृतोत स्मृ ३८
तो वा तर्कसहकारेण तस्य व्याप्तिनिश्चायकत्वात्· ननु व्यभिचारज्ञानविरहसहकृतसहचारदर्श
नं तद्धेतावेवेति न्यायेनानुमितावेव हेतुरस्तु न तु व्याप्तिज्ञान इति चेत्· न· व्यभिचारज्ञानस्य ग्राह्याभा
वानवगाहित्वेनानुमितौ प्रतिबंधकत्वाभावेन तदभावाहेतुत्वात्· तस्मादनुमितिजनकीभूतमव्य
भिचारज्ञानं विघटयत एव तस्यानुमितिप्रतिबंधकत्वं· ननु साक्षात्· यादृशात् तर्कस्य मूलव्याप्तौ व्या

घातेनसंक्रान्तावतरतित्वादृशंवह्निधूमकार्यकारणभावग्राहकंतर्कमुदाहरतिधूमोयदीति·घटादौव्य
भिचारवारणायाद्यसत्यंतं·वह्निसमवहितसामग्रीजन्येतद्वारणायविशेष्यं·धूमस्यवह्न्यसमवहितानन्यत्व
निश्चयदशायामेवतर्कोऽयमभिमतस्तेनसत्यंतविशेषणस्यैवव्यतिरेकमादायनास्यविपर्ययपर्यवसा
नं·एवंचवह्न्यसमवहिताजन्यइतिपक्षविशेषणमप्यत्राभिमतं·तथाचावह्नेरेवभविष्यति·क्वचिद्वह्निंवि
नापिधूमोभविष्यतीतिशंकाद्रूपमापाद्यापादकयोर्व्याप्तिग्रहपरिपंथीभूतमपिपक्षविशेषणाग्रह
परिपंथित्वादाशंक्यपरिहृतमितिध्येयं·अप्रयोजकत्वंशंकते·अ
हेतुकइति·तदुपादानमिति·तदुपादानहेतुभूतधूमवह्न्यादिकार्यकारणभावज्ञानमेवेत्यर्थः।शंकया
विरोधिनिश्चयप्रतिबंधकत्वादितिध्येयं·ननुयदिवह्निधूमादिकार्यकारणभावःप्रथमंगृहीतस्तदाकिं
मनेनतर्केण·एतत्कर्तव्यस्यकार्यकारणभावग्राहकस्यप्रागेवज्ञातत्वात्·यदितर्कात्पूर्वंसनगृहीत

स्तादाप्तिवंधाभावेनोक्तशंकाकवलितस्य वह्नेः एवनज्ञानमुत्पादयेदितिचेत् अत्रकेचित्· धूमार्थवह्नेरु
39 पादानंकथंकुर्यादित्यत्रधूमार्थवह्न्यसमवहितात्ऽनुपादानंनियमतः कथंकुर्यादित्येवाविवक्षितं· तथा
तस्मात्तदुपादानमेवेत्यत्रापिवह्न्यसमवहितानुपादानमेववह्न्युपादानत्वेनविवक्षितं· धूमार्थिनियमत
स्तदुपादानेहेतुभूतंधूमस्यतदजन्यताज्ञानंवह्निधूमयोः कार्यकारणभावाज्ञानेप्यन्वयव्यतिरेकदर्श
नादिनाभवत्येव· तथावह्निधूमयोःकार्यकारणभावज्ञानंपूर्वमनुत्पन्नमेवानेनैवतर्केणोत्पद्यते· ३८
तर्कश्चायंपूर्वोत्पन्नादेवधूमगोचरवह्न्यसमवहिताजन्यत्वज्ञानात्कार्यंसहेतुमेवेतिज्ञानाच्चोक्तशं
कात्रयावकाशोरहितोभवतीत्याहुः॥ तन्न· वह्न्यसमवहितानुपादानस्यतादृशाशंकाप्रतिवंधक
त्वेमानाभावात्· शंकायाविरोधिनिश्चयनिवर्त्यत्वात्· धूमवह्न्यसमवहितजन्यत्वज्ञानाभावात्तदनु ८२
पादानंस्याद्वह्निजन्यत्वज्ञानाभावाच्चवह्निंविनापिस्यादित्याशंकापिस्यात्को विरोधः। अन्येतु· तदुपा

दानपदेनतदुपादानप्रयोजकान्वयव्यतिरेकानुविधायित्वज्ञानमेवविवक्षितंतदेवशंकाप्रतिबंधकं·
यदवच्छेदेनयद्व्यापकधर्मदर्शिनीतज्ज्ञानस्यायिशंकाविरोधित्वात्· अतएवधूमत्वावच्छेदेनव्याप्ति
ग्रहे [illegible] धूमत्वदर्शनादेवपर्वतवह्निधूमेनव्याप्तिसंशयइति· तच्चिंत्यं अन्व
याद्यनुविधायित्वज्ञानस्यान्यथासिद्धव्यभिचारिसाधारणत्वेनशंकाप्रतिबंधकत्वाभावात्· नियमा
न८५ दिघटितज्ञानंवतत्कारणत्वग्रहपर्यवसन्नमेवेतिपूर्वोक्तदोषानुवृत्तिरिति· अत्रोच्यते· नहिसर्व
ज्ञानेनैवतर्केणधूमवह्निकार्यकारणभावग्रहः। कोटिस्मरणादिविरहेनैं स्वतःशंकाविरहेऽन्व
यादिज्ञानवतस्तद्ग्रहे व्याप्तिग्रहेवावाधकाभावात्· स्वतःसिद्धिशंकाविरहे अनेनापितर्केणतद्ग्रहे
वाधकाभावाच्च· तदिदमुक्तंक्वचित्स्वतःसिद्धएवेतितस्मात्सर्वत्रसंका स्यादेव· ततःकुत्रापिनव्या
प्तिग्रहस्ततोनुमानंनप्रमाणमितियच्चार्वाकादिभिरनुक्तंतं प्रत्युच्यते नात्र नियमः साधुर्यत्सर्वत्रशंके

त्ति॰ तथासत्येतादृशतर्केपि तादृशाशंकायांभवतोपिधूमार्थंवह्न्युपादानंव्याहन्येत॰ तदिदमाह॰ न
40 हिसंभवतिस्वयंवह्न्यादिकंधूमादिकार्यार्थंनियमतउपाददानेनतत्कारणंनेत्याशंकतेवेति॰ तथा
चशंकानवस्थाभावान्नव्याप्तिग्रहानुपपत्तिः।नचानवस्थेतिसिद्धमनुमानमितिसर्वमवदातं॰ व्या
घातज्ञानंनशंकाप्रतिबंधकं॰ येननियमगर्भितयानवस्थास्यात्॰ किंतुस्वक्रियैवेत्याह॰ एते
नेति॰ तत्रापीतिव्याघातज्ञानेपीत्यर्थः।स्वक्रियायाहेति॰ अत्रक्रियापदंस्वहेतुभूतनिश्चयोपल ४०
४ दितिय्येयं क्षणं॰ विरोधिनिश्चयस्यैवशंकाप्रतिबंधकत्वाद्भूतएवेति॰ व्याघातोयद्यस्तितदाशंकास्त्येव॰ स्व
क्रियाविरोधप्रतियोगित्याशंकायांजातायामेवस्वक्रिया [illegible]
[illegible] विरोधात्मनोव्याघातस्यावतारात्॰ निःप्रतियोगिकस्यविरोधस्यासंभवा
त्॰ नचेत्तत्रव्याघातइत्यनुषंगः।ततःप्रतिबंधकत्वाभिमतव्याघातविरहात्तत्रसुतरामेवशंका॰ त

घ्यावव्याघातावधिराशंकातर्कः शंकावधिः कुतः। व्याघातस्थले शंकावश्यंभावात्तन्निवर्त्तना
र्थमपि पुनस्तर्कानुसरणेऽनवस्थापत्तिरिति खंडनकारोक्तमत एवायास्त मित्यर्थः। नहीति· यत्रहि
व्याघातः शंकायाउत्तरावधिर्भवतीत्युच्यते· नहि तत्र व्याघातउत्पन्नशंकाश्रित एव भवति: किंतु
स्वक्रियैव व्याघाताश्रयतादृशशंकाप्रतिबंधिकेत्यर्थः। नवेति यदि हि विपरीतनिश्चयजनितवि
ले५ रुद्धस्वक्रियास्थले पि शंकोत्पद्यत एव· किंतु स्वक्रियाव्याघातः परं तदाश्रयको भवति· तदाविप
रीतनिश्चयात्क्वचिदपि शंकानिवृत्तिर्न भवेत· नहि यस्मिन्निश्चये सत्यपि याशं[illegible]कोत्पद्यते सा
ततो निवर्त्तत इति भावः। भूयोपदर्शनं विनेति पूर्वायोवादः। व्युत्पन्नस्य प्रथमदर्शी[illegible] एव तर्कावता
रात· सदिति· भूयोदर्शनरूपोऽर्थ इत्यर्थः। तर्कस्याप्रमात्वादित्याद्या ततः। वस्तुतस्तु तर्कस्यप्रमात्वे
पिनिर्व्यापारतयैव संस्कारस्यनप्रमाणत्वमिति द्रष्टव्यं तद्वेति· व्यभिचारज्ञानविरहसहकृत सहचार

दी॰ दर्शनमित्यर्थः। व्याप्तिप्रत्यक्षइति· व्याप्तिप्रत्यक्ष विशेषइत्यर्थः। यद्यपि बाधाभाववत्तया व्यभिचारज्ञा
४१ नविरहस्य साध्यप्रसिद्धितया पदार्थोपस्थितितया च सहचारज्ञानस्य शाब्दानुमित्योरपि हेतुत्वमस्ति
तथापि बाधसंशयस्य तदुभयत्रापि दोषतया व्यभिचारनिश्चयविरहमात्रहेतुत्वेन सहचारज्ञान
स्य तत्त्वेनाजनकतया वैतदुक्तमिति ध्येयं· भ्रान्तां दर्शयति· नत्विति· अपरे त्विति· अत्रेदमनभिम
तेबीजं· एवं स्खलनयानस्थले ऽनवस्थोद्धारे ऽपि वह्निधूमयोर्व्याप्तौ ग्राह्यायामुक्तशंकावतारे उक्त ४१
प्रकारस्यैवानुसरणे ऽस्याप्रयोजकत्वमिति· पत्विति· अनादिसिद्धत्वेन ज्ञानान्निःशंकमवगम्यमा
नः कार्यकारणभावविरोधादिकेषांचित्तर्काणां मूलमतो न तर्कानवस्थेति भावः। तत्रेति· तत्रमू
लभूतस्य कार्यकारणभावविरोधादेरनादित्वे प्रमाणानुसंधाने ऽनुमान एव पर्यवसानादि॰· तथा
च तत्रापि न कापेक्षायामनवस्थेति भावः। अनुपपत्तेरपीति· तथा च पुनरनवस्थेति भावः। व्यभिचा

यादिति॰ वैजात्यकल्पने मानाभाव इति भावः। अनौपाधिकत्वं सुग्रहमिति॰ तथा च तज्ज्ञानमेव व्याप्तिधी
हेतुस्त्विति भावः। तत्साधन इति॰ साध्याव्यापकत्वं साधन इत्यर्थः। व्याप्तिग्रहे [illegible] परंपरया यित तर्कस्य
न प्रयोजकत्वमिति ये वदंति तेषामनुमानमात्रोच्छेद इत्याह॰ एवेति॰ ननु व्यापकव्यतिरेकेणापि व्या
प्य [illegible] व्यतिरेकसाधनमनुमानमेव॰ तत्रापि विपक्षेतरत्वसंभवाद्व्यतिरेकसाधने
मूलानुमानादेव साध्यसिद्धिः स्यात्॰ किं वानुमात्रोमानं च्छेदं कथ लक्षणाप्रतिकूलतर्कादेव न तस्य साध्य
व्यापकत्वग्रह इति नोक्तदोष इत्यत आह॰ अपि वेति॰ शक्यतिरिक्तेति॰ साध्यं परमते दूषयं॰ क्षित्यादौ
द्विकर्तृकत्वानुमानमस्मन्मतेनाप्रयोजकं बोध्यं॰ तस्मादिति व्यभिचारेण तर्कस्य व्याप्तिग्रहे हेतुत्वं
निसिद्धं ननु व्यभिचारसंशयनिरासद्वारा प्रयोजकत्वमपि निसिद्धमिति भावः। उक्तव्याप्तिप्रकारेष्वि
ति॰ अत्यंताभावगर्भव्याप्तावत्यंताभावप्रतियोग्यसमानाधिकरणत्वप्रवेशादन्योन्याभावगर्भव्याप्ता

[redacted]पेक्षयागौरवमितिभावः। अत्रवदंति न व्याप्तिरनुमितिहेतुः किंतु तज्ज्ञानं तज्ज्ञानस्य तद्धेतुत्वे यदवच्छेदकं
लघु भवति सैव व्याप्तिरूपादेया। तादृशी च गुरुशरीराप्यत्यंताभावगर्भैव सा नह्यत्र प्रतियोग्यसमाना
धिसमानाधिकरणत्वभागस्याप्यत्यंताभावविशेषणस्य ज्ञानमनुमित्युपयोगीति तस्योपादानं। किं
तु व्याप्तिस्वरूपकथनमात्रार्थं तत्र तस्य ज्ञानं विनापि स्वसमानाधिकरणासकलात्यंताभावाप्रतियोगि
वह्निसमानाधिकरणधूमवानयमिति ज्ञाने सति वह्न्यनुमितौ विलंबाभावात्। संयोगात्यंताभावेऽपि ४२
स्वसमानाधिकरणे न प्रतियोगी इति ज्ञानवतो द्रव्यत्वादिना संयोगाद्यनुमानाच्च। एवं च साधनसमानाधि
करणो योऽत्यंताभावः प्रतियोगिसमानाधिकरणत्वेन न ज्ञायते तदप्रतियोगित्वेन ज्ञायमानं यत्साध्यं स सा
धननिष्ठतत्समानाधिकरणत्वज्ञानत्वमेव तद्व्याप्तिज्ञानस्यानुमितिहेतुतावच्छेदकं वाच्यं। तच्चान्योन्याभा
वगर्भव्याप्तिज्ञानस्य तद्धेतुतावच्छेदकं यत्तदपेक्षया लघुशरीरमेव भवति। तस्यापि हि हेतुतावच्छेदकं नोक्त

स्वरूपज्ञानत्वमेव॰ तथासतिसंयोगवदन्योन्याभावोऽव्याप्यवृत्तिरितिज्ञानवतोद्रव्यत्वेनसंयोगाननुमाना
पातात्॰ किंतुतत्रापिसाधनसमानाधिकरणोयोन्योन्याभावःप्रतियोगितावच्छेदकसमानाधिकरणत्वेन
नज्ञायतेतत्प्रतियोगितानवच्छेदकत्वेनज्ञायमानंयत्साध्यंसाधननिष्ठतत्सामानाधिकरण्यज्ञानत्वमे
वलदवच्छेदकंवाच्यं॰ दंवतदपेक्षयागुरुशरीरमेवस्यानद्वयेऽवच्छेदकपदार्थस्याधिकस्यप्रवेशाद्दिति॰
अत्रेदंचिंत्यं॰ भवेदेवं [illegible] विपरीतगौरवं॰ यद्यत्यंताभावाभीयांप्रतियोगिसमानाधिकरण
त्वेनाज्ञायमानत्वं॰ अन्योन्याभावाभीयांप्रतियोगितावच्छेदकसमानाधिकरणत्वेनाज्ञायमानत्वंस्वरू
पसदवच्छेदकंस्यात्॰ किंतूभयत्रस्वाभावसमानाधिकरणत्वेनाज्ञायमानत्वमेवविशेषणमस्तु॰ सत्वा
भावोऽत्यंताभावस्यप्रतियोग्येव॰ अन्योन्याभावस्यप्रतियोगितावच्छेदकत्वमित्यन्यदेतत्॰ अवच्छेदक
त्वंतुस्वाभावत्वेनैवनतुतेनतेनरूपेणेतिकुतोविपरीतगौरवं॰ तस्मादुभयत्रास्मिन्स्वरूपसदवच्छेदकेस

मानेकुतोलाघवादन्योन्याभावगर्भव्याप्तिरनुमितिहेतुरितिनावधार्यतेतथाचविनिगमनाविरहइतिदू
षणामत्रद्रष्टव्यं॰यद्वा॰अन्योन्याभावप्रतियोगिवृत्तित्वेनज्ञायमानत्वमेवविशेषणमस्तु॰तथाचनविप
रीतगौरवमिति॰वयंतुब्रूमः विपरीतमेवगौरवंकिंतुप्रकारांतरेणतथाहि॰निरुक्तेस्वरूपसदवच्छेदके
43 उभयत्रसमानेपिअन्योन्याभावगर्भायामवच्छेदकांतरप्रवेशआवश्यकः नहिस्वसमानाधिकरणान्यो
न्याभावप्रतियोगितानवच्छेदसाध्यसामानाधिकरण्यंव्याप्तिरित्येवविवक्षितंतथासतितत्तद्धूमस्तत्र ४३
धूमसमानाधिकरणान्योन्याभावप्रतियोगितावच्छेदकतयाधूमेपिवह्निव्याप्यत्वाभावापत्तेः किंतुतादृ
शान्योन्याभावप्रतियोगितावच्छेदकंयन्नभवतितदवच्छिन्नसामानाधिकरण्यं॰वह्नेश्चतदवच्छेदकत्वे
पिवह्नित्वेननावच्छेदकता॰किंतुतत्तद्वह्नित्वेनधूमवान्वह्निमान्नेत्यप्रतीतेः अत्यंताभावगर्भायांतुतादृशा
त्यंताभावप्रतियोगितावच्छेदकंयन्नभवतीत्येवविवक्षितंतावतैवोक्तदोषनिरासादिति॰एवंचयद्यन्यो
वच्छेदकता २ प१

न्याभावगर्भायाः स्वरूपसदवच्छेदकं न प्रवेश्यते तदाप्यत्रावच्छेदकांतरमतिरिक्तं प्रविष्टं · अत्यंताभावग
र्भायां च प्रतियोग्यसामानाधिकरण्यमिति कुतो लाघवादियमेव हेतुरित्यपि चिंतनीयं · न चाभावगर्भत्वे
न तस्य गुरुत्वमिति वाच्यं · अवच्छेदकत्वस्याप्यनतिरिक्तवृत्तित्वार्थकत्वेन तुल्यत्वात् · अन्ये तु · लाघवा
ल्लघूपस्थितिकत्वाच्छीघ्रोपस्थितिकत्वादित्यर्थो विवक्षितः · न तु वस्तुतो लाघवं विवक्षितं · तथा चात्यं
ताभावापेक्षयाऽन्योन्याभावस्य शीघ्रोपस्थितिकतया तद्[illegible]र्भा व्याप्तिरपि तथेति सैवानुमितिहेतुः । न शीघ्रोपस्थितिका
तु परमोपस्थितत्वान्यायान्न च शीघ्रोपस्थितिकत्वमसिद्धं · तस्यावश्यकत्वात् · तथा हि धूमवह्निसामानाधिक
रण्यग्रहकाले व्यभिचारस्य वस्तुतो गृहीतानियमात्यंताभावो नावश्यं गृह्यते · अन्योन्याभावस्तु धूमवह्न्यो
रप्यं ततो गृह्यत एव तथा च तदप्रतियोगित्वं वह्निमति सुग्रहं · न चात्यंताभावप्रतियोगिनोऽपि ज्ञानमस्त्येव तां
नतो धूमवत्त्वादेर्धूमवत्त्वाद्य [illegible] प्रतीत्या प्रतियोगितावच्छेदकावच्छिन्नत्वेनाज्ञानात् · अतएव प्रतियो

धूमसादेरवह्न्यादितिवाच्यं १

गीत्यत्रान्योन्याभावगर्भतेवं प्रतियोगित्वत्वनिरूपणाधीननिरूपणातयाविलंबोपस्थितिकत्वा
दित्याहुः। तदपि चिंत्यं। धूमादिरूपादेरधिकरणतेयातस्य वस्वस्मिन्नपि वृत्त्यान्यस्यात्यंताभावप्रति
55 योगिनो गुरुतापेक्षेति वाच्यं। केवलान्वयित्वि = स्य महानसादेश्चात्यंताभावप्रतियोगिनस्तत्रापि गु
रुसंभवात् वक्ष्यरादिना रूपादेर्गृह्यमाण एव द्रव्यगुरुत्वात्। न च प्रमेयत्वत्वादेः केवलान्वयित्वव्या
क्तोप्रमेयत्वादेरधिकरण = प्रमेयत्वादिघटकपदार्थस्य कस्य चिदत्यंताभावप्रतियोगिनस्तत्रापि ५५
गुरुत्वात्। अपि वास्तु प्रथमोपस्थितत्वं तथाप्युभय व्याप्त्युपस्थितिदशायां उक्तलाघवेनात्यंताभा
वगर्भायाहेतुत्व गुरुप्रथमं गृहीतस्यापि त्याज्यत्वात्। प्रथमोपस्थितिलाघवापेक्षया वस्तुलाघ
वस्य बलवत्वात्। अत एव व्याप्यत्वावच्छेदकप्रकारकज्ञानस्य प्रथमोपस्थितत्वेप्युभयोपस्थिते
प्रथमोपस्थि तिदशायां लाघवेन व्याप्यत्वप्रकारकज्ञानस्यैव हेतुत्वगुरुद् इत्यग्रे वक्ष्यते। अत एव प्र

धमग्रहीतापिकार्यान्वितेशक्तिरग्रेलाघवानुरोधेनत्यज्यतइतिदिक्॰यत्तु॰वह्निस्तस्कयोयोधूमवान्
सोग्निमानित्युदाहरणावाक्यान्नात्यंताभावगर्भानवान्योन्याभावगर्भाव्याप्तिः पृतीयते॰साधनसमा
नाधिकरणात्यंताभावादिपृत्यायकस्यपदादेस्तत्राभावं किंतुसाधनस्वरूपावच्छेदकधूमत्वाद्य
वच्छिन्नसाध्यसंबंधितारूपाव्याप्तिर्धूमादौसाधनेततोवगम्यतइतिसेवानुमितिहेतुरिति॰तन्न॰नि
रुक्तावच्छेदकस्याप्युदाहरणादपृतीतेः।यदपियस्यज्ञानंविरोधितदभावगर्भंसा[redacted]नाधिकरण्य ४५
हेतुर्वीयो ऽतएवोपाधिज्ञानमविरोधीत्यनौपाधिकत्वमहेतुः विरोधिवसाध्यवदन्योन्याभावग्र
हवत्साध्यात्यंताभावज्ञानमपि॰तथायतदुभयगर्भैवव्याप्तिर्हेतुः।अन्योन्याभावगर्भैवेत्युपलक्ष
णं॰अतएवाग्रे ऽनौपाधिकत्वमेवव्यवच्छिन्नमनौपाधिकत्वंतुल्लक्षणमिति॰नवैवमननुगमः साध्यवि
रोधिसामानाधिकरण्यज्ञानत्वेनसर्वव्याप्तिज्ञानानामनुगमात्॰साध्यविरोधित्वंवसाध्याधिकरणान

धिकरणत्वं साध्यवदन्योन्याभावसाधारणमिति॰ तदपि न॰ अन्योन्याभावगर्भव्यभिचारज्ञानसत्त्वेप्यत्यं
ताभावगर्भव्याप्तिज्ञानादनुमित्यापत्तेः कारणाभावच्छेदकावच्छिन्नयत्किंचित्सत्त्वेएव कार्यौत्पत्तेः॥
45 ग्राह्याभावानवगाहित्वेन तस्य तत्राप्रतिबंधकत्वात्॰ न चेष्टापत्ति॰ अनुभवविरोधात्॰ वै परित्यस्या
पि संभवेनात्यंताभावगर्भव्यभिचारज्ञानस्याप्यप्रतिबंधकत्वेव्यभिचारस्य हेत्वाभासत्वानुपपत्तेः॰
न च तावद्व्यभिचारज्ञानानां प्रतिबंधकतया तदभावकूटस्याप्यनुमितौ हेतुत्वमिति वाच्यं॰ तथा सति व्या ४५
प्तिज्ञानहेतुत्वएव मानाभावात्॰ तत्कूटसहकृतसद्व्यभिचार[illegible]दर्शनस्यैव हेतुत्वापत्तेः॰ वयं तु पश्यामः॰ अ
त्यंतान्योन्याभावगर्भव्यभिचारग्रहे सति नानुमितिरिति सर्वानुभवसिद्धं तथा च यज्ज्ञाने सति न त
दुभयव्यभिचारज्ञानं सैव व्याप्तिर्हेतुः॰ तादृशी वाशेषसाधनाश्रयाश्रितसाध्यसामानाधिकरण्य
रूपैव सा॰ साध्यवत्त्वग्रहस्य साध्यात्यंताभावसाध्यवदन्योन्याभावविरोधितया सकलसाधनाधि

करणेतद्धूमस्योभयव्यभिचारगुरुविरोधित्वात्·नचसाधनाश्रयेमहानसादौसकलेप्रत्येकव
ह्न्याश्रितत्वाभावादिदमयुक्तमितिवाच्यं·यावत्साधनाश्रयाश्रितं·यत्साध्यतावच्छेदकंतदवच्छिन्न
सामानाधिकरण्यस्यविवक्षितत्वात्·नचसाधनाश्रयेमहानसादौसाध्यतावच्छेदकस्यवह्नित्वा
देराश्रितत्वाभावादिदमप्ययुक्तमितिवाच्यं·स्वाश्रयघटितपरंपरासंबंधेनतस्यापितद्वृत्ति २४
त्वात्·इयमेवव्याप्तिस्तदारूढाहरणेनोपदर्श्यतइतितस्यव्याप्त्युपदर्शकावयवत्वंसर्वजनसि
द्धमपिसंगच्छते·नचवीप्सावत्त्वेनततःसकलधूमाधिकरणेनवह्निसंबंधप्रतीतावपिवह्नित्वेनतदप्र
तीतेःपरंपरासंबंधाभा[illegible]दितिवाच्यं।सकलसाधनाधिकरणेवह्निसंबंधेवह्नौवह्नित्वसमवा
येभासमानेतस्यापिभानात्·अत्यंताभावान्योन्याभावगर्भव्याप्तेरेतल्लक्षणांगुनोपाधिकत्व
वत्त्वमतएवैतज्ज्ञानेऽत्यंताभावादिगर्भव्याप्तेःशार्दूलादिनाप्रतीतावपिनानुमितिः।उक्तयुक्त्याल।

नार्

घावेनवास्या एव हेतुत्वात्· अत एवान्योन्याभावादिगर्भव्याप्तिग्रहहेतुतावादिनः शब्दादिनाऽनौपा
46 धिकत्वरूपव्याप्तिग्रहेपि नानुमितिरिति संक्षेपः। लक्षणमिति· ज्ञापकमित्यर्थः। नन्विति· अनौपा
धिकत्वस्य व्याप्तित्वानभ्युपगमादिति भावः। हेतुत्वादिति· व्याप्तिज्ञानहेतुत्वादित्यर्थः। न ह्धीरि
ति· व्यभिचारधीरित्यर्थः। न च साम्यमित्याह· न चेति· न चानयोरिति· यद्यपि केवलान्वयिसाध्य
रणानुरोधेन साध्ये स्वसमानाधिकरणात्यंताभावप्रतियोगित्वमेव व्यभिचारस्तथाप्यस्य विशे ४६
षणाविरहरूपत्वेपि विशिष्टसामानाधिकरण्यविरहरूपत्वमसंभवतीति भावः। एतच्च संप्रदाय
मतेन· मणिकारमते चान्योन्याभावगर्भो व्यभिचारो द्रष्टव्यः। इंद्रियेति· संयुक्तसमवायादिनाइं
द्रियसंबंधे धूमत्वादौ धूमादिव्यक्तीनां विशेषणाभावादित्यर्थः। नन्वेवं सामान्यं प्रत्यासत्तिरस्या
तु· स्यान्यभावादिग्राहकविशेषणतारूपत्वात्· अत एवालौकिकत्वमस्याः सर्वजनसिद्धमनु

पपन्नं स्यादित्याशयेनाह 'अतिरिक्तैवेति· तथा च विशेषणताभिन्नत्वेनाभयमप्यस्या उपपन्नं घोदाप
रिगणनं तु लौकिकाभिप्रायकमिति भावः। फलबलेनेंद्रियसंब[illegible]मेव सामान्यं प्रत्यासत्तिरितिनिमी
लिताक्षस्यतज्जन्याचाक्षुषधीरिति ध्येयं· मीमांसकमतमुद्भावयति· तदपर इति· धूमत्वावच्छिन्नेति:
यैव धूमत्वावच्छिन्ना सकलधूमवृत्तिः स्यैव संनिकृष्टधूमवृत्तिः प्रत्यक्षेणाज्ञायत इत्यर्थः। तत इति·
ग्रह ५ यदवच्छेदेन यद्ग्रहस्तद्धर्मवत्त्वस्यैव तदुपनय[illegible]भाने हेतुत्वादित्यर्थः। तदनभ्युपगम इति· स्थलीयलिं
गपरामर्शानभ्युपगम इत्यर्थः। न चैवं संनिकृष्टधूमे धूमत्वेन व्याप्तिग्रहे धूमांतरे व्यभिचारग्रहेप्यनुमित्या
पत्तिरिति वाच्यं तन्मते व्यभिचारज्ञानविरहस्याप्यनुमितौ हेतुत्वात्[illegible] तिभावः। व्याप्त्यनुभवेति· व्याप्ता
रवतः करणत्वमित्यभिप्रेत्य करणत्वाभिप्रायेण व्याप्त्यनुभवोपादानमिति ध्येयं· व्याप्तिज्ञानत्वेनानुमि
तिहेतुत्वात्· स्वरूपयोग्यताभिप्रायेण तदुक्तमित्यन्ये· एकेति· तस्यावश्यकत्वादिति भावः।।वादिप

८।
देष्विति· तथा च तत्रापि शक्तिग्रहे सकलगोव्यक्त्युपस्थित्यर्थं तत्स्वीकार इति भावः। एतेऽपि परासिद्धा
न्तमभ्युपेत्य स्वमते ज्ञातावेव शक्तिग्रहादिति ध्येयं· लाभ इति· अनुभव इत्यर्थः। वह्निमानिति· जन्यप
दमुभयत्र देयं· तेन न व्यभिचारादिकमिति ध्येयं· धूमस्यापीति· तथा च धूमत्वस्यापि प्रत्यासत्तित्वम
वश्यकमिति भावः। दृष्टान्ते नि यद्यपि सत्तादिजाति साधकानुमाने विशेषणाज्ञानजन्यत्वमस्ति· त
थापि तस्य तत्त्वेन हेतुत्वं किंतु विशेषणतावच्छेदकप्रकारकत्वेनेति भावः। प्रसिद्धधूमवह्निसंबंधा ४७
वगमादिति· न च प्रसिद्धधूमेपि देशान्तरे व्यभिचारशंका स्यादिति वाच्यं· प्रसिद्धधूमे यावत्सत्त्वं देशान्त
रेपि वह्निसंबंधावगमेप्यनुकूलतर्कादिविरहे धूमो वह्निव्यभिचारी न वेति संशयस्यानुभवसिद्धत्वा
दिति भावः। अत्रेदं चिंत्यं· सामान्यप्रत्यासत्तिस्वीकर्त्तापि अनुमानप्रामाण्यमवश्यं स्वीकर्त्तव्यं· एवं चा
नुमानादेव कालान्तरदेशान्तरी धूमोपस्थितिसंभवे किमनया प्रत्यासत्त्या न च तत्रावश्यकव्याप्त्या
५।

दिस्मृतिविलंबेनविलंबितत्वमितिवाच्यं·तदनवतारदशामपिव्यभिचारसंशयइत्यत्रमानाभावात्·त
थात्वसर्वत्रतत्संशयोनास्त्येव·क्वचित्कोटिस्मरणादिविरहस्यापिसंभवाद्यत्रतत्संशयस्तत्रप्रसिद्धे
विशेषदर्शनादप्रसिद्धज्ञानजनकं किंचित्कल्पनीयं·तच्चावश्यकल्पनीयत्वेनानुमानमेवकल्प्यते·
नतत्प्रत्यासत्तिरक्षणत्वात्·नचतदकल्पनेपक्षेतरवृत्तिलिंगेव्याप्तिग्रहात्परामर्शाभावेनानुमानमपि
नस्यादितिवाच्यं·।व्याप्यतावच्छेदकप्रकारकज्ञानस्यैवानुमितिहेतुत्वमितिपरसिद्धांतात्·अन्यथा
वतदकल्पनेपक्षीयसाध्यज्ञानाभावेनविशेषणाज्ञानाभावान्नानुमितिरितिपरास्तं·विशिष्टवैशि
ष्ट्यावगाहिज्ञानेविशेषणतावच्छेदकप्रकारकज्ञानस्यैवहेतुत्वमितिपरसिद्धांतात्·नन्वेवमनागत
धूमज्ञानार्थंतदनभ्युपगमेप्यनागतगोचरप्रत्यासत्यर्थंसामान्यप्रत्यासत्तिस्वीकारस्यावश्यकः।संश
येप्यनागतविशेष्यकेविशेषप्रत्यासत्तिजन्यत्वस्यस्वीकरणीयत्वादितिचेत्·नसंशयस्यमानसत्वेना

प्युपपत्तेः पुत्यासत्त्यंतराकल्पनात्. अतींद्रियविशेष्यकसंशयवत्. वस्तुरन्वयाद्यनुविधानस्यसकृवा
रादिसाधारणधर्मदर्शनोपक्षीणत्वात्. अन्यत्रवाधका[illegible]भावेनतस्यवानुपपत्वात्. अतएवव्यभिचा
५४ रशंकोपपादकत्वेनैवानुमानमाचार्यवराः कुं[illegible]मां[illegible]लोशंकावेदनुमास्त्येवेत्यनेनपुसाधितं. तस्मा
द्व्यभिचारसंशयानुरोधेननतत्सिद्धिरिति. अन्येतु. यदिसामान्यलक्षणापुत्यासत्त्यापुसिद्ध्यापुसि ४८
द्धसकलधूमोपस्थितावेवापुसिद्धधूमविशेषादर्शनेधूमोवह्निव्यभिचारिनवेत्याकारः संशयस्तदाय
दिंधनरवंडपुभवोधूमोऽपुसिद्धोवस्तुगत्यानास्त्येवपुसिद्धेवतत्पुभवेवह्निसंवंधएवावगतस्तदिं
धनपुभवधूमगोरवे एतदिंधनपुभवोधूमोवह्निव्यभिचारीनवेतिसंशयोनस्यात्पुसिद्धेतत्रविशेष
दर्शनात्. अपुसिद्धस्यवनस्यासत्वात्तदिंधनपुभवधूमत्वंपुत्यासत्त्याप्यनुपस्थितेः। नवासावसि
द्धएव. अनुकूलतर्कादिविरहदशायांधूमोवह्निव्यभिचारीनवेतिसंशयवत्तस्यापिसर्वानुभवसिद्धत्वात्.

धूमत्वव्यतिरेकनिश्चयेन धूमत्वेन व्याप्तिसंशयाभावाद्वह्निव्यभिचारित्वरूपसामान्यप्रत्यासत्त्यैव विरोषदर्शनग्रहणतथ्य तत्प्रतिरिक्तव्यक्त्युपस्थितिर्विषेति थोर् ५
वेतन। वह्निव्यभिचारित्वेनोपस्थिते — पूर्वपक्ष

अथ कथं चित्तत्रैव तदिंधनप्रभवधूमत्वं वह्निव्यभिचारिवृत्ति न वेत्यादिसंशयाकृतत्वादृशः संशय इति मतं तर्हि धूमेपि धूमत्वं तथा न वेत्यादिसंशयाकृतएव तादृशः संशयोस्तु॰ किं तदर्थं सामान्यलक्षणाप्रत्यासत्त्या ननु सामान्यलक्षणां विनापि [illegible] क्तसंशयानुपपत्तिः। तथाहि वह्निव्यभिचारित्वेनोपस्थितास्तु घटादिव्यक्तिषु धूमत्वव्यतिरेकनिश्चय इत्यत्र मानाभावात् सामग्रीभेदात् पूर्वानुमानेनान्यथासिद्धेश्च॰ यत्तु॰ तदिंधनप्रभवधूमस्याप्रसिद्धस्य विषयस्यैवाभावात्तत्र संशयो न भवत्येव॰ प्रकृते वाप्रसिद्धधूमस्य सत्त्वात् संशयेन भाव्यमिति॰ तन्न॰ उक्तसंशयाकृतस्यो वित्यावर्जितस्य संशयस्य प्रसिद्धविषयस्यापि संभवात् प्रमाणसंशयाकृतं संशयवत्त्व तस्माद्दे त द्विंत्यमित्याहुः॰ नव वयं तु ब्रूमः। वह्निमानित्यनुमितेर्विशेषणज्ञानजन्यत्वानुमानादेव सामान्यप्रत्यासत्तिसिद्धिः॰ न च दृष्टांताभावः। तथा सति तत एवागो दिति विशिष्टज्ञानेपि विशेषणज्ञानजन्यत्वानुमिति विरहे निर्वि

विषय ३

वह्निव्यभिचारित्वोक्ति पूर्व

कल्पकासिद्धिप्रसंगात् यदि च साध्यप्रसिद्धिपदार्थोपस्थित्यादेरनुमित्यादौ विशेषणज्ञानत्वेन हेतु
त्वं यद्विशेषयोरिति न्यायेन विशिष्टज्ञानमात्रे विशेषणज्ञानत्वेन हेतुत्वे बाधकाभावादिति तत्रासिद्धि
49 रिति मन्यसे तदा प्रकृतेपि तुल्यं· यद्यपि परस्य निर्विकल्पकासिद्धिरिष्टैव तथापि तत्साधकयुक्तिं परो
प्यंगीकारयितव्य इति स्वमतावष्टंभेनेदमुक्तमिति ध्येयं न चानुमानादेव विशेषणज्ञानमस्त्विति वा
च्यं· अनवस्थानात्· तस्मात्तत्रक्लृप्ता सामान्यप्रत्यासत्तिर्व्याप्त्यादिकमपि ग्राहयतीति तत्त्वं· यत्तु धू ४८
मत्वावच्छिन्नव्याप्तिसकलधूमनिष्ठैव न तु सन्निकृष्टधूममात्रनिष्ठा तथा च संबंध विशेषरूपाया स्तस्याः
संबंधिधूमसकलधूमनिरूप्यत्वात् सकलधूमोपस्थितिं विना तन्न मशक्यमिति तदर्थं सामान्य
लक्षणा प्रत्यासत्तिः स्वीकार्येति· तन्न· सकलसंबंधोपस्थितिं विनाप्येकत्रापि संबंधिन्येकनिष्ठसंबंध
स्य ज्ञानं संभवात्· एकस्मिन्नपि कपाले गृह्यमाणे घटसमवायग्रहात् सकलधूमनिष्ठसामान्यव्या

तेरपिस्मृतायायएकस्मिन्नेवपक्षधर्मे धूमेतृतीयलिंगपरामर्शादिनाग्रहस्वीकारात् ननुवाह्नेधूम
भूमानंतरंधूमत्वेनव्याप्तिग्रहेकथंधूमत्वस्यप्रत्यासत्तित्वं पुरोवर्त्तिनितस्यासत्वात् नचन तत्रतस्य
प्रत्यासत्तित्वंतथासत्यन्यत्रागृहीतव्याप्तेस्तत्रैवचागृहीतव्याप्ते ऽपर्वतेधूमदर्शनादनुमितिर्नस्या
दितिवेत् न वैज्ञानिकेनसंबंधेनपुरोवर्त्तिनितस्यसत्वादितिदिक् ननुसमानविषयत्वेनापीति अ
त्रवदंति इदंरजतमितिज्ञानस्यसमानविषयत्वेनापिरजतेरजतत्वप्रकारकेच्छाजनकत्वंननुसमा

एवमपीत ४ नप्रकारकत्वमात्रेणतथासतिरजतंनीयत्यत्रनियामकाभावादरजतेपिततःसास्यात् ननुस्व
प्रकाराधिकरणएवज्ञानस्येच्छाजनकत्वमतोनियमइतिचेत् तथासतिरजतभ्रमस्थलेरजतत्वप्रकार
कज्ञानाच्छुक्तौरजतत्वप्रकारिकेच्छानस्यात्किंतुरजतएवस्यात् नचपरस्यतत्रेष्टापत्तिः शुक्तौरज
तार्थिप्रवृत्त्यनुरोधेनतेनापितदंगीकारात् ननुसमानविषयत्वेनापितस्यतत्कारणत्वेपरस्यमते

तत्रशुक्तौभ्रान्तस्यात्·तन्मतेरजतत्वप्रकारकज्ञानस्यशुक्त्यविषयत्वादितिचेत्·तर्हिभ्रमोप्यन्यथा
ख्यातिरूपएवानन्यगतिकतयातेनस्वीकरणीयइत्यभीष्टमेवास्माकंयदिचेदंत्येनज्ञायमाना
याशुक्तौउपस्थितरजतभेदाग्रहादेवभ्रान्तत्वंभवतीतितेनपरेणान्यथाख्यातिःस्वीकरणीयानतदा
50 पिज्ञातएवविषयेदृष्टभेदाग्रहादपीच्छेतितेनाभ्युपेयमन्यथाऽतिप्रसंगात्·तथाचभाविनिसुखा
दौज्ञानएवेच्छास्यादितितज्ज्ञानार्थंसामान्यप्रत्यासत्तिस्तेनाकामेनापिस्वीकरणीया·वस्तुत ५०
स्तुलाघवेनेष्टाभेदाग्रहस्यैवेच्छाजनकत्वमितिअन्यथाख्यातिसाधनावसरएवोक्तप्रायं·तस्मादन्य
त्रापिज्ञानस्यसमानविषयत्वेनैवेच्छाजनकत्वादनागतसुखादिज्ञानार्थमवश्यंसामान्यलक्षणा
प्रत्यासत्तिःस्वीकरणीयेति·तन्न·अस्तुतावत्समानविषयत्वेनज्ञानस्येच्छाजनकत्वंतथाप्यना
गतज्ञानस्यानुमानेनाप्युपपत्तेस्तदर्थंसामान्यप्रत्यासत्तेःकल्पयितुमनुचितत्वादितिकृत्स्नेनाप

साध्यं गुर्वित्यनुशयेनाह• किंचेति• नोपा—धिरिति• तस्य साध्यव्यभिचारव्यधिकरणतयात
दव्याप्यत्वेन तत्साधनतायाः पत्यासानर्हत्वादिति भावः। एतन्नकोपकारमतमाशंकते• स्यादेतदि
ति• पक्षधर्मताबलेल्भ्यमिति• तथा च बाधानुन्नीतपक्षेतरेऽपि नातिव्याप्तिरिति भावः। कृतकत्व
मिति• यद्यप्यत्र व्याप्तिसत्वे व्यभिचारव्याप्तोपाधेरनुपपत्तिः। न च पक्षधर्मताबललभ्यमित्य
त्र व्यभिचारस्य मेयत्वे सत्वान्नोक्तदोष इति वाच्यं• एवं हि तादृशपर्वतीयवह्निव्यभिचारितया धू
मस्यापि सोपाधितापत्तेः। तथापि सत्प्रतिपक्षे विरोधमात्रस्य तंत्रत्वेन पर्यवसितानित्यत्वसाध्या स्म४
भावसाधनद्वारा तदुत्पादनक्षमतयैवोपाधित्वमित्येतन्मते तात्पर्यं• न च कृतकत्वस्य पक्षवृत्ति
तया तद्व्यतिरेकस्य स्वरूपासिद्धत्वेन सत्प्रतिपक्षोत्थापकत्वमिति वाच्यं शब्दानित्यतावादिन
उपाधिदत्तेर्मते शब्दस्याकृतकत्वादिति भावः। अत एव कृतकत्वसाधनमाशंक्य निषेधति•

११२

यदियेतिदूषकतेति॰ सत्प्रतिपक्षोत्थापकत्वादित्यर्थः। तथाच व्यभिचारोन्नायकतापक्ष एवोपा
धेर्व्यभिचारव्याप्यत्वं न त्वन्यथापीतिभावः। ननु पर्वतो वह्निमानित्यादावपि पाषा वत्वा
57 दिकमुपाधिरेवं स्यात्॰ तस्यापि पक्षधर्मताबललभ्यपर्वतीयवह्निव्यापकत्वात् साधनाव्या
पकत्वात्॰ न चेष्टापत्तिः प्रमेयत्ववदव्यभिचारितस्यापि धूमस्य सोपाधित्वाविरोधादिति वा
च्यं॰ पक्षवृत्तित्वेनास्य सत्प्रतिपक्षोत्थापनेप्यसमर्थत्वात्॰ धूमे वह्निव्यभिचाराभावेन तदुन्नं त ५७ य ५
स्यासंभावितत्वात् तथाच तत्रातिव्याप्तिर्वज्रलेपायितेति दूषणोसत्येव दूषणान्तरमाह॰ एवं
सतीति॰ असमवेतत्वपर्यवसानवारणायाह॰ साव पृ तद्वृति॰ जन्येति॰ अत्र परमाणव सिद्धिदशायां
मनसोणुत्वासिद्धिदशायां वा गगनादौ व्याप्तिग्रहार्थं जन्यपदं॰ अखंडाभावे वन वैयर्थ्यमिति ध्येयं॰
व्यभिचारावारकस्यापि व्याप्तिग्रहौपयिकत्वादेव न वैयर्थ्यमित्यन्ये॰ जन्यमहत्त्वं महत्त्वावांतरजा

१३

त्तिविरोधपरेतिनवैयर्थ्यमित्यपरे॰ निश्चयेति॰ अत्रऽव्यपदंसमव्याप्तोपाध्यभिप्रायेणेतिध्येयं
नन्वत्रपक्षएवसाध्याव्यापकत्वात्पर्यवसितसाध्यव्यापकत्वंनास्त्येवेतिनातिव्याप्तिरित्यपरि
तोषादाह॰ किंचेति॰ कर्त्तव्योपाधिलक्षणस्यप्रथमंसंगृह्येमाह॰ यद्व्यभिचारित्वेनलिंगेनसा
धनस्यसाध्यव्यभिचारित्वंप्रमितंसउपाधिरित्यर्थः। नचाकाशादिसाध्यकेहेतौघटादेःस
पाधितापत्तिः घटव्यभिचारित्वेनाकाशादिव्यभिचारित्वप्रमासंभवादितिवाच्यं॰ घटव्यभिचा
रित्वंहिघटात्यंताभावसमानाधिकरणत्वमेवंचसाधिकरणत्वमात्रस्यैवगमकत्वेशेषवैयर्थ्यं
त्॰ यस्यसाध्यसमानाधिकरणस्यव्यभिचारित्वेनेतिविवक्षितत्वाद्वा॰ साधनपक्षधर्मावच्छिन्न
साध्यव्यापकोपाधिव्यभिचारित्वेनयथासाध्यव्यभिचारित्वानुमितिस्तथाग्रेस्फुटंयद्धर्मेति॰ न
नुपक्षधर्मतावललभ्यंतत्॰ तथाचपूर्वोक्तदोषइतिभावः। ननुसाध्यप्रसिद्ध्यवच्छेदकधर्मस्य

यावत्त्वंविवक्षितं·यत्किंचित्त्वंवा·नाद्यः।वायुंप्रत्यक्षःस्पर्शाश्रयत्वादित्यत्रोद्भूत——रू
पवत्त्वस्यानुपाधितापत्तेः।तस्यसाध्यप्रसिद्ध्यवच्छेदकप्रमेयत्वाद्यवच्छिन्नप्रत्यक्षत्वाव्यापकत्वा
58 त्·नांत्यः।धूमेऽपिमहानसत्वावच्छेदेनप्रसिद्धवह्निव्यापकव्यंजनवत्त्वादेरुपाधितापत्तेरिति
चेत्नात्रकेचित्·यत्किंचिद्धर्मएवविवक्षितः।किंतुसाधनव्यापकीभूतविशेषणाव्यभिचा
रिणीत्याद्यग्रिमग्रंथपर्यालोचनयातस्यैवलाभात्·व्यंजनवत्त्वंचनधूमव्यापकीभूतधर्मा ५८
वच्छिन्नवह्निव्यापकमितिनोक्तदोषः।नन्वेवंप्रमेयत्वेनवायोर्वह्नेरिंद्रियप्रत्यक्षत्वसाधनेद्र
व्यत्वावच्छिन्नवह्नीरिंद्रियप्रत्यक्षत्वव्यापकमुद्भूतरूपवत्त्वंकोकिलादिसाधारणेनमित्रापु
त्रत्वेनमित्रातनयश्यामत्वसाधनेमित्रातनयत्वावच्छिन्नश्यामत्वव्यापकंचनोपाधिःस्यात्·।
नचतयोःशुद्धसाध्यव्यभिचारानुन्नायकत्वेनानुपाधित्वमिष्टमेवेतिवाच्यं·प्रमेयत्वंवह्निरिं

काकरु शाकपाकेऽसे?

भिचारोन्नायकत्वो ५

द्धियप्रत्यक्षत्वव्यभिचारि·द्रव्येऽद्भूतरूपत्वव्यभिचारित्वात्·द्रव्यत्ववत्·मित्रापुत्रत्वंश्यामत्वव्य
भिचारि·मित्रातनयेनरेवाशाकपाकजत्वव्यभिचारित्वात्·अघटत्ववदित्येवंतयोरपिशुद्धसा
ध्यव्यभिचारोन्नायकत्वादितिचेत्·न·उक्तरीत्यातयोस्तत्रव्यभिचारोन्नायकत्वेप्यनुपाधित्व
स्यैवेष्टत्वात्·अविशेषितेनैवयद्व्यभिचारित्वेनलिंगेनहेतौविशिष्टसाध्यव्यभिचारेपिसाध्य
मानेपक्षधर्मताबलात्केवलंसाध्यव्यभिचारःसिद्ध्यतितस्यैवशुद्धसाध्यव्यभिचारोपाधि
४ दिति त्वव्यवहारात्·सएवसाधनव्यापकधर्मावच्छिन्नसाध्यव्यापकएवभवति·नचैवंतत्रव्यभिचारो
पिनस्यात्तस्योपाधिव्याप्यत्वादितिवाच्यं·नह्यत्रोपाधिरेवनास्तीतिब्रूमः।किंतुतयोरनुपा
धित्वंप्रत्यक्षसामग्र्यादेःसाधनव्यापकधर्मावच्छिन्नसाध्यव्यापकस्यतत्राप्युपाधित्वसंभवादि
त्याकूतः।तत्र·शुद्धसाध्यव्यभिचारोन्नयनस्यदूषकताबीजस्यसत्वेनतयोरनुपाधित्वस्यवक्तुम

शक्यत्वात्॰ निरुक्तलक्षणावच्छेदकेन तयोः संग्रहाच्च॰ स्वयं लक्षणाकरणसामर्थ्येनैत
द्व्यावर्त्तमायतत्र विशेषणांतरप्रक्षेपस्यानुचितत्वात् अन्यथा शुद्धसाध्यव्यापकमात्रसंग्रा
59 हकं लक्षणतावच्छेदकमभिधाय साध्यव्यापकत्वे सति साधनाव्यापकमित्युपाधिलक्षण
मिति सुकरमेव स्यात्॰ यदि तदस्फुरणेपि पक्षधर्मावच्छिन्नसाध्यव्यापकोपाधिस्फुरणे
व्यभिचारोन्नयनेनानुमितिप्रतिबंधात्तस्योपाधित्वे उक्तलक्षणाव्याप्तिरिति मन्यसे॰ तदा ५८
सा॰ व्याप॰ क॰ ४ साधनव्यापकधर्मावच्छिन्नप्रत्यक्षसामग्र्युक्तिपाध्यस्फुरणे उक्तरीत्या व्यभिचारोन्नायकयो
स्तयोः स्फुरणेप्यनुमितिप्रतिबंधात्तयोरप्युपाधित्वे एतल्लक्षणाव्याप्तिरपि वज्रलेपत्वात्॰ वि
शेषणाव्यभिचारिणीत्यादिकं च प्रकृताभिप्रायकं॰ अन्यत्तु प्रकारांतरेणापि शुद्धसाध्य
व्यभिचारोन्नयनमिति ध्येयं॰ यत्तु पक्षधर्मावच्छेदेनेत्यत्र साधनवतीति शेषः। तेन पक्षधर्मावच्छेदे

नसाधनवत्तिसाध्यंप्रसिद्धंतदवछिन्नसाध्यंपर्यवसितत्वेनाभिप्रेतमिति॰तत्तुक्तं॰वायुःप्र
त्यक्षोवायुत्वादित्यादौउद्भूतरूपाद्यावव्याप्ते॰उक्तलक्ष ताावछेदकसंग्रहीतत्वेनव्य
भिचारोन्नयनसमर्थत्वेनचतदनुपाधित्वस्यवक्तुमशक्यत्वात्॰नन्वेवमुक्तरीत्यापिव्य
भिचारोन्नयकस्योपाधित्वेनसंग्राह्यत्वं॰संग्राहकंचतद्धर्मावछिन्नसाध्यव्यापकत्वेस
तितद्धर्मावछिन्नसाधनाव्यापकत्वं त्रसाधनाव्यापकत्वंतद्वृत्तिधर्मावछिन्नसाध्यव्या
पकत्वंवा॰स्वानधिकरणीभूतसाधनाधिकरणावृत्तिधर्मावछिन्नसाध्यव्यापकत्वंवा
लक्षणमस्तु॰ तथैवंगंधप्रागभावावछिन्नोघटोगंधवान्पृथिवीत्वादित्यादौगंधप्राग नद३
भावकालीनत्वावछिन्नसाध्यव्यापकंगंधप्रागभावकालीनत्वावछिन्नपृथिवीत्ववति
पक्षेसाधनव्यापकमेतत्कालीनरूपवत्वादिकमुपाधिःस्यात्॰नचेष्टापत्तिरप्रसिद्धं

60 तादित्तिचेन्न॰ न॰ यद्धर्मवति साध्यव्यापकत्वं तद्धर्मवति साधनाव्यापकत्वमित्यर्थात्॰ उक्तो
पाधिस्थले न तथा॰ तद्धर्मवति पक्षे साध्य व्यापकत्वात्॰ न चैवं स श्यामो मित्रापुत्रत्वादित्य
त्र नरत्वावच्छिन्नश्यामत्वव्यापकं मित्रापुत्रकर्तृंसादौ साधनाव्यापकं शाकपाकजत्वमु
पाधिर्न स्यात्॰ नरत्ववति साध्यव्यापकस्य तस्य तद्वति साधनाव्यापकत्वाभावात्॰ मि
त्रापुत्रस्य नरस्य सर्वस्यैव शाकपाकजत्वादित्ति वाच्यं॰ नरकृंसात्यतरत्वादिकमादा ९०
यत्राप्युक्तलक्षणसत्वात्॰ अत्र वायुः प्रत्यक्ष प्रमेयत्वादित्यादौ रूपत्वावच्छिन्नसा
ध्यव्यापकमुद्भूतत्वादिकमुपाधिः संग्राह्य एवेति न तत्रातिव्याप्तिः। प्रमेयत्वं प्रत्यक्षत्व
व्यभिचारि॰ रूपे उद्भूतत्वव्यभिचारित्वात् ~~[illegible]~~
~~[illegible]~~। गुणत्ववदित्यादिक्रमेण तस्यापि प्रकृतसा

स्नाध्यव्यभिचारो[illegible]न्नायकत्वसंभवात्. नचतस्यस्वीकृतत्रिविधोवहिर्भावादुपाधित्वस्वीका
रेऽप्रसिद्धांतः। तस्योपलक्षणत्वात्. पक्षधर्मावच्छिन्नसाध्यव्यापकमध्यएवपूर्वेत्राद्धा. पक्षधर्मपदे
नसाधनसमानाधिकरणधर्मस्यैवविवक्षितत्वादितिवेत्. अत्रवदंति. घटः पृथ्वीद्रव्यत्वादित्य
त्रघटान्यत्वावच्छिन्नपृथ्वीवीत्वव्यापकंपक्षएवसाधनाव्यापकं. घटावृत्तिगुणवत्वमुपाधिः। तत्रवे
त्तानिलक्षणान्यव्याप्तानि. घटान्यत्ववतिसाध्यव्यापकस्यतस्यतद्वतिसाधनाव्यापकत्वाभावा
त्. पक्षेसाधनव्यापकस्यतद्वृत्तिधर्मावच्छिन्नसाध्यव्यापकत्वाभावात्. स्वानाधिकरणीभूतसाध
नाधिकरणीभूतपक्षधर्मावच्छिन्नसाध्यव्यापकत्वाभावाच्च. नचशुद्धसाध्यव्यभिचारानुन्नायकत्वे
नायमुपाधिरेवनभवतीतिवाच्यं. द्रव्यत्वंपृथिवीत्वव्यभिचारि. द्रव्यत्वपटत्वप्रमेयत्वानीतिप्रतीति
विशेष्यत्वेसतिघटाव[illegible]त्तिगुणवत्वव्यभिचारित्वात्प्रमेयत्वादिवदित्यादिक्रमेणतत्संभवात्. ।

अत्र द्रव्यत्वेति स्वरूपासिद्धिवारणाय नन्वव्यभिचारावारकत्वेन वैयर्थ्यमिति वाच्यं । त्रितयगो
२२ चरं प्रतीति विशेषविशेष्यत्वे व्यर्थत्वशंकानवकाशात् व्यर्थविशेष्यत्वनिवारणायाह । पटत्वेति ।
एवं च पटत्व एव व्यभिचारवारणाय विशेष्यमिति मन्तव्यं । व्याप्तिग्रहस्थानार्थमाह । प्रमेयत्वेति ।
61 घटत्वे व्यभिचारवारणाय सत्यंतं । यद्वा द्रव्यत्वभिन्नघटधर्मान्यत्वे सति घटावृत्ति गुणवत्त्वव्यभि
चारित्वादिति । अखंडाभावे च न व्यर्थत्वशंकेति ध्येयं । न च यद्व्यभिचारित्वमात्रेण साधनस्य साध्य ६१
व्यभिचारानुमितिः स एवोपाधित्वेन संग्राह्यः । अस्य च विशेषणांतरपक्षेपेण तथात्वमिति वाच्यं
एवं क्षित्यसत्त्वे साध्ये प्रमेयत्वादौ साधने उद्भूतरूपवत्त्वादिरुपाधिरेव नेति किं तत्संग्रहार्थमुक्त
लक्षणानुसरणप्रयासेन । स्वासामर्थ्येन तद्व्यावर्तनाय लक्ष्यतावच्छेदके विशेषणदानमनु
चितमेवेति । वयं तु ब्रूमः । यद्युक्तरीत्या व्यभिचारोन्नायकस्योपाधित्वेन संग्राह्यत्वं । तदा पर्यवसितसा

व्यापकत्वपक्षधर्मावच्छिन्नसाध्य ५

ध्याव्यापकत्वे साध्यसामानाधिकरण्ये सति वा साध्यव्यभिचारिसाधनव्यापकत्वमुपाधिलक्षणं वो
द्धव्यं· अत्र च निरधिकरणे साध्यविरुद्धे च सर्वथोपाधिव्यवहारविरहितेऽतिव्याप्तिवारणाय सत्वं
टी३ तव्यं नवत्वादेर्धूमादिहेतावुपाधित्वप्रसंगवारणाय साध्यव्यभिचारीति नन्वेवमुपाधिज्ञानकाल
एव साधने साध्यव्यभिचारभाननियमात्तदुन्नयधारास्य दूषकत्वं न स्यादिति चेत्· म्नां नोसि· न ह्युने
नैवरूपेण ज्ञानस्यास्य व्यभिचारोन्नायकत्वं· किंतु शुद्धसाध्यव्यापकत्वादिना इदं तु सकलसंग्रा
हकमात्रं· यथाऽसाधारणादीनां विपक्षवृत्तित्वादिनैव दूषकत्वं· संग्राहकमात्रमुभयकोट्युपस्था
पकत्वादि· इदं च सर्वैरेवाभ्युपेयं अन्यथापर्यवसितत्वाद्यस्फुरणे शुद्धसाध्यव्यापकत्वस्फुरणेपि
व्यभिचारोन्नायकत्वं न स्यात्· न चानुमितिप्रतिबंधकज्ञानविषयतावच्छेदकमुपाधित्वमिति निरू
पणमिति ग्रंथविरोध इति वाच्यं· अस्य यथाश्रुताभिप्रायेण सर्वसमाधेयत्वात्· यद्वा साध्यव्यापकत्वा
टी१ ता१ पुस्तकांतरे साधनाव्यापकत्वं वाच्यमित्यभिप्रायेण

वा१

ग्रहणातिरिक्तेसाधनसमानाधिकरणोयोधर्मस्तदवच्छिन्नसाध्यव्यापकत्वेसतिसाधनाव्याप
62 कत्वं·नन्वेवंपर्वतरूपपक्षधर्मावच्छिन्नवह्निव्यापकत्वेनधूमाव्यापकत्वेनचज्ञातस्यपाषाणत्वादेः
शुद्धसाध्यव्यभिचारानुमापकत्वंस्यात्‌ अन्यथातेनरूपेणज्ञातस्योद्भूतरूपवत्वादेरपितत्तस्याद
विशेषादितिचेत्‌·न·धूमेवह्निव्यभिचारस्यबाधितत्वेनततएवतदनुमित्यभावात्‌·बाधानवता
रदशायांलिंगादिप्रतिसंधानकालेतद्भ्रमानुमितेरिष्टत्वादितिदिक्‌·नचयद्व्यभिचारित्वेनत्या ६२
दिनानिरुक्तस्यैवसकलसंग्राहकत्वंसंभवति·किमनेनेतिवाच्यं·तस्यलक्षतावच्छेदकत्वेनोप
योगात्‌·अस्यचलक्षणत्वात्‌ अतएवग्रंथकृतालौकिकप्रत्यक्षादिलक्षतावच्छेदकमभिप्रायेण
कृतंइतरभेदानुमानेएकस्यपक्षतावच्छेदकत्वेनोपयोगादितिसंक्षेपः।क्वचित्साधनमिति·
ध्वंसोविनाशीजन्यत्वादित्यादौभावत्वाद्युपाधावित्यर्थः।क्वचित्तद्व्यत्वादीति·वायुर्वह्निरि

लक्षतं ३

द्रियप्रत्यक्षः प्रमेयत्वादित्यादौ रूपवत्त्वाद्युपाधावित्यर्थः क्वचिन्महानसत्वादीति· अयंधूमवान्व
ह्नित्वादित्यादौ व्यंजनत्वाद्युपाधावित्यर्थः। सर्वविधस्योपाधेरुक्तं स्वरूपमुपपादयति· तथाहीति·
अतएवेति· नहि विशिष्टव्यभिचारसाधनानंतरं विशेष्यव्यभिचारस्य साधने येनार्थांतरं स्यात्· किं
तु तत्सिद्धिरेव पक्षधर्मताबलाद्विशेष्यव्यभिचारमादाय· यदा लिंगेन विना पक्षे साध्यप्रतीत्य
पर्यवसानं तदेव पक्षधर्मताबलात् सिध्यतीभावः। तदेव दर्शयति· अन्यथेति· एतच्च प्रकृताभि
प्रायं· अन्यत्रोक्तप्रकारांतरेणाभुक्तसाध्यव्यभिचारोन्नयनेपि नार्थांतरमिति ध्येयं· ननु विशेष्याभा
व विशेष्याभावस्य विशिष्टाभावयोर्भेदेन विशेष्यव्यभिचारविशिष्टव्यभिचारयोरपि भेदात्पक्ष
धर्मताबलादपि विशिष्टव्यभिचार एव सिद्ध्येत् ननु विशेष्यव्यभिचारः। अनुमितेर्व्यापकतावच्छे
दकप्रकारकत्वनियमादित्यनुशयेनाह· यद्वेति· साध्येहेतौ च प्रत्यक्षप वह्निविंद्रियप्रत्यक्षपरं·

रं१

(अव्यभिचारत्वेत्यग्रिमग्रंथानुरोधादाह)

स२

तद्रूपत्वादौ व्यभिचारादाह सत्यंतं द्रव्यत्वमव्यभिचारिव्यापकं यस्येत्यर्थः। नतु षष्ठीतत्पुरुषः
तथा ति सत्यंतमात्रस्यैव व्याप्यत्वेशेषवैयर्थ्यापत्तेः। दृष्टांतासिद्धिस्वरूपासिद्ध्योरापत्तेश्च
६३ तद्घटत्वादौ व्यभिचारादाह॥ वेद्र्व्यत्वादि॥ अत्र यद्यपि प्रत्यक्षव्यापकव्यभिचारित्वादित्यस्यैवग
मकत्वे द्रव्यपदसहितं सत्यंतं व्यर्थं तथापि व्यभिचारस्याभावगर्भतया द्रव्यतद्घटितप्रतियोगि
कात्खंडाभावगर्भकृतौ न व्यर्थविशेषणत्वमिति भावः। वस्तुतस्तु॥ द्रव्यप्रत्यक्षत्वव्यापकपद ६३
मुद्भूतरूपवत्त्वाद्युपाधिपरमतो नोक्तदोषः। नवैवमस्योपाधित्वेन साध्यव्यभिचारानुमापकत्वं
न निर्वहेत् तदाहितन्निर्वहति॥ यदितस्य पर्यवसितसाध्यव्यापकत्वज्ञानं व्यभिचारानुमानप्रयो
जकं भवतीति वाच्यं॥ विपक्षबाधकत्वेन व्याप्तिग्रहौपयिकतया तत्प्रयोजकत्वसंभवात् यद्य
पि प्रमेयत्वादिहेतौ प्रत्यक्षाव्यभिचारित्वानुमाने निरुक्तद्रव्यत्वाव्यभिचारित्वं स्वरूपासिद्धं तथा

ता

(स्यामत्वव्यभिचारितामावत् स्यामभित्रातनयपिकान्यतरत्वाद्दसाधारण्यमित्यर्थः। एकविशिष्टेऽपरवैशिष्ट्ये इति न्यायेन। प्र

[illegible]पि द्रव्ये रूपव्यभिचारित्वादित्येव तदनुमानं तत्र। नह्येकेनैव रूपेण सर्वत्र व्यभिचारानुमान
मिति नियम इति भावः। उक्तं प्रकारं साधनावच्छिन्नसाध्यव्यापकोपाधिस्थले प्याह। तथा मित्रेति।
हेत्वर्थः पूर्ववत्। नवाघटदृष्टांते साधनवैकल्यं। यत्र मित्रातनये कुतोप्याद्गवाक्यादितः शाकपा
कत्वाभावे ऽवगतस्तस्यैव घटभिन्नस्य दृष्टांतत्वात्। तत्रोपाध्याभावानवगतो संदिग्धोपाधितोप
तेः। डित्थ इतिवद्घट इति मित्रातनयस्य संज्ञाभेदः। तद्वृत्तिधर्मं वबाघटत्वमित्यप्याहुः। अन्ये
तु यत्किंचिदधिकरणाव्यक्तिवृत्त्यत्यंताभावाप्रतियोगित्वमेवाव्यभिचारित्वं प्रकृते विवक्षितं
तच्च यद्यपि तत्सामानाधिकरण्यमात्रे पर्यवसन्नं व्यभिचारिसाधारणं। तथापि संतीति पदम
हिम्ना विशिष्टवैशिष्ट्यलाभाद्यदधिकरणावच्छेदेन मित्रातनयत्वसामानाधिकरण्यप्रकृतत्व
मिचरितं विशिष्टता। तदधिकरणावच्छेदेन शाकपाकजत्वव्यभिचारवैशिष्ट्यं हेतुर्थो ऽभिमतस्तेनन
तो।

व्यभिचारिसाधारणंपदद्वयरूपमश्यामकिंचिन्मित्रातनयव्यक्तिवृत्तित्वाद्धेटान्यत्वेप्यस्त्येवेति
नतत्रसाधनवैकल्यमपीत्याहुः।पूर्वंसाक्षाद्धूमत्वसाध्यव्यभिचारोन्नायकस्यैवोपाधित्वमंगीकृत्य
64 विशिष्टसाध्यव्यापकस्यापिसाक्षादेवतथात्वमितिदर्शितंसंप्रतिसा सा[illegible]द्विशिष्टसाध्यव्यभिचा
रानुमानद्वारावा। तदुन्नायकस्यदोषत्वेविशेषाभावात् कथंचित् तदुन्नायकएवोपाधि
रित्यभिप्रेत्याह।यद्वेति।साधनव्यभिचारीतिसाधनंव्यभिचारियस्यसाधनाव्यापकइत्यर्थः। ६४
साध्यव्यभिचारोन्नायकःस्वव्यभिचारित्वेनेतिशेषः।तेनसाध्यव्यभिचारोन्नायकेप्रयोजक
त्वादेनातिप्रसंगः।अभ्युपेत्याह।किंचेति।अर्थान्तरस्येत्युपलक्षणं।अप्राप्तकालस्यापि
द्रष्टव्यं।तत्राभावादिति।तत्रास्फुरणादित्यर्थः।तत्रेति।पक्षइतिशेषः।विशिष्टाव्यापकत्वा
दिति।पक्षधर्मावच्छिन्नसाधनावच्छिन्नसाध्यस्यपक्षएवाव्यापनादित्यर्थः।तत्रेति।यद्यप्यनु

कूलतर्काग्रंथस्तन्मतेनव्याप्तिग्राहकस्तथापितदभावेनिवर्त्तकाभावेनव्यभिचारसंशयान्नसा
ध्यव्यापकत्वनिश्चयइतिभावः पक्षमात्रेति॰ यद्यप्येतन्मदुपाधावप्यस्तिकिंचित्तथाप्यनुकूल
तर्काभावादेवसाध्यव्यापकत्वानिश्चयइतिभावः॰ यद्यपिपर्वतत्वय पर्वतावयववृत्तिरूपादेर
पिव्यावर्त्तकंतथाप्युक्तस्योपाधितायांतस्यतत्वंनप्रयोजकं॰ किंतुतस्यपक्षमात्रव्यावर्त्तक
त्वमेवतथात्वेनचोक्तोपाधेःसाधनाव्यापकतानिर्वाहादित्यभिप्रेत्यततथोक्तं॰ पूर्वोपा
धितापूयोजकीभूतपक्षमात्रव्यावृत्तिप्रयोजकविशेषणवत्वादितिप्रकृतग्रंथार्थोदुष्ट
त्वइत्याकुः। त्रिद्युयथासख्यंतर्कमाह॰ तदुत्कर्षेणात्यादि॰ चतुर्थंतर्कमाह घटेति॰ प्रतियोगि
ध्वंसप्रागभावावच्छिन्नसमयस्यप्रतियोगिका त्वनियमादितिभावः। घटोन्मज्जनप्रसंगम
दृष्टेवशंकते॰ ननु किमिति॰ रक्षादेरपिरूपाद्यव्याप्यत्वापत्तिरितिभावः। नेति॰ सर्वकार्यका

साध्यस्वर

65 रणाभावस्योपजीवनमावश्यकं॰ क्वचित्साक्षात्क्वचित्परंपरयेतिभावइत्याकुः।पक्षेतरस्येति॰
स्वव्याघातकत्वलक्षणाप्रतिकूलतर्केणतस्यसाध्याव्यापकत्वनिर्णयादितिभावः।यद्य
पिविशेषदर्शनदशायामुपाधित्वसंशयेनव्यभिचारसंशयाधापकत्वंतस्यापितथापिवस्तु
तउपाधित्वाभावेनसंदिग्धोपाधित्वंतस्यनास्तीतिभावः साध्यव्यापकतापक्षमिति॰ साध्य
व्यापकताकोटिमित्यर्थः तथाचोक्तरीत्यासाध्यव्यापकत्वनिर्णयएवतत्रवाव्यस्तेननत ६५
त्संशयाधापकत्वमितिभावः।उभयमिति॰ अनुकूलतर्काभावउपाधिश्चेत्युभयं उपाधेरि
तिआत्मनःसाध्यव्यापकत्वनिर्णयार्थमित्यर्थः।अनुकूलतर्कसत्वेहिहेतोःसाध्यव्याप्यतयो
पाधेस्तदव्यापकतयासाध्यव्यापकत्वनिश्चयादितिभावः।सोपाधाविति साधारणे तिशे
षः।विरुद्धेसाध्यसंबंधाभावेप्युपाधिस्वीकारादितिध्येयं॰ विनिगमकाभावादिति॰ उपाध्यभा

वेनिरुपाधित्वभंगप्रसंगएवानुकूलतर्कं स्यादित्यनुकूलतर्काभावस्यापिस्वरूपलाभार्थमुपाध्यु
पजीवकत्वं· एवं चोभयोरपिपरस्परापेक्षितयाउपजीव्यत्वाविशेषाद्विनिगमकाभावइत्यर्थः।
अन्येत्विति क्वचित्साधनवतियद्व्यावृत्त्यालिंगेनयस्यसाधनस्यसाध्यव्यावृत्तिरनुमातुंशक्यतेतत
स्मिन्साधनेसउपाधिरित्यर्थः। सचेति एतद्द्वयपक्षाव्यावृत्तिमुपाधिमभिप्रेत्योक्तं· तदन्यस्य[illegible]वान्य ले४
त्रैवक्वचित्साधनवतिस्वव्यतिरेकात्साध्याभावसाधनेव्यभिचारज्ञानद्वारैवतस्यदूषकत्वमिति
भावः।साध्यसाधनसंबंधाभावेपितत्रास्तीतिवक्तत्वात्तदुक्तं· वस्तुतः साध्याभावमात्रेतात्पर्यंताव
तैवदूषकत्वसंभवात् अतएवयद्व्यावृत्त्यासाध्यंनिवर्ततइत्युक्तं अतएववह्निर्व्यावर्त्ततेहितद्व्या
वृत्त्याधूमवत्त्वमिति तत्रेति· अयोगोलकइत्यर्थः। अतएवतत्रसाध्यंव्यावर्त्तते· अतएवसाध्यसा
धनसंबंधाभावोपीत्यर्थः। यत्तु· अत्रसाधनावच्छिन्नसाध्यव्यापकत्वेसतिसाधनाव्यापकउपाधि

संबंध२ नि२

रिति तात्पर्यमत्यालक्षणमुक्तं संभवतीति· तन्न· तस्य पूर्वपक्ष एव दूषितत्वात्॥ विरुद्धोपाध्यसं
ग्रहापत्तेः। एतेन साध्यसाधनयोर्व्यापकत्वे सति साधनाव्यापकत्वं यन्नेनोक्तमिति निरस्तं· विरुद्धे
66 साध्यसाधनसंबंधाभावेन तदुपाध्यसंग्रहात् स्वव्याघातकत्वेनेति। तेनापि स्वव्यतिरेकद्वाराप
क्षे साध्याभावसाधने पक्षेतरस्योपाधित्वप्रसंगेनेत्यर्थः। कस्यचिन्मतं दूषयितुमुपन्यस्यति· य
त्त्विति· केवलान्वयिनः साधनव्यापकत्वेन व्यभिचारोन्नयनादिद्वारा दूषकताभावादुपाधित्व ९९
मसंभवतीति तन्निवृत्त्यर्थं व्यतिरेकीत्युक्तं आपाद्येति वह्निधूमसंबंधोपाधित्वप्रसिद्धेरित्यर्थः। व
ह्निधूमसंबंध इति न ह्यत्र वह्निधूमसंबंधोपाधित्वमापाद्यं· किंतु वह्निधूमसंबंधे पर्वतेतरोपाधिक
त्वं· एतच्च पर्वते बाधितसाध्यके पर्वतवृत्तिहेतौ प्रसिद्धमेवेति भावः। धूमाव्यापकत्वेनानिश्चिते पक्षे
तरत्वे वह्निव्यापकत्वमापाद्यमित्यत्र तात्पर्यमित्यन्ये· ननु सत्प्रतिपक्षोऽव्यापकत्ववत् बाध्योऽव्यापक

हे२

त्वेनापि दूषकत्वे विशेषाभावात्· साध्यव्यापकत्वे सति पक्षावृत्तित्वमेवोपाधित्वे प्रयोजकमिति ये
मन्यन्ते तन्मतमुपन्यस्यति केचित्त्विति· अत्रेदमनभिमतिबीजं सोपाधाववश्यं व्यभिचार इत्यादिना
उपाधेर्व्यभिचारव्याप्यत्वस्य सर्वसिद्धत्वादत्राव्यभिचारित्वे तदसंभवः। न च तत्र व्यभिचारोन्नयनव
दत्रापि बाधोन्नयनस्य दूषकताबीजस्य सत्वादुपाधित्वं स्यादेवेति वाच्यं। एवं ह्यनुमितिविरोध्य
व्याप्यकमात्रस्योपाधित्वेऽप्रयोजकत्वादेरपि तदन्तर्भावापत्तेः। तत्र वृद्धव्यवहाराभावान्न तथेति
यद्यपि तदा व्यभिचारिण्यपि व हेतौ साधनाव्यापकस्यैवोपाधित्वेन वृद्धव्यवहारादस्यापि न तथात्वमि
तितुल्यं· यत्रेति· हेतोः पक्षवृत्तित्वे तद्व्यापकीभूतस्योपाधेरपि पक्षवृत्तितया तद्व्यतिरेकस्य स्वरूपा
सिद्धत्वे बाधाद्यनुत्थापकत्वादित्यर्थः। ननु साध्यरूप उपाधावुक्तलक्षणमव्यापकं तस्य स्वाव्या
वर्तकत्वादित्यत आह· साध्यं चेति· तथा च व्यभिचारोन्नयनपक्षे साध्याविशिष्टत्वाद्यथा स्यान्न संग्राह्यत्वं

67

तथा तत एवात्रापीति भावः। यद्यप्ययं साध्यव्यभिचारी साध्यव्यापकव्यभिचारित्वादित्यत्रोपाधि
भेदान्न साध्यावेशिष्ट्यं तथापि साध्यवद्धेतोरपि संदिग्धत्वेन साध्यावेशिष्ट्यं वस्तुतः साध्यव्याप
कत्वज्ञानस्य विपक्षत्वाधकत्वेन व्यभिचारानुमानप्रयोजकत्वादुपाधिव्यभिचारित्वमेव तत्र हेतु
रित्युक्तं एवं च साध्यावेशिष्ट्यमिति भावः। अनुमिती ति। अत्रेदं चिंत्यं। सद्धेतौ साध्यस्य साधनाव्याप ६७
कत्वाभावादेवानुपाधित्वमिति कथमितिमनुमात्रोच्छेदः। नवानंतरोक्तसाधनव्यापकोपाधिवा
दिमते दितिवाच्यं। तन्मतेपि यत्र पक्षावृत्तिहेतुस्तत्रैव तत्स्य तथात्वेन पक्षवृत्तिहेतौ साध्यस्यानु
पाधितयाऽनुमितिमात्रोच्छेदासंभवादिति प्रसंगादाह सवेति कश्चिदत्रोपाधिरस्तिन वेत्याकारो
न संदिग्धोपाधिः। तस्य शंकापीशावीत्वेनाप्रतिबंधकत्वादित्यन्यथैवाह। पचेति। अर्थान्तरमि
त्यापाततः परमार्थतस्तु उभयसाधनेपि प्रत्येकमुपाधिः स्यादेवेति दूषणं द्रष्टव्यं। तृतीयसंदिग्धोपा

धिमुदाहरति-यथावा शंकेति-संदिग्धेतिदूषणोमात्रे दृष्टान्तोयं-यद्यपिपृथमेनसंदिग्धोपाधिना
साध्याभाववतिसाधनसंदेहोनधियः।किंतुसाधनवत्येवपक्षेपक्षसमेवास्वव्यावृत्तिसंदेहेनसा
ध्याभावसंदेहः-सचनव्यभिचारसंदेहहेतयादोषः।अनुमानमात्रोच्छेदापत्तेः।तथापितदुच्छेदमिया
स्वरसवाहिनस्तस्याप्रतिबंधकत्वेप्यन्याहितस्यतस्याप्रतिबंधकत्वमेव-फलबलात्अतएव
क्षित्यादिकंकर्तृकमित्यादेरप्रयोजकतयाहितस्तादृशोपिप्रतिबंधकएवेतिभावः।यद्वा-उ
पाध्यादिसंदेहेनहेतावुत्कटकोटिकोव्यभिचारसंशयएवाधीयतइतिफलबलात्तस्यप्रतिबंध
कत्वं-यद्यप्युपाधिसंदेहः स्वरूपसन्नेवप्रतिबंधकोनज्ञातः।परंप्रतिबंधसद्भावनंतज्ज्ञापकंनत
दुत्पादकमित्यकिंचित्करं-तथापिसंदेहज्ञापनमुखेनपराभिमतव्याप्तौसाधकमानाभावप्रदर्शनप
रंतदितिपरस्यतत्रसाधकाभावमापादयत्तत्संशयमापादयतीतिसप्रयोजनमित्याहुः।तुल्यमेवे

68 त्तिज्ञानमितिशेषः। इष्टापत्तिमाशंक्यदूषणांतरमाह संदिग्धोपाधेरिति तद्व्यतिरेकस्येति। एतन्नु
पक्षेसाधनव्यापकतासंदेहेन्यूयः संदिग्धोपाधिस्तदभिप्रायेणोक्तं। ननुतद्व्यतिरेकेणासाधारण्यं
बाधदशायांसपक्षीभूतेपक्षएवतत्सद्भावः। नचयत्रपक्षेस्वस्यसाध्याभावनिश्चयाभावेसत्या
क्षवाक्यादिनापक्षेतरत्वस्योपाधित्वानिश्चयस्तदभिप्रायेणोदमितिवाच्यंतत्रापिव्यतिरेकिणा
सत्प्रतिपक्षसंभवात् नवासाधारण्यंतस्यापिसत्प्रतिपक्षोत्थापकतयादोषत्वादित्यपरितोषा ६८
दाह पक्षावृत्तिश्चेतिपक्षावृत्तित्वज्ञानदशायामुपाधेर्दूषकत्वंनस्यादितिभावः। स्वतन्त्रेतियद्य
प्युपाधिज्ञानस्यस्वतः प्रतिबंधकत्वंनाशंकितंकिंत्वनौपाधिकत्वज्ञानविघटकत्वं। तथाप्यनौपा (ख्रप ६८)
2 ज्ञाने धिकत्वमेवनव्याप्तिधीर्करणामित्युक्तमितिभावः। तर्हिव्यभिचारज्ञानद्वारैवास्यदूषकत्वम
स्त्वित्याशं ह्ना। प्रीतिं यद्यपिज्ञायमानतयैवप्रतिबंधकत्वाभावाद्धेत्वाभासत्वशंकानास्येव।
तस्मादुपाधिरिति।
क्या।

स्था

५ गुणत्वस्य व्याप्यत्वादिति न्यायेन

तथाप्युपाधिदोषत्ववादिना केनापि रूपेणादोषत्वेऽवश्यं वक्तव्येऽनुमित्यसाधारणादोषत्वमेव
हेत्वाभासत्वं वाच्यमिति भावः। व्यभिचारोन्नायकत्वेनैवास्य दोषत्वमित्यभिसंधाय पूर्वोक्तदोष
निरस्यन्नाह आर्द्रेंधनेति बीजा चिंतनमिति निश्चितोपाधिदूषकताभिप्रायेणोदमुक्तं तस्मादुपा
धेर्निश्चयादिति उपादेर्निश्चयादोविल्या वर्जितो मानसो व्यभिचारनिश्चय इत्यर्थः। यान्निवि
रहेति तदनुमापकतयेत्यर्थः। यद्यपीदं दूषकताबीजमाकाशादुव्यत्वाव्याप्यं तद्व्यापकं गुणत्व
त्वादावप्यस्ति न च तस्योपाधित्वमेव लक्षणावच्छेदकासंगृहीतत्वात् आकाशवन्निष्ठात्यंता
भावप्रतियोगित्वरूपसाधनाव्यापकत्वाभावेन लक्षणासंगृहीतत्वात् तथापि दूषणताबीजा
त्तिप्रसंगस्यादोषत्वमेव अत एवाप्रयोजकत्वादेरपि व्यभिचाराद्युन्नायकत्वं दोषत्वे वास्य भि
चारित्वेन व्याप्तिविरहोन्नायकत्वं तद्बीजमिति भावः। यद्वोपाधिनास्य व्यभिचारित्वेन साधने

साध्यव्यभिचारित्वमनुमेयमेवेत्यादूयंदेतिं एतच्च यत्र व्यभिचारःऽधिकरणासंनिकर्षाद्यभा
69 वादयोग्यस्तत्र वोध्यं· अन्यथोपाधिव्यभिचारिस्वरूपविशेषदर्शनंजन्यव्यभिचारप्रत्यक्षाभे
दविवक्षितं· करादिदर्शनजन्यपुरुषप्रत्यक्षवत्· समानविषये प्रत्यक्षसामग्र्या वलवत्त्वात्·
न च यत्रापि व्यभिचारानुमितिस्तत्रापि तज्जनकपरामर्शस्यैव व्याप्तिधीप्रतिबंधकत्वे संभवात्
न तस्याप्रतिबंधकत्वमिति वाच्यं प्रत्यक्षेण व्याप्तिग्रहे विरोधिव्याप्यबुद्धेरप्रतिबंधकत्वात्· दृष्ट
अनुमानेन तु तद्ग्रहे सत्प्रतिपक्षतया तत्र प्रतिबंधकत्वस्येष्टत्वात्· न च ग्राह्याभावानुमि
तेरपि प्रत्यक्षाप्रतिबंधकत्वमिति वाच्यं प्रत्यक्षसामान्ये तथाभावेपि व्याप्तिप्रत्यक्षासाधा
रणेनानुमित्यादिसाधारणव्यभिचारज्ञानर्सीमाना — स्येव प्रतिबंधकत्वकल्पनात् कथम
न्यथा प्रत्यक्षान्तराप्रतिबंधकत्वेपि ग्राह्याभावसंदेहात्मनो व्यभिचारसंशयस्य व्याप्तिधी

प्रतिबंधकत्वमिति भावः। व्याप्तिविरुद्धाद्यनुमानद्वयेप्युपाधिमाशंक्य निराकरोति॰ नचेति॰ साधनेति॥
वह्निर्धूमव्यभिचारी आर्द्रेंधनव्यभिचारित्वादित्यादौ वह्न्यभाववद्वृत्तित्वादिकमुपाधिरित्य
र्थः। यद्यप्येतद्द्वयोगोलकत्वादौ साध्याव्यापकं॰ तथापि व्यभिचारास्फुरणदशायामेवोपा
ध्युपन्यासेन तदानीमुपाधित्वभ्रमाद्व्यभिचारानुमितिप्रतिबंधः स्यादिति भावः॥ उपाधीति॰
तथा च तदुच्छेदापत्तिलक्षणप्रतिकूलतर्केणा तस्य साध्यव्यापकत्वनिर्णयान्नोक्तदोष इति
भावः॰ ननु नोपाधिमात्रोच्छेदः। प्रमेयत्वादौ व्यभिचारिणि साधने तदभाववद्वृत्तित्वस्योपा
धेरसंभवात्॰ साधनाभावाप्रसिद्धेरित्यनुशयादाह॰ अवृत्तीति॰ अत्र च व्यभिचारास्फुरणद
शायामपि साध्याव्यापकत्वं सुग्रहमेवेति भावः। एतच्च व्याप्तिविरुद्धाद्यनुमानाभिप्रायेणो
क्तमिति ध्येयं॰ वृत्तिघटितव्यभिचारस्यावृत्तावसंभवात्तत्साध्यके साध्याव्यापकत्वासंभ

वात्-यत्तूभयकोध्युपस्थापकतावच्छेदकरूपवत्त्वलक्षणो।व्यभिचारो ऽत्र साध्यः।सवप
७० क्षविपक्षमात्रगायणगाना।दौवक्ष्यवेति-तन्न-अनुमितिप्रतिवंधार्थेद्वि व्यभिचारानुमानेन
वतस्यज्ञानमनुमितिप्रतिवंधकं अविरोधिविषयत्वात् किंतु विपक्षगामित्वादिज्ञान
मेवतथेति ननुवह्निमत्त्वपक्षधर्मावच्छिन्नसाध्यव्यापकत्वान्नोक्तदोषवृत्त्यप्रतिनोषाद्
ष्ट-संयोगाद्यावितिसंयोगविशेषाद्यावित्यर्थः।तथाच संयोगविशेषाद्वायुप्रत्यक्षमित्य ७०
त्रसंयोगविशेषःप्रत्यक्षत्वव्यभिचारी-यद्व्यापकव्यभिचारित्वात्-इत्यनुमानेसंयोगवि
शेषाभाववद्वृत्तित्वं तद्व्यापकव्यभिचारित्वादिरूपसाधनव्यापकत्वान्नोपाधिरित्यर्थः।
उपाधिचदाभासमानानामुपाधित्वज्ञानाधीनज्ञानत्वादाह-अथेति-व्यभिचारानुन्न
यनदशायांसत्प्रतिपक्षोत्थापनेऽनुमितिप्रतिवंधात्तदुत्थापनद्वाराऽस्यदूषकत्वमेव-दूषित

स्तुन्नियमभपक्षइत्यभिप्रेत्योपाधेः सत्प्रतिपक्षोव्यापकतापक्षमात्रंव्यैवतदाभासानाह॰ असाधा
रणेतिकेवलान्वयिनिसपक्षस्यकेवलव्यतिरेकिणिविपक्षस्यव्यतिरेकेऽसंभवादसाधारणापासं
भवइत्यतआह॰ अन्वयव्यतिरेकिणीतिपक्षाव्यापकेतिपक्षाव्यावर्त्तकविपर्ययइत्यर्थः।पूर्व
साधनतायाइतिअत्रचपूर्वसाधनव्यतिरेकत्वंनोपाधित्वप्रयोजकमितितात्पर्यंसाध्यव्यापकता
ग्राहकेसतितादृशस्याप्यजन्यत्वादेरुपाधित्वस्वीकारादित्तिनन्वितिसमीचीनप्रतिपक्षोच्छेदः
द्वितीयस्यप्रतिपक्षस्यसोपाधित्वनियमइतियावत् ननुसत्प्रतिपक्षकेत्वाभासोच्छेदइत्यर्थः।
सत्यपितस्योपाधित्वेनदप्रतिसंधानेनदशाविशेषेतद्दोषत्वसंभवात् किंचयथाश्रुतेयत्रैवो
पाधेःसाध्याव्यापकत्वंतत्रैवदस्थापनायाव्यभिचारेसाध्याव्यापकत्वाग्रहेउपाधिनातद्धेतुव्य
भिचारेणोभयथाविशेषादर्शनासंभवेसत्प्रतिपक्षासंभवादग्रिमग्रंथविरोधः।तथाचयथोक्त

मदुक्तमेवमनोहरं।

मेवमनोह्यं· आभासत्वमिति· व्यभिचारेणेतिशेषः। तत एवेति· आभासताप्रयोजकव्यभिचारा
दित्यर्थः। नित्यत्वादेरिति· यद्यपि नित्यत्वं तत्र सदुपाधिरेव न च प्रागभावे साध्याव्यापकत्वान्न
71 तथा· भावत्वस्वरूपपक्षधर्मावच्छिन्नसाध्यव्यापकत्वात्तथापि तत्त्वेनोपाधित्वप्रयोजकं वस्तु
व्यवस्थानुपपत्तेरेव· किंतु साध्यव्यापकताग्राहकानुकूलतर्कादिमत्त्वं तदसत्त्वे चाभासत्वमित्य
त्र तात्पर्यं· साध्यव्यापकताग्राहकाभावादुपाध्याभासत्वमुक्त्वा साधनाव्यापकताग्राहकाभा ७१
वात्तदाह· एवमिति·।। ।।अवसरसंगत्याह· व्याप्तीति· व्याप्तिनिरूपणानंतरमित्यर्थः। पक्षत्वे
निरूपिते तद्धर्मत्वं सुनिरूपणमिति तन्निरूपयति तत्रेति· संदिग्धेति· केवलान्वयिसंदेहस्या व्यधि२
५२ ग्रेऽपक्षत्वादिति भावः। अव्यावर्त्तकतेति· अतीतस्याप्युपलक्षणत्वेन तादृशसंशयविषय
त्वात् साध्यस्य सिद्धसाधनेऽपि पक्षतास्यादित्यर्थः। व्यासज्यप्रतियोगिकाभावाभिप्रायेणाह·।

अथ पक्षधर्मता निरूप्यते अथेति व्याप्तिनंतरं निरूप्यते तिकेवलिताः छ

उभयेति केवलान्वयिनि बाधकाप्रसिद्धिश्चेत्यपि द्रष्टव्यं न त्वेवमस्त्वित्यत आह · नापीति न
नुशब्दातिरिक्तत्वं साधके विशेषणमित्यत आह · प्रत्यक्षेति · सजातीयत्वं तत्र विशेषणमाशं
क्याह · एकेति · संदेहवदिति · न वेश्वरसिसाधयि[illegible]मादाय तदापि तत्समस्त्येवेति वाच्यं । स
धिकरणसिसाधयिषामादाय सिद्धसाधनस्थले पि पक्षतापत्त्या सिद्धिसमानाधिकरणसि
साधयिसाया एव विवक्षणीयत्वात् न च तद्वारणाय स्वजनकत्वमेव विवक्ष्यतां तत्रेश्वरसाधार
णमिति वाच्यं · तदपि हि न सिसाधयिषात्वेन ग्राहकमिति प्रसंगात् किंतु सिद्धिसमानाधिकरण
सिसाधयिषात्वेनैव · एवं चावश्यकत्वात्प्रथमोपस्थितिकत्वाल्लाघवाच्च तदेवास्तु किं चैवं सिद्ध
साधनोच्छेदः । भगवदिच्छाया स्तत्रापि सत्त्वात् न च तत्र तत्सत्त्वे पि न तस्याः सिसाधयिषात्वं · तत्त्वा
त्सिद्धिसामग्रीसाहित्यमेवं हि सिसृक्षादिवत्तस्यास्तथात्वमिति वाच्यं · एवं हि तत्र तत्सामग्र्यभा

वेसिसाधयिषाविरहस्तदभावे यत्तत्सामग्रीविरहे त्यन्योन्याश्रयात्तैर्योग्यतायाश्चैतदवच्छेदक
रूपापरिचयादितिभावः। सिसाधयिषाविरहसहकृतेति अत्र च साधकमानपदं सिद्धिपरं· तेनत
द्दशासिद्ध्यभाव एव पक्षता न चैवं संशयोत्तरप्रत्यक्षस्थलेपि पक्षतासत्त्वेऽनुमित्यापत्तिः। सम
नविषये सिसाधयिषाविरहसहकृतप्रत्यक्षसामग्र्या अपि तत्प्रतिबंधकत्वेन तत एव तदनुत्प
त्तिरित्युक्तमनुमितिलक्षणव्याख्यानावसरे· तत्रैवानुसंधेयं· ननु संदेहवत्यए सर्वपूर्वं सि ७२
साधयिषाया अप्यभावादिति स्वयमेवोक्तत्वात्तदा तत्प्रयुक्ता कथं पक्षता· उपलक्षणापद
स्य तद्वदेवातिप्रसक्तत्वादिति चेन्न· अत्र वदन्ति परामर्षोत्पादानंतरं स्वकारणादनु
[illegible] तदुत्तरक्षण एव वानुमितिरिति विनष्टपदवस्थानुमित्साप्रयु
क्तापक्षता तत्र तदानीं निर्विघ्नैव· यद्वा· प्रथमं यत्रानुमितिर्दृष्टसाधनतायाः प्रकृतव्याप्त्यादेश्च

मित्सा तदुत्तर ॰ क्षण एव प्र[illegible] नः स्मरणात्मकः णः परामर्षः [illegible] ३

समूहालंबनमेव स्मरणं तदुत्तरक्षण एव वानुमितिः सा । तदुत्तरक्षण एव विनश्यदवस्थव्याप्त्यादिस्म
रणा सा विद्या । मानसः परामर्शः तदुत्तरक्षण एव वानुमितिरित्यतो पि तदा तत्र सा सुलभेति । यदा
तु कथं चित्स्मरणादिरूपपरामर्शानंतरं ऽनुमितिः सोत्पद्यते तदा तो विनश्यदवस्थपरामर्शादनुमिति नं
स्तदा विनश्यदवस्थायाः पूर्वसत्त्वात्तदनुमित्यनंतरं तदनुमित्यात्मकपरामर्शात्पुनरनुमित्यंतरं मा
भूदतः स्वविषयानुपहिता सिसाधयिषा सिसाधयिषापदेन विवक्षितेति द्रष्टव्यं । अन्यत्तु द्वित्रिक्ष
णांतरितायामपि सिसाधयिषायामनुमितेरनुभूयमानत्वात् । सिसाधयिषापदेन स्वोत्पत्त्युत्त
रकालीनस्वविषयसिद्ध्यनुत्पादकाल एवात्र विवक्षितः । न चैवमद्य सिसाधयिषायां व्यासंगादि
ना सिद्ध्यनुत्पादे मासानंतरं पक्षीकृते पि विषये पक्षतासत्त्वेनानुमित्यापत्तिरिति वाच्यं । सिद्ध्य
नुगुणानंतरितत्वेनापि ऽनुत्पादकालस्य विशेषणीयत्वात् लिंगदर्शनव्याप्त्यादिस्मरणा

दिव्यवहितद्वित्रिक्षणायांसिसाधयिषायामेतदस्तीतितत्रानुमितिः। मासाद्यनंतरंवनानुमितिः
73 तत्रसिसाधयिषायावकुलोद्भासीनैतरँ चिंतत्वादित्याहुः। अत्रेदंचिंत्यं एवंयत्रानुमित्सानंतरंसि
द्धाननुगुणविषयांतरसंचारस्तदव्यवहितोत्तरक्षणएवस्मरण[illegible]लस[illegible]परामर्षस्तत्रानु
मितिर्नस्यात्‌· नचेष्टापत्तिः। परामर्षाव्यवहितपूर्वसमयेविनश्यदवस्थानुमित्सासत्वेनैक
क्षणांतरितायांतस्यामनुमित्यनुत्पादेलिंगदर्शनादिनाद्वित्रिक्षणांतरितायांतस्यामनुमित्यु
त्पादइत्यत्रमानाभावात्‌ स्वाव्यापारीभूतेनव्यवधानस्योभयत्रापितुल्यत्वात्‌ तस्माद्यदिव्यव ७३
हितायामपिसिसाधयिषायामनुमित्युत्पादोभ्युपेयतेतदायावत्क्षणांतरमनुमित्यभावउ
भयसिद्धस्तावत्क्षणा[illegible]न्तरितत्वेनाप्युत्पादकालेविशेषणीयइतिवयंयुक्तिमुत्पश्यामः
नचैवमनुमित्सानंतरप्रत्यक्षीकृतेविषयेतद[illegible]मक्षणोत्पन्नपरामर्षेणानुमितिजननापत्तिः।

तन्मते दृष्टापत्तेः। प्रत्यक्षानंतरोत्पन्नायां द्वित्रिक्षणावच्छिन्नायां तस्यामनुमित्यभावं। ननु प्र
त्यक्षाद्यवच्छिन्नपूर्वक्षणोत्पन्नायां द्वित्रिक्षणावच्छिन्नायां तस्यामित्यत्र नियामकाभावादिति।
सिसाधयिषा वात्र न सिद्धित्वप्रकारकसिद्धीच्छा विवक्षिता मनस्त्वेन लेतद्विरहेणापक्षताना
पत्तेः। नापि सिद्धिविषयेच्छामात्रं। प्रत्यक्षेणजानीयामितीच्छायामपि पक्षतापत्तावनुमित्या
पत्तेः। नाप्यनुमितित्वप्रकारकेच्छामात्रं। एकलिंगावगते लिंगांतरेणानुमिन्वीयामपित्र
नुमित्यभावापत्तेः। नाप्यनुमितित्वप्रकारकानुमितिमात्रगोचरेच्छा सा। सिद्ध्यनंतरं पुनर्जानी तत्र४
यामितीच्छायां प्रत्यक्षादिसामग्रीविरहकाले परामर्शसत्वेप्यनुमित्यभावापत्तेः। किंत्वनुमिति
गोचरेच्छामात्रं विवक्षितं। सा च सिद्धित्वप्रकारिकाऽन्यप्रकारिका वेति विशेषोनादरणीयः। न
चैवं धूमेन वह्न्यनुमिन्वीयामालोकादिनापि तदनुमित्यापत्तिः। यानुमितिर्यत्रोत्पद्यते तद्भाव

यानुमित्साया अविवक्षितत्वात्· नचैवं पुरुषं ज्ञानीयामितीच्छायां संशयस्थले प्रत्यक्षसामग्र्या
सत्यामनुमित्यापत्तिः। अनुमित्सासत्वे प्रत्यक्षसामग्र्यापि प्रतिबंधासंभवादिति वाच्यं· प्रत्य
७५ क्षसामग्र्यां प्रत्यक्षातिरिक्तसिद्धि[illegible]मात्रगोचरेच्छाया उत्तेजकत्वात् तस्याश्चात्रासत्वा
त्· नह्युभयत्रैकैवानुमित्साविवक्षितेति· ननु सिसाधयिषा तत्पुरुषीया तत्साध्यीया तत्
कालीना चावश्यं विवक्षणीया अन्यथा व्यधिकरणामन्यसाध्यीयामन्यकालीनां च सिसाधयि ७४
षामादाय पक्षतासत्वे सिद्धसाधनस्थलेप्यनुमित्यापत्तिः। एवं च तादृशसिसाधयिषाया चेत्
गर्जितस्थलादावप्रसिद्धेः कथं तद्घटिता तत्र पक्षतेति चेन्न अत्राहुः· स्वीयसिसाधयिषावि
षयत्वाभावसामानाधिकरण्यसिद्धिविषयत्वाभावः साध्ये पक्षतेति ननु [illegible]यि सिसाधयिषा श्र२
यां तत्कालीनत्वं विवक्षितं न वा· आद्ये घनगर्जितस्थलादावप्रसिद्धिः। अन्त्ये· अन्यकाली

नन्सिसाधयिषामादायसिद्धसाधनेऽपिपक्षतास्यादितिचेत् न सिसाधयिषाविषयत्वस्यविशे
षणत्वेनततएवतत्कालीनत्वलाभात् नतुतदपिविशेषणंप्रवेश्यंयेनोक्तदोषःस्यादिति ॥
एवंहित्रिक्षणांतरितायांसिसाधयिषायामनुमितिस्तदनभ्युपगंतृमतेकथंस्यादितिचिं
त्यं । किंचपुरुषांतरेणसाध्यसिसाधयिषायांयत्रपक्षेसिद्धसाधनंतत्रापिपक्षतास्यात् तामे
वसिसाधयिषामादायविशिष्टाभाववत्त्वादिति । नचस्वीयत्वंतत्पक्षीयसिसाधयिषाविष
यत्वाभावोविवक्षितः । यत्रपक्षेतस्यपुरुषस्यनकदाचिदपिसिसाधयिषा । तत्पक्षकानुमिति
स्थलेपुनरप्रसिद्धिरितिचिंत्यं । वस्तुतोव्यधिकरणायाअन्यकालीनायाश्चतदातत्पुरुषेविर
द्वेतितामादायातिप्रसंगाभावाच्चलिंगकल्पात् । पक्षकानुमितिस्थलेतत्साध्यकानुमिति
गोचरेच्छासाविरहणीयातादृशीवचनंगर्जितादिस्थलेयथेश्वरेच्छैवप्रसिद्धेतिनोक्तदोषः

इतिवयंयत्तु सिद्धुत्तरानुमितित्वावच्छिन्नसिसाधयिषाविशेषसामग्रीसामान्यसामग्री
75 परामर्षमात्रमितिविशिष्टाभावेरूपापक्षतानुमितिहेतु रित्युनेतितन्नैवंसत्यासम
वधानकालीनदाहत्वावच्छिन्नेउत्तेजकंविशेषविशिष्टसामग्रीति विशिष्टाभावस्तत्रा
पिनहेतुंस्यात्. यथावात्रनेष्टापत्तिस्तथाशंक्यो वक्ष्यते: ननुतादृशासिद्धेः प्रतिवंधकत
यातदभावरूपापक्षताप्रतिवंधकाभावरूपतयाहेतुर्वाच्या. तच्चनसंभवतिकार्यसमा ७५
नकालीनत्वात् अन्यत्रप्रतिवंधकाभावस्यकार्यसमानकालीनत्वेनैवहेतुत्वावधारणादि
तिचेत्न. मण्यादिसमवधानकालेपिदाहस्यापत्त्याबाधकेनान्यत्रतथावधारणत्वेपितत्र
तदभावेनगौरवेनैवतथाहेतुत्वाभावात् कार्याभावातिरिक्तप्रतिवंधकाभावेतथानियमाद्धा.
व्याप्तिस्मरणमिति. व्याप्तिनिश्चयइत्यर्थः लाघवादिति. अतिरिक्तविशिष्टवैशिष्ट्यावगाहि

ज्ञानकल्पनापेक्षायालाघवादित्यर्थः। उपजीव्यत्वादिति व्याप्यत्वग्रहं विना व्याप्यतावच्छेदक
त्वज्ञानाभावादित्यर्थः। ननु सामग्रीवलेन व्या + ज्ञानद्वयादिति· अत्र ज्ञानद्वयत्वमविवक्षितं उभयगो
चरैकसमूहालंवनादप्यनुमित्युत्पत्तेरिति ध्येयं· लाघवादिति· व्याप्यतावच्छेदकप्रकारकप्रकारक
ज्ञानत्वस्य कारणतावच्छेदकस्य लघुत्वादित्यर्थः +१ प्यत्वप्रकारकज्ञान सिद्धौ प्रत्यक्षस्थितिः ग४
स्यादिति शंकते· अथेति वलवत्वादिति समाने विषये प्रत्यक्षसामग्र्या वलवत्वेपि भिन्नविषय
त्वेऽनुमितिसामग्र्या एव वलवत्वादित्यर्थः। तथा च युगपद्दुःस्थित्यभावः। इंद्रियेतिः तथा च व्य एवेतिभावः
भिचाराल्लघोरपि न हेतुत्वमिति भावः। परामर्श इति· तथा च न व्यभिचार इति भावः। प्रमाणांतर
तापत्तेरिति प्रमाणांतरत्वेन परिगणनापत्तेरिति भावः। न च तन्मतद्वति धूमवह्निव्याप्यत्वपरा
मर्शवद्धूमत्वेपि वह्निव्याप्तिव्याप्यत्वपरामर्शासंभवः। विशेष्यासंन्निकर्षस्योभयत्रापि समानत्वात्·

व्याप्तिस्मृतिर्धूमत्वेनधूमत्वज्ञानमितियदुक्ता धूमेव्याप्यत्वानुमितिसामग्री तत्राप्यास्त्येवेतिभा
76 वः। अतएवेति· यतएवोक्तयुक्त्याव्याप्यतावच्छेदकप्रकारिकाधीरनुमितिहेतुरतएवयदाधू
मादिपुरस्कृत्यैववह्निव्याप्यनिष्ठमहाव्याप्यन्तरविषयंवह्निव्याप्यवान्सोवश्यंवह्निमानितिज्ञा
नंतदापरमनु+ वह्निव्याप्यवच्छिन्नसकल+ मितिर्नतदभावेपीत्यर्थः। अत्रधूमोवह्निव्याप्यइति
स्मरणमस्तिनवा· अन्त्येतदभावादेवनानुमितिः· आद्येत्वाह धूमोवह्निव्याप्यइति· तुल्यमि ७६
त्यायातेतः। वस्तुतःसंशयाभावग्रहएवतात्पर्यं· अन्यथासाक्षादविरोधिनःसंशयस्यज
नकीभूतव्याप्यत्वनिश्चयविघटनद्वारैवप्रतिबंधकत्वंस्यान्नत्वन्यथेतिध्येयं· यत्रेति· यद
वच्छेदेनयद्धर्मनिश्चयस्तद्धर्मज्ञानंतद्धर्मकोटिकसंशयविरोधिलाघवात्· ननुतदवच्छिन्न
कोटिकसंशयविरोधिगौरवादित्यर्थः· नवघटत्वेनभेदनिश्चयेपृथिवीत्वेनतत्संशयस्या

भिन्नक्रमः इति पुस्तकान्तरे ३

ग्रे स्वीकृतत्वात्कथमेतदिति वाच्यं- एतदनुशयादेव तत्र मतांतरावतारादिति भावः। न केवलं व्या
वर्त्तकधर्मदर्शनादेरसंशयाभाव किंतु भिन्नविषये पुत्यक्षसामग्रीतोऽनुमितिसामग्र्या वलवत्वा
दपि न संशय इत्याह- वस्तुतस्त्विति एवकारो भिन्नक्रमात्तेऽनुमितिरेव न भवति न तु संशय इ
त्यर्थः। न त्विति इह पर्वते भावोऽभावो वाऽउभयथापि पुमेयमस्तीति भावाभावान्यतरेण पुमेया
नुमितौ भावत्वाभावत्वयोर्व्याप्यतावच्छेदकयोरनिश्चयेऽन्योन्यगत्या व्याप्यत्वधीर्हेतुरित्यर्थः
ननु भावत्वाभावभावत्वादिना पुमेयत्वे साध्ये भावत्वाभावत्वपदं तद्वृत्तिधर्मपरमित्यर्थः। लिं
गमिति- अयमालोको धूमो वाऽउभयथापि वह्निव्याप्य इत्यत्रेति शेषः। तत्रापुसिद्ध्यभावादिति भा
वः। यद्व्यतिरेकज्ञानमिति- ग्राह्यातिरिक्तपद्व्यतिरेकज्ञानमित्यर्थः। यत्तु यद्व्यतिरेकज्ञानत्वा
वच्छिन्नं यत्पुतिवंधकमित्यर्थः। अतएवोक्तं ज्ञानेति- ननु ग्राह्यविरहज्ञानत्वावच्छिन्नं तथा ग्राह्यवि

४ तथासति ३ भयथापि पुमेयइतिपुल्लिंगनिर्देशापत्तिः। लिंगत्वाभावादिति॥ लिंगतावच्छेदकत्वाभावादित्यर्थः। भावाऽभावान्यापसि
...इत्यर्थः। लिंगतादिति। लिंगतावच्छेदकत्वादित्यर्थः धा

रद्धज्ञानस्याप्रतिबंधकत्वादिति यथाश्रुते नैवोपपत्तौ ग्राह्यातिरिक्तत्वं विशेषणामयुक्तमिति
तन्न एवमप्यव्यभिचारिव्यतिरेकत्वावच्छिन्नमव्यभिचारनिश्चयप्रतिबंधकं॰ न वतन्निश्चयस्तद्धेतु
रिति व्यभिचारवारणाय तद्विशेषणस्यावश्यकत्वात् न व धूमत्वेति पूर्वपक्षधर्मविषयस्य धूमोन
77 वह्निव्याप्यइत्यस्य सामान्याकारस्यैव व्याप्यभेदज्ञानस्य प्रतिबंधकत्वमथेत्यादिनाशंकितं
संप्रतिपक्षधर्मधूममात्रविषयस्य तथात्वमाशंक्य तद्दृत्य पौनरुक्त्यं॰ न वेह धूमव्याप्तिपदवत्ता ७७
त्रपक्षधर्मपदसत्वेनोक्तापौनरुक्त्याभाव इति वाच्यं सामान्याकारभेदज्ञानस्यापि पक्षधर्मवि
षयत्वाविरोधात्तन्मात्रविषयत्वबोधकपदस्य वतत्राभावात्॰ यत्तु॰ व्याप्यभावधूमत्वमेतस्य
व्याप्ये तस्य भेदभ्रमपरत्वमित्यपौनरुक्त्यमिति॰ तन्न॰ वह्निव्याप्यवान्नेति यद्दपर्यालोचनयास्या
पिव्याप्यभेदभ्रमपरत्वावसायात्त्रूत एवास्त्वेत्यादिना भेदाग्रहस्यैव हेतुत्वमुक्तदोषनिरासा

यवक्ष्यति। नतु व्याप्यभावग्रहस्येति॰ अन्यथेति॰ यद्यप्यनुमितिसामग्र्यामप्यनुमित्यनुत्पादस्तदेत्य
र्थः॥ निश्चयेति॰ निश्चयसामग्र्यां व्याप्यभेदसामग्र्यां सत्यां भ्रमाभावात् अनंतरं परामर्शः कुतो न भव
तीत्यर्थः॥ तथा च परामर्शस्वीकारपक्षेपि उत्तरोत्तरं परामर्शधारा नोत्पद्यते तत्रानुमितिसाम
ग्रीबलवत्त्वं तत्त्वमित्यत्रापि ज्ञानद्वयात्मकतया तत्सामग्र्यां ऽनुमितिरेव स्यात् तत्तद्व्याप्याभेदपू
र्त्यक्षमितिभावः॥ अन्ये तु यदि तत्र तादृशापूर्वोत्पत्तिरभ्युपेया तदा त्वदभिमतविशेषदर्शनाद्वि
भूमा ७ रूपपरामर्शसामग्र्यां सत्यां उक्तापूर्वासंभवात् ज्ञोत्पत्त्यधिकरणत्वाभिमतकाले परामर्शए
व कुतो न भवतीति त्वन्मतेपि पर्यनुयोगः॥ इत्याहुः॥ अभ्युपेत्याह॰ अस्तु वेति अभेदेति त्वयापि तादृ
शस्य जनकज्ञानाविरोधिनो भेदज्ञानस्य लिंगपरामर्शप्रतिबंधकत्वस्वीकारात्॰ तस्य कथं ज
नकज्ञानाविरोधित्वमित्यत उक्तं अभेदज्ञानस्येति॰ नह्यभेदज्ञानं परामर्शेपि जनकमिति कश्चिद

(साध्यप्रतियोगिकव्यतिरेकावगाहिभिन्नत्वविशेषितेत्यर्थः)

दभ्युपैतितथाचव्यभिचाराज्ञायंनियमइत्यर्थः। गुर्वाद्यभिन्नत्वविशेषितेपिनेयंव्याप्तिः। अपूयो
78 ज्ञकत्वादित्यत्रतात्पर्यंगोत्वे गोपदप्रवृत्तिनिमित्तत्वंधर्मांतरमस्तीत्यतउक्तंमधुरत्वेतितस्याः
पदविशेषप्रवृत्तिनिमित्तत्वमपिनास्तीतिभावः। व्यक्तेरिति। व्यक्तिघटितधर्मस्येत्यर्थः। न
ष्टीतिनह्यनयोर्ज्ञानयोर्गोत्वविषयतायामविशेषइत्यर्थः। निर्विकल्पकत्वेतिगोरितिज्ञाने
यथागोत्वांशेनिर्विकल्पकत्वमेवमस्यापिनिर्विकल्पकत्वापत्तेरित्यर्थः। तथाचात्रव्यक्ति ७८
रेवप्रकारदानेनाविशेषइतिभावः। अनुपयोगादितिव्याप्यतावच्छेदकाप्रतीतेरितिभावः।
लिंगंलिंगतावच्छेदकंनवेति। तत्रेतिशेषः। अन्यथाधूमादेरपितत्रहेतुत्वंतस्यादितिध्येयंव्य
भिचारेतिव्याप्तिग्रहानुपयुक्तविशेषणावत्वादित्यर्थः। पुरुषइति। तथाचस्वार्थानुमितौनकिंचि
द्बाधकमितिभावः। तदन्यान्यदितिक्वचित्तदन्यान्यमितिपाठस्तदातदन्यच्चस्मात्तत्तदन्यान्यमि

तिवङ्कुवीद्दिर्वीध्यः।तदन्यान्यत्वादिति॰धूमत्वालोकत्वान्यान्यधर्मवत्वादित्यर्थः॰ननुधूमालोकान्या
न्यत्वादित्यर्थः।तथासतिव्यर्थविशेषणत्वशंकानवकाशात्पुत्यसंहीत्यादिनाव्यर्थविशेषणत्व
मभ्युपेत्यपरीहारासंभवाच्च॰नहिधूमालोकान्यान्यत्वेवह्निव्याप्तिव्याप्तावच्छेदकमन्यत्वत्वमपक्षा
यधर्मान्तरमस्ति॰येनव्यर्थविशेषणत्वंस्यात्॰धूमालोकादोवह्निव्याप्यतावच्छेदकंधूमत्वादि
कमेवास्तीतितत्रव्यर्थविशेषणत्वंयुक्तंव्याप्यत्वाभिमतेनलघुनाऽवच्छेदकेनव्याप्तिग्रहेसंभ
वतिगुरुणातदग्रहात्॰निरुक्तेयधूमत्वादेरेवावच्छेदकत्वात्तदन्यान्यत्वेनावच्छेदकगौरवादिति
भावः।[illegible]।पुत्यसंहीतियच्चप्युक्तमित्याव्यर्थविशेषणत्वाभावेनधूमालोकान्यान्यत्वा
द्वह्निव्याप्यतानुमानंसंभवत्येवतथापिपुत्यक्षसामग्रीवलवत्वात्तत्सत्वेतज्ज्ञानस्यापिविशेष
दर्शनत्वेनैवोपयोगइतिभावः।अन्वयेति॰करवरणाद्यन्यतरवत्वनिश्चयानंतरंसंशयोत्तरप

(धूमत्वालोक
त्वान्यान्यध
र्मवत्त्वादेरित्यर्थः)

79

रूपप्रत्यक्षस्य सर्वसिद्धत्वाद्गुरोरपि धूमत्वालोकत्वान्यान्यधर्मवत्त्वस्य ज्ञानं प्रत्यक्षसहकारिस्या
दित्यर्थः। ननु तदन्यान्यधर्मवत्त्वज्ञानमपि स्वरूपेण प्रत्यक्षसहकारि न वाच्यमतिप्रसंगात्‥ किं
तु वह्निव्याप्तिव्याप्यत्वेन तच्च न संभवति धूमत्वादेर्व्याप्यतावच्छेदकस्यानिश्चयात्‥ निश्चितस्य तु त
दन्यान्यधर्मवत्त्वादेर्गौरवेण तदनवच्छेदकत्वादिति चेत्‥ न‥ व्याप्यतावच्छेदकरूपेणानुपस्थि
तेऽपि फलबलेन व्याप्तिग्रहस्वीकारात्‥ सहचारदर्शनादिव्याप्तिधीसामग्रीसत्त्वे तद्व्यतिरेके
णाव्याप्तिग्रहव्यतिरेकादर्शनात् अत एव व्याप्यतावच्छेदकेन धूमालोकान्यान्यत्वेनोपस्थित ७९
एव पक्षधर्मे व्याप्तिग्रहः सर्वसिद्ध इति भावः एवं वह्निव्याप्तिव्याप्यवत्त्वपरामर्षस्याविकल
त्वात्तदनुमानमपि संभवति‥ तथापि प्रत्यक्षसामग्रीसत्त्वे तन्निरवकाशमिति तथोक्तमिति समर्त्तव्यं।
ननु व्याप्यतावच्छेदकेन तदनवच्छेदकेन वा व्याप्यत्वनियतसमानाधिकरणेन तया प्रतीयमानेन

रूपेण पक्षधर्मताज्ञानमनुमितिहेतुरस्तु तथा चात्राप्यस्त्येवेत्यनुशयेनाह: किंचेति अथ वह्नीति ॰
तथा च यो वह्निव्याप्यवान्सोऽवश्यं वह्निमानेति वह्निव्याप्यत्वावच्छिन्नसकलधूमादिव्यक्तिमहाव्या
प्तिज्ञानवत एवानुमितिरिति मदुक्तानुमितिसामग्री तत्राप्यस्त्येवेति भावः। ननु यो धूमवान्
सोऽग्निमानेति वचो वह्निव्याप्यवान्सोऽवश्यं वह्निमानेति महाव्याप्त्यनुभवो दुरपह्नवः। अन्यथा
पूर्वोक्तव्याप्तिलक्षणानामतिव्याप्तिप्रसंगात् एवं च शाब्दपरामर्शस्थलेऽनन्यगत्या तज्ज्ञानं
ध४ कल्पनीयमिति तदुक्तसामग्र्यप्यस्त्येवेत्यरुचेराह· अपि चेति लाघवादिति व्याप्यतावच्छेदक
प्रकारकत्वापेक्षया व्याप्यत्वप्रकारकत्वस्य लघुत्वादित्यर्थः। एवं च वह्निव्याप्यवानयमिति
शाब्दपरामर्शस्थले महाव्याप्तिज्ञानं न कल्पनीयमिति भावः। सप्रमाणकत्वादिति· ला
ध१ घवसहकृतप्रथमप्रवृत्तविशिष्टज्ञानकारणताग्राहकप्रमाणमूलकत्वादित्यर्थः। ननु गौर

वात्तदेवकथंप्रमाणांप्रवर्त्तितद्रत्यतआहकारणमिंति विशिष्टज्ञानकारणताग्रहःफलं
४० तन्मुखमुपस्थितिर्वीजंयस्यतत्फलमुखं·तथाचविशिष्टज्ञानस्यासिद्धौगौरवज्ञान
स्यासत्वादेवनतत्कारणताग्रहप्रतिबंधित्वंतत्सिद्धौचतद्ग्राहकमानकविशिष्टज्ञा
नमूलकस्यगौरवज्ञानस्यनतद्ग्रहप्रतिबंधित्वमुपजीव्यविरोधादितिभावः॥ननुव्याप्य
त्वप्रकारकज्ञानविषयीभवद्धर्मिमात्रगतंयत्प्रतीयतेतत्प्रकारकपक्षधर्मताज्ञानत्वे ४०
नहेतुत्वमस्तुतच्चविशिष्टज्ञानेज्ञानद्वयेवास्तिप्रथमेव्याप्यत्वस्यद्वितीयेधूमत्वादेस्ता
दृशस्यप्रकारकत्वेनोभयानुगतस्यतस्यहेतु[illegible]त्वात्तथाचयत्रसामग्रीवले
नविशिष्टज्ञानंतत्रतस्यापिहेतुत्वं·यत्रतुज्ञानद्वयंतत्रततएवानुमितिर्नत्वतिरिक्त
विशिष्टज्ञानकल्पनंगौरवात्प्रयोजनाभावाच्चेतिचेन्न·न·एतदपेक्षयाव्याप्यत्वप्रका

एकस्यैव लघुत्वात्. नन्वेवं यदि कारणता स्यात्तदाऽतिरिक्त विशिष्टज्ञानकल्पना स्यादिति तर्कितं
तदादाय गौरवज्ञानाद्धर्मिकल्पनातो धर्मकल्पना लघीयसीति न्यायेन ज्ञानद्वयस्यैव गुरुर्णीप्यवच्छे
दकेन हेतुत्वं कल्प्यत इति चेत्. न. एवंविधगौरवज्ञानस्य प्रमानीपूर्वन्यपरिपंथित्वात्. अत एव लाघ
वेन कर्मधारयपूर्वत्वानिष्पादस्य सत्यधिकरणो भूद्रुस्य विद्याप्रयुक्तिरपूर्वा कल्प्यत इति लवापिसि
द्धान्तः। अन्यथा यद्यत्र कर्मधारयः स्यात्तदा भूद्रुस्य विद्याप्रयुक्तिकल्पनागौरवं स्यादिति तर्केण
तत्प्रतिसंधानेन तत्कल्पनमपि न स्यादिति॥ एतेन ज्ञानद्वयसाधारणा नन्यदप्यवच्छेदकं निरस्तं व्या
प्यत्वप्रकारकत्वापेक्षया सर्वस्यैव गुरुत्वात्. ननु सामान्यस्योत्सर्गिकतया गुरुणापि पूर्वीन्नाव
च्छेदकेन हेतुत्वमस्तु. अत एव कर्तृतावच्छेदकं कार्यमुपाधिरूपं. ननु जातिरूपं घटत्वादिकमिति
चेत्। न तत्र घटत्वादीनां मानं न्यात्. यत्र तु विशेषस्यैकस्य लघुत्वं तत्र न सामान्यस्य गुरोरवच्छे

जन्या

दकत्वं अन्तरव्याख्यातवाप्यत्वे यत्तत्त्वमेव तथा न तु व्यापारत्वमिति संक्षेपः अनुमानयोरिति क्वचि
त्काभिप्रायेणेदं बोद्धव्यं अन्यतरसाध्यमन्यतरानुमाने पक्षतावच्छेदकीकृत्यानुमानेनापि सकृद्वा
९१ रगृहस्य क्वचित्संभवात नियमेति स्वरूपनिर्वचनं अनियतस्य व्यापारत्वाभावादिति ध्येयं संस्कार
स्मरणाद्युतिमतभेदेन पृथगिति स्वातंत्र्येणेत्यर्थः। व्याप्तिस्मरणादिना संशयस्यैव नावस्थान
कुतस्तज्जनककोटिस्मृतिरित्यनुशयादाह नवेति गौरवादिति उपलक्षणं प्रामाण्यसंशय ८२
जन्यार्थसंशये व्यभिचाराच्चेत्यपि द्रष्टव्यं सामान्यलक्षणाया पर्वतेपि वह्न्यवगमादाह विशिष्येति
अलौकिकं प्रत्यक्षं निरस्य लौकिकं तदाशंक्य निराकरोति नवेति विशेषदर्शनामिति एतच्च सं
शयच्छेत्तृप्रत्यक्षमभिप्रेत्य अन्यथानुपदवच्छेदेनोपनेयज्ञानं तद्दर्शनपरं तदित्याहुः। व्याप्तिविशिष्टेति
व्याप्त्यापि समज्ञानलक्षणप्रत्यासत्तेः सत्वादित्यर्थः। वह्नेरसन्निकर्षादिति संयोगलक्षणसंनिकर्षा

दिति संयोगालक्षणासंनिकर्षाभावादित्यर्थः। ननु यथा व्याप्तौ ज्ञानमेव प्रत्यासत्तिस्तथा वह्नावपि
तदेवाद्धिषास्तु· न व्याप्तेः समानाधिकरणात्मकत्वेन संयोगादिरूपतया संयुक्तसमवाय एव
तत्र प्रत्यासत्तिरिति वाच्यं नहि संयोगादिकमेव व्याप्तिः। किंतु साध्यादिनानापदार्थविशिष्टं न च वि
शिष्टसंयुक्तसमवायः। न च साध्यादिकं विशेषणं विशेषणविशेषणं· न च तत्संनिकर्षापेक्षणी
यो मानाभावादिति वाच्यं विशेषणसन्निकर्षस्यापि हेतुत्वे मानाभावात् विशेष्यसन्निकर्षापेक्ष
या विषयसंनिकर्षत्वेन हेतुत्वं लाघवादिति यदि तदा विशेषणविशेषणसन्निकर्षे तु यि त्वं· व्या
प्तौ तावद्यथा तथास्तु वह्नौ ज्ञानमेव प्रत्यासत्तिरस्तु· न च पर्वते पुरावह्नेरनवगमे कथं तदुपनीतभानं
तत्रेति वाच्यं· सामान्यलक्षणया धूमवत्त्वावच्छेदेन वह्निबोधने पर्वतेपि तद्भानात् विशिष्य तद्भानस्या
प्रयोजकत्वात् अन्यथा पक्षधर्मे व्याप्तिप्रत्ययस्यानुपपत्तेः। वस्तुतस्तु यदवच्छेदेन यद्धर्मे ज्ञानं तदव

च्छेदेन तद्धर्मिज्ञानं· तद्धर्मोपनयसामग्री तथा च धूमवत्त्वेन ज्ञाने पर्वते वह्नि मत्त्वोपनयः स्यादेवेति चे
त्‌·न·ज्ञानरूपयापि प्रत्यासत्त्या पर्वते वह्निप्रत्यक्षमापाद्यमानमलौकिकमेव स्यात् न चालौकि
कप्रत्यक्षसामग्री मानान्तरप्रवृत्तिप्रतिबंधिका तस्याः समानेपि विषयेऽनुमित्यादिसामग्रीतो दु
र्बलत्वात् अन्यथा मानान्तरविलयापत्तिः। शब्दादिस्थलेपि पदादिस्मारितपदार्थानां कविकाद्य
मूलभूतज्ञानवन्मनस्यैव प्रत्यक्षसंसर्गप्रत्ययसंभवात्‌· बलवत्त्वस्य च फलकल्प्यत्वात् यद्येवं कर
भूमात्मंशयानन्तरं प्रत्यक्षपुरुषभूमो न स्यात्तस्यालौकिकत्वादलौकिकप्रत्यक्षभावसामग्र्याग्र
पि बलवत्त्वे धूमभ्रमाद्वह्न्यनुमनुमितिर्भ्रान्तानस्यात् तथापि फलबलादनन्यगत्या दोषविशेषस्यैव
तत्र बलवत्त्वप्रयोजकत्वेति ध्येयं तस्मात्समाने विषये लौकिकप्रत्यक्षसामग्र्या बलवत्त्वात्तत्सत्त्वे व
ह्निप्रत्यक्षमेव स्यान्नानुमितिरित्येव पराभिमतं तत्रेदमुत्तरं न लौकिकवह्निप्रत्यक्षसामग्री वह्नेरसं

न्निकर्षादिति॰ ननु भवेदेवं यदि विशेषणासंनिकर्षोऽपि हेतुः स्यात् न चैवं मानाभावात् किंतु तज्ज्ञानं॰
आवश्यकत्वात् तच्चात्रास्त्येवेति न लौकिकवह्निप्रत्यक्षसामग्री विरह इति चेत्‌ न॰ नदितरसकलत
द्धेतुसत्त्वे पर्वते वह्न्यनुमितिसमये तद्विशिष्टप्रत्यक्षानुत्पादस्यैव तत्र मानत्वात् लौकिकप्रत्यक्षसा
मग्रीसत्त्वेऽनुमितिसामग्रीबलवत्त्वस्यापि तत्कुमशक्यत्वात् न चात्र प्रत्यक्षमेवोत्पद्यत इति वाच्यं
मनु वह्निमिनोमीत्यनुव्यवसायस्याबाधितत्वात् यत्तु॰ विशेष्यस्य विषयविशेषतयातत्सान्निकर्षत्वा
पेक्षया विषयसन्निकर्षत्वेन हेतुत्वे लाघवाद्विशेषणासन्निकर्षोऽपि हेतुरिति ननु एवं हि पर्वते वह्निप्र
त्यक्षं स्यादेव॰ पर्वतरूपविषयसन्निकर्षत्वात् कारणतावच्छेदकावच्छिन्नयत्किंचित्सत्त्वस्यैव कार्योत्प
त्तेः॥ विशेषणासन्निकर्षे विशेष्यासंनिकर्षेऽपि तद्विशिष्टप्रत्यक्षापत्तेः॥ न च यावद्विषयसन्निकर्षत्वे
न हेतुत्वमिति वाच्यं॰ एतदपेक्षया विशेष्यसन्निकर्षस्यैव लघुत्वात् संसर्गांशस्य पूर्वीज्ञानस्यैव भानाभ्यु

पगामेनभ्रमस्थलेतत्सन्निकर्षासंभवेनव्यभिचाराच्च· किंचविशेषणाविशेष्यसन्निकर्षयोर्नैकमवच्छे
83 दकंविशेषणासन्निकर्षस्यालौकिकसाधारणस्यैवहेतुत्वंभ्रमाद्यनुरोधात्रविशेष्यासंनिकर्षस्यैव
लौकिकस्यैवप्रत्यक्षविशेषव्यवस्थारादिसहकारित्वंअन्यथास्मृत्युपनीतेव्यवहितपुरुषेदंड
स्मृतिमनोदंडीतिचाक्षुषबुद्ध्यापत्तिः। अन्येतु· असंसर्गाग्रहदशायामपिदेवादंडस्मृतिमतः
संनिकृष्टेपिव्यवहितदंडेपुंसिदंडेपुंसिदंडीतिबुद्धिर्नोत्पद्यतइतिसर्वानुभवसिद्धंतथाचान्वय ८३
व्यतिरेकाभ्यामेवतस्यहेतुत्वमित्याहुः। पक्षधर्मइतिपर्वतवृत्तिर्धूमोवह्निव्याप्यइत्याद्याकार
ज्ञानमित्यर्थः। विशिष्टेतिवह्निव्याप्यधूमवानयमित्याद्याकारमित्यर्थः। अतएवेति· योयो
धूमवानित्यनेनधूमवतिवह्नेरत्यंताभावोव्यवच्छिद्यतेतेनतादृशात्यंताभावाप्रतियोगित्वंसा
ध्यस्यप्रतिपाद्यते: वह्निमानेवधूमवानित्यनेनवह्न्यभावान्नधूमवानितिवह्निविरहव्यावृत्तत्वंधू

मनिष्टं प्रतिपाद्यते तदेव व्याप्यत्वमिति तद्बोधस्यानुमितिहेतुत्वेऽन्ययोगव्यवच्छेदेनैवोदाह

रणांस्यादित्यर्थः। तत्रेदमनभिमतिवीजमाकूतं जनकज्ञानस्य यावद्विषयतया जनकत्वं ता

वन्मध्ये यत्प्राधान्येन भासते तदेव जन्यज्ञानेपि तावन्मध्ये प्राधान्येन स्फुरतीति नियमः। पु

रुषस्य दंड इति ज्ञानस्य दंडी पुरुष इति ज्ञाने दंडमात्रविषयतयैव जनकत्वमतानभ्युपगमेऽभि वा

र इति तन्न भूतले घटो नास्तीति ज्ञानजन्ये घटाभाववद्भूतलमिति ज्ञाने तथापि व्यभिचा

रात् तज्ज्ञानस्य भूतलविषयतयापि जनकत्वात्। न चाभावविशेष्यकप्रत्यक्ष एवाधिकरण

ज्ञानस्य कारणत्वमिति वाच्यं। लाघवेनाभावप्रत्यक्षत्वावच्छिन्न एवाधिकरणज्ञानस्य हे

तुत्वात्। यदपि केचित्तद्बीजमुक्तं अयोगव्यवच्छेदेन साधनव्यापकतावच्छेदकरूपदर्शितेत्ययु

क्तं। केवलान्वयिनि साध्याप्रयोगाप्रसिद्धेरिति। तदपि न एवमपि लाघवेन व्यापकताज्ञान

करणत्वेदोषानभिधानात्॥ व्यत्तु· सामानाधिकरण्य॥ भतयाव्याप्तिर्गुर्वीव्यापकत्वंतदप्र
वेशाल्लघ्वीतियदितद्धेतुत्वंतदासाध्यप्रतियोगिभूतेसमानाधिकरणात्यन्ताभावकत्वमे
84 वव्याप्यत्वमस्तुव्यापकत्वघटकानामेवपदार्थानांअत्रापिप्रवेशेनतदपेक्षयागौरवाभा
वादितितत्रास्वरसबीजं·तत्र·एतावतायितज्ज्ञानकारणतायांविनिगमकानुक्तेः॥ किं
वोक्तरूपव्यापकत्वमेवलघुतादृशयावदत्यंताभावकत्वस्ययावद्गर्भत्वेनगुरुत्वादन्य ८४
थाव्यभिचारिसाधारण्यात्स्वसमानाधिकरणात्यंताभावप्रतियोगित्वसामान्याभाव
रूपव्यापकत्वेयावत्त्वाप्रवेशेनलाघवादितिः अन्येतु·पर्वतवह्निधूमव्यापकत्वंवह्नौगृहीत्वा
तद्वत्स्मृतमुपनेयंतथावह्निर्विवान्यत्रापितच्चद्विग्रहणंतदातस्याप्यनुमितिसामग्री·
एवंतत्रापिपुपनयइतिअन्यत्रागृहीततत्राप्यनुमितिसामग्रीतिसमूहालंबनरूपैवानुमितिःस्या

न्नत्वेकानुमितिरूपनेयाप्रतीतावुपनयाप्रसिद्धेरित्येकमस्वरसबीजं अपरं च वस्तुतो लाघवमे
वतन्नथा हि तत्समानाधिकरणात्यन्ताभावे प्रतियोग्यसमानाधिकरणत्वं विशेषणमावश्यकम
व्याप्तिमियात तदर्थश्च प्रतियोगिसमानाधिकरणभिन्नत्वं प्रतियोगिसामानाधिकरण्याभावत्त्व
वा उभयथापि प्रतियोग्यधिकरणानधिकरणत्वगर्भः तथा चाकाशादेरपि व्यापकतापत्तिः
मेयत्वादिसमानाधिकरणाये प्रतियोग्यधिकरणाधिकरणभिन्नाभावा घटाभावादयस्त
दप्रतियोगित्वादाकाशस्य नन्वनुमेयत्वसमानाधिकरणस्याकाशात्यन्ताभावस्य प्रतियोगिव्यधिकर
णाधिकरणाभिन्नतया तत्प्रतितया आकाशस्य कथं तदप्रतियोगित्वं व्यापकत्वमिति चेत् न प्रति
योग्यधिकरणाप्रसिद्ध्या आकाशाभावस्य प्रतियोग्यधिकरणाधिकरणभिन्नत्वाभावेन विशि
ष्टताद्दशाभावाप्रतियोगितया आकाशस्य व्यापकत्वतादवस्थ्यात् तस्मात् द्वारणाय साधन

समानाधिकरणत्वं विशेषणमावश्यकमित्यन्यूनानतिरिक्तपदार्थगर्भनयोभयोः समानतया
कथं व्यापकत्वे लाघवमित्यस्वरसबीजमित्याहुः। तत्र नाद्यः। विशिष्टे विशेषणं तत्र च विशेषणान्त
८५ रमिति न्यायेन धूमे पर्वतवृत्तित्वं धूमव्यापकत्वं च वह्नौ भासत इत्यं पर्वतवृत्तिधूमव्यापकत्वो
पपत्तौ नान्यत्रापि तद्भानकापेक्षा धूमव्यापकत्वं च वह्नौ वेव पुरा गृहीतमिति· स्मृतमुपनेयमि
ति न कारणानुपपत्तिः। न द्वितीयः। प्रतियोग्यधिकरणाधिकरणाः संयोगाभावादयः प्रसि ८५
द्धास्तद्भिन्नत्वस्याकाशात्यंताभावेपि सत्वात् प्रतियोगित्वस्य भिन्नप्रतियोगित्वविशेषणा
त्वात् एवमेव स्वोपादानगोचरजन्यकृत्यजन्यत्वादाव प्रसिद्ध्युद्धार इत्यग्रे वक्ष्यते· तथा च य
थाश्रुतेनैवाकाशव्यापकत्वप्रसंगनिरासान्न साधनसमानाधिकरणत्वमत्रापि विशेषणं·
येन व्यापकत्वे लाघवं तस्मादिति· किं वान्योन्याभावगर्भव्याप्तेरेवानुमितिहेतुत्वेन ग्रंथकद

भिमतत्वात्तद्धर्मव्यापकत्वेप्रतियोग्यसामानाधिकरण्याप्रवेशाच्च।अपिचैवमपिसाधिकरण्यत्व
मात्रमेवोक्तदोषनिरासायास्तुतथापिव्यापकत्वेलाघवमेवतदिदमत्रास्वरसवीजंशब्दादिना
व्यापकत्वेनिश्चितेपिसाधनेसाध्यसामानाधिकरण्यस्यसंशयेव्यतिरेकनिश्चयेवानुमित्यनुत्पा
दात्तन्निश्चयस्तद्धेतुः।यद्व्यतिरेकज्ञानंयदुत्पत्तिप्रतिबंधकंतन्निश्चयस्यतद्धेतुत्वात्॰नव्या
पकत्वस्यसाध्यसामानाधिकरण्यनियततयातद्धीज्ञानेतत्संशयानवकाशइतिवाच्यंनहि
वस्तुतस्तद्व्याप्यत्वज्ञानंतद्विरोधि॰किंतुव्याप्यत्वेनतज्ज्ञानं॰तथावदंतेप्रतिसंधानदशायांतत्सं
शयादिकंस्यादेव॰यदिचैतद्दोषभियासाध्यसामानाधिकरण्यनिश्चयत्वेनेवव्यापकज्ञानम
नुमितिहेतुरितिमन्यसेतदाविपरीतमेवगौरवमिति॰दंडत्वादौव्यभिचारादाह॰बाधकंविनेतित
त्रान्यथासिद्धिरेववाधिकेत्यर्थः।अन्यथासिद्धमितितथाचात्रापिबाधकमेवास्तीतिभावः।धूमवा

न्वह्निमान्नितिवर्त्तमानधूमविशिष्टेवर्त्तमानवह्निवैशिष्ट्यानुमितिरितियावत्तेननांशतो।
बाधादिरितिध्येयं ज्ञायमानेति-ज्ञायमानविशेष्यतावच्छेदकजन्येत्यर्थः।विशिष्टज्ञान।तेन
86 ज्ञायमानवह्निजन्यतयानार्थांतरमितिभावः।विशेषणेतिवर्त्तमानविशेष्यतावच्छेदकवि
शिष्टेवर्त्तमानविशेषणांतरवैशिष्ट्यावगाहित्वशाब्दविशिष्टज्ञानत्वादित्यर्थः।विशिष्टज्ञान
पदंचजन्यानुभवपरंतेनेश्वरज्ञानेस्मरणेवव्यभिचारः।निर्विकल्पकस्यपूर्वपूतीकेनैववार ८६
णात्·रुपमितेश्चयदिसपक्षत्वंनाभ्युपेयंतेनतदातदन्यत्वमपिविशेषणांदेयं विशेष्यभानेति·
विशेषणांतरज्ञानेत्यर्थः।अन्ययेतितथाचज्ञायमानविशेषणाजन्यत्वमेवानन्यगत्यातत्रनिया
मकंकल्प्यमित्यर्थः।नन्वेवमुभयोर्जनकत्वेपिलिंगस्यकरणत्वेकिंविनिगमकमित्यतआह·
किंचेतिप्रतीतेतिनन्वेवमपिविद्यमानलिंगकानुमितित्वावच्छेदेनलिंगकानुमितित्वावच्छेदे

नलिंगस्यहेतुत्वमस्त्विति चेन्न· अतीतादिस्थले क्लृप्तसामग्र्येवानुमित्युत्पत्तौ विशेषसामग्र्य
न्तरकल्पने गौरवात्। अयोग्यलिंगकानुमितौ व्यभिचाराच्च तत्र परामर्शस्य तद्व्यापारत्वासंभवे
न लिंगस्याकरणत्वात् शाब्दादिपरामर्शाद्यत्रानुमितिस्तत्र विद्यमानस्यापि लिंगस्याकारणत्वा
च्च· परामर्शस्य तद्व्यापारत्वाभावात् यदि च निर्व्यापारस्यैव तत्र तस्य करणत्वं तदा तादृशपराम
र्शस्यैव तथात्वमस्तु आवश्यकत्वादिति भावः। परामर्शेति परामर्शद्वारैव त्वयापि लिंगकरणत्वा
भ्युपगमादिति भावः। भाविनीति· यद्यपि भाविन्यपि पक्षे दृश्यत्वादेर्ल्लिंगस्य विद्यमानत्वं भवत्येव
तथापि स्वरूपेण तस्य न लिंगत्वं किंतु पक्षवृत्तितया तथात्वं च तस्य तदानीं पक्षाभावान्न संभवती
त्यभिप्रायेणेतदुक्तं ननु व्यक्तेश्चैकामेवेत्यसंभति तत्समनियतस्य ज्ञानविशेषविशिष्टत्वादेर्लिंगान्त
रस्य संभवात्· न चायमेतदतिरिक्तयावदेतद्धर्मवानित्यत्वेन निर्दिष्टव्यक्तिविशेषस्यैव तत्र लिं

87 गत्वं धर्मीतरस्य साध्याप्रागत्वेनालिंगत्वादितिवाच्यं· प्रकारभेदेनोभयरूपत्वाविरोधात्· अतएव
तोयत्वेन पिपासोपशमनसमर्थतावच्छेदकरूपानुमानमित्यनुशयेनाह· यदिवेति वर्त्तमानतया
संदिग्धादिति । वर्त्तमानादिति शेषः । तथा च धूमस्य निश्चितत्वेपि न सत्वं धूमादेश्च सत्वेपि न नि
श्चितत्वमित्येकस्यापि न हेतुत्वमित्यर्थः । प्रत्यु अतीतदिनवृत्तितया निश्चितस्य धूमस्य वर्त्तमानदि
ने, तीतदिनवृत्तित्वरूपविशेषणध्वंसेन विशिष्टतद्ध्वंसस्य निश्चेतुं शक्यतया तस्यैव हेतुत्वं स्यादि ८७
ति तन्न विशिष्टध्वंसस्य घटादिक्षणिकत्वापत्त्या शास्त्रौ ग्रंथकृतैव निरस्यत्वात् । न वतत्र घटादे
र्विशेष्यविद्यमानतया विशेषणमात्रध्वंस एव स विशेषणे हीतिन्यायेन अत्र च धूमस्य विशेष्य
स्याप्यसत्त्वाद्विशिष्टध्वंसः स्यादिति वाच्यं· एवमपि विशेष्यध्वंससंदेहे विशिष्टध्वंसस्य संदिग्ध
तया हेतुत्वं न स्यात् नहि विशेष्यसत्वेपि विशेषणध्वंसप्रयुक्तो विशिष्टध्वंस इति भावः । ननु त

द्धिने प्रागभावादेः संदेहेऽपि न पर्वते संदेहः। प्रतियोगिसत्त्वेनैव तत्र तस्य निश्चयादिति॰ तस्य वर्त्तमा
नत्वं निश्चयश्चास्तीति न व्यभिचार इत्यरुचेराह किंवेति पर्वते धूमइतिज्ञानादिति॰ वस्तुतोऽतीता
दिधूमविषयादिति शेषः। ननु धूमप्रागभावादौ न व्यर्थत्वं प्रागभावनिष्ठव्याप्तेर्धूमविशेषणं विना
ग्रहात्। यन्निष्ठव्याप्तिर्यद्विशेषणं विना न गृह्यते तेन तस्यैव सार्थकत्वात्॰ एवं वाधिकसंग्राहकवि
शेषणस्य गुरुणोऽपि न व्यर्थत्वं किंतु संकोचकविशेषणस्यैव यथा नीलधूमादौ एवं च धूमात्यं
ताभावात्यंताभावत्वेऽपि न व्यर्थत्वमिति पूर्वोक्तरसादाह॰ आवश्यकेति॰ प्रथमोपस्थितधूमज्ञा
नादेवानुमित्युपादे सिद्धसाधनेनानुमित्यन्तराभावात्॰ प्रागभावादेरहेतुत्वमित्यर्थः। नन्वेवम
प्यनुमित्सया प्रागभावादेरनुमितिजनकत्वं स्यादेवेत्यरुचेराह॰ किंवेति॰ कालिकव्याप्त्यस्फुरण
दशायामपि प्रकारांतरमाह अथ वेति॰ यथा चैतत्तथावाच्यं ग्रंथ एव स्याम। तथैवेति॰ ननु व्याप्य

वक्तयेवनकरणत्वं· किंतु क्रियाऽयोगव्यवच्छेदेनसंवंधिकरणमितिचेत्· न· करणस्यकारणविशे
षत्वात्कारणत्वस्यचव्यापारव्याप्तत्वात् किंचसर्वदा क्रियायोगव्यवच्छेदश्चक्षुरादावपिनास्ति कदा
88 चित्कर्मादावप्यस्तीतितत्वं स्यादिति किंतुव्याप्तिज्ञानमिति· अत्रवदंतियत्रविशकलितानांव्याप्ति
शरीरप्रविष्टसहचारादिपदार्थानांस्मरणेसति विशेष्यविशेषणयोस्तत्रचविशेषणांतरमितिन्या
येनविशिष्टवैशिष्ट्यावगाहिपरामर्शोत्पादादनुमितिस्तत्रपरामर्शद्वाराव्याप्तिज्ञानस्यकरण ८८
त्वंनसंभवतितत्पूर्वतस्यासत्वात् किंचयत्रस्मृतिरूपपरामर्शादनुमितिस्तत्रापितदसंभवः·
नचपूर्वानुभवरूपमेवव्याप्तिज्ञानंकरणमितिवाच्यं· तस्यानुमित्यजनकीभूतसंस्कारेणैवव्यव
हितत्वात्· व्यापारमात्रस्यैवकारणव्यवधायकत्वोपगमात् अन्यथा यागादेःस्वर्गादिहेतुता
स्वार्थंतज्जन्यापूर्वस्यतद्व्यापारत्वसिद्धयेस्वर्गजनकत्वकल्पनानापत्तेः। अतएवाहुः। स्वांग

मव्यवधायकमिति- नचतत्रानुमितौ संस्कारोपि जनकोस्त्विति अन्यथा यागादेः स्वर्गादि
हेतुत्वापत्तेः। अनुमित्यंतरे व्यभिचाराच्च वस्तुतस्तु स्मृतिरूपपरामर्षं तज्जनकपूर्वानुभव
स्य पुत्यक्षरूपपरामर्षे च व्याप्तिज्ञानस्योपक्षीणत्वादन्यथासिद्धत्वमेव अन्यथा स्मृतिजन्ये पु
त्यभिज्ञादौ पूर्वानुभवस्य विशिष्टज्ञाने जन्ये विशिष्टवैशिष्ट्यपुत्यक्षादौ वा विशिष्टज्ञानजनकवि
शेषणज्ञानस्यापि कारणत्वापत्त्या व्याकुलं स्यास्यात् अनुमितौ व्याप्तिज्ञानवत् पराम
र्षजनकं पक्षतावच्छेदकधर्मादिरूपविशेषणाज्ञानमपि करणं स्यात् नचानुमितौ करणा
नुपपत्त्या सर्वत्रानुमितिपूर्वं व्याप्तिज्ञानं तत्करणं कल्पनायमिति वाच्यं परामर्षरूपासाधार
णव्यापारद्वारा मनस एवासाधारणीभूय तत्करणत्वसंभवात् तदुक्तं प्रमेयभाष्यादौ मनोल
क्षणावसरे स्मृत्यनुमित्यादिकरणत्वेन मनः साधितमिति तदपरीरीक्षभंते तथाहि- अनुमि

84

तो मनसः करणत्वे तस्याश्रोत्प्रत्यक्षज्ञानवन्मानसाध्यक्षतापत्तिः। करणान्तरासहकृतस्य
नोजन्यत्वस्यैव मानसत्वनियामकत्वात् न च परामर्शस्य करणान्तरमव्यापारकत्वात् तस्मां
त्परामर्शजनकज्ञानत्वेन व्याप्तिज्ञानादीनां सर्वेषां कारणता तेन न कोऽपि व्याप्तिः। मननव्या
पारकश्रवणत्वादिनैव श्रवणादिप्रतिपत्तीनां मुक्तिकरणत्वं· न च विशेषणज्ञानस्य विशिष्ट
वैशिष्ट्यावगाहिज्ञानं प्रति हेतुहेतुतया व्याप्तिज्ञानादीनामन्यथासिद्धिरिति वाच्यं। येन रूपेणा ७९
न्यथासिद्धिस्तदन्येन रूपेण हेतुत्वाविरोधात् कुलालपितृत्वेनान्यथासिद्धस्यापि कुलालपितुः
कुलालत्वेन घटजनकत्वात् तद्वदिह हेतुहेतुत्वेनान्यथासिद्धत्वेऽपि स्वरूपेण जनकत्वमविरुद्ध-
न च तत्र हेतुताग्राहकान्वयव्यतिरेकौ न स्त इति वाच्यं· तदसत्त्वेऽपि क्रियायाः करजन्यत्वानुमा
नपरिशेषेण विशेषपर्यवसितस्य तद्ग्राहकस्य विद्यमानत्वात्· एतेन पक्षतावच्छेदज्ञानमपि करणं

स्यादित्यनिष्टापादनमपास्तं उक्तरूपेणेष्टापत्तेः। न च स्मृतिरूपपरामर्षजनकं न ज्ञानमिति व्यभि
चारः। तज्जनकानुभवस्य सत्वात्‌- न च संस्कारव्यवहितः स कथमनुमितिहेतुरिति वाच्यं अनुमितिं
प्रति स्मृतिरूपपरामर्षेण स्मृतिरूपपरामर्षप्रति संस्कारेण व्यवहितपूर्ववर्त्तित्व सत्वात्‌- नहि या
वान्व्यापारस्य जनकस्तावान्फलस्येति नियमो न वा व्यापारजनकस्य फलाजनकतया तेन व्यवधा
नं चक्षुर्विषयसंयोगजनकस्य सादौत्कारजनकत्वेन व्यभिचारात्‌- अस्तु वा परामर्षजनकत्वेनै
व जनकता- ननु ज्ञानत्वं पूविवं- तथा वास्तु संस्कार एव तत्करणं- न वानुमितेः स्मृतित्वापत्तिः।
संस्कारत्वेनैव जनकत्वे तथात्वादन्यथा लिंगकरणतापदे संस्कारलिंगकानुमितौ का गतिः।
संस्कारध्वंसे वा का गतिः। वस्तुतः समानविषयसंस्कारजन्यत्वेन स्मृतित्वमत एव संस्कारव्या
पारत्वेन समसमयोत्पत्तिकत्वं बाधकं वक्ष्यति अन्यथा स्मृतित्वापत्त्योत्तच संवादिति- अत्र ब्रूमः।

विशेषणाविशेषणाज्ञानवत्परामर्षोपक्षीणानामपिपूर्वानुभवव्याप्तिस्मरणादीनांपरामर्षज
नकत्वेनानुमितिहेतुत्वमन्वयव्यतिरेकादिनाकल्पनीयंअनुमितौकरणांतरानुपपत्त्यावा·।
90 नाद्यः।तदभावात्परामर्षसतितद्व्यतिरेकानुमितिव्यतिरेकासिद्धेः।नान्त्यः।तथापिपरामर्ष
पूर्ववर्त्तित्वेनैवहेतुत्वमस्तुलाघवात्·नतुपरामर्षजनकत्वेननियमानन्यथासिद्धिघटितत्वेनत
स्यगुरुत्वात्तथावाकाशादीनामपितद्धेतुतापत्तिः।अवच्छेदकलाघवेव्यक्तिगौरवस्यादोष ८०
त्वात्·दोषत्वेवापरामर्षप्रागभावत्वेनैवहेतुत्वमस्तु·परामर्षपूर्ववर्त्तित्वापेक्षयाप्यस्यलघुत्वात्·
तत्पूर्ववर्त्तित्वंहितत्प्रागभावावच्छिन्नसमयवर्त्तित्वंतथाचतत्प्रागभावत्वमेवलघीयइति·परामर्षेणै
वान्यथासिद्धत्वात्तत्प्रागभावस्यनानुमितिहेतुत्वमितियदि·तदैतदत्रापितुल्यं·करणांतरानुप
पत्त्यातत्कल्पनमुभयत्रापितुल्यंपरामर्षजनकत्वेनहेतुत्वपक्षेस्मृतिरूपपरामर्षजनकसंस्का

रषत्परामर्षप्रागभावस्यापिहेतुत्वाभ्युपगमात् तथाचकरणानुपपत्त्यापितत्प्रागभावत्वेनै
वहेतुत्वंकल्प्यंनतुतज्जनकत्वेनापिगौरवात् एवंचसंस्काराव्यवहितस्यपूर्वानुभवस्यतज्जन्यसं
स्कारस्यवाहेतुत्वव्यवस्थापनव्यावृत्तिर्नभवतीत्यपरमप्यनुकूलंभवतिवस्तुतस्तत्प्रागभाव
स्यापिनानुमितिकरणत्वंपरामर्शेणान्यथासिद्धत्वात्तद्धेतुत्वएवमानाभावात् करणान्यथा
नुपपत्तिमीनमितिचेन्न·न·मनसएवतत्करणत्वसंभवात् नचापिकिंविनिगमकमितिचेत्·न·
मनसोनुमितिहेतुत्वस्यक्लृप्तत्वान्नपरामर्षप्रागभावस्यचतद्धेतुत्वेनाक्लृप्तत्वान्नप्रागभावत्वा
पेक्षयामनस्त्वस्यजातित्वेनलघुत्वाच्चनन्वेवमनुमितिर्मीनसाध्यक्षतापत्तिः।करणांतरासहकृ
तमनोजन्यत्वस्यैवतन्नियामकत्वादित्युक्तमितिचेन्न·नकरणान्तरंक्लृप्तमित्यंतरकरणमे
ववाच्यमन्यथायथाकृतोसंभवात्·एवंचपूमित्यंतरासाधारणासहकृतमनोजन्यत्वस्यैवमा

नसत्त्वनियामकत्वेनानुमितेर्मानसत्वंअनुमितिरूपमित्यंतरासाधारणाकारणीभूतपरामर्श
सहकृतमनोजन्यत्वात्तदुक्तंशशधरेनहिमनोजन्यत्वेनमानसत्वंकिंतुसाधारणाकारणानि
रपेक्षमनोजन्यत्वेननवानुमित्यादौतयापरामर्शादेरसाधारणस्यकारणस्यापेक्षनियमादि
७। त्तिभूतएववप्रमाणटीकानहिमनोनिमित्तमेतावतैवमानसप्रत्यक्षंभवतितथासतिनकिंवि
दमानसंप्रत्यक्षमात्रस्यमनोनिमित्तत्वात्असाधारणाकारणापेक्षयातत्तत्प्रमाणव्यपदे ८१
शस्तत्रापिभूयोदर्शनमसाधारणंकारणमितिप्रमाणांतरज्ञानमितिऔत्पत्तिकस्यवत्तथा
भावान्मानसत्वमेवननूत्प्रेक्षायानप्रमित्यंतरजनकत्वंपरामर्शस्यवत्तथात्वमित्यत्रकिंनियामकं
निर्व्यापारत्वेनोभयोरविशेषादितिचेन्नसव्यापारत्वाविशेषेशब्देन्द्रियादेर्विजातीयप्रमाज
नकत्वेयदेवतत्रस्वभावएवफलबलेनतथेतिचेत्·तत्रापिसएववत्ततएवतथास्त्वितिनकिंविदे

तत्र यद्वा प्रमित्यंतरप्रागभावासहकृतत्वमनोजन्यत्वं मानसत्वेप्रयोजकं लाघवात् इंद्रियत्वेन मनोजन्यत्वं वा तथा यथानवेव संस्कारत्वेन तज्जन्यत्वं स्मृतित्वप्रयोजकमिति नोक्तदोषः। यत्तु न व्याप्तिप्रकारकपक्षधर्मताज्ञानत्वेन परामर्षस्य हेतुत्वमिति व्याप्तेः प्रकारत्वेन परामर्ष पूर्वं तदुपस्थितेरावश्यकत्वान्न व्यभिचारः। स्मरणात्मकस्य परामर्षस्थले पूर्वानुभवस्यैव कारणत्वमिति यथाश्रुत एव ग्रंथः। साधुरिति तन्न एवं व्यभिचारोद्धारेप्यन्यथासिद्ध्यनुद्धारात्-किं व्यभिचाराभावसहकृतात् स्मरणांतरं विशेषो विशेषणांतरत्वविशेषणांतरमिति न्यायेन व्याप्तिवैशिष्ट्यविषयकपक्षधर्मताभानादप्यनुमितेरनुभूयमानत्वांत व्याप्तिप्रकारत्वेन तस्य तत्वमिति-विषमपरिशोधकस्यैवेतिनन्चेतस्यानुमितौ कथमुपयोगः। न च विरोधि शंका निवृत्तिद्वारा तथेति वाच्यं-परामर्षस्यैव विशेषदर्शनत्वेन तन्निवर्तकत्वादिति चेत्-मैवं। विशेष

दर्शनेस्वरसवाहिनीशंकानोदेत्यन्याहितानुदेत्येव· कथमन्यथाप्रामाण्यशंकादिनाऽर्थनि
श्चयेसत्यप्यर्थशंकादयस्तदिहपरामर्षनंतरंस्वरसवाहिनीसाध्याविरहशंकानिवर्त्तितांबाध
कप्रमाणाभावनिबंधनीभावंतत्साध्याभावशंकाकथंनोद्धेतुतदुक्तंगुणाकिरणावल्यामा
चार्यवरणैः विरोधिप्रमाणसद्भावशंकयामूर्त्तमनुमितौविलंबतेनतुमानादिति।तथाच
यथाधूमाद्वह्नि तानेनभवितव्यं· तथाकुतश्चिद्वह्न्यभावसाधकाद्वह्निशून्येनैवतत्कुतद्धूमेति ६२
शंकातत्रकिंवह्निविरहसाधकमितिजिज्ञासाचपरामर्षसत्यपिजायते· साच· यदिनिर्वह्निः
स्यान्निर्धूमःस्यादित्तथाचनवह्निविरहसाधकं· किमप्यत्रतत्सत्त्वेवह्निसाधकधूमानुपपत्ते
रितितर्केणापनीयतइतिविपर्ययविरुद्धप्रतिबंधकशंकाविरहादनुमितिरविकलाभवतीति
त्रस्वतःसिद्धशंकाविरहस्तत्रतर्कस्यापिनोपयोगइतिध्येयं।। ।।तच्चानुमानमिति· अनुमान

विषयीभूतंलिंगमित्यर्थः।केवलान्वयीति।क्लृपमाणाकेवलान्वयिधर्मसाध्यकमित्यर्थः।
असद्विपक्षमित्यस्यप्रपंचःकेवलान्वयं यथाज्ञातेसिद्धसिद्धिव्याघातात् अभिधेयत्वस्यशब्दश
क्तिविषयत्वस्यनविपक्षः।आकाशत्वादेरपिआकाशादिपदशक्यस्यवस्तुपदादिशक्य
त्वादितिभावः।अभिधानयति·येनैवपदेनतस्याभिधानंतत्पदशक्तिविषयत्वादेवनविपक्ष
त्वंअनभिधानेववस्तुपदादेरप्यनभिधेयतयाऽवस्तुत्वादेवनविपक्षत्वमित्यर्थः।पदशक्य
त्वेपिपदजन्यज्ञानविषयत्वाद्विपक्षत्वं वस्तुत्वंवस्यादित्याशंकतेअथेति·एवंचेतिउक्तक्रमे
णाव्या तेनिरस्तइत्यर्थः।यद्धर्मसाध्यकंलिंगंकेवलान्वयितद्धर्मनिरूपयति·तत्रनता
वदिति·यत्तूक्तक्रमेणात्यंताभावाप्रतियोगित्वमेवकेवलान्वयिधर्मलक्षणत्वेनतवाभि
मतं·तथाचाव्याप्तिरित्याशंकते·तत्रेति·यदीदंलक्षणंतत्रतदानायमत्यंताभावःकेवलान्व

यीस्यादित्यर्थः ननु कः संग्राह्य इत्याकांक्षायामस्यावतारो॰ लक्षणानाक्षेपेतत्रसिद्धां
तपूरणायतस्य विरुद्धत्वापातादिति॰ तत्र॰ नाप्याश्रयेत्यादिग्रंथस्य संगतत्वापातान् नह्य
९३ व्याप्यवृत्त्यत्यन्ताभावद्व्याश्रयनाशजन्यगुणादिनाशात्यन्ताभावोपि केवलान्वयित्वेन सं
ग्राह्योयेन तत्राव्याप्तिराशंक्येत नवा कृत्लक्षणेऽव्याप्तिरेव दुष्टव्यानातिव्याप्तिरित्यभिप्रा
येणातदुंथावतार इति वाच्यं लक्षणादूषयितुस्तत्रातिव्याप्तिमाशंक्य तन्निरासस्यासंभ ९३
वदुक्तिकत्वात् अव्याप्तिवदतिव्याप्तिसत्वेपि तद्दिष्टस्यैव सिद्धेः। उक्तेनैवोपपत्तेश्च॰ नवे
वमग्रे लक्षणपूरणायनं विरुद्धं स्यादिति वाच्यं॰ वृत्तिमदित्यादि केवलान्वयिलक्षणं॰ न
त्वन्यताभावाप्रतियोगित्वमात्रं तथाच। व्याप्यवृत्त्यत्यन्ताभावश्चाकाशात्यन्ताभावो वा
केवलान्वयेवेति नोक्तदोष इत्याशयेन तत्पूरणायनात् यथावस्थितलक्षणेनाव्याप्यव

स्यत्यंताभावसंग्रहस्तथाग्रे वक्ष्यते प्रतियोग्यवेति न च प्रतियोगिप्रागभावादेरपि तथेति
कथमवधारणं तस्यापि प्रतियोगित्वात् घटात्यंताभावस्यैव तत्प्रागभावात्यंताभावादि
त्तिभावः। प्रतियोगीति प्रतियोगितावच्छेदकरूपइत्यर्थः वृत्तिमदिति वृत्तिमानयोत्यं
ताभावस्तदप्रतियोगित्वमित्यर्थः। नन्विदानीमाकाशइति प्रत्ययादाकाशस्यापि वृत्ति
मत्वात्तदत्यन्ताभावे तथाप्यव्याप्तिः। न च वृत्तिः संयोगः समवायो वा इति विवक्षित इति
वाच्यं घटादेरपि केवलान्वयित्वापत्तेः। अव्याप्यवृत्त्यत्यन्ताभावाव्याप्तेश्चेति चेन्न स्व
वृत्तिविरोधि वृत्तेर्वृत्तिपदेन विवक्षितत्वात् स्ववृत्तित्वं तत्त्वं विरोधित्वं च स्वसामानाधि
करण्यधीविरोधित्वं संयोगादिवृत्तिश्च न तदत्यंताभाववृत्तिविरोधिनीति न तत्राव्याप्तिः
नन्वेवं संयोगस्यापि केवलान्वयित्वापत्तिः तदत्यंताभाववृत्तेरपि तद्वृत्तिविरोधित्वाभावात्

वृक्षादावुभयोः समानाधिकरणत्वादिति चेत् । न । कर्मादावधिकरणे तदत्यन्ताभाववृत्तेरपि त
द्वृत्तिविरोधित्वात् । यद्यपि संयोगवृत्तिरपि स्वावच्छेदेन स्वात्यन्ताभावविरोधिनी भवत्येव तथावत
९५ त्राव्याप्तिरेव । तथापि स्वसामानाधिकरण्यधीविरोधित्वं नास्ति । संयोगावच्छेदेन तदत्यन्ताभा
वासत्वेपि तत्सामानाधिकरण्यबुद्धेरप्रत्यूहत्वात् न चैवं मयत्वादिवृत्तिविरोधित्ववृत्तिरप्रसि
द्धेस्तत्राव्याप्तिरिति वाच्यं । स्ववृत्तिविरोधिमदत्यन्ताभावप्रतियोगिनो घटादयः प्रसिद्धास्तदन्य
त्वस्य तत्रापि सत्वात् । ननु तथाप्याकाशात्यंताभावः कथं केवलान्वयी कालादौ तस्य सत्वेन
तदत्यंताभावासत्वात् न च संयोगित्वेन तदत्यंताभावस्तथा । भूतलादौ संयोगित्वेनापि घटादि
वत्तस्य सत्वेन तदत्यंताभावासत्वात् । न चाकाशसंयोगस्य भूतलादिवृत्तित्वे प्याकाशे तत्र न व
र्त्तत इति वाच्यं एवं घटादेरपि भूतलादिवृत्तित्वं न स्यात् नापि समवेतत्वेन तदत्यंताभावस्तथा ।

व्यधिकरणधर्मावच्छिन्नप्रतियोगिकाभावाभ्युपगमापत्तेरिति चेत्-न-इदानीं भूतले घट इतिव
दिदानीं भूतलादावाकाशमित्याधाराधेयभावप्रतीतेरसिद्धेर्न्न तत्र संयोगित्वेन तस्य सत्वं तथा
त्वतदवच्छिन्नाभावएव तस्य केवलान्वयीत्याहुः-अन्ये तु अप्रसक्तसंयोगेनाकाशस्य भूतलादौ सत्वे
तथापि समवायसंवंधावच्छिन्नाकाशात्यंताभावएव केवलान्वयी-न चैवं व्यधिकरणधर्म्मा
वच्छिन्नाभावाभ्युपगमापत्तिः आकाशत्वावच्छिन्नप्रतियोगिकस्यैव तस्यारोप्पेण समवाय
संवंधभेदेनैवाभावाभ्युपगमात् आरोप्यसंवंधभेदेनैवाभावभेदात् न चाकाशस्य समवा
याप्रसिद्ध्या तदारोपोपि कथमिति वाच्यं-सर्वत्रैव विशिष्टस्याप्रसिद्धस्यैवारोप्यत्वात् न हि घ
टो नास्तीत्यत्र भूतलघटसंयोगोपि प्रसिद्धः तथा च यथारोप्यारोपविषयप्रसिद्ध्या तदुभयसं
सर्गोऽप्रसिद्ध एवारोप्यते यथा वान्योन्याभावे तदुभयप्रसिद्धिमात्रे तदुभयतादात्म्यं तथात्रा



यीतिन कोप्यनुपपत्तिः। यदि च संबंधभेदेनाभावभेदो नाभ्युपगम्यते तदा आत्मादृतरेभ्यो भि
९५ द्यते ज्ञानादिति व्यतिरेकानुमानं सर्वसिद्धं न स्यात् विषयविषयीभावसंबंधेन ज्ञानस्य वस्तुमात्र
वृत्तितया ज्ञानवत्त्वाभावाप्रसिद्धेः। तस्माद्यथा घटादौ विषयविषयीभावेन ज्ञानसत्वेपि समवा
येन तदभावः। तथात्रापि संयोगादिना काशसत्वेपि समवायेन तदभावः स्यात्. येन संबंधेन
यदभावस्तत्संबंधेनैव तत्सत्त्वस्य तदत्यंताभाववृत्तिविरोधित्वात्. तस्माद्व्यधिकरणधर्मो ना ९५
रोप्यतावच्छेदकीभूतो यो भावभेदक आरोप्यसंबंधो भूत्वा भेदक एवेति विभागः। एवं च येन संबं
धेन यस्य न वृत्तिस्तत्संबंधावच्छिन्न दभावः केवलान्वयीति परमाणवाद्यत्यंताभावोपि तत्त्वे
नैव एव। नन्वेवं प्रमेयत्वाद्यभावस्यापि केवलान्वयित्वेनाभ्युपगमे तदप्रसिद्धि विवंधनाऽव्यभि
चरितत्वलक्षणो केवलान्वय्यव्याप्तिः पूर्वोक्ता विरुध्यत इति चेत्. न व्याप्तिशरीरप्रविष्टसंबंधा

वच्छिन्नसाध्याभाववद्वृत्तित्वमव्यभिचरितत्वेन तत्राभिमतं अन्यथा समवायावच्छिन्नवह्न्यभाववद्वृ-
त्तित्वाद्धूमेपि वह्निव्यभिचारानुपपत्तेः। तथा च मेयत्वस्य समवायावच्छिन्नाभावप्रसिद्धावपि यत्र वा-
च्यत्वं तत्र मेयत्वमिति व्याप्तिशरीरप्रविष्टत्वरूपसंबंधावच्छिन्नसाध्याभावाप्रसिद्ध्या तत्राव्याप्ति-
संभवात् एवं च वृत्तिमत्पदस्याप्रसिद्धिवारकतया न व्यर्थत्वशंकापि अव्याप्तिवारकत्वे हि सा
स्यात् वस्तुतस्तत्रापि न व्यर्थत्वमित्युक्तमिंद्रियलक्षणादित्याहुः। वयं तु ब्रूमः। अन्योन्याभावप्रतियो-
गितानवच्छेदकधर्मत्वं केवलान्वयित्वं अन्योन्याभावप्रतियोगितानवच्छेदकधर्मत्वं केवलान्वयित्वं
अन्योन्याभावप्रतियोगितानवच्छेदकधर्मत्वं व्याप्यवृत्तिरेवेति नाव्याप्यवृत्त्यत्यंताभावोऽव्याप्तिरिति
एतच्च केवलान्वयिधर्मलक्षणं तद्धर्मसाध्यकत्वं च केवलान्वयिलिंगलक्षणं बोध्यं तेनायं प्रमेयो घट-
त्वादित्यादावपि नाव्याप्तिः। सर्वसाधारणान्वयिनोऽत्र लक्षणत्वादृशाविशेषान्वयिधूमाव्याप्तिर्न-

96 दोषइतिध्येयसदनुमानविरोधोयमित्यसाध्यसिद्धिविरोधिनीयस्येयुघटःप्रमेयत्वादित्यनुमाना
भासस्यत्रितयवह्निर्भाविपिनस्वतिरितिबाध्यंतथेतिआदिपदाद्विगत्यंताभावाद्विपरिग्रहः। ननु
प्रमात्वपरंपरासंबंधेप्रमेतिधीस्यान्ननुप्रमेयमिति। ग्रंथालोहितःस्फटिक इतिविशेषणास्येवप्र
कृतत्वान्नसंबंधस्येत्यरुचेराह। प्रमाज्ञालीयेति यद्यप्यस्मन्मतद्वश्वरप्रमाएकेवव्यक्तिस्त ९६
द्विसमत्वमनुगतमेवतथाप्युभयमतसाधारण्यादेतदुक्तं भिन्नेति। सवनप्रयोजको ऽतिप्रसं
गादितिभावः। अस्तित्वेति। घटास्तित्वेत्यर्थः। तस्यैवसंशयकोटित्वादितिभावः। साध्यसि
द्धीतिसाध्यसिद्धिविरोधिनीयस्यसाध्यसिद्धिप्रतिबंधइतिभावः। समानविषयत्वमिति। स
मानविशेष्यकत्वमित्यर्थः। घनगर्जितादप्यनुमितिः संशयस्यनानुमित्यंगत्वमित्यभिप्रा
येणाह। यद्वेति। पक्षेति। नयैतदज्ञानदशायांपक्षेसाध्यवत्वग्रहदशायांमुक्तयोग्यतासत्वेन।

नुमित्यापत्तिः। पक्षनिष्ठात्यंताभावप्रतियोगित्वज्ञानविरोधिज्ञानाभावस्यैव योग्यतात्वमित्या
शयात् अन्य इत्यवस्वरसबीजं एवमपि प्रमेयत्वेऽत्यंताभावप्रतियोगित्वसिद्धावपि प्रमेयो न वे
ति संशयकोटीभूताखंडप्रमेयत्वाभावस्याप्रसिद्धिरेवेति यदि तादृशोऽप्रमस्तदा तत एव न के
वलान्वयित्वमन्यथा संदेहाभाव एवेत्यादि तद्बीजमित्यप्याहुः एकरूपविकलमिति· विपक्ष
व्यावृत्तत्वविकलमित्यर्थः। अन्वयव्यतिरेकिणि तन्निश्चयेन गमकत्वदर्शनादिति भावः।
रूपांतरेति पक्षवृत्तित्वादीत्यर्थः। अन्वयेति· तत्रैकव्याप्तिनिश्चयादप्यनुमित्युत्पाददर्शना
दन्यत्रान्वयव्याप्तिनिश्चये सति व्यतिरेकव्याप्तिनिश्चये सति व्यतिरेकव्याप्तिनिश्चयप्रयोजकस्य
विपक्षव्यावृत्तत्वस्यतापेक्षेति भावः। नन्वन्वयव्यतिरेकिण्यन्वयव्याप्तिप्रतीतौ विपक्षव्यावृत्तत्व
स्यापि प्रयोजकत्वदर्शनात्तेन विनान्वयव्याप्तिनिश्चय एवात्र न स्यादित्यत आह· व्यतिरेकश्चेति·

९७ अन्वयव्याप्तिप्रतीतानि विशेषः। व्यतिरेकव्याप्ताविति सति सप्तमी। तथा च व्यतिरेकव्याप्तौ सत्यां
विपक्षसंभवे तद्वृत्तित्वशंका निवृत्तिद्वारा विपक्षव्यावृत्तत्वमन्वयव्याप्तिप्रतीतावुपयुज्यते न तु
साक्षात्। तथा चात्र स्वतः सिद्धे शंकाविरहे तन्निवृत्तिप्रयोजकस्य न कोप्युपयोग इति भावः॥ ॥
असत्सपक्ष इति। सिद्धसिद्धिपराहत इति तदर्थमाह। यत्रेति। व्यतिरेकेति। व्यतिरेकसहचारमा
त्रेणेत्यर्थः। दशाविशेषे धूमादेः केवलव्यतिरेकित्वमिष्टमेवेति भावः एकेति। प्रत्यक्षाद्यन्यतम
त्वेन यत्नुणामप्येकजातीयप्रमाजनकत्वसंभवादिति भावः। व्यतिरेकि साध्य इति। अनुमितिप्रयो
जकसामान्यसामग्र्या अभावादिति भावः। अपीति। वृत्तिमत्त्वेन विशेषणान्नावृत्तौ व्यभिचारः।
एवं सति सतिभेदकमाह। एवमिति। निरूपधीति। साध्यसाधनव्यतिरेकसहचारेण साध्यानुमि
त्यनुकूलाऽन्वयव्याप्तिरेव गृह्यत इत्यर्थः। नन्वत्रापि व्यतिरेकव्याप्त्युपन्यासेऽर्थान्तरमिति चेत्

न· नियमव्यतिरेकसहचाररूपायास्तस्या अन्वयव्याप्तिज्ञानार्थमेवोपन्यासात् अन्वयव्याप्तिज्ञा
नं च परस्य मानेसमेव· नह्यन्वयव्याप्त्युपन्यासेपि शीघ्रमेव तज्ज्ञानमनुमितिजनकं· वादिवचन
स्य निर्णयाजनकत्वात्· तथा च यत्रान्वयसहचारनिश्चयसंभवस्तत्रान्वयव्याप्तिज्ञानाय नि
यतान्वयसहचाररूपासैवोपदर्श्यते· यत्र तदसंभवस्तत्र तदर्थं· नियतव्यतिरेकसहचाररूपा
व्यतिरेकव्याप्तिरेव· न चैवं नियमांशोपन्यासाय वीप्सा वैयर्थ्यमिति वाच्यं तस्य व्यभिचाराभा
वदर्शनपर्यवसन्नतया परस्य व्यभिचारज्ञाननिवृत्तावुपयोगात्· तस्यापि व्याप्तिग्रहोपयोगि
त्वात्· न चैवमप्यप्राप्तकालत्वं अनुलिंगाभावेनैव व्यतिरेकसहचारस्यान्वयव्याप्तिग्रहहेतुत्वात्
लिंगतयैव ज्ञापकस्य ज्ञाप्यमनुपन्यस्योपन्यासेऽनाकांक्षाभिधानत्वेनाप्राप्तकालत्वात् अत ए
वोपाधिज्ञानादौ विन्यावर्जिनं मानसमपि व्यभिचारज्ञानसंभवतीति व्याप्यव्यभिचारमनुपन्यस्या

पाधिरूपन्यस्यतद्इतिसिद्धंतइतिभावइत्याङुः। ननुव्यतिरेकसहचारेणयद्यन्वयमात्रंव्याप्तिज्ञा
नंजन्यतइतिमतंतदान्वयमात्रव्याप्तिज्ञानतस्तस्यवैलक्षण्यभावश्यकंतद्विलक्षणहेतुजन्य
98 त्वात्‌विषयकृतंवतत्रासन्नास्तीतिजातिरूपमेववाच्यंतन्नसंभवतिवालुसत्वादिनासंकरापि
त्तेः। यदिवान्वयव्यतिरेकोभयव्याप्तिज्ञानतेनजन्यतइतिमतं-तदाऽन्वयव्यतिरेकोभयसह
चारजन्यतदुभयव्याप्तिज्ञानतस्तस्यतुल्यविषयतयाजातिरूपमेववैलक्षण्यमुपेयं-तदपिन ९८
युज्यतेवालुसत्वादिनैवसंकरापत्तेः। नव्यभिचारज्ञानविरोधिसहचारज्ञानत्वंहेतुत्वेनहेतु
वैलक्षण्याभावात्तत्रवैजात्यमितिवाच्यं-सहचारस्यतज्ज्ञानस्यवाव्यभिचारज्ञानविरोधित्वा
भावात्‌तत्सत्वेपिवह्न्यादौधूमादिव्यभिचारोपलंभादितिचेत्‌-न-स्वाधिकरणनिष्ठव्यभिचार
ज्ञानविरोधिसहचारज्ञानत्वेनोभयस्यहेतुत्वात्‌-यत्राधिकरणेसाध्यसाधनयोस्तदभावयोर्वा

सहचारग्रहस्तत्र हेतुसत्त्वाभावसामानाधिकरण्यात्मकव्यभिचारज्ञानस्य सर्वथैवासंभवा
त्. ननु व्यतिरेकसहचारेणान्वयव्याप्तिज्ञानं व्याप्तिविशेषणकं लिंगविशेष्यकं वा जन्यते.
व्यभिचाराभावविशेषणकं सहचारविशेष्यकं वा. नाद्यः तत्पूर्वमन्वयव्याप्तिज्ञानाभावा
त् लिंगेन्द्रियसंनिकर्षाभावाच्च. नान्त्यं विशेषणाज्ञानं विशेष्यसंनिकर्षं विना तस्याप्यभावा
त्. व्यतिरेकसहसहचारज्ञानमात्रे कालेतयोरभावादिति चेन्न. न. अन्यपक्षस्येवायुक्तत्वा
त्. इतरसामग्रीसत्त्वेन तस्य व्याप्तिग्राहकत्वाभ्युपगमात् विशेषणाज्ञानादिसत्त्वे ऽन्वयसह
चाराज्ञानेपि ततो व्याप्तिग्रह इत्येवाभिमतं न तु तद्व्यतिरेकेपीति स्यात् अन्वयसहचारस्याना
मिषिक्तत्वात्. अन्यथा इतरकारणाविरहे ततो न व्याप्तिनिश्चय इत्यन्वयसहचारज्ञानस्यापि
तद्धेतुत्वं न स्यात्. अन्वयात्. उभयसहचारादन्वयव्याप्तिरवगम्यत इति मतावष्टंभेनेदमुक्तं.

एवमन्वयव्याप्तिग्राहके पक्षतावच्छेदकान्तरप्रतीत्यनियमात् प्रकारान्तरमाह· पृथिवीत्वमिति·
येषां केवलव्यतिरेकिणोऽभावरूपं साध्यमप्रसिद्धमेव सिद्ध्यति अन्वयव्याप्तिज्ञानजनकविशे
११ षणाज्ञानादिविरहेऽपि व्यतिरेकव्याप्तिज्ञानादेवानुमित्युत्पादाभ्युपगमस्तेषां मतेन प्रकारान्तर
माह· यद्वेति· तथा च पूर्वोक्तरूपेण व्यतिरेकसहचारस्य विशेष्यसन्निकर्षादिसत्त्वेऽन्वयव्या
प्तिज्ञानहेतुत्वं तदसत्त्वे व्यतिरेकव्याप्तिज्ञानहेतुत्वमेव तस्येत्यनियम एव· ननु पूर्वीस्वरसेन ९६
यं विकल्प्य इति ध्येयं· व्यतिरेकव्याप्तेरिति पञ्चम्यन्तं· साध्याभावेति· अत्र प्रतियोगिवैयधिक
रण्यावच्छेदकावच्छिन्नः सन्योऽभावः प्रतियोगिवैयधिकरण्यावच्छेदकावच्छिन्नस्य साध्या
भावस्य व्यापकस्तत्प्रतियोगिसत्त्वं व्यतिरेकिणो गमकताप्रयोजकत्वेनाभिमतं अन्यथा रू
पादिविरुद्धसंयोगादेरूपादिगमकतापत्तेः। संयोगे साध्ये द्रव्यत्वादेरन्वयव्यतिरेकित्वाभाव

पक्षेश्च॰ केवलान्वयिलिङ्गस्य साध्यकहेतोश्च तत्वेनावश्यं संग्राह्यत्वात्॰ अन्यथा तस्य त्रितयवह्निभावा
पत्तेः। नन्वेवमपि विभागव्यक्तिविशेषाभावस्य संयोगव्यक्तिविशेषाभावगमकत्वं न स्यात्
तत्र संयोगरूपसाध्याभावस्य प्रतियोगिसामानाधिकरण्यनैयत्येन निरुक्तस्य गमकता
प्रयोजकस्य तत्रासंभवादिति चेन्न॰ न॰ तस्य केवलान्वयित्वेन व्यतिरेकितया ऽसंग्राह्यत्वादि
त्युक्तेः। एवं हि यत्र संयोगव्यक्तिविशेषव इति व्यतिरेकव्याप्तिप्रमायां तत्संयोगाभावयोर्गम्य
गमकभावः कथं स्यात्॰ उक्तरीत्या तस्य व्यतिरेकित्वाभावात् अन्वयव्याप्त्यस्फुरणादशायां
केवलान्वयित्वेनागमकत्वाच्च न वत्तस्य तदा तद्गमकत्वमिष्टमेवेति वाच्यं॰ एवं यत्र वह्निविर
हस्तत्र धूमविरह इति व्यतिरेकव्याप्तिग्रहे धूमस्यापि वह्निगमकता नापत्तेरविशेषादिति प्रक्षे
तादृशव्यतिरेकव्याप्तिग्राहकस्य रूपादिविरुद्धसंयोगविशेषादिसाधारणात यानन्यगत्या गुरो

100 रपिनिरुक्तस्यैवगमकत्वेत्तस्यबाधासंभवात्तदातदगामकत्वंतस्यभ्रमेव-अतएवधूमस्यापि
निरुक्तभानादेववह्निगमकत्वंनान्यथेत्युत्तरंप्रतिभावीतिदिक्-अथवाप्रसिद्धसाध्यकव्यति
रेकिणिसाध्यरूपप्रतियोगिव्यधिकरणत्वेनसाध्याभावस्यकथंज्ञानमितिचिन्त्यं-यत्तुप्रति
योगिव्यधिकरणस्वसमानाधिकरणात्यंताभावप्रतियोग्यप्रतियोगिकत्वेनसाध्याभाव
विशेषणीयइति-तन्न-व्यतिरेक्याभासोच्छेदापत्तेः।नवनत्वेनज्ञानंगमकताप्रयोजकंतद्य १००
क्वचिन्नुमाक्कविद्धूमइतिवाच्यंतत्वेनज्ञानंहिव्यभिचारग्रहविरोधिनवा-आद्येव्यतिरेकसह
चारमात्रविषयतयैवगमकतापत्तौनियमांशवैयर्थ्यापत्तेः।अन्त्ये-तत्वेनधूमदशायांरूपादि
क्वचिद्धत्वेनज्ञानस्यसंयोगविशेषरूपादिगमकतापत्तिरेवेति-अनुमितिमात्रइति-यद्य
पिव्यतिरेकिणोव्यापकताज्ञानमात्रंहेतुर्ननुव्याप्तिधीरपि-तथापितस्यव्यतिरेकव्याप्ति

विशेषतयैवहेतुत्वंअन्वयव्याप्तिज्ञानेनतुल्ययोगक्षेमत्वात्‌अन्यथा।ऽन्वयिन्यपिव्यापकताज्ञान
मेवहेतुःस्यात्‌यथावाच्चनेष्टापत्तिस्तथोक्तं ननुतथापिव्याप्तिज्ञानत्वंमतिप्रसक्तमितिस्वव्या
प्तिज्ञानत्वेनहेतुत्वंवाच्यंतच्चनव्यतिरेकव्याप्तिसाधारणमितिचेत्‌·न·स्वव्यभिचारधीविरोधि
धीविषयव्याप्तिज्ञानत्वेनहेतुत्वात्‌एवंद्वयव्याप्तिपरामर्शद्वयस्याप्यनुगमयितुंशक्यत्वात्तस्या
नुमितिमात्राएवहेतुत्वसंभवाद्विशेषसामग्रीद्वयाभिधानविरुद्धंतथापिव्यतिरेकानुमितौ।व्या
पकतावच्छेदकावच्छिन्नाभावविषयत्वंअन्वयानुमितौव्यापकतावच्छेदकावच्छिन्नविषयत्वमनु
भूयतइतिफलभेदआवश्यकइत्यभिप्रायेणेदमभिमतंअतएवटीकादौनेदंनिरात्मकंजीवच्छ
रीरमित्येवानुमित्याकारदर्शनमितिभावः।अतिप्रसंगइतिपक्षधर्मताज्ञानंविनापिव्याप्तिग्र
हमात्रादनुमित्यापत्तिरित्यर्थः।अन्वयीतिअतिप्रसंगस्थलइतिशेषः।पक्षत्वमितिसंदेहघटि

तपस्त्वमित्यर्थः।नन्वनुगममात्रेणानासाधारण्यं।किंतुतद्यावत्तत्वग्रहेणान्यपरितोषाद
161 हकिंयेतिवैधर्म्यमित्यस्यैवविवरणं जलादीतिवैधर्म्येतिपृथिवीत्वस्यहेतौवैधर्म्यरूपत्वा
दितिभावः।तथापीतिमिलितस्याप्रसिद्धिरितिभावः।आचार्यमतंशंकते अथेतिननुतेजो
भिन्नत्वेसतिजलादिकादशभिन्नत्वंकथमुक्तसंशयेनापिविषयीकर्त्तव्यंतस्यतत्पूर्वमसि
द्धातज्ज्ञनकविशेषणाज्ञानाविषयत्वादित्यतआह एकेतिएकविशेषणाविशिष्टतयोपस्थि १०१
तइत्यर्थः।यद्वेतिअत्रत्रयोदशत्वमविवक्षितंसमूहालंबनीभूतेकसंशयेपितावद्भेदानां
प्रत्येकंकोटित्वसंभवादितिध्येयंयदित्रयोदशसंशयास्तदापूर्वपूर्वसंशयोपस्थितभे
दविशिष्टत्वेनोपस्थितेधर्मिण्यपिसंशयेनतावद्भेदसमुदायोविषयीकृतइतिध्येयंएका
धिकरणेनतावद्भेदोपस्थितयेउक्तसंशयानुसरणंअन्यथाकोटिप्रसिद्धिंविनासंशयस्या

प्रसिद्धेर्निश्चयरूपा। एतावद्भेदरूपसाध्यप्रसिद्धिर्भवत्येव एकाधिकरण्यविशिष्टत्वावच्छेदक
साधनं वा साधारण्यनिरासार्थं जलादेर्विपक्षत्वे प्रसिद्धाव्यतिरेकव्याप्तिग्रहार्थं च अन्यथा
तेजोवाय्वादिद्वादशभेदस्य जलादावपि सत्त्वे त्रयोदशभेदाभावस्य तत्र सत्त्वे तदसंभव एव
स्यात् व्यासज्यप्रतियोगिकाभावानभ्युपगमात् प्रत्येकभेदसाधने ऽसाधारण्यात् तथा
चैकाधिकरण्यावच्छिन्नत्वरूपविशेषणाभावाद्विशिष्टाभावसत्त्वेन तस्य विपक्षत्वं तदसंभव
इति भावः। समुदितेति एकाधिकरण्यावच्छिन्नेत्यर्थः। साध्यनिश्चय इति अत्र वदंति पृथिव्यां ज
लादित्रयोदशभेदसंशये सति न जले तत्संशयः तत्र जलभेदाभावस्यैव ग्रहात् एकदेशावि
रहनिश्चयस्यापि समुदायसंशयविरोधित्वात् ननु मा भूत्तत्र तदा तत्संशयः। तद्व्यतिरेकनिश्च
योपि न स्यात् प्रतियोगिनिश्चयस्य भावनिश्चयहेतुत्वात् तथा च कथं व्यतिरेकव्याप्तिग्रहः स्या

द्विनिवेत्त।नालाघवेनप्रतियोगिज्ञानत्वेनैवतस्यहेतुत्वात् पृथिव्यांजलादित्रयोदशभेदसंश
येसत्यपिज्ञातुंनजलादित्रयोदशभेदवदितिनिश्चयस्यानुभवसिद्धत्वाच्चेनवतत्रतद्व्यापकमा
नासंभवः।संशयरूपायामेवसमुदितत्रयोदशभेदाभावप्रसिद्धौसत्यांजलंजलादित्रयो
102 दशभेदसमुदायाभाववत् तदेकदेशीभूतजलभेदाभाववत्त्वात् यद्यत्समुदायैकदेशाभा
ववत्तत्तत्समुदायाभाववदितिसामान्यतो व्याप्तिमूलकस्यैवानुमानस्यसंभवात् नहिसा १०२
मान्यव्याप्तिमूलकेप्यनुमानेप्रकृतसाध्यहेत्वोःसहचारनिश्चयापेक्षा यथात्रदेहेतदाभेत्रा
भाववदित्यत्र वस्तुतस्तु...संशयानंतरंत्रयोदशभिन्नत्वस्यतदभावस्यवानिश्चविषयत्व
मपिनदुर्लभंतदनुव्यवसायरूपेणैवनिश्चयेनतत्कारत्वेनोभयोरपिविषयीकरणादिति·
अत्राहुः।यत्रङ्गासामान्यतोव्याप्तिरनुगतव्याप्यतावच्छेदकाद्यभावान्तानुमानांगामिति

ग्रंथकृते वोक्तत्वादुक्तानुमानं न व्यतिरेकनिश्चायकं-प्राङ्गनस्तितानुमानमपि तद्धत्तया ऽस्म
र्यमाणत्वहेतोरन्वयाप्रतीतौ व्यतिरेक्येव तदुभयानवतारे प्राङ्गादितिबुद्धेरसिद्धेः। यत्त्वनु
व्यवसायेन निश्चयरूपाप्रसिद्धिरिति तन्न यादृशो हि निश्चयो व्याप्तिग्राहकोऽनुव्यवसायस्य
तथात्वाभावात् विषयविशेषणीभूतधर्मग्रहस्य व्याप्तिधीहेतुत्वादनुव्यवसायेन तज्ज्ञान
विशेषणत्वेन तदवगाहनादिदिवस्तुतस्तु समुदायाभाववत्त्वरूपस्यापि साध्यानुरेवेति
नोक्तमनुमानं संभवति नवसंशयरूपेव तत्प्रसिद्धिरिवाव्यंभेदसमुदायस्य तदभावस्य
वाप्रसिद्धत्वेन संशयकोटित्वासंभवात् प्रसिद्धौ संशयस्याप्यभावात् नवैकाधिकरण्येन
तावद्भेदोपस्थितये संशयानुसरणमिति वाच्यं संसर्गविषये काधिकरण्योपस्थितावपि
व्यापकावच्छेदकप्रकारेण संशयादप्यनुपस्थितेरिति भावः। योग्यानुपलब्धेरिति। ऐं

द्रियकस्यप्रतियोगिनोऽनुपस्थितेरित्यर्थः। नयनेति तत्प्रतीतो नयनोन्मीलनानंतरमस्येत्य
103 र्थः। याहीति एवंद्धिमनोऽन्योन्याभाववन्मनस्त्वात्यंताभावोपिघटे प्रत्यक्ष एव तत्रापि प्रति
योगि सत्वविरोध्यनुपलब्धिसंभवात् तद्विषयत्वेनैवाभावस्य योग्यत्वादिति केचित् अन्ये
तु नन्वितादृशानुपलंभोऽवश्यमभावं ग्राह्यत्येवेति नियमः प्रतियोगिज्ञानादिविरहे
ऽभावज्ञानानुदयात् किन्त्वभावग्रहणकारणप्रतियोगिज्ञानादिसंभवे सति योऽयमभ १०३
भावग्राहयतीति मनस्त्वात्यंताभावस्तु न योग्यो योग्यप्रतियोगिकस्यैव संसर्गाभावस्य
योग्यत्वादतो घटे स न गृह्यते। रूपवदन्योन्याभावस्तु योग्योपि वायावधिधरणायोग्यतावि
रहान्न गृह्यते। रूपवदन्योन्याभावस्तु योग्योपि वायावधिकरणायोग्यतो अन्योन्याभावग्रहे
तस्याः प्रयोजकत्वात् अत एव संसर्गान्योन्याभावयोः प्रतियोग्यधिकरणयोर्योग्यतातंत्रमि

तिसिद्धांत इत्याहुः। अनयोश्च कल्पयोर्विनिगमको ऽनुभव एवेति ध्येयं। अनुपलब्धिश्च यादृ
श्यभावोपलब्ध्यंगता दृशी प्रपंचिता प्रत्यक्षप्रकाशे न त्विति नैवेंद्रियवानुपलब्धिमात्रमि
त्यर्थः। नन्वधिकरणे प्रतियोगिसत्वस्याप्रसिद्ध्या तन्निरूपितविरोधित्वस्यासंभवादुक्ता
नुपलब्धिरप्रसिद्धिरित्यत आह अधिकरण इति तथा च तर्कितमेवैतद्विरोधित्वनिरूपन
नु वास्तवमिति भावः। तमेव तर्कमाह यदिह्यत्रीति स्तंभो यदि पिशाचात्मा स्यात् पिशाचा
त्मतया प्रमाविषयः स्यात् यो यदात्मा स तदात्मतया प्रमाविषय इति सामान्यव्याप्तेः।
तत्र दृष्टांतः संभवति विशेषव्याप्तौ तु व्यतिरेके दृष्टांतो ऽयमन्वये तु पिशाच एव दृष्टांत इ
ति द्रष्टव्यं एतेनोपलंभपदं यदि प्रत्यक्षपरं तदा व्याप्त्यसिद्धिः यदि ज्ञानमात्रपरं प्रमाप
रं वा तदेष्टापादानमित्यपास्तं स्तंभो यदि पिशाचवतादात्म्यं स्यात्तदा स्तंभतादात्म्यव त्त

१०५

दुपलभ्येत स्तंभे यत्तादात्म्यं तत्तत्रोपलभ्यतेति व्याप्तेरित्यर्थ इत्यन्येनत्वाकाशादितादा
त्म्यस्य शब्दाश्रयत्वादिरूपतया जातित्वाभावाद्घटादिवृत्तित्वेन न तदुपलंभमापादयितु
शक्यत इति तदन्योन्याभावस्तत्र कथं प्रत्यक्ष इति चेत् न आकाशादिघटाद्योरभेदे आ
काशत्वादेरपि जातित्वापत्तेरावश्यकत्वात्तदापादानसंभवात् न ह्येकव्यक्तिकत्वमप
द्यापाकाशत्वादीनामन्यज्जातित्वबाधकमस्तीति भावः। यद्यपि सामान्यविशेषसम
वायान्योन्याभावोयमपि कल्प्यो न संभवति तथापि घटादिवृत्तितादात्म्यत्वेनैव त
त्र तदुपलंभापादनं शक्यमिति ध्येयं पक्षतावच्छेदकनानात्व इति कुत्र वदंति पक्षताव
च्छेदकनानात्वे एकत्वे वा पदार्थपक्षव्यक्तिकैकसमूहालंबनरूपा साध्यसिद्धिरु
द्देश्या भवति तदोभयत्रापि क्वचित्पक्षांशे साध्यसिद्धौ ज्ञातायां नांशतः सिद्धसाधनं १०५

तद्देशेप्युद्देश्यभूतायाः समूहालंबनरूपसाध्यसिद्धेरज्ञातत्वात् यदातु समूहालंभनत्वा
द्युदासीनायाकाचित्साध्यसिद्धिमद्देश्याभवति तदाभयत्रापितद्वर्जनीयमेव पक्षतावच्छे
दकेक्वापि तद्देशसाध्यप्रतीते ज्ञानत्वेन तदुद्देश्यविच्छेदात्· तस्माद्दनच्छिन्त्यमिति अत्रब्रूमः
पक्षतावच्छेदकैक्यं ऽशतः सिद्धसाधनं तभवत्येव पक्षतावच्छेदकधर्मसामानाधिकरण्येन
क्वचिदपि पक्षे साध्यसिद्धौ क्वापि सिद्धसाधनमेव नांशतः सिद्धसाधनं तादृशसिद्धेरेवानुमा
नसाध्यत्वात् तदसिद्धौ तत्र केवनास्तिनक्वापि पक्षसाध्यसिद्धिमात्रेणातत्र धूमवत्त्वेन पर्व
ते वह्निनिश्चयसि धूमसाधनप्रसंगात् तस्मात्प्रकृतेघटत्वेन साध्यसिद्धावपि पक्षतावच्छेद
कसामानाधिकरण्येनतदसिद्धौ नोक्तदोषः नन्वेवं पृथिवीत्वस्य पक्षतावच्छेदकत्वात्तत्सा
मानाधिकरण्ये नैवघटे साध्यसिद्धेः सिद्धसाधनमेवास्त्विति चेत्· न· सर्वपृथिवीत्वस्य पक्षताव

वच्छेदकत्वात्तदिदमुक्तं सर्वा पृथिवी इतरभिन्नेत्युद्देश्यप्रतीतेरभावादित्ति: अतएवाग्रे स
र्वत्वेन रूपेणैपक्षतेति वक्ष्यति ते वक्ष्यति यच्चु समूहालंबनानुमित्युद्देश्यतायांपक्षताव
च्छेदक नानात्वेपि नांशात: सिद्धसाधनमिति तथैव सिसाधयिषाविरहस्थलएव तन्नाश।
105 त: सिद्धसाधनस्योक्तत्वादिति अन्यथेति यद्यनुमितिविषयैकदेशासिद्ध्या सिद्धसाधनमि
त्यर्थ:। ननुधूमवान्नित्यादिना सामान्यतो निश्चितविशेषरूपेण संशयस्योपपादितत्वे १०५
पि विशेषरूपेण निश्चिते सामान्येन संशयो नोपपादित: तथा सति इदं पर्वतत्वेन वह्नि
निश्चये पर्वतत्वेन संशयप्रसंगात् किंचयदवच्छेदेन यत्कोटिनिश्चयस्तदवच्छिन्नत्वज्ञानं त
त्रतत्कोटिकसंशयविरोधि ननु तत्प्रकारकतत्कोटिकसंशयविरोधिगौरवादतएव धूम
त्वेन व्याप्तिनिश्चये सति धूमत्वेनोपस्थितायां व्यक्तौ विशेषतोपि न व्याप्तिसंशय:। तदुक्तं प्र

कृयत्र हि यद्व्याधकेन्ने धर्मदर्शनं तत्र न तत्संशयः। तच्च सामान्यविशेषेवेत्यपरितोषादाह-
यद्वेति पृथिवीत्वेनेति घटादिभिन्नपृथिवीत्वेनेत्यर्थः अन्यथा पूर्वोक्तरीत्या सिद्धसाधनप्रसं
गात् अत एवेश्वरानुमाने विप्रतिपत्तिमात्रविषयसंग्राहकपक्षतावच्छेदकनिर्वचने निर्बन्धः
अन्यथा कार्यत्वेन तावतामेव पक्षत्वेऽदोषप्रसंगात् न वांशतः सिद्धसाधनमित्येवंवादिदृश
पक्षतावच्छेदकनिर्वचनं तत्र तथा च पक्षतावच्छेदकैक्ये तदभ्युपगतमेवेति वाच्यं तन्मते सिद्ध
साधनमीत्येव तन्निर्वचनात् अन्यथा कार्यं सकर्तृकमित्यत्र घटादावंशतः सिद्धसाधने प
रेणोद्भाविते कार्यत्वेन क्षित्यादिकमेव पक्ष इत्युद्भावनादेव विजयेतरवादीनि भावः। पूर्वमतेऽप्य
न्वयित्वमापादयति घटसाधारण्येति अन्वयेति उक्तरीत्या हेतुसाध्यसामानाधिकरण्यग्रहा
वश्यंभावेऽपि अव्यभिचारानुपस्थितिदशायामन्वयव्याप्तिप्रतिसंधानसंभवादिति भावः। उक्ता

106

वृत्ति

प्रकारस्याकारस्याकाशादावसंभवात्तदर्थं प्रकारांतरमाह अथवेति एतद्व्यासज्यप्रतियो
गिकाभाववादिमतेन अन्यथा जलादौ तेजोवाय्वादिभेदसत्त्वेन त्रयोदशभेदाभावासंभवेन वि
पक्षत्वानुपपत्तेर्व्यतिरेकव्याप्तिग्रहानुपपत्तेः। प्रत्येकं वसाध्यतायामसाधारण्यापत्तेः। तस्मा
द्व्यासज्यवृत्तिधर्मस्य साध्यतावच्छेदकत्वे तदवच्छिन्नाभावप्रकसत्वेप्यस्तीति नोक्तदोषः। अ
त एव नासाधारण्यमपीति निश्चितसाध्यतावच्छेदकावच्छिन्नवद्व्यावृत्त्यादिकं तद्भवति प्र १०६
कृते च न तथा प्रत्येकाभावस्य व्यासज्यवृत्तिधर्मावच्छिन्नत्वाभावत्वात् अन्यथैकत्रापि द्वा
विति बुद्ध्यापत्तिः। अत एव गुणेवत्तातितावदभावयोगीत्यत्र सपक्षो भवति ननु तदेकदेशाक्र
तिपयाभाववान् साध्यतायास्तावति पर्याप्तिरिति न वैवं साध्यतावच्छेदकेन रूपेण साध्यप्रसि
द्धिरपि कथमिति वाच्यं भिन्नभिन्नाधिकरणस्थानानामप्यभावानां त्रयोदशत्वादिना ज्ञान

संभवात्यत्तुप्रत्येकव्याप्तिभिःप्रत्येकाभावानामपिसाध्यत्वेनासाधारण्यंस्यादितितच्चिंत्यं·
तथापिप्रत्येकाभावव्याप्तत्वज्ञानेनप्रत्येकाभावाभावसाधनस्यानिष्कलंकत्वेनमि
लिताभावासिद्धेः।मेलकस्यातिरिक्तस्यासिद्धेः।सिद्धौवामेलकानामसिद्धौसर्वथात
दसिद्धेरितिकेचित्तुअसाधारण्येदशाविशेषेदोषइतियदातदभावस्तदाकिंचिदयमपि
कल्प्यःसंभवतीत्येतदुक्तमित्याहुः।सर्वसाधारण्यंप्रकारान्तरमाह यद्वाजलमितियद्यप्यु
क्तानुमानाज्जलभेदस्यासिद्धेःसिसाधयिषितत्रयोदशभेदस्यासिद्धिरेवतथापितेजःप्र
भृतिद्वादशभिन्ननिष्ठभेदप्रतियोगित्वंसाध्यमतोनोक्तदोषः।अन्येतु·तेजःप्रभृतिद्वाद
शभिन्नंनजलभेदवत्जलनिष्ठभेदप्रतियोगित्वादित्यनुमानान्तरात्तत्सिद्धिरित्यभिप्रेत्यैतदु
क्तमित्याहुः।यत्तु·जलद्वादशभिन्नप्रतियोगिकभेदभानोद्वादशभिन्नोपिजलभेदस्यभानंस

मानसंवित्संवेद्यत्वादिति तन्तुच्छं विशेषणाविशेष्यादिभेदेन समानसंवित्संवेद्यत्वासिद्धेः। तत्प्र
तियोगिकभेदेभासमानेतन्निष्ठभेदप्रतियोगित्वंभासतइत्युचितंअतएवगवयेगोसादृश्यभा
समानेसमानसंवित्संवेद्यतयागविगवयनिष्ठसादृश्यप्रतियोगिकत्वभानं ननुगवयप्रतिप्र
107 तियोगिकगोसादृश्यभानमपिअन्यथासादृश्योपमानस्यप्रत्यक्षएवांतर्भावसंभवादनुमा
नांतर्भावप्रमाणयानुपपन्नेरिति- इतरभावान्योन्याभावस्यसाध्यत्वादिति इतरप्रतियोगिकता। १०७
वदन्योन्याभावत्वेनरूपेणयदिसाध्यतातदाभाववद्बहिर्भावादनुमानांतरपेक्षा। यदिवाभावप्र
तियोगिकस्वरूपभेदवत्वेसतिजलादिभावप्रतियोगिकत्रयोदशाभाववत्वंसाध्यंयदिवाइ
तरत्वावच्छिन्नसामान्यान्योन्याभावएकएवसाध्यस्तदाऽभावभेदोपिपृथगनुमानेनैवसिद्ध्य
तीतिमंतव्यं नन्वभावप्रतियोगिकाभावानभ्युपगमेनसामान्यान्योन्याभावोपिभावमात्रप्र

तियोगियोगिक एवसिद्धेन्नाभावप्रतियोगिकइतिचेत्‌.न.भावसाधारणप्रतियोगितावच्छेद
कभेदेनाभावस्याप्यतिरिक्ताभावस्वीकारस्यावश्यकत्वात्‌ अन्यथाकार्यत्वेसाध्येतद्ध्वंसव्यभिचारिणा
पिप्रमेयत्वादेस्तद्व्याप्यत्वापत्तिः कार्यत्वस्यध्वंसवृत्तितयाप्रमेयत्वादिसमानाधिकरणात्यंता
भावप्रतियोगितानवच्छेदकत्वात्‌तस्मादकामेनापिभावाभावसाधारणप्रमेयत्वावच्छिन्नप्रति
योगिकोभावोऽभ्युपेयस्तथेदृपिननुपृथिवीतरत्वस्यपृथिव्यन्योन्याभाववत्वस्याभावेभा
वाभावाभावसाधारणसामान्यान्योन्याभावप्रतियोगितावच्छेदकमेवात्रदुर्मिलमितिवत्त
न.जलादिभावाभावविशेष्यकसमूहालंबनसंभवेनतज्ज्ञानविशेष्यस्यैवत्वस्यतादृस्यस
त्वात्‌नवाभाववद्भिर्भावपक्षेऽभावस्यैवसपक्षत्वात्‌नतोहेतुव्यावृत्तावसाधारण्यमिति
वाच्यंतस्यसपक्षत्वाप्रतिसंधानदशायामेवास्याभिमतत्वात्‌ अभावस्याभावानाश्रयत्वा

देवनसपक्षत्वमित्यप्याहुः।तेनसममिति यद्यप्यभावस्वरूपभेदस्यपृथिवीजलादिरूपत्वेना
ननुगमस्तत्वस्थ एव तथाप्यभावभिन्नत्वबुद्धिजननयोग्यत्वमनुगतमस्तीतिभावः।नवा
त्यावपत्तिनिघटादौव्यभिचारः पृथिव्यादिस्वरूपस्याभावभेदस्यतत्राभावादितिवाच्यं।
108 घटादिरभावभिन्न इत्यबाधितप्रतीत्याभेदत्वेनवस्यापिस्वस्मिन्ननन्यगत्यावृत्त्यभ्युपग
मात्प्रतीतिवैचित्र्यस्यान्यथानुपपत्तेरितिदिक् पृथिवीत्वाभिन्नेतिपृथिवीत्वसमानाधि १०८
करणधर्मत्वावच्छिन्नात्यंताभावइत्यर्थः अस्याप्रसिद्धिरित्यस्वरसोदाहृ जलत्वादीति। योग
इतिपक्षधर्मतावललभ्यसाध्यसंबंधाभिधानं अत्यंताभावस्यैववसाध्यत्वं अन्यथा मगृंथ
विरोधः स्यात् अत्रजलत्वादिनियतस्नेहाद्यभावेपिसाध्यइतिनपूर्वाभेदः।योगोमेलकमि
त्यन्ये ननुप्रत्येकंसाध्यतायांसमूहालंबनानुमित्याऽभाववदभावसिद्धावसाधारण्यमि

ल्लितसाध्यतायांवाप्रसिद्धिरित्यनुशयेनव्यासज्यवृत्तिप्रतियोगिकाभाववादिमतमेवावलंब
ते मिलितानामप्रीति किंविदिति त्रयोदशत्वसंख्यासमानकालीनस्यतादृशापेक्षाबुद्धिविषयत्व
स्यसत्वादितिभावः।एतेनतादृशबुद्धिविषयत्वावच्छिन्नानामेवाभावानांतेजःप्रभृतिषुसत्वेन
तेषांविपक्षत्वार्थमेकाधिकरण्यावच्छेदएवमेलकपदार्थोवाच्यः।सवाप्रसिद्धएवेति निरस्तं
व्यासज्यवृत्तिधर्मस्यसाध्यतावच्छेदकत्वाभ्युपगमेनतदवच्छिन्नाभावस्यतदेकदेशवृत्तिप्र
याभावसत्वेपितेजःप्रभृतिषुसत्वेन तेषांविपक्षत्वसंभवात् नचाभावेष्वव्यासज्यवृत्तिधर्म्म
एवनास्तीतिवाच्यंअभावेसंख्यानास्तीतिविशेषदर्शनवतस्तत्रत्रयोदशव्यवहारानापत्तेः
नचाव्यासज्यवृत्तितादृशबुद्धिविषयत्वेनैवसइतिवाच्यंअव्यासज्यवृत्तिधर्म्मस्यप्रत्येकाधि
करणाविश्रांतत्वेनेकस्मिन्नप्यभावेत्रयोदशत्वादिव्यवहारापत्तेः।एकत्रापिघटेघटद्व

त्तिपुती तिवत्‌अनुतएवजलादौत्रयोदशाभावानेतिसर्वेषांपुतीति:।तस्मादकामेनापि
तस्यव्यासज्यवृत्तिधर्मोऽभ्युपेयइतितावतीतिव्यासज्यवृत्तिसाध्यतावच्छेदकस्यतावत्येवप
र्याप्तेरितिभाव:।एकाधिकरणपावच्छेदकस्यापिमेलकपदार्थत्वेनसाध्यापुसिद्धिरित्याद्यंतेत्रौ
यदेतिऽनुत्यंताभावत्वादितिइतरनिरूपणाक्ताविशेषितपुतियोगिकात्यंताभावत्वादित्यर्थ:।
तेननतेजोन्यपुमेयत्वात्यंताभावादौनव्यभिचार:।यत्तुअभावा विशेषितपुतियोगिकात्यंताभा
वत्वादित्यर्थइतितन्नतेजोन्यपुमेयमितिज्ञानविशेष्यत्वात्यंताभावेतथापिव्यभिचारात्तेजो
मात्रावृत्त्यभावत्वादित्यर्थइत्यन्ये।किंचेतिअनुत्रनिराधिकरणानामेवजलादिभेदानांपुसिद्धो
सपक्षानिश्चयात्पुत्येकव्याप्तिभिरपिपुत्येकभेदसाधनेनासाधारण्यामितिहृदयं।ननुगुरु
त्वेनजलमात्राभेद:साधनीयस्तेन:पुभृत्यभेदाश्चलिंगांतरै:साधनीया:।किंच।इतरभेदनि

घेधोनेतराभेदः।अन्यतमभेदाभावेनापिसमुदायाभावादेकसत्वेपिद्वयमिव्हनास्तीतिप्रतीतेः
अन्यथाचतुर्दशभेदरूपसाध्यस्याभावाप्रसिद्ध्याव्यतिरेकव्याप्त्यतिप्रसंगादित्यतआहचतुर्द्द
शेतिप्रत्यक्षादिनाप्रत्येकभेदस्यपक्षेनिश्चयेनान्यतराभावेनापिचतुर्द्दशाभेदस्यबाधान्नस
त्प्रतिपक्षइतिभावः।अभावपदार्थमादायचतुर्द्दशत्वंबाध्यं विरोधेनेति प्रमाणासिद्धप्रत्येकच
तुर्द्दशभेदविरोधेनेत्यर्थः।लिंगत्वेवेति तत्रापितत्साध्याधिकरणजलान्यतरत्वस्यलिंगत्व
संभवादितिभावः।यद्यपिजलेपृथिवीतरभेदस्यबाधेननसिद्धिप्रसंगः।जलेतरभेदसिद्धा
विष्टापत्तिः।तथापिपूर्वदोषएवतात्पर्यंव्यभिचाराद्वित्युपलक्षणमसाधारण्यादित्यपि
बोध्यं स्यादीति-इच्छाद्यवच्छेदकत्वादित्यर्थः।तस्येति योग्यानुपलब्धेरभावादित्यर्थः।कार्यत्वा
दिति-भावकार्यत्वादित्यर्थः।ज्ञानेति-घटादेरपिसपक्षत्वापत्तेरततोहेतुव्यावृत्त्यावसाधारण्य

मित्यतआहज्ञानसमानाधिकरणेतिआत्मघटादिसंयोगस्यघटादौसत्त्वाद्दोषतादवस्थ्यमि
त्यतआहज्ञानकारणीभूतेतितादृशसत्त्वादेर्घटादौसत्त्वाद्दोषतादवस्थ्यमित्यतउक्तंसंयोगादि
तिआत्ममनसोःसपक्षत्वनिरासायाहकार्यत्वमितिनवपुरणेऽतिप्रसंगःआत्मपुरणसंयो
110 गस्यान्यथासिद्धतयाज्ञानाहेतुत्वादितिभावःशरीरावयवस्यसपक्षत्वानिश्चयदशायामे
वास्यैवतारइतिनान्वयित्वमाशंकनीयंशरीरएवेतियद्यप्युक्तंसात्मकत्वंशरीरावयवेप्य ११०
स्तितथापितत्रतत्सिद्धौअन्वयित्वमसाधारण्यंवेतिभावः।दोषांतरमाहअसाधारणेति
इच्छाऽसमवायिकारणसिद्धौसंयोगासमवायिकारणकत्वशंकानास्तीत्यतआहइच्छे
तिभावकार्यत्वादितिशेषः।इच्छात्वमितिव्याप्तिपक्षकेशब्दजशब्दव्यभिचारःस्यादितिजा
तिपक्षकमुक्तमनित्येतिस्वकृतव्यभिचारादाहनित्येति·तच्चनित्यमात्रेंद्रियग्राह्यत्वमतोमनो

ग्राह्यत्वेनतस्यनदोषतादवस्थ्यमितिभावः।एतच्चगुणविशेषणंननुजातिविशेषणंअन्य
थात्मकत्वेनित्यघ्राणेंद्रियग्राह्यजात्यभावेनव्यभिचाराभावात्तद्वारणायपदोपादानानुपपत्तेः
न्नात्मैकत्वपक्षेत्वपक्षेसंख्यात्वजातौव्यभिचारादाहविशेषेतिशब्दजशब्दमात्रवृत्तिजातौ
व्यभिचारादाहसाक्षादितिसाक्षाद्व्याप्यत्वंजातेरेवेतिस्वरूपनिर्वचनपरंजातिपदंयदितद्व्या
प्यागर्भितत्तदाशब्दसंख्यान्यतरत्वादौव्यभिचारवारकमपिनदितिध्येयंइंद्रियत्वेनानित्येंद्रि
यग्राह्यत्वंविवक्षितंननुतन्मात्रग्राह्यत्वमेवंवजातिविशेषणत्वेपिनदोषइतिवयंसर्वेतिकिंवि
दवच्छिन्नसंयोगोऽसमवायिकारणमित्युद्देश्यविधेयभावव्यत्यासेनयोज्यं।अतएवतदनु
कूलतर्कमाहआत्मसंयोगमात्रस्येतिनचैवंसंयोगत्वादितिहेतुत्वसंभवइतिवाच्यंअसम
वायिसंयोगत्वादितिविवक्षितत्वादित्याहुः।अत्रोभयत्रापिअवच्छिन्नत्वभावेनसमानवित्ति

वेद्यतयावच्छेदकत्वस्यापिविषयीकरणात्साध्यप्रसिद्धिर्दृष्टव्यासिद्धसाधनभयेनाह·
सामान्यतइतिअतएवेतिसामान्यतःसाध्यसिद्धौसिद्धसाधनाद्यनवकाशादेवेत्यर्थः।व्यति
रेकव्याप्तिंदर्शयतिसशरीरइतिननुशरीरंसात्मकंनत्वेवाधकाभावादितिशरीरविशेष्य
कावुद्धिरपितदनंतरंसुकरैवेत्यरुचिराहउपायेतिअवधनसामर्थ्ययोरन्यतरास्फुरणास्या
111 प्यन्वयप्रयोगादित्यर्थःसंस्काराजन्येतिगुरुत्वादिजन्यत्यापिविशेषणंतेनपतनादौनव्यभि १११
चारः।प्रयत्नेतियाक्रियेत्यादिव्याप्तेरितिभावः।एवंवेतिसत्यंतभागस्यात्मन्यापिसत्वात्ततो
हेतुव्यावृत्तावसाधारण्यमित्यतउक्तंशरीरत्वमितिचेष्टावत्वादितिचेष्टावच्छरीरत्वादित्या
दित्यर्थस्तेनशरीरावयवेनव्यभिचारः।आत्मभिन्नत्वइतिआत्मनोपिसाध्यत्वेऽसाधारण्य
यसत्यंतं·मृतशरीरस्यापिभोगाधिकरणतयातत्राप्युक्तसंयोगसत्वेनसपक्षतयातत्र

द्वेषावत्त्वव्याप्त्या ३ साधारण्यमात्मविशेषगुणाकारणेति नवकादावित्क भोगाद्यूगा
धारत्ववद्वेषावत्त्वमपितत्रास्तीतिवाच्यं· मृतशरीरव्यावृत्तस्यैव वर्त्तमानद्वेषावत्त्वस्य सा
त्मकत्वलिंगत्वात् मृतशरीरात्मसंयोगजनकतदवयवात्मसंयोगमादाय मृतशरीरा
वयवेपि साध्यसत्त्वेनासाधारण्यं स्यादत उक्तं विशेषेति· भेरीदंडसंयोगावच्छेदजनकं पर
शरीरादिसंयोगमादाय मृतशरीरेपि साध्यसत्वेनोक्तदोषतादवस्थ्यमत उक्तं आत्मे
तियद्यपि तस्यापि स्वर्गावरसाक्षात्कारजनकत्वेन दोषतादवस्थ्यं तथापि ज्ञानातिरिक्ता
त्मविशेषगुणाकारणत्वं जन्यात्मविशेषगुणत्वावच्छिन्नकारणत्वं वा विवक्षितमिति नोक्त
दोषः। मनसः सपक्षत्वनिरासायाह· भोगानधिकरणावृत्तीति· तत्त्वद्वयस्याप्येतदेव फ
लमित्याहुः। तच्चिंत्यं· अत्रहेत्वंतरसत्वे वेषावत्वहेतुमादाय व्याख्यानस्यासंगतत्वात्· तस्मा

त्तद्धेतुपरतयैवव्याख्येयमितिबोध्यंनत्वात्म नसोरपिहेतुसत्त्वेव्यभिचारइत्यतआह आत्मेति
अतिप्रसंगभियाशरीरावच्छिन्नात्ममनोभ्यांप्राणस्यसंयोगोहेतुर्वाच्यइत्यावश्यकत्वाच्छरीर
112 प्राणसंयोगेनैवान्यथासिद्धिरित्यर्थः। नन्वनात्मतयाशरीरस्यापिभोगानधिकरणत्वेनत
दवृत्तिसंयोगवत्त्वंतत्रबाधितमित्यनात्मनोपिभोगानधिकरणत्वंसाधयतिभोगाधारत्वमि
तिसकलेतिनचभोगाधारपदस्यस्वरूपासिद्धिवारकत्वेनवैयर्थ्यमितिवाच्यंव्याप्यतावच्छेद ११२
कविकाशकविशेषणात्तथात्वभावादित्यर्थः। तच्चिंत्यव्याप्याश्रयत्वविकाशेपिव्याप्याश्र
यविकाशाभावात् नचतद्विकाशस्यापिनव्यर्थत्वंतत्रयन्निष्ठेत्यादित्यायस्याप्रसंभवेनमा
नाभावाद्वन्यथाधूमालोकान्यतरत्वाद्यवच्छालोकादिव्याप्याश्रयविकाशकतयाव्यर्थत्वंन
स्यात्‌·तस्मादखंडाभाववदखंडोपाधीनव्यर्थत्वमित्यन्यत्रविस्तरः। यत्तु·सकलात्मवर्त्तिन्या

न्मत्वे सकलवृत्तित्वं व्यभिचारीति तन्न शुद्धस्य सकलपदस्य यावत्पदार्थपरत्ववृत्तिरिति ननु भो
गानधिकरणवृत्तित्वमत्रोपाधिरन्यथा रूपाधारत्वादीनामपि रूपादिसमवायिभिन्नवृत्ति
त्वानुमानापत्तिरित्यत आह- तार्किकीति रितितथा च शरीरे सुखमित्यादिलदाधारत्वानुभ
वो न स्यादित्यनिष्टप्रसंगात्मकतर्केणाहेतोः साध्यव्याप्यत्वेनोपाधेः साध्याव्यापकत्वमत एव
वनरूपद्याधारत्वप्रतिबंदिरपि तत्रैतादृशतर्काभावादिति भावः। केचित्तु संसार्यात्मत्वे संदि
ग्धानैकान्तः। साध्याभावतया निश्चिते तत्र हेतुसंदेहादित्यत आह- तार्किकीति रिति तथा चोक्त
तर्कवशादत्र व्याप्तिग्रह इत्याहुः। आश्रितत्वेति आश्रयत्वेत्यर्थः। साध्यनिश्चयं विनेति तत्तद्व्या
प्येतरतन्निर्णयकसाकल्यसत्वगर्भस्य तस्य क्वापि निश्चयसद्भावपवसत्यात्मलाभसंभवात्अ
न्यथा तन्निश्चापकाप्रसिद्धोतदसंभवादिति भाव इत्याहुः। वस्तुतः साध्यतावच्छेदकप्रकारेण

साध्यप्रसिद्धिरनुमानांगं। साधनसंशयरूपात्तादृशकोट्यप्रसिद्धेः प्रसिद्धौ वा निश्चयरूपेव से
तितत्वं प्रसिद्धिरिति एतच्च द्रव्यत्वाश्रयाश्रितेति यदि सामान्यतो दृष्टावतारस्तदा पृथिव्यं य
दिवेच्छादुव्याश्रितेति सामान्यतो दृष्टं तदा द्रव्यत्वस्य प्रकारतया तदाश्रितत्वस्य वैशिष्ट्यमर्या
112 दया भानेनाश्रितत्वरूपसाध्यतावच्छेदकावच्छिन्नस्य द्रव्यत्वेऽप्रसिद्धितया तत्र प्रसिद्ध्युपवर्ण
नविरोधात् एवं चान्वयित्वाद्यापादनमपि विरुध्येत तस्माद्यदि द्रव्याश्रितेति सामान्यतो दृष्टं त
देच्छायामेव साध्यप्रसिद्धिः पृथ्व्याश्रुत एवेच्छाविशेष्यकप्रतीत्यर्थं व्यतिरेक्याद् इति ग्रंथकृ ११३
तोक्तमन्यथा निश्चयार्थमेव तदवतार इति ब्रूयादिति वस्तुतो मानान्तरादुपस्थितानामपि त
ज्ज्ञानं अनुमितेर्व्यापकतावच्छेदकप्रकारकत्वनियमादिति भाव इत्यप्याहुरिति अपीत्यस्वारसो
ज्ज्ञावनं तद्बीजं तु पदीच्छा आश्रयस्या घटद्रव्याभिन्नत्वेन ज्ञानं तदा साध्याप्रसिद्ध्या व्यतिरेकिणो व्यन

वकाशाद्इतितत्समर्थनमप्याशक्यंस्यादितिध्येयं· व्यतिरेकिणोवास्तवसाध्याभावव्यापकाभाव
प्रतियोगित्वमेवगमकंननुसाध्याभावत्वेनतस्योपस्थितिरपितंत्रं· गौरवादितियेमन्यन्तेतन्मत
मुपन्यस्यतिअन्येत्वितिअत्रास्वरसबीजमभावएवेत्यवधारणांतद्व्यभावादेर्धूमाद्यभावव्याप्य
त्वग्रहेवह्न्याद्यभावस्यापिसिद्ध्याविरोधात्तभावरूपसात्मकत्वादेरपिसिद्ध्याविरोधाच्चद्या। ने
वविशेषैर्येयोदत्रसाध्यप्रसिद्धिरप्यंगमितियस्यभावस्येतियदात्मतयाग्रह्यमाणस्यव्यापकत
याग्रहेत्वभावोगृहीतस्तदभावएवव्यतिरेकिणासिद्ध्यतीत्यर्थः। तेनसुखस्यदुःखाभावतयाग्रह्य
माणस्यव्यापकतयायत्रग्रहेत्वभावोगृह्यतेतत्रदुःखविशिष्टानुमितिरनुभवसिद्धासमर्थिताभव
तिअन्यथासुखाभावस्यैवतत्रसिद्धिप्रसंगादित्याहुः। नन्वितरपदार्थान्तर्गतात्मादिव्यापकत्वंप्र
थिवीत्वाभावेस्यासंभविसंभवेवातदत्यंताभावसिद्धेकदाचितत्त्वेनतदन्योन्याभावसिद्ध्यपवर्ण

नविरोधः हेत्वभावव्याप्यतया गृहीतस्यात्यन्ताभाव एव व्यतिरेकिणा सिध्यतीत्यभ्युपगमादि
तिचेत्-अत्राहुः।जलादिपदं जलादितादात्म्यपरं-नचैवं तदत्यंताभाव एव सिध्येदिति वाच्यं-य
114 थाहि हेत्वभावव्याप्यतया गृहीतस्यात्यंताभावः सिध्यतीति नियमस्तथा तदवच्छिन्नाभावः सिध्य
तीत्यपि नियम एव-एवं च तस्याभाव इत्युपलक्षणं तदवच्छिन्नान्योन्याभाव इत्यपि द्रष्टव्यं व्याप्या
भावज्ञानावश्यंभावादित्युपलक्षणं व्याप्यावच्छिन्नान्योन्याभावज्ञानावश्यंभावादित्यपि द्रष्टव्यं ११४
केचित्तु जलादितादात्म्यात्यन्ताभावस्यैव जलाद्यन्योन्याभावरूपतया तत्सिद्धौ विरोधः।ज
लाद्यन्योन्याभावात्यंताभावस्य जलत्वादिरूपतया जलत्वाद्यत्यंताभावस्यापि जलाद्यन्यो
न्याभावरूपत्वात्-यस्य यत्पदार्थात्यंताभावरूपत्वं तस्य तत्पदार्थरूपात्यंताभावकत्वात्-अ
तएवात्यंताभाव-तत्प्रतियोगिनोः परस्परविरहरूपतानियमः।नचजलान्योन्यात्यंताभावस्यै

वनजलादिरूपत्वमितिवाच्यं ऽअप्रसिद्धांतात् अतएवोक्तंग्रंथकृता ऽअन्योन्यात्यंताभावस्यप्रति
योगिवृत्तिरसाधारणोधर्म्मइतियएकेनैवाभावेनतदान्योन्याभावतत्तादात्यात्यंताभावव्यव
हारोपपत्तौतदन्यकल्पनेमानाभावात्अन्यथैवंजलवत्वादिज्ञानंविनासत्वभावोननिरूप्येत·
प्रतियोगितावच्छेदकावच्छिन्नज्ञानस्यहेतुत्वात्तच्चतदितरावृत्तित्वगर्भंतदितरत्वमपितदन्यो
न्याभावरूपंतच्चतादात्म्यत्वज्ञानसापेक्षमित्यात्माश्रयानवस्थादिकमितिचेत्· न·ऽअभावस्य
यावत्प्रतियोगिनिरूप्यत्वनियमानभ्युपगमात् अतएवघटप्रागभावतत्प्रध्वंसयोःपरस्परप्र
तियोगित्वेऽपिनपरस्परनिरूप्यत्वनियमः।केवलेनापिघटेनतन्निरूपणात्·नचतयोःपरस्पर
प्रतियोगिकत्वमेवनेतिवाच्यंऽअन्यतरस्थितिकालेऽन्यतरोन्मज्जनापत्तेः।तथाचतस्याभावस्यो
भयप्रतियोगित्वेऽपिजलादिनैवप्रतियोगिनानिरूपणोनानवस्थादिकमित्याहुः।अत्रेदंचिंत्यं·

तदन्योन्याभावतत्तादात्म्यात्यंताभावयोः प्रतीतिवैचित्र्यान्न तदभेदानुपपत्तिः। प्रतियोगिभेदा
दभावभेदस्यावश्यकत्वात् अपिचान्योन्याभावात्यंताभावयोर्विरुद्धधर्माध्यस्तत्वेनावश्यंभेदः।
115 ननु यथाभावव्यवहारहेतुर्घटोघटाभावाभावव्यवहारहेतुरपि· नचैतावता विरुद्धधर्माध्या
सः वस्तुतोभावस्यैवतस्याभावव्यवहारहेतुत्वात् तथाचवस्तुतोऽन्योन्याभावात्मनोऽत्यंताभावात्मनो
वानस्योभयव्यवहारहेतुत्वमस्तु· नचैतावता विरुद्धधर्माध्यास इतिचेत्·न· तदन्योन्याभावेनतत्ता ११५
दात्म्यव्यवहारस्तत्तादात्म्याभावेनवा तदन्योन्याभाव इत्यस्य विनिगंतुमशक्यत्वात् घटादेश्च
भावाभावव्यवहारहेतुत्वेपि भावत्वमेव प्रमाणबलादास्थीयते· अतएवसंयोगात्यंताभावयोरप्य
व्याप्यवृत्तित्वेपि शाबत्वात्यंताभावतदन्योन्याभावयोश्चायोग्यत्वं योग्यत्वंचेति संक्षेपः। अ
न्येतु· अत्रमते संबंधिनोः समानाधिकरण्येन व्याप्तित्वेनाभिमतं· किंतु तदुभयसंबंधयोः सामा

नाधिकरण्यंपतदुभयसंबंधिव्याप्तिः। अस्तिवयत्रधूमसंबंधस्तत्रवह्निसंबंधसामानाधिकरण्या २१
दग्निनाधूमव्याप्तिः। परेणाप्युतिपुंसंगवारणायतन्नत्संबंधावच्छिन्नतत्तत्सामानाधिकरण्यं
वाच्यंतथाचलाद्यवान्नत्संबंधसामानाधिकरण्यमेवतत्संबंधिव्याप्तिरस्तु-तद्विह यत्रजला
दितादात्म्यंतत्रपृथिवीत्वाभावसंबंधइतिजलादिपृथिवीत्वाभावरूपसंबंधिद्वयपुतियोगि
स्तादात्म्यस्वरूपयोः संबंधयोरैक्याधिकरण्यव्याप्तिरितिजलादेरेवव्याप्यता·नवतादात्म्यं
संबंधएवनेतिवाच्यंअविशिष्टव्यावृत्तविशिष्टधीनियामकत्वात्अतएवतादात्म्यारोपोविशि
ष्टज्ञानं·तथाचेतरस्यजलादेरितियथाश्रुतमेवननुभवतुतादात्म्यंसंबंधोभवतुवतादात्म्य
सामानाधिकरण्यंतद्व्याप्तिस्तथापिजलादोरेवव्याप्यतायाजलाद्यत्यंताभावएवसिद्धेतजला
द्यन्यान्याभावइतिचेत्‌·मैवं·जलाद्यन्यान्याभावोहितादात्म्यवच्छिन्नजलादिविरहस्तथाचयदा

संवंधितावच्छिन्नसामानाधिकरण्यंव्याप्तिर्व्यापकाभावेतत्संवंधिवच्छिन्नविरुद्धवत्सामानाधि
करण्यंव्याप्तिस्ततुसंवंधावच्छिन्नविरुद्धवत्सामानाधिकरण्येव्याप्याभावस्यव्यापकाभात्वसि
द्धिरितिदोतोन्यसामानाधिकरण्यगुरुत्वात्तादात्म्यावच्छिन्नविरुद्धःसिद्ध्यतीतात्यंताभावसिद्धि
सामग्र्येवान्योन्याभावःसिद्ध्यतीत्याहुः।तदपिचिंत्यं।यत्रयत्रधूमसंवंधस्तत्रतत्रवह्निसंवंध
इत्यादौसंवंधेधूमादिःसंवंधीविशेषणामुपलक्षणंवा।नाद्यः।आकाशादेरव्याप्यनापत्तेः।
नहियत्राकाशादिसंवंधस्तत्रपृथिवीत्वाभावसंवंधइतिव्याप्तिःसंभवति आकाशादेरवृत्ति
तयातद्विशिष्टस्यसंवंधस्यकुत्राप्यावृत्तेः।पूर्वोक्तलाघवासंभवाच्चनापिद्वितीयः।धूमाद्युप
लक्षितसंवंधस्यधूमादावपिसत्वेनतत्रएववह्निसंवंधाभावेनव्यभिचारापत्तेः।वह्निसंवंधस्यसंयो
गात्मकस्यमहानसादौवृत्तेः।एवंचदंडोपलक्षितसंवंधस्यदंडेपिसत्वेनतत्रचकुंडलसंवंधा

= ॥ इति व्यतिरेकिग्रंथः ॥ ॥ अथार्थापत्तिः ॥ ६

भावात्समानाधिकरणयोरपि दंडकुंडलयोर्व्याप्तिर्न स्यात् तस्मादनन्यगत्या तत्संबंधावच्छिन्न
संबंधिसामानाधिकरण्यमेव व्याप्तिस्तच्चेतरपदार्थान्तर्गतिकाशादावसंभवतीति नगलादीनां
मेव व्याप्यत्वमिति: व्यापकाभावेन व्याप्यावच्छिन्नान्योन्याभावसिद्धिप्रकारेण व्याप्याभावसि
द्धिं दर्शयति· एवमिति· यस्य भावस्येति यदात्मतया ग्राह्यमाणस्येत्यर्थः। अयं चेति· एतेन व्य
तिरेकिण्यभाव एव साध्य इत्यत्रानुशयान्तरमपि सूचितं· परार्थानुमाने भावसाधारणस्य प्रकारा
तिरेकिण्यभावपक्षानिर्व्याप्तिरेकिणीयत्वादिति अन्वयिनि व्यतिरेकिणि च निरूपिते अन्वयव्यतिरेकी निरूपित
तरस्यैवानुसरणीयत्वादिति अन्वयिनि व्यतिरेकिणि च निरूपिते अन्वयव्यतिरेकी निरूपित
प्राय एवेति तदुपेक्ष्य व्यतिरेकिसिद्धेरर्थापत्तिमानान्तरत्वनिरासफलमाह· व्यतिरेकीति· ज्यो
तिःशास्त्रादिति· यद्यपि ज्योतिःशास्त्रं व्याप्तिमात्रग्राहकं· न तु शतवर्षजीवित्वनिश्चायकं· न देवदत्तीय
थापि ज्योतिःशास्त्रं यस्य सतथेति पुरुष एव विवक्षित इति केचित्· एतदस्वरसादेव तत्कथि

तल्लिंगाद्वेत्युक्तमित्यन्ये॰ निश्चितो ग्रहाभावो ग्रहे ऽभावस्य निश्चय इत्यर्थः। नियमद्वयेति॰
शतवर्षजीवेवेत्येको नियमः। ग्रहे एवेत्यपरः। तत्कथितं लिंगाव्याप्तिरूपएको नियमः।
ग्रह एवेत्यपर इत्यन्ये आशायमविद्वानशंकते॰ नन्विति॰ आशयमुद्घाटयति॰ नेति॰ न
117 नु ग्रहाभावो न करणं नियमग्राहकविरोधेन तस्य संदिग्धत्वादित्यत आह॰ ग्रहाभावश्चेति
देवदत्तेति॰ जीवनवधितासामपि वाधआवश्यक इति भावः। तर्कीतरमाकृतयेति तथा ११७
पीति॰ मरणापेक्षया जीवनं लद्धिति तत्कल्पनार्थमर्थापत्तिस्वीकारः स्यात्तत श्चतत्कल्पि
तजीवित्वलिंगकानुमित्या वह्निः सत्वं साध्यमित्यावश्यकतया गुर्वपि वह्निः सत्वमर्थापत्त्या
कल्प्यते न मरणमिति तर्कः शरीरमेव सर्वमिदं इष्टव्यं॰ तेनैतावत्तर्कसहितः संशयो वह्निस
त्वं कल्पयतीति॰ नोपसंहारविरोधो न वा जीवित्वस्यार्थापत्त्यापवर्णने ऽपसिद्धांत इति॰ पुकीते

यीति॰ अत्र देवदत्तो गृहे नास्त्येवेति नियमग्राहकं नियमग्राहकपदेनोक्तं न जीवी गृह एवेति
नियमग्राहकं तथा सति वहिः सत्त्वप्रमा कुत्रापि न स्यात्॰ गृह एवेति नियमग्राहकस्य तत्रा
प्रमासत्त्वादिति भावः । यद्वेति॰ पूर्वदेशाभावो न हेतुः किन्तु तिरोहितप्रमाशङ्किकस्य प्रमा
हेतुत्वं तद्विरहाच्चोदाहृतस्थले प्रमाविरह इत्यभिमतं॰ अत्र वदोषाभावोपि प्रमाहेतुस्तद्वि
रहाच्च तत्र तद्विरह इत्युच्यते इति न पूर्वाभेदः । प्रमाणत्वाभिमतयोरिति अत्र शतवर्षजीवी
गृह एवेति नियमग्राहकस्य शतवर्षजीवित्वरूपविशेषणाबाधाभिमतेति ध्येयं॰ तदनुसंध
नमिति विरुद्धार्थग्राहकत्वरूपलिङ्गप्रतिसंधानमित्यर्थः । अबाधप्रसंगादिति अविलंबप्रसं
गादित्यर्थः । दृश्यते च तदनुसंधानं विना तत्र विलंब इति त्वयापि तदवश्यं स्वीकरणीयमिति
भावः । वस्तुतस्तर्कावतारकाले पूर्वोत्पन्न॰ संशयोपि दुर्लभस्तावत्पर्यन्तमनवस्थानात् तथा

114

वनपुनःसंशयासंजननमपि॰ एवंवनस्यकल्प्यप्रमाणाभाववतयाक्लृप्तप्रमाणाभावस्यसामा
न्यतोदृष्टस्यैवपुनरवतारोलाघवात्कल्प्यतइतिभावः।लिंगनिश्चयार्थंसामान्यतोदृष्टं
नत्वनुमानं॰ अपिचेति॰ नचप्रमाणत्वलिंगप्रतिसंधानंतदाऽसिद्धमितिवाच्यं॰ अन्यतरप्राप्तिवि
नाविनिगमकत्वादवधारितकीनवतारात्पूर्वोक्तियुक्तेश्चेतिभावः।विशेषविषयत्वादिति
जीवनविविषयत्वादित्यर्थः।तथाचविरोधिविषयतयामरणानुमानेनसत्प्रतिपक्षसिद्धे ११८
ति॰ अन्यथाऽन्यतरग्राहकसामान्यतोदृष्टेनविरोधाभावात्सत्प्रतिपक्षएवनस्यादितिभा
वः।जीवनग्राहकस्यज्योतिःशास्त्रकथितलिंगस्य॰ सर्वत्रेति॰ पर्वतोनपर्वतीयवह्निमा
न्धूमवत्त्वादित्यादिनाप्रतिबंधःस्यादित्यर्थः।जीवनग्राहकस्येति॰ अत्रेदंचिंत्यं॰ विपक्षबाधक
स्यैवतितर्कानवतारेसामान्यतोदृष्टस्यापिनजीवित्वनिश्चायकत्वं॰ सत्प्रतिपक्षेतत्त्वात्तदव

तारेवज्योतिः शास्त्रकथितलिंगादेवावश्यकाज्जीवित्वनिश्चयसंभवे किमनेन सामान्यतोदृ
ष्टेनेति तस्मादिति अनुतुल्यवलेनन सत्प्रतिपक्षत्वमितिभावः। सवेति। प्रमाणत्वभिमतयोर्द्व
योरपि वाधास्यादिति यपररीत्याप्रागुक्तं मरणापेक्षयाजीवनं लघ्विति लाघवं ज्योतिःशा
स्त्रायथार्थत्वांवेति। विनिगमकं स्वपक्षे त्रदृष्टव्यं। अन्यमीमांसकाइत्यर्थः। अप्रमाणस्या
पीति। तथावजीवी गृहएवेति वक्तृते। ऽप्रमाणमपि प्रमाणत्वेन ज्ञायते। तत्रापि तद्विरोधि
वहिःसत्वमेव कल्प्येत न मरणमित्यर्थः। किंवेति। मृते मरणं गृहस्थितेगृहसत्वं वहिःस्थि
ते वहिःसत्वमिति यथा योग्यत्वं। अत्रेष्टापत्तिमाशंक्याह। अर्थापत्त्येति अन्यत्तु किंवेत्यर्थो द्व
पत्याभासश्चैवं न स्यादित्येकोग्रंथः। अप्रमाणत्वादित्यस्यानंतरमिति। पूरणीयः। तेन द
तुक्तं तन्मतइत्याहुः। विशेषव्याप्तिमूलकमनुमानमुक्त्वा सामान्यव्याप्तिमूलकमनुमानमाह।

विद्यमानत्वे सतीति द्वितीयानुमानं दूषयति - सामान्यत इति यत्वतत्वयोगैरनुगमान्नव्या
प्तिग्रहः इति भावः । स्वोक्तदूषणोरखंडनसंमतिमाह - तदुक्तं यतोन्यत्वमिति : यतः कल्पनीया
दन्यत्वं तथान्यत्वप्रतियोगिनोग्रे प्रथमतः सिद्धेस्तस्यार्थापत्तेरसिद्धेः । तत्फलत्वेनाभिमत 119
स्यान्यत्वप्रतियोगिज्ञानस्य प्रमाणान्तरादेवज्ञानत्वात् तदज्ञानत्वेऽन्यथानुपपत्तेरेवाज्ञा
नादित्यर्थः । यद्वा - यतः कल्पनीयापादन्यत्वं तत्सिद्धेरग्रे तत्रासिद्धेरग्रे तत्रासिद्धेः पूर्वं तद ११९
सिद्धेस्तत्रानुपपत्तिज्ञानासिद्धेरित्यर्थः । देवदत्तस्याभाव इति - अत्र देवदत्तस्येति प्रतियोगि
त्वं षष्ठ्यर्थं अकारो नञ्नः देवदत्त इतिवत् संसर्गमर्यादया प्रतियोगित्वत्वरूपव्याप्यतावच्छे
दकावच्छिन्नप्रतियोगित्वरूपलिंगलाभादनुमानावतारोऽन्यथा वैशिष्ट्यवि याप्रति
योगित्वलाभेपि व्याप्यतावच्छेदकावच्छिन्नलिंगानुपस्थितेर्नानुमानं स्यात् न चैवं यत्र संस

गमिथ्यादयेवतज्ज्ञानंतत्रानुमानानवतारेनार्थापत्तिः सावकाशेतिवाच्यं अर्थापत्तवपिवह्निः
सत्वंविनागरहनिष्ठाभावप्रतियोगित्वस्यैवानुपपत्तिबुद्धिर्गमिकेतिप्रतियोगित्वावच्छिन्नो।
पस्थितिविनातेनार्थापत्त्यवतारानभ्युपगमादित्याहुः। अधिकस्यपक्षविशेष्यकत्वस्यननुगर
हनिष्ठाभावप्रतियोगित्वस्यापिदेवदत्तधर्मतयाऽसंनिकृष्टत्वात्तद्विशेष्यकोपिवानुपपत्तिःप
रामर्षासंभवीत्यनुशयेनाह अथवेति पूर्वोक्तदोषं निरस्यति यथावेति ननुसाधिकरणत्वा
नुमितावपिव्यापकतावच्छेदकप्रकारनैयत्येनाधिकरणत्वेनैवपर्वतभानंस्यान्नतुपर्वतत्वे
नेतिनतयापर्वतत्वप्रकारकज्ञानजनकार्थापत्त्यन्यथासिद्धिः। एवंवमयूरान्नृत्यतीतिवाक्ये
ऽधिकरणबोधकपदाभावात्सामान्येनापिरूपेणानपर्वतभानंकुतःपर्वतत्वेनेतिनशङ्क्यंना
पितदन्यथासिद्धिरित्युभयत्रापरितुष्यन्नाह यद्वामयूरान्नृत्यमितिश्रुतार्थापत्तिवादीभद्दः

प्रत्यवतिष्ठतेकृथेतिरात्रिभोजनोपपादकं·रात्रिभोजनोपस्थापकमित्यर्थः।तेनेतिरात्रि
भोजनेनेत्यर्थः।योग्यतावच्छेदकरूपेणोपस्थितिंविनानशाब्दान्वयधीरित्यत्रप्रभाकरसम्म
१२० तिमाह यथेति·उपस्थितस्ययोग्यस्ययोग्यताज्ञानानानशाब्दधीर्नतुयोग्यतावच्छेदकरूपेणा
तस्योपस्थितिस्तत्रगौरवादित्यभिप्रेत्यसिद्धांतमाह वाधकेति॥ ॥न्यायसाध्यमित्युप
लक्षणंतदवयवसाध्यमित्यपिद्रष्टव्यंतेनतदवयवाप्येतिनासंगतमितिभावः।उदाहर १२०
णोपनयरूपमवयवद्वयमितिवौद्धाः।उदाहरणान्तमवयवत्रयमितिमीमांसकाइतित
न्निरासंहृदिनिधायाह प्रतिज्ञेति·पंचानामपियथोपयात्रस्तथावक्ष्यते·समस्तरूपेति·स्व
पंपक्षसत्त्वादिकिंत्वितिअनुमितिचरमकारणत्वमनुमितिजननेस्वोत्तरभाविज्ञानानपेक्ष
त्वंप्रयोजकत्वंजनकज्ञानजनकत्वं·शाब्दज्ञानपदं·चरमकारणपरामर्शान्यूनविषयज्ञानप

यं अत्र वह्निव्याप्यधूमवानयमित्याद्यवाक्येऽतिव्याप्तिवारणाय प्रयोजकेत्यंतं परामर्शजनन
केति वक्तुं संभवः। नहि तज्ज्ञानक विशिष्टवैशिष्ट्यावगाहिज्ञानजनकं वाक्यं संभवति। तस्य
ज्ञानस्य मानसत्वादित्यत उक्तं जनकजनकेति। संस्कारद्वारा परामर्शजनके पूर्वोक्तावाप्तवाक्ये
ऽतिव्याप्तिवारणाय ज्ञानेति तज्जन्यज्ञानस्यापि यत्र किंचिज्जनकत्वसंभवादुक्तदोषसंभवा
दित्यत आह। अनुमितिचरमकारणेति। लिंगपरामर्शपदं च स्वरूपकथनपरं वह्निव्याप्यधूम
वानयमिति वाक्यावयवावयवेऽतिव्याप्तिवारणाय शाब्दज्ञानपदं तदर्थं सूक्ष्मपव यदि वैव
मसाधकताप्रयोगेऽव्याप्तिशंका तदा वाक्यपदमेव महावाक्यपरं बोध्यं आत्मादावतिव्याप्तेरा
ह वाक्यपदं अन्ये तु शाब्दज्ञानपदं कारकोद्धारस्वरूपेन्यायाभिन्नवाक्येऽतिव्याप्तिवारणाय। न
च अनुमितिचरमकारणपरामर्शजनकव्याप्तिज्ञानादिजनकयोग्यताज्ञानजनकतया तादृश

परामर्षजनकज्ञानजनकं॰ नायमाभासइत्यनेनव्याप्त्यादिवैशिष्ट्यधीजनकयोग्यताज्ञानज
ननात्॰ नवशाब्दपदंदनेप्येवदोषः शाब्दज्ञानत्वेनतादृशपरामर्षप्रयोजकत्वस्यविवक्षित
त्वात् नवयोग्यताज्ञानंतथाजनकं॰ योग्यताज्ञानत्वेनजनकत्वात्॰ न्यायजन्यज्ञानेशाब्दज्ञान
१२१ त्वेनजनकत्वं॰ वाच्युक्तप्रयोगज्ञानपर्वोक्तपरामर्षसामग्रीसत्वासंदन्यत्रापितात्तवाक्याद्वह्नि
व्याप्यवानयमितिपरामर्षस्यैवाकृत्योत्पत्तेरित्यस्यानुपदमस्करएवस्फुटत्वात्॰ एवंसत्यो १२१
प्तोक्तवह्निव्याप्यवानयमितिवाक्यावयवावयवेऽतिव्याप्तिवारणायवाक्यपदंमहावाक्य
परमित्याहुः। नवपर्वतेवह्निर्धूमोयतोधूमश्चवह्निवन्मात्रवृत्तिरस्तितवतादृशधूमेपर्वतवृत्ति
त्वं॰ तस्मादग्निः पर्वतवृत्तिरित्यादौन्यायसमानार्थन्यायानात्मनिवाक्येऽतिव्याप्तिरितिवा
च्यंतादृशवाक्यस्यपर्वतोत्रिकसंप्रदायविरुद्धयानमध्यस्तत्वेनव्याकुलीभावात्कथमन्यथा।

कथायामित्थं प्रयोगः सर्वसमुदायमेवमत्यक्तोनेनेति तद्वीजगवेषणाव्यग्रतया तद्वाक्यार्थेन
विशिष्टवैशिष्ट्यज्ञानानुत्थापनेन तस्यानुमितिकारणपरामर्शप्रयोजकज्ञानाजनकत्वादित्या
हुः। तन्नवेति· नवात्र मानाभावः। शाब्दज्ञानसहकृतमेव मनः परामर्शजनकमिति वाच्यं· तस्या
नाप्तोक्तत्वेनाप्रामाण्यशंकाक्रांततया परामर्शजनकत्वात् अन्यथाप्तवाक्यादिवन्न्यायज
ज्ञानादेवानुमित्यापत्तेः। तस्मान्न्यायजज्ञानेऽप्रामाण्यशंकया तस्य वक्ताप्तत्वं तत्र त्वेतस्य तदु
पस्थित्यनुसारेण स्वयं मनसा धूमविशिष्टवह्निवैशिष्ट्यमित्याकारजननेन तेन परामर्शोत्पा
दइति स्वीकार्यं· तद्वाक्यस्य पदार्थमात्रोपस्थापकत्वेन प्रयोजकत्वादिति वदंति· अन्ये तु· मा
नांतरं मनोलक्षणोपस्थापितेष्वात्मरूपसहकारिसंपन्नं क्रियत इत्यर्थ इत्याहुः। अनुमितेती
ति· अत्र प्रथमशाब्दज्ञानांतं न्यायजज्ञानपरं· तथा च न्यायजज्ञानजनकशाब्दज्ञानजनकत्वा

क्यत्वमित्यर्थः।अत्र च न्यायवहिर्भूतवाक्यातिव्याप्तिवारणाय॰न्यायजज्ञानेति॰नवावयवा
वयवेऽतिव्याप्तिः।तस्य न्यायजनकज्ञानजनकव्याप्तिज्ञानादिजनकयोग्यताज्ञानादिजन
कत्वेन तदजनकत्वात् अत एव कंटकोद्धाररूपेपि वाक्येनातिव्याप्तिस्तस्यापि न्यायजज्ञानज
122 नकत्वेन तज्जनकत्वेन॰शाब्दपदं संपातायातं॰आत्मादावतिव्याप्तिवारणाय वाक्यपदं ए
तद्वलक्षणं यन्मतेऽवांतरवाक्यार्थज्ञानस्य महावाक्यार्थज्ञानजनकत्वाभ्युपगमस्तन्मते १२२
न दुष्टं॰यदि च तावत्संस्कारमेलकात्तावत्पदस्मृतौ तावत्पदार्थस्मृतिरथ महावाक्यार्थ
ज्ञानमित्यभ्युपगमस्तदास्यासंगतत्वापातादिति॰परामर्शप्रयोजकवाक्यत्वेनेति॰प्रयोज
कत्वस्य जनकजनके वा विरोधादिति भावः।न्यायत्वपत्तिरिति॰कौवोत्वस्यापि गौरवेण
त्याज्यत्वादिति भावः।यदि च वस्तुवादेः स्वरूपसत एव हेतुत्वान्न तत्राकांक्षेति न तस्य न्यायत्वं

तदा विशिष्टवैशिष्ट्येऽपि पृथगमाकांक्षा नास्तीति न तस्यापि तत्त्वमित्याहुः · आकांक्षेति · दुर्न्नि
रूपणमिति · असंभवतीति भावः । तत्स्वीकार इति · अननुगतपुंस्त्वकानुगतरूपस्वीकार इत्यर्थः ।
अन्यथा जातिसंकरप्रसंगादिति · जातिनियामकानुगतकारणतावच्छेदकधर्मं विनापि जा
तिस्वीकारे परस्परविरुद्धसमानाधिकरणजातिद्वयसमावेशः स्यादित्यर्थः । किंतु उद्देश्यति ·
अन्यत्रैयापृविष्टसमानाकारवाक्येऽतिव्याप्तिवारणाय सत्यन्तं · वाक्यार्थपदसंपातायां
तं न्यायान्तरप्रतिज्ञायान्यायांतरप्रतिज्ञार्थत्वं माप्रसांक्षीदिति पृथमोद्देश्यपदं अनुमितौ
लिंगाभासपक्षेवैतदर्थमेवाग्रे प्रदुद्देश्यपदं तत्र तद्भानपक्षेत्वसंभववारणार्थमपि तदिति ध्ये
यं · तथा चास्मिन्पक्षे यद्विषयत्वेनानुमितिरुद्देश्यानुमितिविषयत्वेन विवक्षितत्वमिति नात्र
दोष इत्याहुः । प्रतिज्ञैकदेशेऽतिव्याप्तेराह · अन्यूनेति नवपक्षतावच्छेदकस्यावयवांतराप्रति

पाद्यत्वादन्यूनपदेनैवतद्व्यवच्छेदेनातिरिक्तपदवैयर्थ्यमितिवाच्यं॰यत्रपृथिवीतरभिन्नत्वाभा
वस्तत्रपृथिवीत्वाभावइतिसाध्याभावांशेउदाहरणैकदेशेऽतिव्याप्तिवारकदित्वात्याकु:
123 तश्चिंत्यं॰तत्रपृथिवीत्वस्येतरभेदसामानाधिकरण्याभावेनातिव्याप्त्यसंभवात्‌यद्वित्त
स्माद्वह्निमानयमित्याद्याकारंनिगमनं॰तदाऽयमितिपदस्यसर्वनामत्वेनबुद्धिस्थवाचक
तयापर्वतत्वप्रकारकज्ञानजनकत्वन्निगमनेतिव्याप्तिवारकत्वंतस्येतिध्येयं॰एवंचेतन्म १२३
तेनिगमनानवयवत्वेसतीत्यपिविशेषणीयमतोवह्निमानयमितिगमनैकदेशेनातिव्या
प्तिरितिदृष्टव्यं॰नवशाब्दपदंव्यर्थं॰घटशब्दोगुणादिकर्मान्यत्वेसतिसत्वादित्यादावुदाहरणे
यदिप्रतिज्ञारूपएवशाब्दोदृष्टांतस्तेनोपादीयतेतदातत्रातिव्याप्तिवारकत्वात्‌नहितस्यपरा
मर्षप्रयोजकशाब्दज्ञानजनकत्वंशाब्दज्ञानजनकत्वेनापितुस्वज्ञानेनेतिविवक्षितंतुलक्षणे

तथाजनकत्वमितिमितिवदंति॰ तद्विंत्यं॰ तस्यप्रतिज्ञात्वेनसंग्राह्यत्वात्तद्विषयकस्योदाहर
णस्यान्यूनानतिरिक्तविषयकत्वाभावेनातिव्याप्त्यभावात्तस्मात्संपातायातंशाब्दपदं
पक्षसाध्यवाचकपदस्याप्युक्तलक्षणसत्वादतिव्याप्तिरित्यतआह॰ वाक्यमिति॰ तथाव
तादृशज्ञानजनकपदसमुदायत्वमित्यर्थः वाक्यपदस्यसमुदायवाचित्वादितिानच प्रतिज्ञ
याज्ञानलक्षणायोद्देश्यानुमित्यतिरिक्तविषयकज्ञानजनकत्वासंभवइतिवाच्यं।वह्नि
मानित्यस्यहेत्वन्वयानुपपत्त्याज्ञातव्यलक्षणायांहेत्वन्वयप्राक्कालिकमुख्यान्वयवो
धमादायलक्षणासंभवात्।केचित्तुतत्रज्ञानलक्षणैवनेत्याहुः।ननुसर्वंप्रमेयमितिप्रतिज्ञा
यामतिव्याप्तिः।अनुमितिविषयातिरिक्ताप्रसिद्ध्यातत्रानतिरिक्ताप्रसिद्धेः।नचतत्रविवा
दाभावेनसंशयाभावेनचप्रतिज्ञाद्यसंभवान्नोक्तदोषइतिवाच्यं।अनुमित्सयातादृशप्रये।

गासंभवात्। भिन्नप्रकारसंशयाद्वा। अन्यथा केवलान्वयिहेतुलक्षणमग्रेतनं विरुध्येत।
124 सत्त्वं सर्वपदार्थवृत्तिधर्मत्वाद्वस्तुत्ववदित्यादिप्रतिज्ञायां तथाप्यप्रतीकाराद्ध नह्यत्रापि के
वलान्वयिसाध्यं येन विवादादिर्न स्यात्। सर्वपदार्थस्यानुमितिविषयतयाऽनतिरिक्ता प्र
सिद्धिस्तत्रापीति चेत् अत्र ब्रूमः। अनुमित्यन्यूनानतिरिक्तविषयकपदेन अनुमितिविषयता
समव्याप्तविषयताकत्वं विवक्षितमतो नोक्तदोषः। यद्वा एतदस्वरसेनाह लिंगेति। प्रतिज्ञा १२४
यां वह्निमानित्यादौ मतुरर्थसंबंधस्यापि भानादनुमितौ तद्धानेमानाभावात् तदनतिरिक्त
विषयत्वमसिद्धमित्यस्वरसः पूर्वत्र बोध्यः। अत्रापि सत्यं तं न्यायविप्रष्टवाक्यपदं उदासी
नवाक्यातिव्याप्तिवारणाय। अवयवांतरवारणाय लिंगाविषयकेति। शाब्दपदं स्पष्टार्थं। प्र
तिज्ञैकदेशादावतिव्याप्तिवारणाय वाक्यपदमवयवावयवान्यवाक्यपरं। लिंगाविषयकज्ञा

नजनकत्वंचनञ्चव्याप्त्यासेनलिंगविषयकज्ञानजनकत्वनियतावयवान्यत्वंतेनोदाहरणादि
चतुष्टयावयवान्यत्वंपर्य्यवसितंअन्यथायत्रहेतोःप्रतिज्ञायांपक्षतावच्छेदकत्वेनान्यथावाप्र
वेशस्तत्राव्याप्तिःस्यात्।नचलिंगतावच्छेदकप्रकारेणलिंगविषयत्वविवक्षयैवनोक्तदोष
इतिवाच्यं·धूमकालादेःपक्षतावच्छेदकत्वेतथाप्यप्रतीकारात्।धूमत्वेनचतत्रधूमस्याभानात्
नचविवक्षितोपितादृशज्ञानजनकत्वनियमोयदिव्यक्त्यावच्छेदेनविवक्षितस्तदातादृशप्रति
ज्ञायांतथैवाव्याप्तिः।अथानुगतहेत्वाद्यवच्छेदेनतदाप्रतिज्ञात्वमवच्छेदकमादाययथाश्रुतेने
वसमर्थनमस्तीतिवाच्यंप्रतिज्ञात्वस्यैवलक्ष्यत्वेनतदपरिचयेतदादायसमर्थनस्याशक्यत्वा
त्हेत्ववयवादेस्तल्लक्षणांतरप्रमितत्वेनतदवच्छेदकलिंगविषयकज्ञानजनकत्वनियमग्र
हादुक्तलक्षणार्थःसुग्रहइतिभावःनिगमनेऽप्यतो।पिनातिव्याप्तिरित्याह·निगमनंचेति।चकारो

ऽप्यर्थोभिन्नक्रमः।निगमनंपरामर्षहेतुरपिनेत्यर्थः।तथाचसत्यंतेनापितद्वारणमितिभावः
नचेतदेवासिद्धमितिवाच्यं॰परामर्षपदेनोपनयजन्यपरामर्षस्यविवक्षितत्वात्तत्रचनिगमन
125 स्योदीयत्वेनाप्रयोजकत्वात्।प्रतिज्ञायाश्चाकांक्षोत्थापनद्वारातत्रप्रयोजकमस्तीतिना
संभवइतिध्येयं॰अवयवलक्षणेचपरामर्षपदंनोपनयजन्यपरामर्षपरंतेननतल्लक्षणस्य
निगमनेनाव्याप्तिरितिद्रष्टव्यं॰अतएवपरामर्षेतत्रचरमत्वंविशेषणमिहतुनेतिसर्वंसुस्थं १२५
॥ ॥इत्वितिहेत्ववयवेत्यर्थः।पक्षावाक्यपदमवयवपरमितिना।तिव्याप्तिप्रसंगइतिभावः
लिंगेति।अत्रापिनत्र्यत्यासेनलिंगविषयकज्ञानजन्यत्वनियतावयवान्यन्यायावयवत्वमि
त्यर्थः।यद्विन्यायावयवपदंनास्तिकिंतुवाक्यपदंतदातदेवावयवपरंद्रष्टव्यं।लिपिपदंच
क्रुविक्रमफलं।पूर्वंविजातीयज्ञानंनिर्बीजमुक्तमितिबीजपूर्वंपरमतमाहु॰व्यवहारादिति।

भास्करमतंदूषयति एतेनेति।यद्यपितत्र।पिवीजातीयजनकत्वमेवपर्यवस्यतितथाप्युपा
धिभेदाद्भेदइतिमंतव्यं।अपाद्वत्तौत्विति।इदंवा।पानतःवस्तुतोहेत्वन्वयानुपपत्त्याप्रतिज्ञायांज्ञा
नलक्षणावश्यंवाच्यविप्रतिपत्तौवनत्वयेतिनतयातदन्यथीसिद्धिः।नचप्रमाणाकांक्षायांहे
त्वभिधानाद्भूमादित्यादोज्ञापकत्वएवपंचमीतिनान्वयानुपपत्तिरितिवाच्यंज्ञानलक्षणाया
प्युपपत्तौहेतुत्वशंकायाःपंचम्यानानार्थत्वकल्पनायांमानाभावादितिवक्ष्यते।तदभिधान
मिति।अवयवांतराभिधानमित्यर्थः।अन्येत्वित्यस्वरसोद्भावनं·तद्बीजंतुशाब्द।नित्यत्वेप्रमाणंव
देत्यस्यसाध्योपदर्शितसाधनाभिधाननियोगपरतयाप्युपपत्तौसाध्यस्यविशेषणत्वमुक्तयु
क्त्युपष्टंभेनग्राह्यंतथावसेवास्तुकिमनेनेतिमूतएववापसंहारेतामेवदर्शयतितस्मादितिहे
तुत्वंवेति।हेतुसदृशान्यायाप्रविष्टवाक्यातिव्याप्तिवारणायकारणोत्यंतेधीविशेषणंतस्मादि

निगमनांशे तद्धारणायसाध्याविषयकेति। अत्रसाध्याविषयकेत्तिसाध्यतावच्छेदकप्रकारेण
साध्याविषयत्वं विवक्षितं तेन प्रमेयत्वादौ साध्येन साध्यविषयकज्ञानस्याप्रसिद्धिरिति ध्येयं।
नचैवमपिवायुप्रत्यक्षस्पर्शाश्रयत्वादित्यादिहेतावव्याप्तिरितिवाच्यं साध्यविषयकशाब्दधी
जनकत्वानियतावयवभिन्नत्वस्यविवक्षितत्वात्। योयोधूमवानित्यत्रोदाहरणांशेऽतिव्या
प्तिवारणाय हेतुविभक्तिमदिति। सामान्यवत्वेसतिअस्मदादिबाह्यकरणप्रत्यक्षत्वादि 126
त्यत्रान्तिमभागेऽतिव्याप्तिरित्यतउक्तं शब्दपदं तदावशाद्व्याधिक्यादर्थाधिक्यमितिन्यायेन
यावदवच्छेदेनहेतुविभक्तिसमभिव्याहृतत्वं तावदवच्छिन्नशाब्दत्वं विवक्षितं प्रकृतेचसतिस
प्तमीबलाद्विशिष्टस्यैवहेतुसमभिव्याहारइतिभावः हेतुत्वेति। न्यायावयवावच्छेदकावच्छेदेन
हेतुत्वप्रतिपादकविभक्तिमत्वं विवक्षितमितितस्मादित्यंशमादायहेतुसत्वान्तनिगमनेऽति

व्यादिः। उदाहरणेति। व्याप्यभिधानेत्यर्थः। उदाहरणावयवपरत्वेवाग्रिमावयवपदस्यार्थता
पत्तेरितिभावः। साध्याविषयकेति। मूत्रजलकेत्यंतशब्दविशेषणं तस्मादितिनिगमनांशे
ऽतिव्याप्तिवारणाय तदर्थंस्य पूर्ववत्। उदाहरणांशेतिव्याप्तिवारणाय हेतुपंचम्यंतेति। उ
दासीनवाक्येऽतिव्याप्तिवारणाय यानुमितिपरेति। न्यायेपूविष्टवाक्यत्वमित्यर्थः। यद्वाऽनु
मितिपरशब्देनन्यायावयवत्वं विवक्षितं। तथा च साध्याविषयकज्ञानजनकन्यायावयव
त्वंहेतुपंचम्यंतन्यायावयववत्वंवालक्षणाद्वयं ध्येयं वो पूर्व हेतुत्वप्रतिपादकविभक्तिमत्वमुक्त
मिदानींहेतुपंचम्यंतत्वमुक्तमतउक्तिनपूर्वाभेदः। प्रतिज्ञेति। उदासीनस्याप्रतिज्ञात्वेनप्रतिज्ञा
वाक्यधीजन्याकांक्षानिवर्त्तकत्वमवयवस्येवतिपंचम्यंतोदासीनवाक्येनिगमनैकदेशेच
नातिप्रसंगः। सामान्यवत्वेसतीत्यादौहेत्ववयवावयवेपरं परयोक्तज्ञानजनकेतिव्याप्तिवा

रणायहेतुविभक्तिमत्त्वंविशेषणंहेतुत्वान्वितैकावच्छिन्नकत्वंवोत्त्वमित्यर्थः हेत्ववयवंतद्गी
तस्यखंडवाक्यस्यतथात्वाभावात्सामान्यवत्त्वेसतीत्यादिहेतावपिसप्तमीवत्त्वाद्विशि
ष्टस्यवहेतुत्वान्वयोनविशेष्यमात्रेतदन्वयादितिभावः। यत्तुधूमवान्पर्वतइत्यादावति
127 व्याप्तिवारणायहेतुविभक्तिमदिति। नहितत्रपंचम्यंतमात्रेणतदाकांक्षानिवृत्तिरपितुप्र
थमांतपंचम्यंताभ्यांहेत्ववयवेहेतुपंचम्यंतेनैवेति। तन्न। तस्यानवयवत्वेतत्रप्रतिज्ञावि १२
रहेणोदासीनवाक्यवत्पूर्वप्रतीकमात्रेणावारणात्। अवयवत्वेचतद्वारणस्यानर्हत्वा
दिति। पंचम्यंतेति। न्यायाप्रविष्टहेतुसदृशवाक्येतिव्याप्तिवारणायानुमितिपरेति। न्या
यप्रविष्टेत्यर्थः। निगमनेऽतिव्याप्तिवारणायतत्। लक्षणेकेति। तस्मादिति। सर्वनाम्नश्चबु
द्धिस्थवाचकतयातस्यान्वयस्यबुद्धिविषयत्वेऽशक्येवतदविषयत्वेलक्षणायाअप्रसंभ

येन सर्वथा तत्र लक्षणाया अव्युत्पत्तेः । प्रतिज्ञायामपि साध्यपदे लक्षणेति तत्रापि व्याप्ति रत आ
रूपं च मन्यंतेति । न च तत्र लक्षणायां मानाभावः । साध्यस्य हेतुवाक्यार्थेन हेतुना ऽन्वयासंभवात् ।
तस्य तदकार्यत्वात् । अत्राहुः । न हि हेतुवाक्येन कारको हेतुरभिधीयते किंतु ज्ञापकः । साध्य
वन्निर्देशानंतरं कुत इति प्रमाणाकांक्षायामेव तत्प्रयोगात् · पंचम्या अपि तत्र ज्ञापकत्वरू
पहेतुत्वपरत्वात् । तथा च हेतुवाक्यार्थे ज्ञापके ज्ञाप्यस्य साध्यस्य विषयत्वेनैवान्वय इति न सा
ध्यपदेन ज्ञानलक्षणा । अत एव भास्करादौ कंठतस्तथैव प्रतिपादितमस्ति उद्देश्यानुमित्य
न्यूनेत्यादिगर्भप्रतिज्ञालक्षणं प्रकृतमतो गंगेश्वरस्याप्येतदेवाभिमतं अन्यथा प्रतिज्ञायाः
साध्यज्ञानविषयायाः साध्यज्ञानविषयत्वे ऽनुमितेश्च तदविषयत्वेन लक्षणासंभवादिति
वेत· अत्र वदंति । पंचम्या ज्ञापकत्वपरत्वं लक्षणया शक्या वा · नाद्यः सुविभक्तो लक्षणाया

128 अनन्याय्यत्वात्. नांत्यः। एकार्थत्वे संभवति नानार्थत्वायोगात्। प्रतिज्ञालक्षणं च यथा सुखं
तथोक्तं। यत्तु यदि प्रतिज्ञायां न लक्षणा तदा पंचम्यंतपदमत्र लक्षणो व्यर्थं स्यात्। न च पर्य्य
दासतत्रादि लाक्षणिकपदवत्त्ववयवांतरेऽतिव्याप्तिवारणाय तदिति वाच्यं. लाक्षणिकप
दवत्त्वेन तादृशपदनियतानुमितिपरवाक्यत्वस्यावश्यवाच्यत्वेन तत एव तादृशावयवां १२८
तरवारणायेत्. अन्यथा यत्रोदाहरणाविशेषधूमवत्त्वादित्यादिहेत्ववयव एव दृष्टांतत्वेनोप
दीयते तदा तद्दशायामतिव्याप्तेर्वज्रलेपत्वापातात्। न च प्रकृतसाध्यप्रतियोगिकहेतुपंचम्यं
तमर्भतियोक्त्यातिव्याप्त्यसंभवः। तत्प्रयोगहेतोऽपि तत्प्रयोगादाहरणादृष्टांतत्वसंभवा
दिति तन्न। उदाहरणांशे विषयीभूतस्य हेत्ववयवत्वेन संग्राह्यत्वात्. तत्प्रतिपादकस्योदाह
रणांशस्यापि धूमवत्त्वादिति शब्दवदित्यादेर्महानसवदिति वत्पंचम्यंतत्वाभावेन नियमविवे

त्वायाः असंयुक्तत्वात्. त्वाक्षणिकपदवत्त्वमुपपादयति हेत्विति असहेतुत्वेनेति. अतीतादौ व्यभिचा
रादितिभावः। नचैवं स्वायत्तःशब्दप्रयोगइतिन्यायाद्भूमज्ञानादितिप्रयोगापत्तिः।। कर्तृकर
णीतिवत्निरूढलक्षणायाज्ञानज्ञानलाभापत्तेः।नतुहेतुपदेयदि ज्ञानलक्षणातदाहेत्व
द्वयविरोधेनज्ञानमात्रमुपतिष्ठतेनतुविषयोधूमादिः।तथाचानुपस्थितेतत्रगमकत्वाकांक्षा
नस्यात्. प्रस्तुतलिंगज्ञानेगमकत्वाकांक्षास्यादितितत्रैवगमकताप्रयोजकंव्याप्त्यादि
विषयकत्वमुदाहरणाभिधेयंप्रसज्येत. किंचावयवेनानुमित्यंगज्ञानमुत्पादयितुमर्हंलिं
गज्ञानंचतथानतुलिंगं. तस्माल्लिंगस्यानुमित्यजनकतापत्तेपिधूमादिपदंशक्तमेव. पंच
मीचजनकतुतायांकिंतु अनुमितिजनकत्वलक्षणा।अनुमितिप्रयोजकत्वमात्रकृतिचेत्। अत्र
वदंतियद्यपेवचत्तिद्वयविरोधस्तदापाकाङ्क्षमित्यनन्वितंस्यात् अभेदोपचारेपिहेत्तिद्वयविरो

धस्तदापाकाद्युक्तमित्यनन्वितं स्यात्· अभेदोपचारेपि वृत्तिद्वयविरोधेन रक्तस्यानुपस्थितेस्तयाहेतो
स्तत्राकांक्षाविरहात् यदि वतटस्थतयातत्रापि आकांक्षा यदि वा यद्विषयेन विनानभासत इति
129 न्यायात्तल्लक्षणां विनाप्यस्य लक्षणामेवेति तदुपस्थितेस्तत्राकांक्षा तदा घुक्तेपि तुल्यं· तद्विष
यकज्ञानस्यापि तन्निरूपणाधीननिरूपणत्वेन ज्ञानलक्षणायैव तदुपस्थितिसंभवात्· अतए
वसमासे अन्यपदार्थलक्षणादौ लंबकर्णादिविशिष्टव्यक्तिभानं· नन्वेवमुपस्थितस्यापि विष १२९
यस्य विशेषणत्वात् विशेष्यपदज्ञाने गमत्वाकांक्षा स्यादिति चेत्· इष्टापत्तिः। गमकत्वं हि ज्ञान
जनकत्वं तच्च लिंगज्ञानस्यैव न तु लिंगस्य तथा च कथमस्य गमकत्वमित्याकांक्षापि तत्रैव· व्या
प्यविषयतया यतस्य गमकत्वमिति तद्विषयीभूते लिंगे व्याप्त्युपदर्शनायोदाहरणमपि ताद
शं संगच्छते· अस्तु वा लिंग एवाकांक्षा तथापि नानुपपत्तिः लाघवेनोपस्थितमात्रस्यैव तत्र वि

नविशेषणतयापितदुपस्थितेः प्रयोजकत्वात् पञ्चम्यन्तं पंचमीवचनहेतुतायामित्यादितन्त्रः हेतुत्वश
क्तायाः पंचम्या विवक्षितार्थलक्षणापत्तेः। सुब्विभक्तेर्वा तदनुपपत्तेः। नानार्थकल्पने माना
भावात्। उक्तेनैवोपपत्तेः। नवतत्त्वज्ञानान्तिःश्रेयसाधिगम इत्यत्र कथं प्रयोजकत्वे पंचमीति
वाच्यं अनन्यथासिद्धत्वांशमपहाय विशिष्टशक्त्या पंचम्या विशेष्यभागे नियतपूर्ववर्त्ति
त्वतात्पर्य्यात् नवपदार्थैकदेशतया तत्रापि लक्षणैवेति वाच्यं विशेषणांशेऽनन्यान्वितत्वेनो
पस्थितत्वे निराकांक्षतया आकांक्षोत्थापनात् स्वतंत्रोपस्थितये तत्र लक्षणास्वीकारात् न
तु साकांक्षे विशेष्यभागेपीति। अस्तु वा तदनुरोधेन नियतपूर्ववर्त्तित्व एव शक्तिः पंचम्यास्तथापि
प्रकृते संगतिः उक्तप्रयोजकत्वस्यापि पंचम्यर्थत्वे प्रमाणाभावादिति। यत्तु धूमविशिष्ट एव वह्ना
नेलक्षणेति धूमोपस्थितिः विशिष्टलक्षणया गंगाविशिष्टतीरोपस्थितिर्विशिष्टैवेति। नत्रलक्षणा

बसरेवस्याम:। अनंतरोक्ते ऽन्येषांमतपरेर्यायुक्तिरुक्तातांदर्शयति· जातिंविनेति। अत्रतादृशाद्दि
नजनकतावच्छेदकसत्वेतदेवलक्षणामसत्वेतद्वेदुर्गुद्धिमित्यस्वरसवीजंपूर्वमुक्तप्रायमितिनै
कृदर्शितं। अन्वयेति। अत्रजनकांतंकेवलव्यतिरेकिणोहेतावतिव्याप्तिवारणायप्रतिज्ञाया
130 अपिपरंपरयातत्प्रयोजकत्वात्तद्वारणायहेतुविभक्तिमदिति। अत्रोदासीनवाक्यातिव्याप्ति १३०
वारकत्वेनोपात्तयो:प्रथमचरमावयवपदयोरन्यतरगर्भलक्षणद्वयेवोध्यं अन्यथाऽन्यतराव
यवपदव्यर्थतापत्ते:। नन्विदमन्वयव्यतिरेकिहेतावतिव्याप्तं नवान्वयमात्राभिधायकत्वंविव
क्षितमितिवाच्यं·केवलान्वयिहेतौमात्रपदव्यवच्छेद्यव्यतिरेकव्याप्तेरसिद्धेरितिचेत·न· अन्वयव्या
प्त्यभिधायकावयवमात्राभिधानप्रयोजकेतिविवक्षणात् नवैवंमात्रपदव्यवच्छेद्याभाव:। व्य
तिरेकव्याप्तेरभावेपिविशेषादर्शनदशायांतदभिधायकावयवप्रसिद्धे:। तत्प्रतीतिजनकस्यैव

तदभिधायकत्वात्॰ दशाविशेषे अन्वयव्यतिरेकी हेतुः संग्राह्य एवेत्याहुः। न च केवलान्वयिनि संशयाभावेन न्यायानवतारात्तदीयो हेतुः संग्राह्यो नास्त्येवेति वाच्यं। अनुमित्स्याप्रयोगसंभवादिति भावः। पक्षेति पक्षेत्यादि सतोऽर्थस्य प्रतिपादको हेत्ववयव इत्यर्थः। अत्र च सद्धेतुविषयक एव हेत्ववयवः संग्राह्य इति स्वरूपासिद्धविषयकावयवव्यावारणाय पक्षपदं॰ एतच्चोपलक्षणमबाधितत्वाद्यपि बोध्यं॰ असाधारणविषयकावयवव्यावारणाय व्यतिरेकि हेत्विति व्याप्तिवारणाय च सपक्षपदं व्यभिचारिविरुद्धविषयकावयवव्यावारणाय केवलान्वयिहेतुवारणाय च विपक्षासत्त्विति। एवमग्रिमलक्षणेऽपि बोध्यं॰ एवं चेन्न व्याख्यायते तदा वारणीयहेत्ववयवस्य पदान्तरेणैव वारणात्प्रथमलक्षणे पक्षपदं द्वितीयलक्षणे पक्षसपक्षपदं चानर्थकमापद्येतेति भावः। दशविशेषासाधारणं लक्षणमाह अनुमितीति। अत्र कारणं तमुदासीनवारणाय तस्मा

दितिनिगमनांशेऽतिव्याप्तिवारणाय साध्यविषयकेति। शाब्दपदं स्फुटार्थं। केवलव्यतिरे
किण्यतिव्याप्तेराह प्रतीतान्वयेति। प्रतीतान्वयमात्रेत्यर्थः। प्रतीतान्वयं साध्यं यस्य साधन
।८। स्य तद्भावकत्वमित्यर्थः। यो यो धूमवानित्यत्रोदाहरणांशेऽतिव्याप्तेराह हेतुविभक्तिमदि
ति। दशाविशेषव्यतिरेकिसाधारणं लक्षणमाह एतदेवेति। व्यर्थत्वादिति। पक्षधर्मता
यास्तदानीमनाकांक्षितत्वेन मीमांसकवत्तद्बोधनाय मनुवादिन्नं प्रयोज्यः। तथा सत्यनाकां १३१
क्षिताभिधानेनार्थान्तरापातादिति भावः। केचित्तु व्यर्थत्वात् व्यर्थविशेष्यत्वादित्यर्थः। धूम
मात्रस्यैव व्याप्यत्वेन तत्संबंधस्य गुरुत्वादिति व्याचक्षते। तन्न धूमवद्धूमवत्त्वस्यापि व्याप्य
त्वेन व्यर्थत्वाभावात्। समानाधिकरणावच्छेदकद्वयसमावेशेऽन्यतरलाघवस्यैव तद्बीज
त्वात्। न चैवं धूमवत्त्वादित्युक्तेऽत्वं द्रुतार्थान्तरमप्यशक्योद्भावनं। यावता पक्षतार्थमपानम

नुप्प्रयोगः कृतः। किंतु विशिष्ट एव हेतुरित्युक्तापरेणापरिहारकरणासंभवादिति वाच्यं। उ
दाहरणोपनयाभ्यामेव हेतुपरिच्छेदात्। न हि धूमवत्त्वं हेतौ यत्र धूम इत्युदाहरणं धूमवांश्चा
यमित्युपनयो युज्यते। किंतु यत्र धूमवत्त्वमित्युदाहरणं धूमवत्त्ववांश्चायमित्युपनयश्चेत्या
हुः। एवं ह्यत्र वह्निव्याप्यो धूम इत्येवोपनयस्यार्थे मतुपो व्यर्थत्वात्। यदि च कथकसंप्रदाया
नुरोधात् तत्र तथा तदेतदत्रापि तुल्यं एवं प्रतिज्ञादावपीति चिंत्यं सप्तमीबलादिति। विरु
द्धार्थिकाया एव विभक्तेर्विभक्त्यंतरान्वयविरोधित्वादत एव प्रतिबंधकान्यस्य सत इत्या
दिरपि हेतुराधिक्यमिति भावः। व्याप्तेरिति। विशेषणत्वेनास्याः प्रथमोपस्थिततया प्रथ
ममादावाकांक्षाविषयत्वादित्यर्थः। पक्षतायाश्च वैशिष्ट्यरूपत्वेनातथात्वादिति भावः।
केचित्तु सकलवादिसिद्धत्वमेव व्याप्तेः प्राथम्यं पक्षधर्मताया उपरि सवितेत्यादौ कश्चिदिं

प्रतिपद्यते प्रीत्याहुः। तत्प्रदर्शनायेति। या व्याप्तिर्यथोदाहरणे न प्रदर्श्यते तथोक्तं प्राक्प्रागंधक
दभिमतव्याप्त्युपदर्शकत्वं च परंपरयोदाहरणस्य दृष्टं पदार्थविषयावाक्यार्थविधयावा
132 ततस्तदलाभात् किंतु तेन सह वारं वेधितेमान सो व्याप्तिग्रहो भवतीति। तत्रेति। अत्र ज
नकांतमुदासीनवारणाय न्यायजन्यज्ञानप्रयोजकपरं प्रति ज्ञादिवारणाय बोधजनके
त्यंतं· निरुक्त संबंधबोधजनकत्वं यतद्बोधतात्पर्यकत्वं· उपनयेव पक्षधर्मता बोधनेता
त्पर्य्यमिति न तत्रातिव्याप्तिः। यद्वा तत्संबंधविधायकत्वमित्यर्थः। उपनयस्य च तत्संबंधा १३२
नुबाधकत्वमिति। शब्दपदं यावदवच्छेदेन तत्संबंधबोधकत्वं तावत्पदसमुदायपरं· तेनो
दाहरणैकदेशेनातिव्याप्तिः। सामान्यलक्षणादिति। व्याप्यत्वाभिमतेत्यादिस्थलइतिशेषः
कस्यचिन्मतमपाकरोतिन्यायेति। न्यायावयवत्वे सति दृष्टांतप्रतिपादकत्वमित्यर्थः। उप

नयेत्युपलक्षणं निगमनातिव्याप्तिरपि द्रष्टव्या। शून्यद्रव्यस्वरसप्रदर्शनं तद्बीजं वतादृश। जिज्ञा
साजनकत्वमनुगतावच्छेदकासत्वे दुर्ग्रहं। तत्सत्वे वतदेव लक्षणमिति द्रष्टव्यं। अत्र व्यभिचारि
ति। व्यभिचारिसाधारणसाध्यसामानाधिकरण्यमात्रप्रतीतिप्रसंगवारणाय वीप्सामाहुरि
त्यर्थः। तेन वीप्सितशब्देन यावत्साधनाधिकरणोपस्थितौ तत्र साध्यवत्त्वविधानाद्यावत्साधना
श्रयाश्रितसाध्यसंबंधरूपा व्याप्तिर्गृह्यत इति भावः। ग्रंथकृदभिमतव्याप्तिपक्षे विशिष्टसाम
नाधिकरण्यरूपायास्तस्या वीप्सयाप्यप्रदर्शिना। किं तयेति चिंत्यं। ननु तत्रापि व्यभिचारधीवा
रणाय सा· तथा हि· तया सकलसाधनाधिकरणे साध्यवत्त्वबोधनाद्व्यभिचारशंकाशून्यसह
चारज्ञानाद्भवति मानसो व्याप्तिग्रह इति चेत्·न· यद्युदाहरणस्य व्यभिचारज्ञानविरोधिज्ञानो
त्पादकत्वमनुमतं तदा व्याप्त्युपदर्शकत्वस्यापि संभवेन व्याप्तिग्रहस्य मानसत्वोपवर्णनविरो

धात्।व्यभिचारज्ञानविरोधिज्ञानविषयस्यैवव्याप्तित्वौचित्यात्।तत्रेति।ननुसामानाधिकरण्य
मात्रस्यव्यभिचारिसाधारणतयाकेवलान्वयिन्यपिविशिष्टसामानाधिकरण्यमेवावश्यंव्या
प्तित्वेनाभ्युपेयं।तच्चाभव्ययदिविपक्षंविनापिस्यात् धूमादावपिस्यात्तचेत्तदाकेवलान्वयि
133 न्यपितंविनानतच्चाभइतितत्राप्युपादेयैवसा।नचधूमादौव्यभिचारसंशयःसंभवत्यत्रतु
नेतिविशेषोस्तीतिवाच्यं·हेतुसमानाधिकरणात्यंताभावाप्रतियोगिसाध्यंनवेतिसंशयस्यात्रा १३३
पिसंभवात्·नचकेवलान्वयित्वेनज्ञातेतदसंभवइतितत्रैवतदनुपादानमितिनान्यत्रापीतिवा
च्यं·स्वकर्त्तव्यत्वेनतत्रापितदुपादानस्यकर्त्तुमुचितत्वात्·अन्यथाकेवलान्वयित्वेनज्ञानस्य
प्रमेयत्वादिलिंगस्यपक्षधर्मतायिनोपदर्श्यत तथात्वेचकथकसंप्रदायविरोधात्।असाधक
ताप्रयोजकनियमतउभयवादिसंमतिविषयतयाकथकसंप्रदायसिद्धतयाव्याप्त्यनुपन्यासः।

किंचयदि केवलान्वयित्वेन ज्ञाते व्यभिचारशंकाविरहाद्वीप्सानुपादनं तदाऽसकृच्चारशंकाया

अपितत्राभावात् सकृच्चारबोधनमपि नास्तीत्युदाहरणमेव न क्रियेत॰ यदि च सकृच्चारज्ञानं वि

नाऽमनसापि न व्याप्तिग्रह इति तद्बोधनाय तदुपादानं तदाऽव्यभिचारज्ञानं विनापि ततो न व्या

प्तिग्रह इति तद्विशिष्टसामानाधिकरण्यज्ञानाय वीप्साघटितमुदाहरणमावश्यकं। एवं वा

भेदानुमानेपि वीप्सोपादेयैव॰ तथा चावस्थाभेदेन नानात्वपुरस्कारादेकस्य पक्षत्वं दृष्टांत

त्वं च न विरुद्धमिति वीप्सायिनानुपपत्तेति॰ तस्मादत्र समाधानं चिंत्यमिति। वीप्सायामपि

व्यभिचारतादवस्थ्यमिति। अनेकव्यक्त्युपस्थापनसमर्थया वीप्सायाः साधनाधिकरण

द्वित्रिव्यक्त्युपस्थापनेपि चरितार्थत्वसंभवादधिकरणांतरे साध्यवत्त्वाग्रहात्ततोपि न व्या

प्तिग्रह इत्यर्थः। ननु वीप्सया व्युत्पत्तिबलाद्व्याप्तिग्रहः स्यात्। तथा हि॰ वीप्सितशब्दश्रवणा

नंतरं द्वितीयपदस्यानुवादकतया प्रयोजनजिज्ञासायां व्युत्पत्तिवृत्त्या व्याप्तितात्पर्य्यकत्वे गृही
ते व्याप्तिबोधनस्यैव प्रयोजनतया प्रथमयत्पदोपस्थाप्यभिन्नं सर्वं साधनाधिकरणं तदन्यत्वे
नाननुगतेन रूपेणोपस्थाप्यते। एवं च सर्वत्र साधनाधिकरणे साध्यवत्त्वबोधनाद्भवति व्याप्तिप्र
134 कृइति चेत्. न: कृतेवं व्युत्पत्त्यादरे वीप्सां विनापि यद्योगप्राथम्याभ्यां व्याप्तितात्पर्य्यकत्वनिय
मइति व्युत्पत्त्यंतरादेव सर्वसिद्धादन्यत्र क्लृप्तात्सकृदुच्चरितयत्पदादेव यावत्साधनाधिकर १३४
णोपस्थितौ वीप्सावद्व्याप्तिग्रहसंभवे किं गुरुणा वीप्सादरेण यद्योगप्राथम्यव्युत्पत्तिपुरस्का
रेणास्वल्पाक्षरे। ।।। दाहरणं भवतीति न वीप्साव्युत्पत्त्यादरइत्यत्र तात्पर्य्यं. ननु वीप्साव्युत्पत्त्यादे
रेपि व्यभिचारतावदस्थ्यमित्यत्र तात्पर्य्यं। तदिदमुक्तं। एवं यद्योगप्राथम्याभ्यामेव व्याप्तौ लब्धायां
वीप्सावधारणोस्फुटार्थ इति। वीप्सया व्याप्तिलाभमभ्युपेत्याह. वीप्सा चेति। यद्यपि तत्पदवीप्सा।

यामपिनानन्वयः तत्रापि यत्पदोपस्थापितयोः प्रत्येकं तत्पदद्वयेन परामर्शसंभवात् यथा सा
साक्रियानमुमुखीव भूवेत्यत्र तथाप्येकपदोपादानादप्यभिमतसिद्धिसंभवे द्वितीयतत्पदोपादाने
प्रयत्नगौरवमित्यभिप्रायेणैतदुक्तमिति द्रष्टव्यं। निरूपेति। यत्पदद्वयाद्भिन्नरूपेणोपस्थितयोर
पि केन चिदेकेन धूमवत्त्वादिना रूपेणैकतत्पदेन परामर्शसंभवादित्यर्थः। तत्र वदंति। नित्यवीप्स
योरित्यनेन सूत्रेण वीप्सायां सुबंतस्यैकपदस्य स्थाने पदद्वयात्मकः समुदाय आदिश्यते वीप्सा
च तत्पदद्वयार्थयोर्व्याप्तुमिच्छा व्याप्तिश्च तदभिधेयस्य साकल्येन परपदार्थेन सह संबंधः। तथा च
तत्पदसमुदाय एकपदतामापन्नोऽवयवद्वयशक्तिपुरस्कारेणैव युगपत्साकल्येनैव स्वप्रतिपाद्यमु
पस्थापयतीति व्युत्पत्तिरवसीयते। अत एव समुदायस्य सकलस्वावयवार्थोपस्थापकत्वमेकपदत्वं च
पुरस्कृत्य तत्र वक्तव्यवचनापत्तिर्नृभिर्नृभिरित्यत्र नकारस्य णत्वं वाशंक्य प्रपहृतवानभीष्टकारः।

तस्माद्वीप्सयापि व्यभिचारतादवस्थ्यमित्यसंगतमेव· यत्पदद्वयसमुदायेन हेतुमत्तया बुद्धिस्थान
साकल्येनैवोपस्थापनात्। एवं च विरूपोपस्थितयोरपीत्याद्यसंगतं· न हि तत्र यत्पदद्वयं प्रत्येकं प
135 रस्परनिरपेक्षं मिथो विलक्षणरूपद्वयेन सकलं स्वाभिधेयमभिधत्ते· किं त्वेकेनैव रूपेण तत्समु
दाय एव· अन्यथा यद्यद्धूमवदित्यत्र यत्पदद्वयान्वयार्थं धूमवत्पदस्याप्यावृत्तिप्रसंगात् व्याप्तिरनुमि
तिहेतुः। सा च वीप्सयाः सत्वे असत्वे वा यदि व्याप्तिग्रहानुकूलसहचारमात्रोपस्थापकत्वमुदाहृ १३५
रणास्य तदा किं वीप्सया न च वीप्सयाः सर्वस्मिन्साधनाधिकरणे साध्यसहचारोपस्थापकत्वमिति
विशेष इति वाच्यं सहचारज्ञानत्वेनैव तस्य व्याप्तिग्राहकत्वे तस्य विशेषस्यानादरणीयत्वात्। एवं च
यावत्साधनाश्रयाश्रितसाध्यसाध्यसंबंधरूपाया अपि व्याप्तेर्व्यभिचारव्यावृत्ततया वीप्सावल्लोने।
दाहरणा प्रतिपाद्येत यावानुमित्यनुकूलत्वाभ्युपगंतारं प्रत्याह· वीप्सा चेति। यो वीप्सां व्याप्तिमनुकूल

त्वेनेच्छंतितस्यापितत्पदेवीप्साविकल्पात्तां विनापितल्लाभसंभवादित्यर्थः। नवतथापिविरूपोप
स्थितयोरित्ययुक्तमेव॰ समुदायस्यैकेनैवरूपेणोपस्थापकत्वादितिवाच्यं गौरवेणसमुदायस्य
शक्ततयाऽनुपस्थापकत्वेनयत्पदद्वयस्यैवपृत्येकं भिन्नरूपेणोपस्थापकत्वात् अतएवावयव
द्वयवृत्तिशक्तिपुरस्कारेणसमुदायस्योपस्थापकत्वमितितवापिस्वीकारः। नवैवमावृत्त्यापत्तिः।
धूमवत्पदेनकारकान्वितैकक्रियापदेनवोभयान्वयबोधजननात्। यथावनावृत्तिस्तत्रापित
न्मतेनतथाग्रंथकृतैववक्ष्यते। अत्रवयाधूमवानित्युदाहरणधूमेहेतौनयुज्यते॰ तेनहिमतुरर्थ
सामानाधिकरण्यंपृतिपाद्यतेनतुधूमसामानाधिकरण्य॰ धूमस्याधेयतायाःपर्वतस्याधारता
याश्चापृतीतेः। किंतुधूमसंयोगस्याधेयताभासतेतस्माद्यत्रधूमस्तत्रवह्निरित्येवोदाहरणंतत्रावि
तमितिवदंति। अत्रब्रूमः। एवंपर्वतोवह्निमानितिपृतिज्ञावह्निव्याप्यधूमवांश्चायमितिउपनयस्तस्मा

वह्निमानिति निगमनं वनस्यात् वह्न्यादेराधेयतायाः पर्वतस्याधारतायाश्चततोऽप्रतीते वह्निरित्या
द्यवप्रतिज्ञादिकमित्तिवाच्यं कथक संप्रदायविरोधात् यद्दिववह्न्यादि विशिष्टसंबंधाधेयः। प्रतीतो
136 विशेषणांशस्य वह्न्यादेरप्याधेयतेति मन्यसे तदा तत्रापि तुल्यमिति। इदं वति। संप्रदायमतेन सामग्य्रि
कदृष्टांतसद्भिलोदाहरणाभिप्रायेणवा दृष्टांतस्य साध्यादिवैकल्येनोदाहरणाभासत्वं बोध्यं यद्य
प्युभयवैकल्येपि साध्यादिवैकल्यमस्त्येव तथाप्यत्यंतं ता कौशलख्यापनाय तेनापि रूपेणोद्भा १२६
वनामिति पृथगुपन्यास इति बोध्यं अनुपदर्शितेति। यथा महानसमित्येव यत्रोदाहरणमित्यर्थः
विपरीतेति। योग्निमान्स धूमवानिति यत्रोदाहरणमित्यर्थः। एवमग्रेपि अत्रावयवांतराभासत्वं
कथंनोक्तमिति चिंत्यं। अनुमितीति। अनुमितिकरणव्यापारसमानाकारज्ञानजनकावयवत्वमि
त्यर्थः। यद्यपि तस्मादिति निगमने तद्धटूनेन व्याप्तपक्षधर्म्मपरामर्षादुक्तज्ञानजनकत्वं संभवति।

तथापिसाध्यव्याप्यविशेषणकपक्षविशेष्यकपरामर्षसमानाकारज्ञानजनकत्वंनास्तीतिन
तत्रापिप्रसंगइत्तिभावः।ननुपरेषांतृतीयलिंगपरामर्षहेतुतांगीकारएवनास्तिकुतस्तन्न्याभा
योपनयइत्यतआह·तदनभ्युपगमेवेति।तथाचोदाहरणानंतरंपक्षधर्म्मता।मात्रस्याप्युपदर्शन।
र्थमवयवांतरंपरैरपिस्वीकर्त्तव्यमेवव्याप्तिविशिष्टपक्षधर्मताप्रदर्शकंतत्किमर्थंकर्त्तव्यमि
त्यवशिष्यते।तत्रतृतीयलिंगपरामर्षहेतुत्वव्यवस्थापनादेवनिरस्तमितिभावः।तत्रानुमितीति।
अत्रोदासीनवारणायकारणेत्यंतं·प्रतिज्ञातिव्याप्तेराह व्याप्तेत्यादि।साध्यधीजनकत्वंसाध्य
धीज्ञानजनकत्वंप्रतिज्ञायामिवनिगमनेपिसाध्यपदस्यलक्षणायाज्ञेयत्वपरत्वादितिभावः।
पर्य्याप्तेरिति:प्रतीतेरित्यर्थः।अपर्य्यवसानादिति।साकांक्षत्वादित्यर्थः।अथेति·अभिधानं
व्याप्त्यादिविशिष्टलिंगानुभवः।अभिधेयंतथाभूतंलिंगं।ननुयावत्पक्षेसाध्यविपरीताशंका।त।

वन्ताभिधेयंपर्य्यवस्यति।नहिसंभवतिपक्षेसाध्याभावोव्याप्त्यादिविशिष्टंचलिंगमिति।तथावा
137 भिधेयापर्य्यवसानादेवात्राकांक्षास्यादित्यतआह·विपरीतेति।साध्यविपरीतशंकानिवृत्तेरपि
पक्षेसाध्यसत्त्वोपदर्शिकात्प्रतिज्ञालक्षणादवयवान्तरादेवभावादित्यर्थः।अन्यथेति।प्रतिज्ञाया
स्तदनिवर्त्तकत्वइत्यर्थः।नहीति।नहिनिगमनमपिविशेषदर्शनतांपक्षनिष्ठसाध्यसत्त्वोपदर्शिक
तारूपामन।इत्यनिवर्त्तकमित्यर्थः।सिद्धेति।प्रतिज्ञायांसाध्यनिर्द्देशादितिपक्षनिष्ठसाध्यवत्त्वो १३७
पदर्शिकत्वविशेषेपिनिगमनमेवतन्निवर्त्तकंनतुप्रतिज्ञेतिभावः।स्वरूपेति।सिद्धत्वप्रतिपाद
कपदादेरभावान्निगमनस्यापिसाध्यविशिष्टपक्षमात्राभिधायकत्वमित्यर्थः।प्रत्युतसाध्यनि
र्द्देशत्वमेवास्तीत्याह·साध्यत्वेति।अन्यथाप्रतिज्ञायामपिसिद्धनिर्द्देशत्वापत्तौपुनस्तत्प्रवृत
न्निवृत्तिसंभवेऽस्यवैलक्षण्यमेवस्यादितिभावः।समीहितानिर्व्वाहादिति।उद्देश्यानुमित्युदानि
स्या

र्थ्यादित्यर्थः। तथा च निगमनं विना तात्पर्यविषयीभूताबाधितत्वासत्प्रतिपक्षितत्वान्विताभिधा
नापर्यवसानमेवावयवांतराणां तेन सहाकांक्षेति भावः। प्रयोजकत्वमनुमितिजनकत्वमित्य
र्थः। असिद्धेश्चेति। तेन विना स्वार्थानुमित्युत्पाददर्शनादित्यर्थः। यदवगमद्वति। अयं च नियमः प
रामर्शज्ञाने बोद्धव्यः। अन्यथा पटाभावज्ञाने सति पटप्रत्यक्षं न भवति न च तत्तदभावज्ञानसाध्यमि
ति व्यभिचारः स्यादिति। अत्र केचित्। अबाधितत्वादिज्ञानस्यानुमितिहेतुत्वलाघवेन परामर्शस्ये
व तद्विषयतया ऽनुमितिहेतुत्वं वाच्यं। ननु तद्विषयकं ज्ञानांतरं गौरवात्. तथा च परामर्शविषया
भावतयाबाधितत्वसत्प्रतिपक्षितत्वयोरसिद्धित्वमेव स्यान्न तत्त्वसिद्धिभिन्नत्वं न वा तयोर्ज्ञानस्य स
त्सदनुमितिप्रतिबंधकत्वं स्यात्. परामर्शविघटनद्वारैवास्य प्रतिबंधकत्वसंभवात् तथा च प
सिद्धांतः। किंच बाधस्य पक्षीयसाध्याभावतया तदभावस्य पक्षीयसाध्यरूपतया साध्यज्ञानं स

138

ध्यज्ञानहेतुरितिपर्य्यवसितं·तच्चासंगतंसिद्धसाधनप्रसंगात्·यद्विवसाध्याभावप्रमावाधस्तदास्व
परसाध्याभावप्रमाविरहरूपोवाधाभावस्तत्रसाध्यसत्वनिश्चयंविनानिश्चेतुमशक्यएव·त
धायतत्राप्यवाधितत्वनिश्चयेसाध्यनिश्चयोऽपेक्षणीयइत्यवाधितत्वनिश्चयस्यानुमितिहे
तुत्वमापद्यतेतिमहदसमंजसं।तस्माद्यदवगमेसतियन्नभवतितत्तदभावज्ञानेसतिभ १३८
वत्येवेतिपरस्यवाधादिज्ञानप्रतिबंधकाभिप्रायेणवाधितत्वादिकंबोध्यते·ननुतज्ज्ञानमप्यनु
मितिहेतुरित्यभिप्रायेणेत्याहुः।वस्तुतस्त्वनुमितौगुणानुरोधेनयोग्यताज्ञानवत्संशयनिश्चय
साधारणमवाधितत्वज्ञानंहेतुरित्यग्रेवक्ष्यतेतथाचहेतुत्वाभिप्रायेणैवतद्बोधनमितिमंतव्यं·असि
द्धिलक्षणंचान्यथैववक्ष्यामः।ननुनिगमनेनाप्यवाधितत्वादिवोधनंसिद्धत्वप्रतिप्रादनमुखेनवि
रोधिव्यवच्छेदकतयाकार्यं।अन्यथाप्रतिज्ञावयवादपितद्बोधापत्तेः।तत्रप्रागुक्तंनन्वयंइत्यत

आह॰ नवेति॰ यद्यपि हेत्वनाकांक्षितत्वलक्षणा सिद्धत्वमपि न साक्षाद्बाधादिविरहबोधकं तथात्वेपि
निगमनस्य सर्वथैव तद्बोधकत्वं तथापि साध्यपुनर्वचनस्यानुवादतया प्रयोजनं जिज्ञासायां यानि
ष्ठाच्छाद्बाधादिविधूननमेव तदित्यवसीयते। तथैव व्युत्पत्तेः। ७। तदाह॰ उपसंहारस्यैवैषमहिमाय।
द्विपरीतशंकाविलापनं नामेति। सिद्धेति॰ सिद्धपक्षादि। तथा च वह्निव्याप्यधूमवानयमित्यत्रय
थाइदंशब्देन सिद्धस्य परामर्शः॰ पक्षस्य तथा साध्यांशस्यापि सर्वनाम्ना परामर्शो युक्त इत्यर्थः॰
विरोधवारणायेति। पक्षे साध्याभावस्य साध्याभावव्याप्यस्य च विरोधिनो निरासायेत्यर्थः। तथेति॰ था
त्युत्पयस्य मतभेदेनार्थत्वं त्रयसंभवादिति भावः। प्रकारे विशेषकधर्मे उपनयनस्य तथा वाप्यमित्या
कारत्वमाश्रित्याह॰ आद्य इति। हेतुमानित्यर्थ इति। उपनयस्य सन्निहिततथाशब्दांतरोपस्थितस्य हेतु
मत एव तथेत्यत्र तच्छब्देन परामर्शसंभवादिति भावः। सामान्येति। यो यो धूमवान्सो ऽग्निमानित्युदाह

णोपक्षसाधारणसाध्यवत्परवह्निमदादिपदोपस्थापितस्य पक्षस्य तत्पदेन परामर्शसंभवात्पक्षव
त्त्विप्रकारान्वयः पक्ष एवेत्यनन्वय इत्यर्थः । यद्यपि पक्षवृत्तिवह्निमत्त्वादिप्रकारकत्वं पक्षेनानन्वितं
तथापि तथेत्यनेन न तत्पदार्थभिन्नत्वेनैवावगतेन तत्पदार्थवृत्तिधर्म्मानिर्देशात्तथैव व्युत्पत्तेरिति भा
१३५ वः । अत एवेति । तत्पदस्य पक्षपरत्वेन सादृश्यस्य भेदगर्भतया वक्ष्यमाणत्वात् सादृश्यान्वयस्तत्रैवेत्यनन्वया
त्यर्थः । ननु तत्पदेन दृष्टान्तपरामर्श एवास्तु तथा वर्त्तीयपक्षे नानन्वय इत्यत आह । अभेदानुम १३८
न इति । अत्र पक्षस्यैव दृष्टान्तत्वेनोक्तदोषतादवस्थ्यमित्यर्थः । ननु धर्म्म्यभेदेप्यवस्थाभेदमादाय
सादृश्यस्वीकारान्नोक्तदोष इत्यत आह । बहूनामिति । अतिप्रसंगादिति । अवयवविपर्य्यासादाव
पि योग्यतादिना प्रकारान्तरेणान्वयसंभवेनादोषत्वापातादित्यर्थः । तस्मादिति । न वक्तृतत्त्वादित्ये
वकथनं क्रियत इति वाच्यं । सर्वनाममहिम्ना पूर्वोक्ताशेषरूपलाभेनोपसंहारासिद्धेः । तदुक्तं सर्वन

स्तामहिमाद्यपंयत्पूर्वोक्तानुसंधानंनामेतिभावः।ननुमाभूद्विशिष्यनिगमनेनानित्यत्वस्यसिद्धत्ता
वगमइत्यतआह॰अन्यथेति।तद्वैयर्थ्यात्॥निगमनवैयर्थ्यात्॰निगमनेनपक्षेविशेष्यनित्यत्वस्यो
पसंहारेतद्धत्ला।द्विरोधीभूतबाधादिनिराकरणंनत्वन्यथेतिभावः॥ ॥हेतुवदाभासतइतियो
गाद्दुष्टोधर्म्यवद्धेत्वाभासपदवाच्यइतितल्लक्षणमाह॰अनुमितीति।अनुमितिकारणीभूताभाव
प्रतियोगिपदेनयस्मिन्सत्यनुमित्यभावनियमस्तादृशज्ञानंविवक्षितंतेनव्यभिचरितत्वादिज्ञा
नस्यकारणविघटकस्यसंग्रहोभवति।अन्यथायथाश्रुतेनतदभावस्यव्याप्तिज्ञानेनैवान्यथा
सिद्धतयाऽनुमित्यकारणतयातदसंग्रहापत्तेः।कारणपदस्यप्रयोजकपरत्वेउपाधिज्ञानस्या
पितादृशतयातत्रातिव्याप्त्यापत्तेः।यथोक्तेतुतत्रनप्रसंगः।उपाधिज्ञानेपिव्यभिचारानुमि
तावनुमित्यप्रतिबंधात्॰ननुव्यभिचारादोधर्म्मीऽतिव्याप्तिः।नयहेतुत्वाभिमतत्वेसतीतिपूरणीय

मितिवाच्यंहेतुत्वाभिमानोक्तिकादाचित्कोवातत्कालीनोवा॰ आद्येव्यभिचारादावपिकदाचित्स
त्वेऽतिव्याप्त्यपरिहारात्।अंत्येऽसाधारणानैकांतिकादावप्यनभिमानदशायामव्याप्तिः।किंच
यथार्थपदेनवह्निव्यभिचारित्वादिभ्रमविषयधूमादावति व्याप्तिवारणेपिसमूहालंबनीभूतैक
हेत्वाभासविषयकतादृशज्ञानविषयेऽन्यत्रसद्धेतावतिव्याप्तिस्तदवस्थैवनयतादृशज्ञाने
यद्विषयतयाऽनुमितिप्रतिबंधकत्वंतदेवविषयपदेनविवक्षितमितिवाच्यं।बाधितस्यालिंगस्या
संग्रहापत्तेः।बाधज्ञानस्यपक्षनिष्ठसाध्याभावविषयतयातज्ज्ञानप्रमात्वविषयतयावाप्रतिबं
धकत्वेनलिंगविषयतयाऽप्रतिबंधकत्वात्।ननुबाधायामपक्षधर्म्मोहेतुरनैकांतोवेतिनियमा
त्तत्रव्यभिचारित्वेनैवोक्तलक्षणगमनंस्यादितिचेत्।बाधितत्वेनरूपेणविभागानुपपत्तेः।न
ह्यनेनरूपेणसामान्यलक्षणेरूपांतरेणविभागःसंभवतितथापिवक्ष्यमाणसंकीर्णबाधस्थ

ले ऽव्याप्तेर्वंगुत्लेपत्वात्। नह्यत्रैवतत्रापिव्यभिचारित्वादिसंभवः। किंचसिद्ध्यादिसंकीर्णसत्प्रति
पक्षितेतेनरूपेणालक्षणागमनेपिसद्धेतौतत्राव्याप्तिः। तत्रविरुद्धोभयव्याप्यगोचरसमूहालं
वनस्यप्रतिबंधकत्वात्। तस्यचभ्रमत्वनियमात्। नचसद्धेतौस्वगोचरपरामर्शांशस्यप्रमात्वनियं
मात्तत्पुरस्कारेणोक्तलक्षणागमनंस्यादितिवाच्यं। ज्ञानेद्वियावद्विषयतयाप्रतिबंधकत्वंतावं
तियाथार्थ्याविवक्षितंनवा। आद्येअपरहेतुविषयतयापिसद्धेतुगोचरपरामर्शस्यानुमितिप्रतिबं
धकतयातदंशेवायथार्थत्वनियमेनोक्तदोषापरिहारः। अंत्येवह्निव्यभिचारित्वादिभ्रमविषयी
भूतधूमादावतिव्याप्तिस्तदवच्छेदेवधूमांशेतस्यापियथार्थत्वात्। नचतस्यधूमविषयतयाप्रतिबंध
कत्वमेवनेतिवाच्यं। किंविरुद्धवह्निव्यभिचारीतिज्ञानेप्यनुमितिप्रतिबंधाभावाद्धूमविषयत्वेनैवप्रति
बंधकत्वात्। नचसद्धेतुपरामर्शस्येवापरहेतुविषयतयाप्रतिबंधकत्वेमानाभावः। तद्विषयकस्य

तस्यानुमित्यनुकूलत्वेन तत्त्वेनैव प्रतिबंधकत्वात् । ननु सत्प्रतिपक्षयोर्विरुद्धयोरन्यतरस्मिन्व्या
प्तिपक्षधर्म्मतान्यतरभंग इति ज्ञानस्य यथार्थस्य प्रतिबंधकतया नाव्याप्तिरिति चेत् · न · तादृशं
।५। हि ज्ञानं न प्रत्यक्षेण किंतु विरुद्धोभयव्याप्तमुभयमेकत्र न वर्त्तत इति व्याप्तिवधारणादनुमिति
रूपं तद्वाच्यं · तथा च यत्र विरोधिद्वयपरामर्षानंतरं विषयांतरसंचारादिना व्याप्तिपक्षधर्मतान्य
तरभंगानुमित्यनुकूलो व्याप्त्यादिपरामर्षो न जातस्तत्र सत्प्रतिपक्षेऽव्याप्तिस्तदवस्थैव · तथ १५१
तादृशज्ञानाभावेन तत्रानुमितिरिति तत्संग्राह्यमेव नेति वाच्यं · विरुद्धोभयव्याप्यवत्त्वपराम
र्षस्यैव विरोधिसामग्रीत्वेन प्रतिबंधकत्वात् । न हि व्याप्त्याद्यन्यतरभंगज्ञानपुरस्कारेणाहेत्वा
भासत्वं किंतु कदाचित्सामग्रीवशेन तदपि ज्ञानं तत्र भवतीति · अन्यथा तस्यापि करणाविघट
कत्वापत्तौ बाधप्रतिरोधयोः साक्षादनुमितिप्रतिबंधकत्वमिति सिद्धांतो व्याकुप्येत० किंच यत्र

समीचीनत्वलिंगद्वयंविरोधभ्रमेणासत्प्रतिपक्षितंतत्रतज्ज्ञानस्याप्ययथार्थत्वेनातिव्याप्तिर्वज्र
लेपैव। यत्तुव्याप्तिपक्षधर्मतान्यतरभंगाद्यनुमानेननुप्रतिबंधः किंतुस्वसाध्यासाधकत्वाविभा
वितिज्ञानंसत्प्रतिपक्षेऽनुमितिप्रतिबंधकंतच्चायथार्थमेवेतिनाव्याप्तिः। अन्यथाऽसाधकतानु
मितिवैयर्थ्यापत्तेरिति। तन्तुच्छं। साध्यासाधकत्वंहिसाध्यसिद्ध्यजनकत्वं अनुमितिप्रतिबंधक
तावच्छेदकरूपवत्त्वंवा। तज्ज्ञानंचनसाक्षादनुमितिप्रतिबंधकं। बाधवदनुमितिविषयविरोध्यन
वगाहनात्। नापिकरणविघटकं। व्यभिचारादिज्ञानवत्परामर्षविषयानवगाहनात्। अन्यथाऽ
साकेधत्वस्यव्यभिचारादिवद्धेत्वाभासोपाध्यंतरापत्तेः। असाधकतानुमानंचनानुमितिप्रतिबंधा
र्थंकिंतुतदप्युद्देश्यमित्यग्रेस्फुटमिति। किंवानुमितिप्रतिबंधकयथार्थज्ञानविषयत्वंविशेषणमुप
लक्षणंवानाद्यः। अज्ञायमानेनित्यदोषेविरुद्धादावव्याप्तिप्रसंगात्। नचतदातदसंग्राह्यमेवेतिवा

यं।साध्यवत्तयकाभावप्रतियोगित्वादेर्विशेषलक्षणास्यतदायितत्रसत्वेनसंग्राह्यत्वात्।अन्यथा
विशेषलक्षणानांतदाऽतिव्यापकतापत्तेः।नापिद्वितीयः।सद्धेनावसाधारणोसत्प्रतिपक्षेचविशे
षादर्शनदशायांतादृशज्ञानविषयत्वात्तद्दर्शनदशायामपिहेत्वाभासतापत्तेः।अपित्वयत्पुरुषी
142 यतादृशज्ञानविषयत्वंयस्यतस्यतंप्रतिहेत्वाभासत्वं·अन्यंप्रत्यपिवाआद्येयनपुरुषेणविरुद्धा
दिविशेषोनित्यदोषेणगृहीतस्तंप्रतितस्यहेत्वाभासतानापत्तेः।द्वितीयेविशेषादर्शनदशाया १४२
मेकपुरुषंप्रतिव्यक्तकत्वादिहेतोर्हेत्वाभासत्वेविशेषदर्शनवतःपुरुषांतरस्यापिहेत्वाभासतापत्तेः
अत्रोच्यते।अनुमितिप्रतिबंधकपदेनज्ञानस्यानुमितिप्रतिबंधकतावच्छेदकाःसव्यभिचारत्वादय
उपाधयोगृहीताःअनुमितिप्रतिबंधकतावच्छेदकत्वंतुलिंगान्यत्वेसत्यनुमितिप्रतिबंधकज्ञानवि
षयतावच्छेदकत्वमेवविवक्षितं·तद्धत्वगोचरयथार्थज्ञानविषयत्वंहेत्वाभासत्वमित्यर्थः।विषयत्वंच

विशेष्यत्वमतो नव्यभिचारादिधर्म्मेऽतिव्याप्तिः। तद्वत्त्वगोचरत्वं यत्तात्कालिकतद्वत्त्वगोचरत्वं तेन
पाकरक्ते श्यामोऽयमिति धीर्यथार्थत्ववत्कादाचित्कसंबंधपुरस्कारेण सत्प्रतिपक्षत्वबुद्धेर्यथार्थ
त्वेन सत्प्रतिपक्षोन्नीयमानसद्धेतौ नातिव्याप्तिः। न चैवं यथार्थपदवैयर्थ्यं तात्कालिकतद्वत्त्वगोचर
विरहादेव सद्धेतावनतिप्रसंगादिति वाच्यं। तद्वत्त्वं हि न विषयविशेषणं किंतु ज्ञानविशेषणं
तथा चेदानीं वह्निव्यभिचरितोऽयं धूम इति भ्रममादायातिप्रसंगतादवस्थ्यात् तादृशज्ञानविशेष्य
त्वं च विशेषणमेव। न चाज्ञायमानदशायां नित्यदोषेऽव्याप्तिरिति वाच्यं। तत्रेश्वरज्ञानस्यैव तदानीं
तद्वदिदं लिंगमित्याकारकस्य तदापि सत्त्वात् न चैकपुरुषीयसत्प्रतिपक्षतादशायां कालकल
द्विहेतोः पुरुषांतरं प्रति सत्प्रतिपक्षतापत्तिः। आपादकाभावात्। न हि तादृशज्ञानविषयः सर्वपु
रुषं प्रति हेत्वाभास इति लक्षणार्थः। किंतु तादृशज्ञानविषयो हेत्वाभास इत्येतावतैव हेतुतद

143

भासविवेकोपपत्तेः।तत्पुरुषीयस्यसत्प्रतिपक्षतादशायांतत्पुरुषीयसमानवल्लोपस्थित्याप्रति
रुद्धतत्पुरुषीयानुमितिरूपकार्यप्रलिंगत्वंप्रयोजकमितिनतदापत्तिरितिति।विशिष्ट्यापादकाभा
वात्‌·नवसमूहालंवनीभूतेकृत्वाभासविषयकतादृशज्ञानविशेष्यऽन्यत्रसद्धेतावतिव्याप्तिः
तद्देशतद्धत्वप्रकारकयथार्थज्ञानविशेष्यत्वस्याविवक्षितत्वात्‌।वाधितमिदमितिज्ञानस्ययथा
र्थस्यविशेष्यत्वाद्बाधितेलिंगेनातिव्याप्तिः।नवतथापिसत्प्रतिपक्षेऽव्याप्तिरेव·विरोधिपरामर्श 143
र्षविषयीभूतस्यप्रतिसाधनस्यैवदोषत्वात्‌।स्थापनाहेतौवतत्संवंधाभावेनतद्धत्वगोचरयथा
र्थज्ञानादितिवाच्यं।इदंलिंगमनेनसत्प्रतिपक्षेणासत्प्रतिपक्षितत्वविशिष्टमितिज्ञानस्ययथा
र्थत्वेऽभावः नसवर्त्तसिद्धतयाज्ञानपुरुषसंवंधस्यस्वरूपसंवंधविशेषस्यवाकल्प्यत्वात्‌·
तत्संवंधेलेभूज्ञानस्यैवानुमितिप्रतिं तत्संवंधनज्ञानस्यापियथार्थत्वात्‌·अतएवतत्संवंधस्यानि

त्यत्वादनित्यदोषत्वं। नचैवं धूमो वह्निव्यभिचारीति ज्ञानसंबंधमादाय धूमेपि व्यभिचरितत्वसत्वाद
तिव्याप्तिः स्यादिति वाच्यं। तज्ज्ञानस्यायथार्थत्वेन सकलसिद्धतया तत्र तत्संबंधत्वाकल्पनात्त
न च संबंधीभूतज्ञानसंबंधीनुमितिप्रतिबंधकतया न तत्संबंधगोचरज्ञानस्यानुमितिप्रतिबंधकत्व
मिति वाच्यं इष्टापत्तेः। नह्यनुमितिप्रतिबंधकीभूततादृशज्ञानविशेष्यत्वमत्र विवक्षितं। किंतु तद्ध
गोचरयथार्थज्ञानविशेष्यत्वमात्रं तच्च ज्ञानं व्यभिचरितत्वादिगोचरमनुमितिप्रतिबंधकमपीत्य
न्यदेतत्। अन्यथा बाधितेप्यव्याप्त्यापत्तेः। न हि लिंगविशेष्यकबाधितत्वादिज्ञानस्यानुमितिप्रति
बंधकत्वं किंतु बाधमात्रविषयकस्यैव तद्विषयतया विरोधाभावादित्युक्तं। ननु याथार्थ्यस्य विषय
घटिततया विशेष्यविशेषणीभूतमपि तद्धर्मत्वं लब्धमेव। तथा च व्यर्थविशेषणत्वमित्यपरितोषात्त
द्धत्वरूपं लक्षणं करोति। यद्विषयत्वेनेति। ज्ञानमात्रमिति। तत्रापि ज्ञानविषयीभूतस्य व्यभिचारा

देर्न्नप्रतिवंधकत्वंकिंतुतज्ज्ञानस्यैवेत्यपरितोषाद्द्वितीयलक्षणंमंतव्यं।अनेनव्यभिचारादयउपाध
योलक्षिताः।तद्विषयत्वेनैवलिंगज्ञानस्यानुमितिप्रतिवंधकत्वात्।अत्रचलक्षणद्वयेतत्त्वमित्यत्र
तच्छब्दस्यतद्वत्परत्वेनतद्वत्त्वमित्यर्थः।नेनव्यभिचारादौधर्म्मिनातिव्याप्तिः।धर्म्मिणोवलिंगेनासं
144 भवः।नचपक्षताविरहरूपायाज्ञानविरहरूपायावाअसिद्धेर्न्नसंग्रहइतिवाच्यं।इष्टापत्तेः।ज्ञा
यमानादोषस्यैवात्रहेत्वाभासत्वेनलक्ष्यत्वात्।नवाज्ञानादिर्द्दोषोज्ञायमानःप्रतिवंधकःका १४५
रणाभावत्वेनस्वरूपसतएवप्रतिवंधकत्वात्।नचैवंसंदिग्धासिद्ध्यादिकंकथायांनाद्भाव्यं
अज्ञायमानदोषतयाहेत्वाभासत्वासत्वात्।निग्रहस्थानांतरत्वाभावाच्चेतिवाच्यं।हेत्वाभासाश्च
यथोक्ताइतिसूत्रेऽनुक्तसमुच्चयार्थेनचकारेणातस्यापिनिग्रहस्थानत्वप्रतिपादनात्।सिद्धसा
धनस्यपक्षताविरहपर्य्यवसन्नस्यार्थान्तरत्वेनैवाद्भावनमितिसर्वमवदातं।।नन्वेतल्लक्षणंस

द्धतोसत्प्रतिपक्षेऽसाधारणो वा व्याप्तं व्याप्तपक्षेधर्म्मी तया तस्यानुमित्यनुकूलतयाऽनुमिति
प्रतिबंधकतावच्छेदकताभिमतसत्प्रतिपक्षितत्वादेरभावादित्यत आहृदशेति। तथा च तत्काले
तज्ज्ञानस्यानुमितिप्रतिबंधकत्वादनुमितिप्रतिबंधकतावच्छेदकरूपसत्प्रतिपक्षितत्वस्यासा
धारणत्वस्य च भानान्न तत्राव्याप्तिरिति भावः। यद्यपीति। अत्र सत्प्रतिपक्षपदं विरोधिज्ञानसाम
ग्रीपरं तत्वेनैव सत्प्रतिपक्षस्य प्रतिबंधकत्वात्। ननु सत्प्रतिपक्षकेत्वाभासपरं तस्यान्यत्र सत्प्र
तिपक्षत्वासंभवादिति दुष्टव्यं॰ तथापीति। न ह्यनुमित्यसाधारणदोषत्वेनात्र लक्ष्यता किंतु ज्ञा
यमानदोषत्वेनेत्यर्थः। अनुमित्यसाधारणादोषत्वमपि बाधसत्प्रतिपक्षयोरित्याह॰ यद्वेति। बाधे
नेत्युपलसत्प्रतिपक्षेणेत्यपि द्रष्टव्यं। प्रत्यक्षे प्रत्यक्षबाधत्वेन तत्सामग्रीत्वेन च प्रतिबंधकत्वात्
अपीतत्वानुमितावपि शंखे पीतत्वप्रत्यक्षोदयात्। अनुमितौ नु बाधमात्रस्यैव प्रतिबंधकत्वात्॰

तथा च बाधेनेत्यत्र बाधमात्रे तात्पर्यादुष्टत्वं। ननु शाब्देपि बाधस्यैव प्रतिबंधकत्वं ‥ अयोग्यता
ज्ञानमात्रस्यैव प्रतिबंधकत्वात्तदितिचेत् ‥ न ‥ अत्यंतासत्यपिह्यर्थे ज्ञानं शाब्दः करोतीति सिद्धांतानु
सारेण तत्प्रतिबंधकत्वमंगीकृत्यैवास्याभिधानात्। नचास्मिन् सिद्धांतेपि न बाधमात्रस्य शाब्द
145 प्रतिबंधकत्वं ‥ नरशिरःशौचानुमानेन तदशौचबोधकागमस्य बाधापत्तेरितिवाच्यं। उपजीव्य
जातीयत्वेन शाब्दस्य बलवत्त्वाज्ज्ञानदशायां विशेषादर्शनतः समुत्पन्नतया वाऽनुमित्या शाब्दबा १४५
धापत्तेरिष्टत्वादिति। ननु गौरवज्ञानस्य गुर्वर्थानुप्रतिबंधकत्वाद्गौरवस्यापि व्यभिचारादिवद्धेत्वा
भासत्वापाधित्वमस्तु ‥ नच हेतुविषयतया तज्ज्ञानस्याप्रतिबंधकत्वान्न तथात्वमिति वाच्यं। बाध
स्याप्यतथात्वापत्तेः। नहि तज्ज्ञानमपि हेतुविषयतया प्रतिबंधकमित्युक्तमिति चेत्। न। यज्ज्ञा
नेहि सत्यवश्यमनुमिति प्रतिबंधकत्त्वस्यैव तथात्वेनाभिमतत्वं ‥ नच गौरवं तथा। फलमुखगौरवादेः

प्रमाणासिद्धतया तज्ज्ञानस्याप्रतिबंधकत्वादिति। तेचपंचभिरुपाधिभिर्विभज्यंते इत्याह· तेचेति।
सव्यभिचारोपीति। यद्यपि सामान्यलक्षणानंतरं विभागो युक्तः अन्यथाऽप्राप्तकालत्वापत्तिस्त
थाप्यनुपसंहारीन व्यभिचारांतर्भूतः किंत्वसिद्धांतर्भूत इति केषांचिन्मतं· तथा च तत्साधारण्ये
न सव्यभिचारलक्षणमयुक्तमिति शंकामपनेतुं तदंतर्भूतत्वप्रदर्शनपरत्वमेतस्य न तु हेतुवि
भागो तात्पर्यमिति भावः। प्रसंजकत्वं साधकत्वमापादकत्वं वा वाद्यंतद्वयविरुद्धमुभयप्रत्येकस्य
न संभवतीत्याह एवस्येति। नाप्युभयपक्षेति। साध्यवत्साध्याभाववद्रूपं पक्षद्वयं अनुपसंहारिणि
पक्ष एव तथेति भावः। उभयेति। अत्र सर्वेति विशेषणं· तेन धूमादौ नातिव्याप्तिः। अथेति। साध्य
संदेहजनिकाकोटिद्वयोपस्थितिः साध्यतदभावोपस्थितिजनकं यत्पक्षधर्मताज्ञानं तद्विष
यत्वे सतीत्यर्थः। ननु पक्षधर्मेति व्यर्थमिति चेन्न। न· साध्यसंदेहजनकप्रमाणयसंशयात्मक

कोटिद्वयोपस्थितिजनकज्ञानविषयीभूतेज्ञानत्वेव्यभिचारवारकत्वात्। पक्षधर्म्मताज्ञानेच साध्य
संशयविषयवृत्तिताज्ञानं॰नचज्ञानत्वस्यसाध्यसंशयविषयपर्व्वतादिवृत्तिताज्ञानंप्रामाण्यसंश
यात्मककोटिद्वयोपस्थितिजनकं किंतुज्ञानवृत्तिताज्ञानमेवेतिभवतितद्व्युदासः। ननुसर्व्वज्ञा
नंनिर्व्विषयकंज्ञानत्वादित्यनुमितिप्रामाण्यसंशयजनकज्ञानत्वेतथाप्यतिव्याप्तिः। तत्रसंशय
150 विषयीभूतज्ञानवृत्तिताज्ञानस्यैवतथात्वादितिचेत्र॰न॰नह्येतज्ज्ञानस्यनिर्व्विषयत्वरूपसाध्य १४६
सशयविषयवृत्तिताज्ञानत्वेनप्रामाण्यसंशयात्मकोभयकोट्युपस्थितिजनकत्वं किंतुप्रामाण्य
संशयविषयीभूतनिर्विषयत्वानुमितिवृत्तिताज्ञानत्वेनैव॰अन्यथाघटादिज्ञानेप्रामाण्यसंशयो
नस्यात्तज्ज्ञानत्वस्यघटादिवृत्तिताज्ञानविरहात् ननुव्यभिचारित्वादिभ्रमविषयीभूतसद्धेतावति
व्याप्तिः नचहेतुत्वाभिमतपदेनहेत्वाभासपरेणतद्व्युदासः। अपक्षधर्म्मधूमेतादृशभ्रमविषयेतथाप्य

तिव्याप्तेः। नचतादृशकोट्युपस्थापकप्रमाविषयत्वेनैव नातिप्रसंगः। हेत्वभिमतपदवैयर्थ्यापत्ते
मेवं। हेत्वभिमतपदस्यसाध्याव्याप्यत्वपरत्वादितिकेचित्। तन्न। व्यभिचरितत्वादिभ्रमविषयीभू
तेविरुद्धेतथाप्यतिव्याप्तिरेव। नचविरुद्धोप्यनेनरूपेणसाधारणएवेतिग्रंथकृताऽभिधीनत्रा
स्यलसत्वमेवेतिवाच्यं। पक्षधर्मतापदवैयर्थ्यापत्तेः। निर्विषयत्वादौसाध्यज्ञानस्यविरुद्धत्वेन
लक्ष्यत्वात्। तद्व्यावर्त्तनस्यानभिमतत्वात्। सविषयत्वादौसाध्येनविरुद्धमितिचेत्। न। तत्रसा
ध्येतस्यसद्धेतुत्वेनसाध्याव्याप्यत्वपदेनैववारणात्। नचविशेषणज्ञानजन्यत्वादौसाध्येन
स्मिन्नेवहेतावतिव्याप्तिः। तत्रतस्यव्यभिचारित्वेनसंगृह्यसाधारणत्वात्। अन्यादृशस्यसा
ध्यस्यसाध्यस्याभावात्। तस्माद्यदिविरुद्धस्यासंगृह्यत्वंतदाव्यभिचारितत्वभ्रमविषयीभूते
विरुद्धेऽतिव्याप्तिः। यदिचतस्यसंगृह्यत्वंतदापक्षधर्मतापदवैयर्थ्यमेवेतिचिंत्यं। वयंतुब्रूमः॥

ज्ञानपदंप्रमापरंयद्विषयत्वेनकोट्युपस्थापकत्वंतदंशेप्रमात्वंबोध्यंतेनस्वरूपासिद्धसंकीर्णानि।
त्तिव्याप्तिः।विरुद्धत्वेनसंग्राह्यमेवेतिपक्षधर्मतापदंसार्थकं।तादृशज्ञानदशायामेवात्रमतेऽल
क्ष्यत्वमितितदभावदशायांनाव्याप्तिः।नचकृत्वमिमतपदवैयर्थ्यं।तस्यसाध्याव्याप्यत्वपरस्य
सद्धेत्वसाधारण्यातिव्याप्तिवारकत्वात्।केवलान्वयीत्यादिनाग्रिमग्रंथेनतस्याऽत्रालक्ष्यत्वे
नप्रतिपादनादिति।ननुसद्धेतावसाधारण्येसाध्याव्याप्यत्वस्याभावादव्याप्तिः।केवलान्वयिसा १४७
ध्यकेऽनुपसंहारिणिवाव्याप्तिरित्यतआह।केवलेतिविशेषलक्षणस्यापितद्घटितस्यैव
बोध्यत्वादितिभावः।यद्यप्यस्यसंग्राह्यत्वेपिनदोषः।तत्रविशेषलक्षणावारणायविशेषणम
प्यनर्थकं।तथापिसद्धेतुर्नकदापिहेत्वाभासइतिमतमालंब्येतदुक्तं।अतइति।अतःपुरुषदे
ह्यानवस्कदोषइत्यर्थः।प्रमेयत्वमिंनेति।अयंघटएतदभिन्नःप्रमेयत्वादित्यत्रेत्यर्थः।तयोःरिति।

साध्यानवगतसहचारीत्यादिलक्षणानुसारेणैतदुक्तं बोद्धव्यं। साध्यवदवृत्तित्वेन निश्चित
साध्यवदवृत्तित्वेनेत्यर्थः। पक्षे साध्यस्य संदिग्धत्वादिति भावः। यस्य यदा तादृशज्ञानविषयत्वं
तदा तस्य व्यभिचारित्वमिति मतानुसारेणैतद्बोद्धव्यं। अन्यथा तादृशाविशेषे तस्यापि तादृश
ज्ञानविषयतया संशायकत्वेनातिप्रसंगात्। तथा च तद्दशायामस्यापि संग्राह्यत्वमेवेति भा
वः। एतदज्ञानेपीपि। न च साधारण्याद्यज्ञाने एतज्ज्ञानस्याप्यनुमितिप्रतिबंधकत्वाद्विनि
गमकाभाव इति वाच्यं। एतदज्ञानस्य विरोध्यविषयत्वेनाप्रतिबंधकत्वात्। अत एव हेत्वाभास
त्वादिज्ञानमपि नानुमितिप्रतिबंधकं विरोध्यविषयत्वात्। तज्ज्ञाने व्यभिचरितत्वादिसंदेहो
पादनेतस्यैव प्रतिबंधकत्वमिति भावः। एतेन पक्षवृत्तित्वे सतीति। अत्र विरुद्धान्यत्वमपि विशे
षणं तथा च विरुद्धान्यस्य पक्षवृत्तेर्योऽनुमितिपरंपराविरोधीकरणा विघटक इति यावत्। तेन सा

धारणत्वादिकंलभ्यते।तत्संबंधाव्यावृत्तिविद्यमानतत्संबंधत्वमित्यर्थः।तेनस्वरूपासिद्धि
संकीर्णव्यभिचारिण्यव्याप्तिः।विरुद्धेचातिव्याप्तिः।विरुद्धान्यत्वविशेषणेविरुद्धसंकीर्णा
148 साधारणाऽव्याप्तिः।बाधितत्वसत्प्रतिपक्षितत्वयोरपिअनुमितिविरोधित्वात्बाधसत्प्रतिप
क्षयोरतिव्याप्तिः।कादाचित्कसंबंधमादायासाधारण्योत्तीर्णेचातिव्याप्तिरित्यतानिदूष
णानिनिरस्तानिवेदितव्यानि।स्वरूपासिद्धिसंकीर्णेपिसाधारणत्वादेतादृशस्यसंभवा १४८
त्अन्यथाअलक्ष्यत्वात्।विरुद्धान्यस्येतिविशेषणाद्विरुद्धेनातिव्याप्तिः।विरुद्धान्यस्य
पक्षवृत्तेरनुमितिविरोधिसपक्षविपक्षव्यावृत्तत्वं।तस्यविरुद्धसंकीर्णसाधारणेपिसत्वा
न्नाऽव्याप्तिः।बाधितत्वसत्प्रतिपक्षयोरनुमितिपरंपराविरोधित्वाभावान्नातिव्याप्तिः।अव्या
वृत्तिपदमहिम्ना।संबंधस्यविद्यमानत्वलाभात्सद्धेतावसाधारण्योत्तीर्णेऽतिव्याप्तिवारणं।

ननुव्यर्थविशेषणोनीलधूमादौविरुद्धान्यपक्षवृत्तेरनुमितिविरोधिव्याप्यत्वासिद्धत्वंतत्संबंधस्य
तत्रविद्यमानत्वादतिव्याप्तिरितिचेत्न॰न॰व्यर्थविशेषणान्यस्येत्यस्यापिविवक्षणीयत्वात्।अ
नुमितिविरोधित्वंचानुमितिप्रतिबंधकज्ञानविषयतावच्छेदकत्वमतोनाज्ञानरूपासिद्धादा
वतिप्रसंगइति।विरुद्धोपीति।नचैवंविरुद्धान्यस्येतिविशेषणांव्यर्थमितिवाच्यंअनेनरूपेणे
त्यभिधानादुक्तरूपान्यतरवत्तयाज्ञातस्यैवविरुद्धस्यलक्ष्यत्वात्।तथाचसपक्षविपक्ष
व्यावृत्तत्वादिज्ञानदशायामेवविरुद्धस्यासाधारणत्वेनसग्राह्यत्वंनतुविरुद्धत्वेननिश्चय
दशायामुक्तरूपत्रयाभावात्तथाचतद्धातद्व्यावर्त्तनायसार्थकमेवतदिति।साध्याव्याप्यत्वे
सतीति।साध्यव्याप्यत्वसाध्याभाववैव्याप्यत्वोभयनिश्चयविरोधिहेत्वाभासतोपाधिमत्त्वंसाध्य
वन्मात्रवृत्तित्वनिश्चयसाध्याभाववन्मात्रवृत्तित्वनिश्चयविरोधिहेत्वाभासतोपाधिमत्त्वंवेत्यर्थः।

पृथमभिमित्ति।सव्यभिचरितत्वादिगृहं विनाहेत्वाभासत्वाग्रहादित्यर्थः।यद्यपितद्गृहेपिशाब्दादिना
हेत्वाभासत्वंगृहीतुंशक्यतएवतथापिसनसार्वत्रिकइत्यर्थः।यथाश्रुतेसद्धेतावसाधारणोऽव्या
प्तिरितियथोक्तस्यावश्यवाच्यत्वेऽव्याप्तिशंकैवनास्ति।सकलसपक्षविपक्षव्यावृत्तत्वरूपहे
149 त्वाभासत्वोपाधेरुभयनिश्चयविरोधिनस्तत्रापिसत्वादित्यपरितोषादाह-कश्चिदिति।अयोगो
लकादिसपक्षव्यावृत्तत्वंधूमादावपीत्यतउक्तंसर्वेतिसपक्षविशेषणं।नापिसपक्षवृत्तित्वइति·
विरुद्धान्यपक्षवृत्तोयदनुमित्योपयिकव्याप्त्यादिसंबंधशून्यत्वंतद्वत्वमित्यर्थः।तेननस्वरूपा १४८
सिद्ध्यादिसंकीर्णाव्याप्तिः।अनुमित्योपयिकत्वंतुअनुमितिकारणलिंगपरामर्शविषयतावच्छेद
कत्वमतोऽबाधितत्वासत्प्रतिपक्षयोरप्रसंगः।नचविरुद्धेस्वरूपासिद्धयातिव्याप्तिः।स्वरूपासि
द्धविरुद्धेस्वरूपासिद्धत्वातिव्याप्तिः।स्वरूपासिद्धविरुद्धेहिअनुमित्योपयिकसंबंधशून्यत्वंस्वरू

पासिद्धत्वं विरुद्धत्वं च· न च तदुभयं विरुद्धान्यपक्षवृत्तौ वर्त्तते· प्रथमस्यापक्षधर्म्मा द्वितीयस्य विरु
द्धएव वृत्तेरिति। उभयेति। ननु शब्दोऽनित्यः शब्दत्वादित्यादौ शब्दत्वादिना व्याप्तिग्रहदशायामिदमति
व्याप्तमिति चेत्· न· तद्व्याप्तिनिश्चयस्य पक्षीयसाध्यगोचरतानियमेन तदा पक्षस्यैव सपक्षतया
सकलसपक्षविपक्षव्यावृत्तत्वरूपोभयकोट्युपस्थापकतावच्छेदकरूपवत्त्वस्य तत्राभावात्।
विशेषदर्शनसहितस्यैव तस्योभयकोटिप्रसिद्धेरिति चेत्· न· तस्यालक्ष्यत्वात्। व्याप्तिनिश्चय
विरोधिसंदेहजनककोट्युपस्थितेर्विवक्षितत्वाद्वा· तादृशश्च साध्यतदभावसंशयः। साध्यपक्ष
वृत्तित्वसंशयश्च भवतीति भावः। अथायमिच्छावान् ज्ञानादित्यत्र प्रामाण्यरूपोभयकोट्युपस्थिति
जनकतावच्छेदकज्ञानत्ववति सद्धेतोर्ज्ञानेऽतिव्याप्तिरिति चेत्· न· लिंगनिष्ठतया यज्ज्ञानमुभयको
ट्युपस्थितिजनकं तद्धत्वस्य तादृशावच्छेदकरूपत्वेन विवक्षितत्वात्। ज्ञानत्वं तु प्रामाण्यसंशयहेतौ

१ १

विषयत्वेनज्ञानंतथा॰तथाहिपर्वतोवह्निमान्धूमादित्याद्यनुमितिवृत्तितयाज्ञातस्यायेंज्ञानत्व
स्यवह्नितदभावसंशयजनकप्रामाण्याप्रामाण्यासंशयात्मकोभयकोट्युपस्थापकत्वात्।अन्यथा
धूमवृत्तितयातस्याज्ञानात्तथात्वंतस्यनस्यादिति।प्रामाण्याविशेषणकसाध्यतदभावकोट्युप
१५० स्थापकतावच्छेदकरूपवत्त्वेवातात्पर्य्यमतोनज्ञानत्वेऽतिव्याप्तिःविरुद्धान्यपक्षवृत्तित्वेसती
तिएतच्चलक्षणंपक्षवृत्तित्वेसतीत्यादिपूर्वपक्षलक्षणव्याख्यानेनैवव्याख्यातमितिबोध्यंलक्ष १५०
णानुरोधेनेति।यद्विषयत्वेनज्ञानस्यानुमितिप्रतिबंधकत्वमितिलक्षणानुरोधेनेत्यर्थः।साध्य
वन्मात्रेति।ननुसाध्येहेतुसंकीर्णोविरुद्धसंकीर्णोवासाधारणोऽव्याप्तिः।प्रथमस्यसाध्यवन्मात्रवृत्ति
त्वात्।द्वितीयस्यवसाध्याभाववन्मात्रवृत्तित्वात्नवसाध्यवत्पदंनिश्चितसाध्यवत्परं॰अनुपसं
हार्यव्याप्तेः।धूमेवसद्धेतुतादशायामतिव्याप्तेश्च॰प्रथमेनिश्चितसाध्यवतोऽप्रसिद्धेः।प्रमेयम

त्रस्यैवपक्षत्वेनसंदिग्धसाध्यकत्वात्।द्वितीयेऽनिश्चितसाध्यवत्यपिपक्षेधूमस्यवृत्तेः।अतएवत
दुभयपदंपक्षातिरिक्ततदुभयपरमित्यपिन।नवसाध्यवन्मात्रवृत्तित्वेनानिश्चितत्वेसतिसाध्या
भाववन्मात्रवृत्तित्वेनानिश्चितत्वंतत्त्वंहेत्वाभासत्वेनविशेषणीयादज्ञायमानेधूमेव्यतिरेकव्या
प्तिमत्तयाज्ञायमानेवानतत्रातिव्याप्तिरितिवाच्यं।व्यतिरेकव्याप्तिमत्तयागृह्यमाणहेत्वंतरेण
सत्प्रतिपक्षितेधूमेतथाप्यतिव्याप्तेः।ज्ञलहृदादौपक्षेस्वरूपासिद्धतयाहेत्वाभासेज्ञायमानेधूमे
ऽतिव्याप्तेश्च।अथासाधारण्याभावकालावच्छिन्नसाध्यव्याप्त्यभाववत्त्वेसतितत्कालावच्छिन्न
विरुद्धत्वाभाववत्त्वमुक्तलक्षणार्थोविवक्षितः।साध्यव्याप्तेविरुद्धेवाऽसाधारणत्वदशायांतदभा
वकालावच्छिन्नत्वविरहान्नाव्याप्तिरितिचेत्·न·असाधारण्यंपक्षेतत्पुरुषीयंतत्साधीयंयत्किंचि
त्साध्यीयंयत्किंचित्पुरुषीयंवा·आद्येयंसाध्यविशेषमादायकस्यपुरुषस्यासाधारण्यंकदापिनाव

तीर्णात्तत्साध्यकसाधारण्यस्य सर्वथैवाऽव्याप्तेः।नचतत्पुरुषीयंप्रतिसाधारणत्वाभावेपुरुषांतरंप्र
तितत्स्यादितिवाच्यं।तस्यनित्यदोषत्वात्।यत्किंचित्साध्यकासाधारण्यदशायांतदसाधारण्य
मादायविशिष्टाभावसत्वेनसद्धेतुत्वदशायांशब्दत्वादावतिव्याप्तेः।अत्रोच्यते।।साध्यवन्मात्रवृ
त्तित्वसाध्याभाववन्मात्रवृत्तित्वरूपोभयनिश्चयविरोधिहेत्वाभासतोपाधिमत्वमत्रविवक्षितं। १५१
151 तादृशश्चोपाधिःसपक्षविपक्षगामित्वमनुपसंहारित्वमसाधारणत्वंच।यद्यप्यसाधारणस्यस
त्प्रतिपक्षोत्थापकतयादूषकत्वपक्षेव्याप्तिनिश्चयविरोधित्वंनास्ति।तथापिसाध्यवन्मात्रवृत्ति
त्वादिनिश्चयविरोधित्वमस्त्येवव्यतिरेकव्याप्तिपुरस्कारेणतस्यसत्प्रतिपक्षोत्थापकत्वात्।के
वलान्वयिसाध्यकोऽनुपसंहारीसंग्राह्यएवनास्मिन्पक्षेइतिनतत्राव्याप्तिः।तत्संग्राह्यतापक्षेतु
साध्यवन्मात्रवृत्तित्वनिश्चयपदेनसाध्यनिष्ठहेतुसमानाधिकरणात्यंताभावाप्रतियोगित्वनिश्चयः।

साध्याभाववन्मात्रवृत्तित्वनिश्चयपदेन साध्यनिष्ठहेतुव्यापकाभावप्रतियोगित्वनिश्चयश्च विव
क्षित इति ध्येयं· केचित्तु केवलान्वयिसाध्यकोऽनुपसंहारी सद्धेतुसाधारणो विरुद्धसंकीर्णासाधार
णाश्चयन्मतेन संग्राह्यस्तन्मतेनेदं लक्षणं। वृत्तिमत्त्वे सतीति विशेषणान्तादृत्तावलिप्रसंगादित्याहुः।
ननु विरुद्धोप्यनेनरूपेण साधारण एवेति ग्रंथकृताऽग्रेऽभिधीनादुक्तलक्षणानां तत्राव्याप्तिरि
ति चेत्· न· न हि विरुद्धोपि साधारणानैकान्तिक इति तदर्थः अपि तु साधारणो यदूषणत्वोपाधिः
स तत्राप्यस्तीति विरुद्धस्यापि तद्वत्त्वेन ज्ञायमानस्यानुमितिप्रतिबंधकत्वमिति। साधारणविभा
जकोपाधिश्च सपक्षगामित्वमिति न तस्य साधारणत्वं किंतु सर्वदा विरुद्धत्वमेव कदाचिद्विरुद्धत्व
प्रयोजकोपाधिमत्तया ज्ञातस्यानुमितिप्रतिबंधकत्वं कदाचित्साधारणत्वप्रयोजकविपक्षगामि
त्ववत्तयेति। न च विपक्षगामित्वमेव साधारणविभाजकउपाधिः स्वीक्रियतां तथा च तेनरूपेण सोपि सा

धारणायवांतर्भवतीतिवाच्यं। स्वतंत्रस्य महर्षेर्न्नियोगानर्हत्वात्। अन्यथा साक्षात्प्रतिबंधकत्वेन
बाधप्रतिरोधयोरप्येकत्वापत्तिः। वयं त्वेतल्लक्षणप्रणयनं संप्रदायमतेन ग्रंथकृन्मते तु विरुद्ध
152 स्यापि संग्राह्यत्वं साध्यवन्मात्रवृत्तित्वनिश्चयविरोधिहेत्वाभासतापाधिमत्त्वं त्रितयसाधारणं
लक्षणं द्रष्टव्यमिति साधु पश्यामः। नचैवं विरुद्धस्याप्यत्रैवांतर्भावे विभागव्याघातः। उपधेयसं १५२
करेप्युपाधेरसंकरात्। अन्यथा तस्याऽसिद्धांतर्भूतत्वेनोक्तदोषापत्तिः। केचित्तु साध्यव्याप्यत्वे
नाप्रमीयमाणत्वे सति बाधासिद्ध्यतिरिक्तहेत्वाभासताप्रयोजकधर्मयोगित्वं त्रितयसाधार
णं लक्षणं बोद्धव्यं। असाधारणं च न सत्प्रतिपक्षी न्यूनदूषणं· तदंतर्भूतत्वप्रसंगात्। दूषकताबीज
स्यैकत्वात्। तथा च सद्धेतावसाधारणे नाव्याप्तिरिति वदंति। तन्न। तेनासाधारणस्य साध्यतदभा
वनिरूपितव्यतिरेकव्याप्तिद्वयग्रहपुरस्कारेण साध्यतदभावाव्यापकतया दूषणत्वपक्षे नाव्याप्ति

रित्यर्थः। प्रथमलक्षणेऽनुतन्मतेन तस्मिन्न व्याप्तिरेव· तत्र संशयविरोधीभूतव्याप्तिग्रहविरुद्धदशा विशे
षस्यैव सपक्षव्यावृत्तत्वस्योभयकोट्युपस्थापकतावच्छेदकत्वेन संग्राह्यत्वादिति भाव इति केचित्।
नचैवमिति। यद्यपि बाधस्य साध्याभाव रूपत्वं ननु तद्व्यापकत्वं तथापि प्रमितसाध्याभाववत्पक्षक
त्वरूपस्य बाधस्य ग्रंथकृदभिमततया तस्य लिंगततया तत्साध्याभावज्ञापकत्वादिति भावः। इदं
वोपलक्षणं विरुद्धस्य साध्याभावज्ञापकत्वेन तदंतर्भावापत्तिरित्यपि द्रष्टव्यं। ननु तयोरपि संग्राह्य
त्वान्न दोष इत्यनुशयेनाह· संयोगादिति। अत एवेति। अन्योन्याभावस्याप्यव्याप्यवृत्तित्वादुक्ताति
व्याप्तेरेवेत्यर्थः। यद्वाऽनुपसंहार्यपि तिव्याप्तेरेवेत्यर्थः। अत एवाग्रे तद्भाववत्तं लक्षणमाह· नापी
ति। निश्चितसाध्यवद्वृत्तित्वे सति साध्यवदन्यवृत्तित्वमित्यर्थः। ननु निश्चितसाध्यवदन्यवृत्तित्वं ता
दृशापक्षवृत्तित्वेन धूमादावतिव्याप्त्यापत्तेरिति। अमुकेन साध्यवदन्यस्मिन्नयं केनु रित्यत्राद्धाव्य
२

तद्वत्यर्थः। नापीति। पूर्वं विपक्षत्वमन्योन्याभावगर्भः अग्रेऽत्यंताभावगर्भमुक्तमिति न पौनरुक्त्यं
सपक्षपदं वात्र निश्चयाघटितमतो वा न पौनरुक्त्यं। न वा व्यर्थविशेषणतेति। पक्षान्यपदव्यर्थता
नेत्यर्थः। सर्वेति। यत्किंचित्साध्यवदन्यवृत्तित्वं धूमादावपीत्यत उक्तं सर्वेति साध्यवद्विशेषणं
153 न तु साध्यविशेषणं तद्वतोऽप्रसिद्धेः। सामान्याभावस्याविवक्षायामिदं तद्विवक्षायां तु व्यर्थवि
शेषणत्वमेव द्रष्टव्यं। एकव्यक्तिकेति। एकव्यक्तिराश्रयरूपा यस्य साध्यस्य तदेकवृत्तिकं सा १५३
ध्यं तथा चानेकवादिसर्वपदार्थासंभवस्तत्रेत्यर्थः। विपक्षवृत्तित्वमिति। ननु विपक्षत्वं निश्चितसा
ध्याभाववत्त्वं साध्याभाववत्त्वं वा नाद्यः। असाधारणतावदनित्यदोषतापत्तेः। न द्वितीयः। तन्निश्च
यत्वेन प्रतिबंधकत्वे संदिग्धानैकान्तिकोच्छेदापत्तेः। तज्ज्ञानत्वेन प्रतिबंधकत्वे च पक्षीयव्यभिचार
संशयस्यापि तत्त्वेनानुमितिमात्रोच्छेदप्रसंगात्। न च साध्याभावांशनिश्चयीभूततज्ज्ञानत्वेन

प्रतिबंधकत्वमितिवाच्यं। साध्यांशानिश्चयीभूततज्ज्ञानत्वेन प्रतिबंधकत्वेऽसाधारण्यास्यापि नित्य
दोषतापत्तेः। अपि च श्यामोऽयं मित्रातनयत्वादित्यत्र पक्षातिरिक्तमित्रातनये सर्वत्र श्यामत्वनि
श्चयदशायां शाकपाकजत्वेनोपाधिनयासंदिग्धेन व्यभिचारसंदेहोत्पादनं पक्ष एव कर्त्तव्यं·
अन्यत्र विशेषदर्शनात्· तथा च साध्याभावांशानिश्चयीभूतत्वाभावाद्व्यभिचारसंदेहस्तत्र प्रति
बंधकोन स्यात् न चैवमेवेति वाच्यं। तत्रोपाधिसंदेहानुद्भावनप्रसंगात्। अप्रसिद्धांताद्वक्षिति
र्द्धिकर्तृकार्यत्वादित्यादावप्रयोजकत्वाहित साध्याभावांशासंशयीभूतपक्षीयव्यभिचारसंदे
हप्रतिबंधकत्वस्य सर्वसिद्धत्वाच्च। किं च साध्याभावप्रतियोगिवैयधिकरण्याप्रवेशेऽयमेतद्
कपिसंयोगी एतत्वादित्यत्र सद्धेतावतिव्याप्तिः। तत्प्रवेशे च साध्याधिकरणाभिन्नाधिकरणावृत्ति
साध्याभावसामानाधिकरण्यमिति फलितार्थः। तथा च साध्याधिकरणाभिन्नाधिकरणावृत्तित्व

ज्ञानमेवप्रतिबंधकमस्तु लाघवात्। किंच साध्यवदन्यवृत्तित्वज्ञानस्यावश्यंप्रतिबंधत्वादत्रान्तर्भू
तत्वादाधिक्यं। एवंच साध्यनिष्ठहेतुसामानाधिकरण्यात्यंताभावप्रतियोगित्वज्ञानस्य हेतुनि
ष्ठसाध्यवन्मात्रवृत्तिभिन्नत्वज्ञानस्य हेतुनिष्ठसाध्यसंबंधाभावसामानाधिकरण्यज्ञानस्य साध्य
154 वन्निष्ठहेतुसमानाधिकरण्यान्योन्याभावप्रतियोगित्वज्ञानादेश्च प्रतिबंधकत्वादाधिक्यं। मेवं
विपक्षत्वं हि साध्याभाववत्त्वमेव न तु निश्चयमभिमतानानित्यदोषता। तद्वृत्तित्वनिश्चयः सर्वदानु १५४
मितिप्रतिबंधकः। यन्निश्चीयमानमनुमितिप्रतिबंधकं भवत्येव तस्यैव नित्यदोषत्वं अनुसाधा
रणो तु शब्दत्वादौ पक्षे साध्यसंशयदशायां सपक्षविपक्षव्यावृत्तत्वनिश्चयो घटाद्यनित्यव्योमा
दिनिश्चयपर्यवसन्न एव प्रतिबंधकः। पक्षे साध्यनिश्चयदशायां घटादिव्योमादिव्यावृत्तत्वनि
श्चयो विद्यमानोप्यकिंचित्कर एव। तद्घटितत्वेन प्रतिबंधकत्वं तस्य किंतु सकलसपक्षविपक्षव्या

वृत्तत्वनिश्चयत्वेनतथात्वतदापक्षस्यापिसपक्षत्वेनतन्निश्चयस्तत्रनास्तीतिनप्रतिबंधकत्वमि
तितस्यानित्यदोषताप्रतिबंधकताव्यभिचारज्ञानत्वेनैव॰नचानुमितिमात्रोच्छेदः।तर्कविशेष
दर्शनादिनासंशयोच्छेदेऽनुमानप्रवृत्तेः।यद्वाहेतुमत्तयानिश्चितेउपाधिसंदेहाधीनाहितोयोव्य
भिचारसंशयस्तदतिरिक्तव्यभिचारज्ञानत्वेनप्रतिबंधकत्वं।वस्तुतस्तुव्यभिचारनिश्चयतत्संशय
योरेकंनप्रतिबंधकतावच्छेदकंतन्निश्चयस्याव्यभिचाररूपग्राह्याभावनिश्चयत्वेनैवप्रतिबंधकत्व।
त॰तन्निश्चयस्यतेनरूपेणान्यत्रैवप्रतिबंधकत्वकल्पनात्।ग्राह्यसंशयस्यचान्यत्राप्रतिबंध
कत्वात्पुनरन्यगत्यातादृशस्यापितस्यव्यभिचारसंशयत्वेनैवप्रतिबंधकत्वंकल्प्यते।नचप
क्षीयव्यभिचारसंदेहेतथाप्यतिप्रसंगइतिवाच्यं।प्रतिबंधकताननुगमस्यादोषतयाफलबलेन
तत्तत्संदेहत्वेनैवप्रतिबंधकताकल्पनात्।निश्चितहेतुमतिउपाधिसंदेहाधीनाहितसाध्यव्यभि

155 वारसंशयातिरिक्तव्यभिचारसंशयप्रत्वेनैववेतिन किंचिदनुपपन्नं। अत एव व्यभिचारसंशयत्वेनै
वतदुद्भावनमपीति। साध्याभाववत्प्रतियोगिवैयधिकरण्यं देयमेव न च गौरवं तज्ज्ञाने हेतौ
साध्याधिकरणभिन्नाधिकरणवृत्तित्वाभावभासनात्। विरोधिविषयतया गुरुविषयकस्या
पितस्य प्रतिबंधकत्वात्। न च साध्यवदन्यवृत्तित्वादिज्ञानानामपि प्रतिबंधकत्वादाधिक्यं। अत्यं
ताभावगर्भव्याप्तिपक्षे अन्योन्याभावगर्भव्यभिचारज्ञानस्याप्रतिबंधकत्वात्। अन्योन्याभाव
गर्भव्याप्तिपक्षे च तद्गर्भव्यभिचारज्ञानस्याप्रतिबंधकत्वात्। प्रतिबंधकत्वे वा व्यभिचारज्ञानप्रतिबंध
कज्ञानविषयतावच्छेदकत्वेन व्याप्तिज्ञानकारणीभूतसहचारग्रहसहकार्यभावप्रतियोगिज्ञा
नविषयतावच्छेदकरूपवत्त्वेन वा सर्वेषामेकीकृत्य साधारणत्वेन विभजनात्। साध्यसंबंधस्यापि
ग्राह्यतया तत्संबंधाभावसामानाधिकरण्यस्यावश्यं विरोधितया तत्संग्रहार्थमुक्तोपाधेरवश्य

१५५

मनुसरणीयत्वात्। विरुद्धस्यापि साधारणत्वेन संग्राह्यत्वेऽप्युक्तोपाधिमत्त्वमेव तत्संग्राहकं। त
दसंग्राह्यत्वे सपक्षगामित्वसहकृतत्वे तदुपाधिमत्त्वमेव तदिति सर्व्वमवदातं। तत्त्वाज्ञाने इति। यद्य
पि तत्त्वेन ज्ञानदशायामपि साधारणत्वमस्त्येव तस्य नित्यदोषत्वात् तथापि तदा तन्नोद्भाव्यते
किंतु विरुद्धत्वमेवेति भावः। एतत्संग्राहकं च सामान्यलक्षणं प्रागेव दर्शितमिति विशेषलक्ष
णासंगृहीतस्य सामान्यलक्षणेनासंग्रहो न दोषः। यदा तु दुष्टोपाधिमात्रस्यैवासांकर्यं तदा
दोषशंकापि नास्तीति। सर्वनिश्चितसाध्यवदिति। अत्र सर्वेतिनिश्चितसाध्यवद्विपक्षयोरुभयो
रपि विशेषणं तेन सद्धेतुधूमादिविरुद्धयोर्नेति व्याप्तिः। ननु शब्दे यदाऽनित्यत्वनिश्चयो नास्ति
शब्दत्वे चाप्तवाक्यादेरनित्यत्वप्रतियोगिकव्यतिरेकव्याप्तिग्रहः तदा तत्राति व्याप्तिरिति चेत्
न। संशयविरोधिविशेषदर्शनविरहकालीनस्य सर्वसपक्षविपक्षव्यावृत्तत्वस्य विवक्षितत्वात्।

हेत्वाभासत्वेनविशेषणेनान्तत्रातिव्याप्तिरितितुनवाच्यं।पक्षांतरेशब्दत्वस्यस्वरूपासिद्धतया
हेत्वाभासत्वेनदोषतादवस्थ्यात्।शब्दत्वानित्यत्वेति।तथाचतदासपक्षव्यावृत्तत्वमपिनास्त्य
156 तोपिनातिव्याप्तिरितिभावः।अन्यथेति।संदिग्धसाध्यधर्म्मीपक्षइतिमतमालंब्येदमुक्तं।व्या
प्तिग्राहकेति।नन्वेवंव्याप्तिग्राहकसहचारग्रहविघटकतयास्वतोऽदूषकत्वादुपाधिर्वद्धेत्वा
भासत्वंनस्यादितिचेत्नन पूर्वपक्षिणस्तस्येष्टत्वादितिभावः।तदुपजीव्यमिति।सपक्षव्यावृत्त १५६
त्वेनैवोदाहरणाभावात्।अन्यथोदाहरणमपिकुर्यादेवेत्यर्थः।असाधारणमिति।अप्रतिभादि
नाउदाहरणप्रयोगासंभवादितिभावः।व्यतिरेकिप्रयोगसंपूर्णइतिशेषः।तथाचतत्रन्यूनत्वा
भावादिदमेवोद्भाव्यमितिभावः।अकिंचित्करत्वादिति।तत्रसहचारज्ञानविघटनद्वारापिव्याप्ति
ग्रहाप्रतिबंधकत्वादितिभावः।स्वार्थानुमानइति।तथाचोभयव्यावृत्तत्वेस्यकुत्रापिनदूषकत्व

मितिभावः। अर्थात्‌ अर्थापत्तितः। इति परमते। व्यतिरेकितयेति स्वमते। साध्यतदभावोपस्थापकतयेति साध्यतदभावानुमित्यनुकूलव्यतिरेकव्याप्तिद्वयसहितपक्षधर्मताज्ञानविषयेत्यर्थः। नचैवं सत्प्रतिपक्षेऽसाधारणोद्भावनं नक्वापि स्यात्‌। एतेनापि सत्प्रतिपक्षितत्वस्यैव करणादिति वाच्यं तत्र तदनुद्भावनस्यैवेष्टत्वादिति सांप्रदायिकाः। अत्र वदंति। यो नित्यत्वाभाववान्‌ स शब्दत्वाभाववानिति व्यतिरेकव्याप्तिग्रहे शब्दत्वाभावरूपव्यापकाभावरूपस्य शब्दत्वस्य शब्दे निश्चयः। नित्यत्वाभावरूपस्य तु व्याप्यस्य तत्र संशय इति संदिग्धानैकांतिकस्य प्रतिबंधकत्वान्न व्याप्तिग्रहः प्रतिबंधकत्वादिति न सत्प्रतिपक्षः। न चानुमानमात्रोच्छेदकतया पक्षीयो व्यभिचारसंशयो न दोष इति वाच्यं तावता व्याप्यवत्तया निश्चिते व्यापकसंशयस्यैवादोषत्वात्‌ व्यापकाभाववत्तया निश्चिते तु व्याप्यसंशयस्य प्रतिबंधकत्वेन कस्यापि विप्रतिपत्तिः। नचैवं व्यतिरेकिमात्रविलयापत्तिः। स

१३

वेत्रव्यापकहेत्वभावाभावरूपहेतुमत्तयानिश्चितेपक्षेसाध्याभावरूपव्याप्यसंशयेनसंदिग्धंनैकां
तिकत्वादितिवाच्यं।यत्रतर्कादिनापक्षीयसाध्यसंदेहव्युदासस्तत्रैवतत्संभवात्।यन्मतेव्यतिरेकि
157 ण्यप्रसिद्धमेवसाध्यंसिद्ध्यतितन्मतेनवानत्संभवात्।नचात्रापिपरस्परविरुद्धत्वादृशातर्कावतारः
संभवति।एककोटिकतर्कावतारकालेविशेषदर्शनादसाधारण्यगंधोपिनास्तिकुतोव्यतिरेकव्या
प्तिग्रहपुरस्कारेणसत्प्रतिपक्षत्वं।अतएवपक्षतादशायांसाध्यतदभावानिश्चयेनतस्यदोष १५७
त्वमित्यनंतरमेवोक्तवान्ग्रंथकारः।किंचैवंदूषकताबीजभेदस्यहेत्वाभासभेदप्रयोजकत्वा
दत्रचतदभावात्सत्प्रतिपक्षेभेदोनस्यात्।हेतुभेदाभेदमात्रस्याप्रयोजकत्वात्।तावतासत्प्रति
पक्षविशेषत्वापत्तेश्च।नचोभयपरामर्शविषयतापन्नप्रतिसाधनंसत्प्रतिपक्षः।सपक्षविपक्षव्या
वृत्तत्वेचज्ञायमानंतद्भिन्नमेवप्रतिबंधकं।तज्ज्ञानस्यव्यतिरेकोभयसहचारग्रहरूपतयाविरोधि

परामर्शाव्याप्यकत्वादितिवाच्यं।एवं व्यभिचारोव्यापकोपाधिवत्परमुखनिरीक्षकतयाहेत्वाभास
तैवनस्यात्।क्वांतभाववद्भिर्भाविचिंता।।किंवात्रनियमतःसाध्यव्यापकाभावप्रतियोगित्वग्रहेविरु
द्धत्वांतर्भावापत्तिः।अपिवत्तिमतोधर्मस्यान्यतरवृत्तित्वनियमेनोभयव्याप्तत्वरूपमुभयव्या
प्यत्वमेकत्रगृहीतुमशक्यमेववृत्तिमत्वेनान्यतराधिकरणावृत्तित्वनिश्चयेनोभयाधिकरणावृ
त्तेः।सपक्षविपक्षव्यावृत्तत्वस्यवज्ञानेमेकत्रैकदानविरुद्धः।तृतीयकोटेःपक्षस्यापिसत्वेनवि
रोधाभावात्।विरुद्धोभयव्याप्तिग्रहस्यपक्षांतर्भावेनविरोधस्यावश्यकत्वात्।सत्प्रतिपक्षेवासा
धारण्यंनाद्भूयेतसत्प्रतिपक्षांतरवत्।नचेष्टापत्तिः।कथकसंप्रदायविरोधात्।तस्मादुभयव्याप्
तत्वग्रहस्योभयव्याप्तिग्रहसामग्रीत्वेनसत्प्रतिपक्षवदुभयव्याप्तिग्रहप्रतिबंधकतयास्यदोषत्वं।
विरोध्यनुमितिसामग्र्याइवविरोधिव्याप्तिधीसामग्र्याअपिप्रतिबंधकत्वादिति।अत्रब्रूमः।सत्प्रतिप

स्वरूपतयैवास्यप्रतिबंधकत्वं-नचपक्षीयव्यभिचारसंशयान्तव्याप्तिग्रहइतिवाच्यं।व्यतिरेकिदृविलया
पत्तेः।नचतर्कादिनासंशयव्युदासेतत्संभवइतिवाच्यं।एवंहिनिश्चितहेतुमतिपक्षेसाध्यसंदेहेन
158 व्यभिचारसंदेहोपिप्रतिबंधकःस्यात्।नचानुमानमात्रोच्छेदः।तर्कादिनातन्निवृत्तौतत्संभवात्
नचैवमेवेतिवाच्यंअप्रसिद्धांतात् अतएवपृथिवीत्वेनतेभवतएवेतिग्रंथेनपक्षतासंपत्त्येघटादौ
तत्संशयःप्रागुपपादितः।तस्मात्प्रतिबंधकत्वंफलबलकल्प्यं।तथाचान्वयिनिव्याप्तिनिश्च १५८
येपक्षीयव्यापकसंशयोव्यतिरेकिणिचव्यापकाभावनिश्चयेपक्षीयव्याप्यसंशयोनदोषइ
तिफलबलात्कल्प्यते।नचसत्प्रतिपक्षाभेदः।हेतुभेदाभेदस्यैवतद्भेदहेतुत्वात्।नचैतावताविशेष
णात्तद्विशेषणात्तद्विशेषत्वमेवेतिवाच्यं।स्वतंत्रेच्छायानियोगपर्यनुयोगानर्हत्वात्।अन्यथासा
क्षात्प्रतिबंधकत्वेनबाधप्रतिरोधयोरप्येकत्वापत्तेः।वस्तुतस्तुसत्प्रतिपक्षेउभयपक्षधर्मताविषय

त्वेन परामर्शप्रतिबंधकत्वं। अन्यथान्यतरहेतोः स्वरूपसिद्धत्वग्रहेपि सत्प्रतिपक्षापत्तेः। अत्र चैकप
क्षधर्मताविषयत्वेनैवेति न तदंशे तदभावशंकापि। तदिदमुक्तं दीधितौ तथेति। यत्तु परमुखनिरीक्षकतयो
पाधिवदुभयव्यावृत्तत्वं न दोष इति तथैव तन्न। साध्यतदभावव्यापकाभावप्रतियोगित्वसहित
पक्षधर्मताज्ञानमात्रस्यात्र प्रतिबंधकतया तद्विषयीभूतस्यैव हेत्वाभासत्वात्। तत्त्वस्यैतल्लक्षणाख्य
क्र। अत एवैक्यानुकूलतर्कावतारेपि नातिप्रसंगः। न च सिद्धांतभावः। साध्यव्यापकाभावप्रतियोगित्व
ज्ञानस्य विरोध्यविषयतया तत्र प्रतिबंधकत्वानभ्युपगमादिति वक्ष्यते। न च शब्दत्वादेर्वृत्तिमत्त्वग्रहे
सति तदभावस्य न साध्यतदभावव्यापकत्वग्रह इति वाच्यं। न हि सकलव्याप्याधिकरणो व्यापकसंबंधो
व्यापकत्वं येन साध्यतदभावान्यतरवत्तिसकलाधिकरणे हेत्वभावसंबंधस्य ग्रहाद्धेतोर्वृत्तिमत्त्वेन ग्र
हे तत् किंतु व्याप्यवन्निष्ठात्यंताभावाप्रतियोगित्वं। तथा च नित्यत्वानित्यत्ववन्निष्ठात्यंताभावाप्रतियो

गीशब्दत्वाभावइतिज्ञानंनशब्दत्वभावव्याप्तिमत्त्वग्रहेप्रतिबंधकं॰ग्राह्याभावासंस्पर्शात्।अतएवहेतु
व्याप्तिमत्त्वज्ञानमपिनतज्ज्ञानप्रतिबंधकं॰अन्यथाबाधस्यापिप्रतिबंधकतापत्तेः।साध्यव्याप्यवत्तयानि
श्चितेपक्षेव्यापकसंबंधस्यावश्यकतयातदभावावगाहिबाधज्ञानस्यानुदयात्।तस्माद्यथाव्याप्यव
त्तयानिश्चितेपक्षेबाधरूपव्यापकाभावनिश्चय॰तथाव्याप्यीभूतनित्यत्वानित्यत्वान्यतरवत्तया
159 निश्चितेपिपक्षेव्यापकीभूतशब्दत्वाभावाभावरूपस्यशब्दस्यनिश्चयइतिनकिंचिदनंनुपपन्नं।य १५८
दिचभिन्नप्रकारकत्वान्नतस्यप्रतिबंधकत्वंतदाप्रकृतेपितुल्यं।सत्प्रतिपक्षेचैतदुद्भावनमनिष्ट
मेव।नचैवंकथकसंप्रदायविरोधः।तस्यसंदिग्धत्वात्।यद्वोक्तं।तस्मादुभयव्यावृत्तत्वग्रहस्येत्या
दि।तदपिचिंत्यं।सपक्षविपक्षव्यावृत्तत्वादिज्ञानकालेपिशब्दादिनाव्याप्तिग्रहादनुमित्युत्पत्तेर
नुभवसिद्धत्वात्किंचोभयव्यावृत्तत्वग्रहस्योभयसहचारग्रहमात्रतयानोभयव्याप्तिग्रहसाम

ग्रीत्वंयेनविरोधिसामग्रीत्वेनप्रतिबंधकत्वंस्यात्। किंतुअनुकूलतर्कादिसहितस्यतथात्वं॰अतए
वैकत्रानुकूलतर्कावतारेनासाधारण्यंनहितरसामग्रीसमवहितस्यापियज्ज्ञानस्यविरोधिसाम
ग्रीत्वेनअनुमितिप्रतिबंधकत्वंतस्यापिहेत्वाभासत्वमभिमतं। तथासतीतरसामग्रीसमवहिता
पाधिज्ञानस्यव्यभिचारज्ञानसामग्रीत्वेनप्रतिबंधकतयातस्यहेत्वाभासतापत्तेः। तज्ज्ञानंग्राह्या
भावानवगाहीतिनप्रतिबंधकमितियदितदेतदत्रापितुल्यं। विरोधिसामग्रीत्वेनचतत्त्वमुभय
त्रापीतिबाधसामग्रीत्वेनाधिकबलोपस्थितेरपिप्रतिबंधकत्वात्तद्विषयस्यापिहेत्वाभासतात
तापत्तिश्च॰परसामग्रीत्वेनप्रतिबंधकस्यनस्वतोदूषकत्वमितियदितदेतदत्रापितुल्यं। किंचि
साध्यतदभावोधापकतयातदुभयसंशायकतयेत्यर्थः। तथाचतत्परतयैवापरोपिग्रंथोव्या
ख्येयइति। तन्न। पक्षेसाध्यतदभावसंशयस्यप्रागपिसत्वात्। किंच॰तत्संशयस्यग्राह्यःभावविं

षयतयाप्रतिबंधकत्वंहेतुत्वविषयतयाऽनैकांतिकसंशयत्वेनवा।नाद्यः।ग्राह्याभावसंशयस्य
प्रमाणापूर्वत्त्यप्रतिबंधकत्वात्।नांत्यः पक्षीयसंदिग्धानैकांतिकस्यानुमानमात्रोच्छेदकत्वेन
प्रतिबंधकत्वात्।नचसंदिग्धोपाध्याद्याहितव्यभिचारसंदेहवदसाधारण्यादितोऽपिसप्रतिबं
160 धकएवेतिवाच्यं।तथासतिपरमुखनिरीक्षकतयातद्वदेवहेत्वाभासतानुपपत्तेः।यत्तुसपक्ष
विपक्षव्यावृत्तत्वेसतिपक्षवृत्तित्वमसाधारण्यं।तज्ज्ञानंसाधारणसंशयसामग्रीत्वेनप्रतिबंधकं
यज्ज्ञानंयत्रप्रतिबंधकंतत्सामग्र्यपितत्रप्रतिबंधिकेतिव्याप्तेः।नचोपधावतिप्रसंगः।तत्रसा १६०
मग्रीत्वाभावादिति।तत्तुच्छं।तज्ज्ञानस्यकिंसामग्रीत्वंकिमितरनैरपेक्ष्येणसाधारणसंशय
जनकत्वंइतरकारणसहितस्यतज्जनकत्वंवा।नाद्यः।असंभवात्।नहिकोटिस्मरणविशेषादर्शि
नविनाकृतस्यतस्यतत्संशयजनकत्वंव्यभिचारेणतेषामन्यत्रापिसंशयाजनकत्वापत्तेः।नांत्यः।

उपाधावतिप्रसंगात्।नहीतरकारणासमवहितस्यापिउपाधिज्ञानस्यव्यभिचारज्ञानजनकत्वंत
थासतितस्यतदजनकत्वमेवस्यात्।तथाचोपाधिव्युत्पादनमप्यनर्थकंस्यात्।किंचोभयव्यावृत्तत्वे
सतिपक्षवृत्तित्वज्ञानंसाधारणप्रसंशयमपिपक्षएवजनयेत्।नतुपक्षातिरिक्तेतद्व्यावृत्तत्वेनैव
हेतोर्ज्ञानेनतत्रविशेषदर्शनात्।तथाचतादृशस्यपक्षीयव्यभिचारसंशयस्यैवनानुमितिप्रति
बंधकत्वं।क्वतत्सामग्रीत्वेनतज्ज्ञानस्य·तादृशसंशयस्यतत्पूर्वमपिसत्वेनतस्याप्रयोजकत्वाच्चे
तिसंक्षेपः।यद्यपिपरार्थानुमानेपिसाध्यतदभावव्यापकतयेवायंदोषस्तथापिपरंप्रतिविपक्षव्या
वृत्तत्वांशोनाद्भाव्यइत्याशयेनोक्तंस्वार्थानुमानइतिद्रष्टव्यं।ऊसाधारणोनान्वयिप्रयोगेन्यूनत्वा
द्युद्भावनमुचितंनत्वसाधारणस्येत्यतआह·व्यतिरेकीति।एवंचयद्यपिसाध्याभावप्रतियोगिकव्य
तिरेकव्याप्तेरेवसाध्याभावव्यापकत्वादुद्भावनमुचितंतथापिव्यभिचारज्ञापनायोपाधेरियतद्व्याप्ति

ज्ञापनार्थैव तत्र सर्वसपक्षव्यावृत्तत्वस्योद्भावनमिति भावः। साध्येति। व्यतिरेकव्याप्तिज्ञानद्वारा
साध्यतदभावोऽव्यापकत्वादित्यर्थः। व्यर्थत्वादिति। साध्याभावोऽव्यापनेऽनंगत्वादित्यर्थः। वस्तुगति
मुक्त्वा कथकसंप्रदायानुरोधादाह यद्वेति। लक्षणं त्विति। यद्यपि सर्वसपक्षव्यावृत्तेपि हेतौ यदाप्त
161 वाक्यादिना तदभावान्यतरप्रतियोगिकैकमात्रव्यतिरेकव्याप्तिग्रहः। यदा वा तदधीनसाध्यतदभा
वप्रतियोगिकव्यतिरेकव्याप्तिद्वयग्रहस्तदाऽतिव्याप्तिः। प्रथमस्य हेतुत्वाद्द्वितीयस्य च व्याप्तेरज्ञा १६१
नात्। अज्ञानरूपासिद्धिमात्रयोगितयाऽसाधारणत्वाभावात्। तथापि साध्यतदभावप्रतियो
गिकव्यतिरेकव्याप्तिद्वयवत्तया ज्ञायमानत्वमसाधारणस्य लक्षणमित्यत्र तात्पर्यं। असाधक
तासाधनं तु सत्प्रतिपक्ष इव साध्याभावानुमितिसामग्रीप्रतिरुद्धत्वादित्येवेति न तत्रापि वैयर्थ्य
शंकेति ध्येयं। व्यर्थेति। असाधकतानुमान इति शेषः। विरुद्ध इति। अज्ञाने कांतिक सामान्यलक्ष

णायोगः पूर्वंवदेव समाधेय इति ध्येयं। सिद्धासिद्धी इति। सपक्षविपक्षसिद्ध्यसिद्धी इत्यर्थः। अन्यथेति।
साध्यतदभाववद्वृत्तित्वाभावे व्यतिरेकिसाध्यकस्यानैकान्तिकतापि न स्यादुक्तानैकान्तिकसामा
न्यलक्षणायोगादिति भावः। व्याप्यत्वासिद्धमिति। अज्ञानरूपासिद्धमिति भावः। तथापि तत्पदं
प्रत्यङ्गावनानर्हमत आह अनुपाधिकमिति। अत्यशब्दस्य लक्षणाकत्वमाश्रित्याह साध्यप्रसिद्धावि
ति। नापीति। केवलान्वयिसाध्यके सङ्केतावति व्याप्तेराह सत्यन्तं। शेषस्तु साधारणातिव्याप्ति
वारणाय तदर्थश्च केवलान्वयिधर्मावच्छिन्नसाध्यसिद्धिविरोधिसंदेहविषयवृत्तित्वं साधारणाश्च
निश्चितसाध्याभाववद्वृत्तिरिति भावः। विप्रतिपन्नेति। साध्याभावाप्रसिद्धावपि अभिधेयत्वं घटनि
ष्ठात्यन्ताभावप्रतियोगि न वेति संभवात्। यदि वेति। सहचारग्रहात् पक्ष एव यत्र व्याप्तिग्रह इत्यर्थः।
तत्रैवेति। यत्र सङ्केतोपक्षप एव व्याप्तिग्रहस्तत्रैवेत्यर्थः। तत्र पक्षातिरिक्ते व्याप्तिग्रहाभावादिति भावः।

देशांतरमाह सर्वस्येति। सर्वमनित्यं प्रमेयत्वादित्यादावित्यर्थः। ननुपक्षातिरिक्तत्वपदं न विव
162 क्षितं किंतु व्याप्तिग्रहानुकूलाप्रतीतसहचारत्वमेवेति नोक्तदोषद्वयमित्यत आह असाधार
णेति। दूषकतायामिति। असाधकतायामित्यर्थः। नवेति। इदमसाधकमनैकांतिकत्वादि
त्यसाधकताप्रयोगेऽनुपसंहारित्वार्थविशेषणत्वशंकानास्तीति भावः। अर्थगत्येति॥
अनैकांतिकत्वमुभयकोट्युपस्थापकतावच्छेदकरूपवत्त्वं. तत्र साध्याभावकोट्युपस्थाप १६२
कतावच्छेदकरूपवत्त्वमात्रस्यैव गमकत्वे विशेषणवैयर्थ्यं तत्राप्यावश्यकमिति भावः।
त्वनुपसंहारित्वहेतौ पक्षीक्रियतेऽनैकांतिकत्वादिति हेतुवाक्येन योग्यताबलादुक्तरूपानु
पसंहारित्वरूप एवार्थोऽभिधेयः। तत्र व्यर्थविशेषणत्वं दुःपरिहरमेवेति। तन्न. तत्प्रकारको
पस्थितिं विना व्यर्थविशेषणत्वाभावात्। अन्यथा धूमवत्त्वस्यापि नीलधूमवत्तियोग्यता

वत्वान्नत्पत्त्वैवतदापत्तेः।अनैकांतिकत्वेनवसाधारणाद्यन्यतमत्वंविवक्षितंतत्रवव्यर्थाविशेष
णत्वमित्याहुः।केवलान्वयीति।सर्वमभिधेयंमेयत्वादित्यत्रेत्यर्थः।अत्रहेतुमाहसर्वस्येति।मात्रा
र्थस्यव्यवच्छेद्यस्यतत्राभावादितिभावः।यद्यपिव्यतिरेकिसाध्यकेऽनुपसंहारिणिअव्याप्तिर्भव
त्येव·तथापितस्यवस्तुतःसाधारणत्वात्तन्नलक्ष्यमित्यपरोब्रूयादित्तिनिःसंदिग्धामव्याप्तिंद
त्तवानितिभावः।क्वचिदनिव्याप्तेरितिपाठः।तत्रायमर्थः।ननुमात्रपदंकान्तर्याधिकंवाव्यवच्छेद
र्थकंवा·आद्ये·केवलान्वयीति।व्याप्यज्ञानस्यपुरुदोषत्वात्सद्धेतौतस्मिन्नतिव्याप्तिरित्यर्थः।अं
त्येत्वाह·सर्वस्येति।उपलक्षणंचैतत्।असाधारणादप्यतिव्याप्तिर्द्रष्टव्या।व्याप्तिग्रहानुकूलेपं
ति।व्याप्तिग्रहानुकूलोयएकधर्म्युपसंहारःतदभावोयत्रेत्यर्थः।पक्षेसहचारसंदेहसत्त्वादप्रती
नसहचारत्वमसंभवतीत्यतआहव्याप्तिग्रहानुकूलेति।तदनुकूलत्वंचसहचारनिश्चयत्वेनेत्यर्थः।

अन्यथातत्रापिव्याप्तिधीप्रसंगात्।ननुव्याप्तिग्रहानुकूलत्वंस्वव्याप्तिग्रहानुकूलत्वंतथाच
केवलव्यतिरेकिण्यपितादृशसाध्यसहचारानिश्चयास्तीत्यतिव्याप्तिरितिचेत्·न·व्यतिरे
163 कसहचारस्यापिस्वव्याप्तिग्रहानुकूलत्वात्व्यतिरेकसहचारेणान्वयव्याप्तिर्गृह्यतइतिम
ते·मतांतरेतुव्याप्तिपदमेवस्वसाध्यसिद्ध्यनुकूलव्याप्तिपरं·तथाचव्यतिरेकिणोतादृशीव्यति
रेकव्याप्तिरेवभवतीतितद्ग्रहानुकूलश्चव्यतिरेकसहचारस्तस्यचतत्रप्रतीतिरस्त्येवेतिनातिव्या १६३
प्तिरितिभावः।ननुअज्ञायमानतादृशायांसद्धेतावतिव्याप्तिः।नचहेत्वभिमतपदंहेत्वाभासप
दंहेत्वाभासपरं।जलह्रदादिपक्षेस्वरूपासिद्धतयाहेत्वाभासेतत्रैवाव्याप्तेः।नचसाध्यसहचारा
निश्चयविरोधिहेत्वाभासतोपाधिमत्त्वंविवक्षितमितिवाच्यं·विरुद्धेपिगतत्वादितिचेत्·न·स्वसाध्यसि
द्ध्यनुकूलव्याप्तिग्रहानुकूलसहचारत्वावच्छिन्ननिश्चयविरोधिहेत्वाभासतोपाधिमत्त्वस्यविवक्षित

त्वात्। विरुद्धस्य व्यतिरेकसहचारनिश्चयाविरोधित्वान्न तत्र। तिव्याप्तिरिति भावः। मनुपसंहारिरि।
तुप्रमेयमात्रएवसाध्यसंदेहान्नोभयसहचारनिश्चयइति· नचकेवलान्वयिसाध्यकेऽव्याप्तिस्तत्र
तत्र व्यतिरेकसहचाराभावादिति वाच्यं। तत्रान्वयव्याप्तिमात्रस्यैवस्वसाध्यसिद्ध्यनुकूलतयात
द्ग्रहानुकूलसहचारत्वेनान्वयसहचारमात्रस्यैवलाभादिति भावः। विरुद्धत्वाज्ञानइति। यद्यपि
विरुद्धत्वज्ञानदशायामपि उक्तलक्षणसत्वात्तदाप्यनुपसंहारित्वमस्त्येव तथापि तदा विरुद्ध
त्वमेवोद्भाव्यत इतादमुक्तं। एतच्चान्वयसहचारमात्रनिश्चयविरोधित्वेनानुपसंहारित्वमप्युपेन्या
क्तं। वस्तुतो व्यतिरेकसहचारनिश्चयस्य तत्र संभवन्नानुपसंहारित्वं तस्येति ध्येयं· ननु तादृशसह
चारग्रहाभावः कारणाभावत्वेन स्वरूपसन्नेव व्याप्तिग्रहप्रतिबंधक इत्यनुशयादाह केवलेति।
केवलान्वयिधर्मिव्यापकस्वसाध्यसिद्धिविरोधिसंदेहविषयकत्तित्वमित्यर्थः। तेन प्रमेयं त्व मत्रव

र्त्तेनवेत्तिसंदेहाधीनपक्षताकेवलान्वयिसाध्यकेऽनुपसंहारिणिनव्याप्तिः।अस्यापिसंश
164 यस्यस्वसाध्यसिद्धिविरोधित्वात्।नवाविशेषदर्शनकालेऽप्यनुमित्सयाऽप्यनुमितिसंभवात्तत्रैव
तिव्याप्तिः।तादृशसंशयाभावात्।नवाद्रव्यगुणकर्म्मसामान्यविशेषसमवायाभावाअनित्य
मेयत्वादित्यत्राऽव्याप्तिः।केवलान्वयिधर्म्मावच्छिन्नसंशयाभावेपितद्व्यापकसंशयसत्वात्।
अन्यथाऽनुपसंहारित्वानुपपत्तेः।नवसर्व्वोधूमवान्वह्निमान्धूमवत्वादित्यत्रसकलधूमाधिक १६४
रणावह्निसंशयदशायामनुपसंहारिण्यव्याप्तिः।व्यतिरेकसहचारनिश्चयाविरोधित्वेनानुप
संहारित्वाभावेनालक्ष्यत्वात्केवलव्यतिरेकिवत्।नन्वत्रज्ञानेसंशयस्योपलक्षणत्वात्स्वरूप
सत्तादृशसंशयाक्रान्तसकलपक्षयद्वृत्तित्वज्ञानंव्याप्तिज्ञानविरोधितयाऽनुमितिप्रतिबंधकंवाच्यं।
तथाचसहचारनिश्चयविरहस्यावश्यकत्वाद्व्याप्त्यग्रहादज्ञानरूपाऽसिद्धिरेवनतुहेत्वाभासः॥

नवपक्षेसाध्याभावसहचारज्ञानान्नतादृशसहचारनिश्चयपदइतिहेत्वाभासत्वमितिवाच्यं।तथासतिसाध्या
भावसहचारस्यैवसाधारणत्वात्तत्रैवांतर्भावापत्तेः।नचतन्निश्चयोनास्त्येवनतत्संशयस्यपक्षीयानानु
मितिविरोधीअनुमितिमात्रोच्छेदकत्वादितिवाच्यं।अतएवनहेत्वाभासः।ज्ञायमानप्रतिबंधकोपाध्यला
भात्।नचतस्यैवसाध्याभावसहचारसंशयस्यव्यभिचारसंदेहत्वेनानुमित्यप्रतिबंधकत्वेपिविश्वगोच
रसंदेहविषयसाध्याभावसामानाधिकरण्यज्ञानत्वेनप्रतिबंधकत्वंकल्प्यतामितिवाच्यं।सहचारनिश्च
याभावेनैवव्याप्त्यप्रतीतौतेनरूपेणप्रतिबंधकत्वाकल्पनात्।कल्पनेवाकेवलान्वयिसाध्यका
संग्रहस्यतथाप्यापत्तेः।तत्रसाध्याभावाप्रसिद्धेः।नचतस्याऽलक्ष्यत्वमेवेतिवाच्यं।अव्यवहिताग्रि
मग्रंथविरोधात्।तज्ज्ञानस्यप्रतिबंधकत्वेपिसाधारणविलक्षणप्रतिबंधकतावच्छेदकानुपन्यासा
त्।अन्यथातादृशसंशयस्यसाध्याभावज्ञानत्वेनापिप्रतिबंधकत्वकल्पनेहेत्वाभासाधिक्यापत्तिः।।

पद्दिवोक्तदोषात् तर्कज्ञाने सत्यपि व्याप्तिज्ञानसत्त्वात्ततस्य तथात्वं तदाप्रकृतेपि तुल्यं। नच तादृश
संशयविषयवृत्तित्वमेव हेत्वाभासतोपाधिः। तर्कज्ञानस्य फलकरणविषयविरोध्यनवगाहित
याप्रतिबंधकत्वाभावात्। अत्र वदंति। केवलान्वयिधर्म्मव्यापकतादृशसंशयविषयमात्रवृत्ति
185 त्वमेवानुपसंहारित्वं। तर्कज्ञानं च हेतौ साध्यसामानाधिकरण्यसंशयसामग्रीत्वेन प्रतिबंधकं १६५
संशयसामग्र्यासामान्यत एव निश्चयप्रतिबंधकत्वकल्पनात्। तद्विशिष्टहेतुज्ञानस्य हेतौ सा
ध्यसामानाधिकरण्यसंशयजनकत्वमवर्जनीयमेव। हेतुमति सर्वत्र साध्याभावसंदेहेन हे
तौ साध्यसामानाधिकरण्यसंदेहस्यावित्यावर्जितत्वात्। अत एवास्यानित्यदोषत्वं। विशेष
दर्शिनेतस्य संशयसामग्रीत्वात् तं भावात्। न चोक्तक्रमेणात्र साध्याभावसंशय एव दोषत्वेन क
ल्प्यतामिति वाच्यं। क्वचिदप्यकल्पनात्। विशेषादर्शिने सत्येव तस्यैव व्याप्तिधीप्रतिबंधकद्वारा।

:संशयसामग्र्यास्तन्निश्चयप्रतिबंधकत्वंज्ञप्रमिति। अत्रेदंचिंत्यं। तज्ज्ञानसत्त्वेपिशंकाव्याप्तिग्र
हसंभवेनतस्यनव्याप्तिधीप्रतिबंधकद्वाराऽनुमितिप्रतिबंधकत्वं। साध्यसामानाधिकरण्यसंदेहस्ये
वयोग्यतासंशयपर्य्यवसन्नतयातत्राप्रतिबंधकतयातत्सामग्र्याःसुतरामप्रतिबंधकत्वात्। नन्वे
वंव्यभिचारसंशयस्यापिशंकाव्याप्तिग्रहाप्रतिबंधकतयाव्यभिचारस्यापिहेत्वाभासत्वंनस्या
दितिचेत्। न। नहितत्संशयप्रतिबंधकत्वेनतस्यहेत्वाभासत्वेअपितुतन्निश्चयप्रतिबंधकत्वे
न। यन्निश्चयेऽवश्यमनुमितिप्रतिबंधस्तस्यैवहेत्वाभासत्वात्। अन्यथासाध्यव्यापकत्वस्यापि
तुतन्निश्चयप्रतिबंधकत्वेन। यन्निश्चयेऽवश्यमनुमितिःसाधनाव्यापकत्वसंशयविषयीभूतोपा
धिज्ञानस्योचित्यावर्ज्जितव्यभिचारसंदेहसामग्रीत्वेनप्रतिबंधकतयाऽउपाधेरपिहेत्वाभासांत
रतापत्तेः। नचज्ञानेनतस्यनव्यभिचारसंदेहसामग्रीत्वंतत्सत्त्वेकोटिस्मरणादिविरहेव्यभिचारसं

166

देहानुनुत्पादकत्वादिति वाच्यं· एवं हि तादृशसंशयविषयवृत्तिताज्ञानव्यापि न सामानाधिकरण्य
संशयसामग्रीत्वं तत्सत्त्वेपि सामानाधिकरण्याभावादिकोटिस्मरणविरहेण तत्संशयानुत्पादकत्वा
त्। न च साध्याभावेन साध्यासामानाधिकरण्योपस्थापनमिति वाच्यं। तत्र तस्यासामर्थ्यादिति। सा
ध्याभाववद्वृत्तित्वनिश्चयदशायामित्यर्थः। तदवगम इति। तन्निश्चय इत्यर्थः। तदवगम इति। तन्नि
श्चय इत्यर्थः। संकर एवेति। कालभेदेन तत्रोभयसमावेशादिदमुक्तं तदानुपसंहारित्वाभावेन १६६
संकराभावादिति भावः। व्याप्यत्वेति। इदं च व्यतिरेकसाध्यकानुपसंहारिणामभिप्रेत्य केवलान्व
यिसाध्यके तल्लांदभावादिति भावः। यद्वाऽज्ञानरूपासिद्धिमभिप्रेत्योक्तं अत एवानुपदमेवत
थाविभावयिष्यति अत एव वत ज्ञानेनोपजीव्यत्वमित्यपरितोषेणोद्भावनेवेत्युक्तं। अनुपदस्वी
कृतां व्याप्तिमाशंक्याह घटेति। इदं च साध्यानवगतसहचार इत्यादिलक्षणमभिप्रेत्य वस्तुतः सा

धारणोयमितिमंतव्यं संयोगादीति।संयोगविशेषसाधकइत्यर्थः।किंतुसाध्यासमानाधि
करणेति।साध्यवेयधिकरण्यवच्छेदकावच्छिन्नसाध्याभावव्याप्यइत्यर्थः।अन्यथेति।तत्राधिक
रणोद्देश्यव्याप्याभावान्नैवोपपत्तेरित्यर्थः।कस्यचिन्मतंनिरस्यतितिनवेति।अत्रव्यभिचारव्याद्त्तेनस्व
पेणानुमित्यप्रतिवंधकत्वात्तद्वदानुपपत्तिनादवस्थ्यमित्यपिद्रष्टव्यं।अस्फूर्त्तावद्भिनि।वस्तुतो
नैकांतिकसामान्यज्ञानंप्रतिवंधकमेवनविरोध्यविषयत्वात् किंतुविपक्षवृत्तित्वादिज्ञानमेव·
तथाचतद्दंतर्भाविस्थावश्यकइतिभावः।तथानुपन्यासादिति।नीलवह्निर्भावेनधूमवत्त्वानुपन्या
सादित्यर्थः।अन्यथेति।तथैवोपन्यासेतत्समभिव्याहृतस्यनीलस्यनिराकांक्षतया ऽनन्वय ऽपार्थ
कत्वापत्तिरित्यर्थः।साध्यानवगतेति।साध्याप्रमितसहचारइत्यर्थः।तेनगोत्वाश्वत्वयोः सहचार
भ्रमेपिनातिव्याप्तिः।विपक्षेति।साध्याभावसहचरितत्वमात्रविषयतयेवप्रतिवंधकत्वेविशिष्टवि

ध्यत्वेनाऽतथात्वात्तेन रूपेणाहेत्वाभासत्वमिति भावः। वह्निविरुद्धत्वभूमदशायां धूमेऽतिव्याप्ति
रित्यनुशायेनाह तत्पुमायकत्वं चेति। साध्याभावेति। साध्याभावव्याप्यत्वेनैव तत्पुमापकत्वं ग्राह्यं
तथा च तत्संबंधबुद्धिरावश्यकी अन्यथा तत्पुमापकत्वगुरुस्यापि विरोध्यविषयतयाऽप्रतिबंधकत्वा
पातादिति भावः। एतेन साध्याभावव्याप्यत्वे व्यर्थविशेषणत्वादिना दूषिते साध्यवदन्योन्याभाव
व्याप्यत्वं द्वितीयलक्षणमनूद्य दूषयति नापीति। साध्यव्यापकेति। नन्वेतस्य ज्ञानं न व्याप्तिधीप्रति ९६७
बंधकं हेत्वभावस्य हि साध्यव्यापकत्वं तद्वन्निष्ठात्यंताभावाप्रतियोगित्वं न चैतद्विषयकबुद्धौ सा
ध्यसामानाधिकरण्यादिविरोधी कोऽप्यर्थः स्फुरति ग्राह्याभावाऽस्फुरणात्। अतथाभूतस्य च ज्ञा
नस्याप्रतिबंधकत्वात्। अन्यथाऽतिप्रसंगादिति चेत्। न। सकलसाध्याधिकरणनिष्ठाभावप्रति
योगित्वस्य विवक्षितत्वात्। सर्वस्मिन्साध्याधिकरणे हेतुविरह इति ज्ञानं च हेतौ। साध्यसामानाधि

करण्यधीविरोध्येवसाध्याधिकरणेहेतोर्ग्राह्यतयातद्विरहस्यग्राह्यविरहरूपत्वात्।अत्रानेनहेतौ
भावपदंप्रतियोगिव्यधिकरणाभावपरं।तेनायंवृक्षोद्रव्यंएतत्कपिसंयोगवत्वादित्यत्रनातिव्या
प्तिः।अथायमाकाशवान्द्रव्यत्वादित्यत्रेदमव्यापकं।तत्रसाध्याधिकरणाप्रसिद्धेः।नचतदलस्य
मेवेतिवाच्यं।साध्यहेतुसामानाधिकरण्याभावग्रहस्यव्याप्तिधीप्रतिबंधकत्वेनतद्विषयस्यापिहे
त्वाभासताप्रयोजकतौचित्यात्·तस्यचतत्रसत्वात्।नचहेतुसामानाधिकरण्याभावएवसकल
विरुद्धव्यापकत्वाद्धेत्वाभासतोपाधिरस्त्वितिवाच्यं।अस्याप्याकाशादिरूपविरुद्धाव्यापकत्वात्·
साध्यसामानाधिकरण्याभावस्यदूषकतावीजस्यतत्रापिसंभवादितिचेत्·न·सर्वेषामेवाविरु
द्धोपाधित्वंविरोधित्वाविशेषणविनिगमकाभावात्।नचहेत्वाभासाधिक्यंसामानाधिकरण्येसा
ध्यहेतुप्रतियोगित्वधीविरोधिविषयत्वेनसर्वोपाधीनेकीकृत्यमहर्षिणाविभागकरणात्।अत्र

ववक्ष्यमाणांसाध्यवद्वृत्तित्वादिकमपिनाधिकंअतएवसाध्यवान्हेतुमानितिज्ञानस्यप्रतिबंधक
त्वात्सकलसाध्याधिकरणानिष्ठान्योन्याभावप्रतियोगितावच्छेदकत्वमपिहेतौहेत्वाभासताप्र
168 योजकमितिविभागन्यूनतेतिनिरस्तं।नज्ञानस्यसाध्यसामानाधिकरण्यग्रहविरोधित्वेऽक्तविभा
जकोपाध्याक्रांतत्वात्।तदविरोधित्वेव्याप्तिग्रहप्रतिबंधकत्वात्।अव्यभिचारसहचारयोर्ग्रहण
मविरुद्धतांव्याप्तिग्रहविरोधित्वात्।यत्तुसाध्यसामानाधिकरण्यधीविरोधित्वंविभाजकोपाधिरि १६९
तितन्न।अवृत्तिसाध्यकविरुद्धाव्यापकत्वादिति।नन्वेतदवृत्तिहेतौवृत्तिव्यापकं।नवदूषकतावी
जस्यसाम्यात्तस्यापिलक्ष्यत्वमेवेतिवाच्यं।तत्रोक्तविरुद्धत्वाग्रहेपिव्यतिरेकव्याप्तिग्रहाप्रतिबंध
कत्वादित्यस्वरसादाह।यद्वेति।तथाचवृत्तिमतःसकलसाध्याधिकरणानिष्ठात्यंताभावप्रतियोगि
त्वग्रहेनव्यतिरेकव्याप्तिग्रहइतिभावः।केचित्तुवृत्तिमतइत्यसंकीर्णस्यकथनाय।अन्यथाऽवृत्ते

सामान्यतो ज्ञाने पक्षावृत्तित्वस्यापि ज्ञाना । स्वरूपासिद्धिसंकीर्णतापत्तेः । दूषकता वीजं तु साध्य
वद्वृत्तिमात्रमेवेत्याहुः । साध्यवद्वृत्तित्वेति । साध्यवद्वृत्तित्वप्रतियोगिकाभावाधिकरणत्वमित्यर्थः
पूर्व्वास्वरसमवायिहृदिनिधायवृत्तिमत्त्वपरधर्म्मपदांतर्भावेन लक्षणद्वयांतरमाह साध्येत्यादि ।
अन्योन्याभावात्यंताभावगर्भतया लक्षणयोर्भेदो द्रष्टव्यः । वयं तु क्रमः । असाधारणोक्तन्याये
न वृत्तिमत्त्वघटितोक्तविरुद्धत्वग्रहस्यापि न व्यतिरेकव्याप्तिग्रहप्रतिवंधकत्वं · तस्मिन्सत्यपि शब्द
दिना तद्ग्रहे वाधकाभावात् तस्माद्व्यतिरेकसहचारेणान्वयव्याप्तिरेव गृह्यत तदभिमते विरुद्धस्य है
त्वाभासत्वं तत्र न वृत्तिमत्त्वांतर्भावः । तं विना प्यन्वयव्याप्तिग्रहप्रतिवंधकत्वसंभवात् । व्याप्यत्वा
सिद्धेरपि हेत्वाभासत्वं · न ह्वि व्यर्थविशेषणे नील धूमादौ तज्ज्ञानस्य व्यतिरेकव्याप्तिग्रहप्रतिवंधक
त्वसंभावनापि विषयविरोधाभावादिति । व्यतिरेकाप्रि व्याप्तिरिति । साध्यवदवृत्तित्वज्ञानस्य तत्रापि

संभवाद्धनुमितिप्रतिबंधापत्तिरित्यर्थः। वस्तुतस्त्वतिव्याप्तेरसंभवात्। अत एव तत्रज्ञाद्दृशज्ञानाभाव
मेवोपपादयति तत्रेति। व्यभिचारज्ञानेति। अव्यभिचारज्ञानेत्यर्थः। अयोग्यताज्ञानस्येति। अयोग्यता
169 द्धिपदार्थयोः संसर्गाभावप्रमेव सैव च प्रकृतेविरुद्धधीः। तथा च विरुद्धत्वज्ञानज्ञानमेवात्र यो
ग्यताधीः पर्यवस्यतीति तस्य विरुद्धत्वेज्ञानोपजीवकत्वमिति भावः। एवं वाधोपीति। अत्रयेवा
नुमाने वाधधीः सैव शाब्देऽयोग्यताधीरिति कथमनयोरुपजीव्योपजीवकभाव इति चिंत्यं। निर १६८
ग्निकत्वात्। अग्निसंबंधाभाववत्त्वादित्यर्थः। तेन धूमव्यापकवह्न्यभावस्तद्व्याप्यत्वं तत्संबं
धाभाव इति भावः। अभेदेपि व्याप्यव्यापकभाव इत्यभिप्रायेणाह वह्न्यभाव एव ताद्दृहेतुः। अत एव
वाग्रे व्यापकत्वमभेदेपीति वक्ष्यति। एतद्ज्ञानेपीति। अत्रेदं चिंत्यं। यदि प्रतिबंधकज्ञानविष
यतावच्छेदकत्वे विधेयतत्त्वे विधेयं तदा विधेयांतरमपि स्यादेव। पूर्वोक्तसाध्यवद्वृत्तित्यादिज्ञानाना।

मपिप्रतिबंधकत्वात्। यद्विषयकत्वारादिज्ञानविरोधित्वेन तेषामनुगमः। तद्देतेषामनुगमः। तद्देते
षामप्यनुगमान्नत्रैविध्यं। नवैतत्त्रितयं विरुद्धहेत्वाभासतोपाधिः। प्रथमोपाधिज्ञानस्यसाधारणे
त्वेनैवदोषत्वात् द्वितीयतृतीयोपाधिज्ञानस्यविरोध्यविषयत्वेनाप्रतिबंधकत्वात्। नहिधूमेसा
ध्ये वह्न्यभावव्याप्यत्वग्रहस्य हेतौ वह्निविरुद्धत्वग्रहस्य हेतौ वह्निविरुद्धत्वग्रहस्य वा विरोधित्वं।
किंतुधूमविरुद्धत्वग्रहस्यैव। जलाशयत्वादौ वह्निविरुद्धत्वग्रहकालेपि शब्दाभासादिना धूमव्या
प्यत्वग्रहसंभवात् न च पूर्वोक्त एव विरुद्धहेत्वाभासतोपाधिस्तस्यैव ग्रहणे प्रकारत्रयमिदमिति
वाच्यं। एतत्त्रितयप्रकाराभानेपि साध्यवदवृत्तित्वादिग्रहात्तज्ज्ञानेपि कदाचित्साध्यविरुद्धत्वा
ग्रहात्। एवं निषेधसाधनेपीति। ननु विरुद्धे बाधाद्यन्यतमज्ञानस्यावश्यकत्वात्। तस्यैवानुमि
तिप्रतिबंधकत्वेन नास्य हेत्वाभासांतरत्वमित्यत आह। अयं चेति। बाधादिपदं तत्तज्ज्ञानपरं। तथा च

विद्वाधादिज्ञानसांकर्य्यापिक्वचित्तदसंकीर्णासाध्यवद्धतित्वादिज्ञानस्यप्रतिबंधकत्वाभासत्वमि
तिभावः।यत्तुचतुर्विधाःपरमाणावोऽनित्यापार्थिवपरमाणुत्वादित्यत्रक्वचिद्विसंद्धस्यबाधितत्वा
170 दिसांकर्य्यमितिस्वरूपकथनमिति।तन्न।प्रकृतानुपयुक्तत्वात्।अन्यथाहेत्वाभासांतरेपिहेत्वा
भासांतरंविभावयेदिति।नापिव्याप्तिपक्षधर्मतयाज्ञानत्वमिति।व्याप्तिपक्षधर्मतावगाहिसमानज्ञा
नविषयमित्यर्थः।आरोपयितुमिति।यद्यपिभ्रमरूपानित्यत्वव्याप्यश्रावणत्वप्रसिद्धिःसंभवत्येवत १७०
थापिप्रमितमेवारोप्यतइतिमतमालंब्येदमुक्तं एकत्रेतिसत्प्रतिपक्षयोर्म्मध्ये एकत्रहेतावित्यर्थः
पक्षविशेष्यकपरामर्षाभिप्रायेणेदंबोध्यं।विशेषमात्ताबच्छेदकप्रकारकज्ञानस्यैवविशिष्टवैशिष्ट्या
वगाहिज्ञानजनकत्वमितिमतमालंब्येदमुक्तं।अन्यथाहेतुविशेष्यकपरामर्षेविशिष्टस्यानारो
प्यत्वेनतदप्रसिद्धेरदोषत्वात्।एकस्यद्वयमितिन्यायेनशब्देश्रावणत्ववैशिष्ट्यस्यश्रावणत्वव

नित्यत्ववैशिष्ट्यस्ययुगपदेवभावात्। पक्षविशेष्यकत्वेप्यदोषत्वाच्च। अत एव दूषणमिदमलग्नक
मिति सिद्धांतेनोद्धरिष्यति। अन्यथा लिंगाभासादनुमित्यलापत्तेरिति। यद्वैकत्राकाशादौ लिंगो
उभयाभावात्व्याप्तिपक्षधर्मतोभयाभावात् विशिष्टस्योभयस्य व्याप्तिपक्षधर्मतारूप
स्याप्रसिद्धेरित्यर्थः। विशेषणव्याप्तिभंगाभंगरूप इति। अनिर्द्धारिता वा य इति शेषः। ए
कत्र भंगनियमादिति। तथा चान्यतरत्वेन निर्द्धारणासंभवान्न सर्वथैवोभयोरनिर्द्धारितवि [illegible]
शेषत्वमित्यर्थः। साध्येति। अत्राधिकबलोपस्थितिश्च निर्णायकं न निकेवेति न समानबलेति नो
क्तदोषः। ननु तत्फलेति नोक्तदोषः। ननु तत्फलस्य बाधस्यैव तत्रानुमितिप्रतिबंधकत्वं न
त्वधिकबलोपस्थितेः। किंच यत एव दोषात्प्रतिबंधस्य हीनबलत्वं तत एव तत्रानुमितिप्रति
बंधकसंभवान्न तस्याप्यपि तत्प्रतिबंधकत्वमिति चेत्-न-बाधस्यानुमितिप्रतिबंधकतयातस्या।

मगृहीत्वेनाधिकवलोपस्थितोपि प्रतिवंधकत्वात्। यज्ज्ञानमित्यादिव्याप्तेः। अन्यथा वाधावतार
पूर्वसमये हीनवलेनापि लिंगेनानुमितिजननापत्तिः। न च तदानुल्यवलतया सत्प्रतिपक्षत्वमेवेति
वाच्यं। अन्यवहितोत्तरसमये ऽधिकवलेनापि वाधरूपानुमित्यजननापत्तेः। यदि च हीनवलत्वप्र
योजकं दोषांतरमपि ज्ञातं तदा तस्यापि प्रतिवंधकत्वमस्तु प्रत्येकमवच्छेदकसामर्थ्यात् विनिगमका
171 भावात्। अन्यथा हेत्वाभासद्वयावतारकालेप्युभयस्य प्रतिवंधकत्वं न स्यात्। दोषांतरज्ञानसंकी १७१
र्णाया एवास्याः सर्वत्र प्रतिवंधकत्वात्। तद्विषयस्य न हेत्वाभासतोपाधिमत्त्वं। अतथाभूतज्ञान
विषयस्यैव तथात्वात्। अत एव वाधस्य दोषांतरायप्रयास इति। धूमोयं न व्याप्तपक्षधर्म्मः पर्वतव
न्नित्वादित्यादौ यदा वाधावतारः तदा पर्वतवन्नित्वादौ लिंगेऽतिव्याप्तिः। वाधरूपोपस्थितेर्व्या
प्तिपक्षधर्म्मताविषयत्वेन वलोपस्थितितात्। स्वयं च निर्णायकरूपतया निर्णयाजनकत्वेन समा

नत्वाद्वेन्यत्राह· साध्यविरोध्युपस्थापनसमर्थत्वमुपस्थितौ विशेषणं। बाधरूपोपस्थितिस्तु सा
ध्यविरोध्युपस्थितिरेवनतुतज्ज्ञानिकेतितद्व्युदासः। नचवलयदस्यस्वविरोधिवलपरत्वादेवनाति
प्रसंगइतिवाच्यं· उक्तविशेषणादानेनतत्पर्यवसानात्। ननुकेवलमेववलपदंतत्परं। विशेषणावै
यर्थ्यापत्तेः। साध्यविरोध्युपस्थापनसमर्थत्वंसाध्यसिद्धिविरोध्युपस्थितिजनकत्वमतोनकेवला
न्वयिनिसत्प्रतिपक्षाऽव्याप्तिः। ननुयत्राऽनित्यत्वव्याप्यकृतकत्वनिश्चयस्सत्प्रतिपक्षात्मातत्रै
वयसमूहालंवनात्मकेनित्यत्वविरुद्धजन्यत्वजन्यत्वमपिभातं। तत्रनित्यत्वविरुद्धत्वेनज्ञायमाने
जन्यत्वेतिव्याप्तिः। नित्यत्वरूपसाध्यनित्यत्वोपस्थापनसमर्थनिर्णयाजनकत्वेनसमानपातयेव
वलोपस्थितत्वात्तस्यप्रतिरुद्धकार्यत्वात्। नचवलोपस्थितित्वेनप्रतिवंधकत्वंविवक्षितंदिरुद्धोपस्थि
तेश्चसहचारनिश्चयविरोधित्वेनतत्वमितिवाच्यं। एवंक्षिपर्वतत्वद्वन्नित्वादोहेत्वाभावत्तिप्रसंगाभावाद्धि

शेषणावैयर्थ्यमेव नहि तत्र वलोपस्थितित्वेन प्रतिवंधकत्वं किंतु ग्राह्याभावनिश्चयत्वेनेति वेत्र। नत्रा
कूः। वलोपस्थितित्वेनैव प्रतिवंधकत्वं विवक्षितं· एवंच सर्वाण्येव विशेषणान्यसंभववारकाणी
तिन तद्वैयर्थ्यं। तथाहि वलोपस्थितित्वेन प्रतिवंधकत्वमसंभवि· स्वकीयवलोपस्थितेरप्रतिवंधक
172 त्वादतः साध्यविरोधीत्युपस्थितो विशेषणं। केवलान्वयिसत्प्रतिपक्षसंग्रहानुरोधाच्च अनेनै
वरूपेण प्रतिवंधकत्वं नतु साध्याभावसाधकवलोपस्थितित्वेनेति न दोषतादवस्थ्यं। साध्यविरो १७२
ध्युपस्थितिस्वरूपयोग्यत्वस्य हीनवलोपस्थितावपि सत्वेन तत्त्वेन प्रतिवंधकतावच्छेदकमित्यसं
भवतादवस्थ्यं न तद्वारणार्थः समानपदं। समानत्वं च प्रतिवध्यापेक्षयेवलक्षणायवत्तयाऽनिश्चीय
माणत्वं। नचहीनायां वलोपस्थितौ तदस्ति। एवंच वाधतत्सामग्र्यादावतिव्याप्तिरेव नास्तीति तद्वा
रणाय न विशेषणमिति। अत्रेदं चिंत्यं। तादृशवलोपस्थितित्वमपि न प्रतिवंधकतावच्छेदकं। तथा

द्धि। यत्रोभयहेतुपरामर्षकाले ऽभयवाधावतारेणोभयस्यापि हीनवलत्वं। तत्र तदुपस्थितावत
तिपुसंगेन पुनरप्यसंभव एव। तस्यां पि पुतिवध्यापेसवेलक्षण्यवत्तया ऽनिर्द्धार्य्यमाणत्वेन स
मानत्वात्। न च तदा सत्पुतिपक्षत्वमिष्टमेवेति वाच्यं। अयसिद्धांतात्। वाधादेवानुमितिविंधसंभ
वात्। वाधितेनापि सत्पुतिपक्षे हेत्वाभासांतरेणापि तदापत्तेः किं वाधिकवलोपस्थितेरपि पुतिवं
धकत्वात् समानवलोपस्थितित्वं न पुतिवंधकतावच्छेदकं किं त्वन्यूनवलोपस्थितित्वमेव। न च स
मानपदेन तथैव विवक्षितमिति वाच्यं। हीनवले ऽतिव्याप्त्यापत्तेः। अनेनेव रूपेणाधिकवलोप
स्थित्या। पुतिरुद्धकार्य्यलिंगत्वात्तस्य। नन्वधिकवलोपस्थितेविरोधिसामग्रीत्वेनैव पुतिवंधक
त्वं न त्वनेन रूपेणेति चेत्। हंतैवं समानवलोपस्थितेरपि विरोधिसामग्रीत्वेनैव पुतिवंधकत्वमस्तु
परस्परविरुद्धार्थकशव्दस्थले तथा पुतिवंधकत्वकल्पनात्। तथा च सुतरामसंभवः। तेन रूपेणाध्व

विदपि प्रतिबंधकत्वाकल्पनात्। तस्माद्बलोपस्थितित्वेनाप्रतिबंधकत्वेपि यदुपस्थितेः प्रतिबंधक
त्वंव्याप्तिपक्षधर्म्मतारूपं बलं केनापि रूपेण विषयतयावच्छेदकं तदुपस्थित्या प्रतिरुद्धकार्य्यत्वं
विवक्षितं। तथाच पर्वतवह्नित्वादिलिंगप्रतिबंधकबलोपस्थितेर्ग्राह्याभावोपस्थितित्वेन प्रतिबंध
कत्वं व्याप्तिपक्षधर्म्मता विरुद्धस्य बलं तत्र ग्राह्यतया तदभावरूपस्य बलस्य ग्राह्याभावरूपतया त
दवच्छेदकत्वमित्यतिव्याप्तिः। तद्वारणाय साध्यविरोधीत्यादिविशेषणं। अनित्यत्वव्याप्यकृतक १७३
त्वनित्यत्वविरुद्धजन्यत्वनिश्चयरूपबलोपस्थितौ च समूहालंबनरूपायां विषयतया न बलं प्रति
बंधकतावच्छेदकं किंतु विरुद्धत्वमात्रेण तावतस्याः सद्धेतुधीप्रतिबंधद्वारा व्याप्तिधीप्रतिबंध
कत्वसंभवादिति। लिंगपदं च व्याप्तपक्षधर्म्मतया ज्ञातत्वपरं। तेनापि तादृशबलोपस्थित्या प्रति
रुद्धकार्य्ये लिंगे विरुद्धत्वेन ज्ञायमाने जन्यत्वादौ नातिप्रसंगः। अत एवात्ममनःप्रभृतौ विरुद्धे

व्यभिचारिणि। बलत्वेन ज्ञायमानेनातिव्याप्तिः। तदपि क्लृप्तादृशबलोपस्थित्याप्रतिपक्षरूपया
प्रतिबद्धकार्य्यं। तत्प्रतिबद्धायामनुमितौ लिंगवदात्मादेरपि कारणत्वात्। न च साध्यविरोधीत्य
त्र साध्यपदं स्वसाध्यपरमतः कथमलिंगे तत्रातिव्याप्तिरिति वाच्यं। साध्यं क्लृप्तव्याप्यलिंगस्यैवात्मा
देरानीति सर्वं सुस्थं। यत्तु समानबलोपस्थित्याप्रतिरुद्धकार्य्यत्वं लिंगत्वमेव लक्षणं। समानत्व
मेव केन रूपेण विवक्षितमित्यपेक्षायां। साध्यविरोध्युपस्थापनसमर्थत्वं विशेषणं। तथा च तेन
रूपेण समानया बलोपस्थित्या प्रतिरुद्धकार्य्यत्वं विवक्षितमिति। तन्न। अधिकबलोपस्थित्या प्र
तिरुद्धे हीनबलेऽतिव्याप्तेः। न च सा न समाना। किंत्वधिकेति वाच्यं। साध्यविरोध्युपस्थापनसमर्थ
त्वेन तस्या अपि समानार्थत्वात्। प्रकारांतरेण समानत्वविवक्षायां साध्येत्यादिविशेषणवैयर्थ्या
पत्तेः। ननु बलं सपक्षसत्वादिकं विवक्षासत्वादिकं विपक्षासत्वादिकं वा। आद्ये व्यतिरेक्यव्याप्तिः।

ग्रंत्यकेवलान्वयित्यव्याप्तिरित्यतआह॰वलंवेति।व्याप्तिश्चस्वसाध्यसिद्ध्यनुकूलाविवक्षितास
वच्छेदन्वयव्याप्तिः॰क्वचिद्व्यतिरेकव्याप्तिरितिभावः।विरोधीति।अत्राप्यधिकवलोपस्थित्य
प्रतिरुद्धकार्यलिंगेऽतिव्याप्तिवारणायविरोधिबाधकान्यतेति।गमकतौपयिकरूपविशेषणं।
बाधकत्वंचनस्वरूपयोग्यत्वं।किंतुफलोपहितत्वंतेनसत्प्रतिपक्षस्यापिविरोधिबाधस्वरूप
174 योग्यत्वेनतदन्यत्वासंभवान्नासंभवः।तदर्थोपिविरोधीयोबाधःतदुपहितान्यत्वमतोन १७४
केवलान्वयिसत्प्रतिपक्षेविरोधिनोबाधाप्रसिद्ध्याऽव्याप्तिः।गमकतौपयिकंवरूपंव्याप्तिपक्ष
धर्म्मते।अत्रापिव्याप्तिपक्षधर्म्मेति।अत्रापिव्याप्तिपक्षधर्म्मतयाज्ञानत्वपरंलिंगपदंबोध्यं।ते
ननपूर्वोक्तातिव्याप्तिः।यत्तुयन्मतेवह्न्यादिकमप्यनुमानेनसत्प्रतिपक्षितंभवति।तन्मतेतत्सा
धारणमपिलक्षणंभवत्विति।नात्रलिंगपदमुक्तमिति॰तन्न।तन्मतेहियथावह्न्यनुमानेनसत्प्र

तिपक्षितं तथा वह्नुषाप्यनुमानं सत्प्रतिपक्षितं वाच्यं । तच्च नोक्तलक्षणासंगृहीतं स्यात् । ज्ञाय
मानतया वह्नुषोऽप्रतिबंधकत्वात् । अग्रे वह्न्यादेश्चेत्यनेन ग्रंथकृतैव तन्मतस्य दूष्यत्वाच्च । एक
दा निरंतरयोर्वेति । सामग्र्यनियमात्क्वचित्कदाचिन्निरंतरयोर्वेति व्यवस्थितविकल्पः । न
वाग्निमपरामर्शकाले प्रथमपरामर्शेणानुमितिजननापत्तिः । विरोधिसामग्र्येव तदा प्रतिबं
धकत्वात् । अग्रिमपरामर्शस्य प्रतिबंधकतया तदभावस्य कार्यसहभूतस्यैव जनकत्वाभ्युप
गमेन तत्काले तदभावाच्च । स्वपरसाधारणत्वादिति । तथा वास्यापि दूषणासमर्थत्वाद्दोषात्
स्वदुद्भावनं परार्थानुमानेऽप्यविरुद्धमिति भावः । प्रतिरुद्धत्वेति । विरोध्युभयपरामर्शविषयीभू
तप्रतिसाधनज्ञानानंतरमित्यर्थः । प्रतिरुद्धत्वज्ञानस्य प्रतिरोधाहेतुत्वात् । उभयोरेकत्रेति । न
नु विरोधादुभयोरेकत्र निश्चय एव कुत इति चेन्न । हेत्वोर्विरोधापरिस्फूर्तौ साध्ययोश्च तत्प्रतिपत्तौ

स्मसामग्रीसमाजादुभयपरामर्षसंभवात्। नह्मिसाध्याविरोधएवहेतुविरोधः। उभयपरामर्षानं
तरंसाध्ययोर्विरोधप्रतिसंधानेवस्तुतत्प्रतिपक्षसंभवात्। किंचप्रत्यक्षरूपेपरामर्षेविरोधिव्याप्य
ग्रहेनप्रतिबंधकः। पीतःशंखइतिभ्रमानुपपत्तेः। किंतुग्राह्याभावग्रहमात्रं। तस्यबलत्वाभा
175 वान्नसत्प्रतिपक्षासंभवइतिभावः। ननुसद्धेतुनाकथंसत्प्रतिपक्षसंभवः। हेत्वाभासताप्रयो
जकस्यव्याप्त्यादिविरहस्यतत्राभावात्। तादृशस्यापिहेत्वाभासत्वेसर्वदैवतस्यतत्त्वस्यादिति १७५
तत्राह। दूषकताबीजमिति। हेत्वाभासताप्रयोजकं। तथाचविरोधिपरामर्षविषयीभवन्नायंनि
श्चीयजनयत्यतएवहेत्वाभासोनतुव्याप्त्याभावात्। ननुदूषकताबीजमनुमितिबंधकज्ञानविषय
ताच्छेदकमितिभ्रमःकर्तव्यः। निर्णीयाजनकत्वज्ञानस्याप्रतिबंधकत्वात्। तादृशज्ञानविष
यतावच्छेदकंचप्रतिहेतुद्वयमेवतद्वत्त्वंचयथातदुभयस्यतथोक्तंप्राक्। एकत्रेति। अन्यतरत्वप्र

कारकव्याप्त्यादिभंगज्ञानजनकत्वलक्षणेनानतिप्रसक्तेनदुष्टिवीजेनास्यहेत्वाभासत्वमित्य
र्थः। तच्चकादाचित्कमितिनसदास्यहेत्वाभासत्वमितिभावः। एवंचयदाव्याप्त्यादिभंगज्ञानद्वा
रास्यदोषत्वंतदादूषकतायामसिद्ध्युपजीवनात्तस्यहेत्वाभासत्वेपृथगितिनिरस्तंवोध्यं। नन्व
नुमानप्रतिरुद्धेवह्न्यादौलिंगत्वाभावादुक्तलक्षणयोरव्याप्तिः। तस्यव्याप्तिपुरस्कारेणा
गमकत्वात्तद्भंगज्ञानद्वारातत्रदूषणत्वासंभवश्चेत्यतआह वह्न्यादेश्चेति। तदुपस्थितावि
ति। पीतत्वाभावव्याप्यशंखत्वोपस्थितावपिपीतप्रत्यक्षोदयस्यानुभवसिद्धत्वादित्यर्थः। न
न्वेवमिति। यदिसमानवलमात्रेणासत्प्रतिपक्षाभ्युपगमइत्यर्थः। समवलत्वइतिव्याप्त्यादिभि
न्नंवलमभ्युपेत्यलक्षणयोगदोषेसत्येवदोषान्तरमाह अधिकेति। तस्येति। विरोधिवाक्यस्या
धिकवलेज्ञातेनुभयस्यवाधितत्वादेवानुमानवैयर्थ्यं। न्यूनवलत्वेचज्ञातेसाध्यनिश्चयादेवत

द्वैयर्थ्यं। न्यूनबलत्वेन ज्ञाते साध्यनिश्चयादेव वैयर्थ्यमिति भावः। उक्तं हीति। शाब्दरूपेव प्रामाण्येन
तादृशाबलमित्यर्थः। प्रतिवादिवाक्यजं ज्ञानमप्रामाण्यशंकास्कंदितमिति न प्रतिबंधकं। ननु य
दि व्याप्तिपक्षधर्मतेत्यदाप्रत्यक्षादौ सत्प्रतिपक्षोपन्यासः सर्वसिद्धौ विरुद्धोन त्यत आह् प्रत्यक्षा
देरिति। कथायामिति। यदुपन्यस्तं परः प्रमांजनयति तदेव प्रमाणामुपन्यसतीयं प्रत्यक्षस्य वस्तु
रूपसत एव प्रमाजनकत्वं शाब्दस्य तथात्वेपि वाद्युक्तत्वेनाप्रामाण्यशंकास्कंदितत्वादिति भा १७६
वः। एकैकमिति। प्रत्येकमसाधारणत्वादिति भावः। साध्यतदभावयोरित्यादि। साध्याभाव एव
बाधः अप्रामाण्यशंकाशून्यं च तज्ज्ञानं प्रतिबंधकमिति मतेनेदमुक्तं। ननु विरुद्धनिश्चयसाम
ग्र्याः संशयजनकत्वकल्पनादवश्यमत्र तयानुमितिरूपसंशय उत्पाद्यः। न च विशेषदर्शनसा
तायास्तस्यास्तथात्वं प्रकृते च विशेषदर्शनमिति वाच्यं एकमात्रकोटिकविशेषदर्शनस्यैव सं

शयवारकत्वात्तदभावस्यैवसंशयकारणत्वात्तस्यचपुरुषत्वे सत्त्वात्‌• अन्यथास्थाणुत्वपुरुषत्वो
भयव्याप्यदर्शनेसतिपुरोवर्त्तिनितदुभयकोटिकसंशयानुपपत्तेः। ननुविरुद्धप्रत्यक्षसामग्र्याः
संशयजनकत्वंअन्यथाविरुद्धस्मृतिसामग्रीतःसंशयरूपस्मृत्यापत्तेः। विरुद्धार्थिकशब्दाच्छाब्द
संशयापत्तेश्चेतिचेत्‌• न• एतन्मतदृष्टापत्तेः। नन्वेवमन्यत्रापिसंशयरूपस्मृतौबाधकाभावात्‌
संशयस्यापिसंस्कारजनकत्वंस्यात्तच्चसर्वमतनिषिद्धमितिचेत्‌। एतावताविरुद्धानुभवसाम
ग्रीत्वेनसंशयजनकत्वमस्तु• ननुप्रत्यक्षेसाध्याभावप्रत्यक्षत्वेनैवप्रतिबंधकत्वादनुमितौशाब्द
ज्ञानेवसाध्याभावज्ञानत्वेनैवप्रतिबंधकत्वेकल्प्यमानेलाघवेनसामान्यतःसाध्याधिकरणान
धिकरणज्ञानत्वेनकल्प्यतेतच्चसाध्याभावव्याप्यज्ञानेप्यस्तीतिचेत्‌• न• एवंवह्निजलहृदोवह्निमा
निति भ्रमरूपाप्यनुमितिःकदापिनस्यात्‌• पक्षतावच्छेदकजलहृदत्वादिज्ञानस्यैवसाध्याधिकरणा

नधिकरणज्ञानत्वेनप्रतिवंधकत्वसंभवात्नवस्वरूपेणानतज्ज्ञानंप्रतिवंधकंअपितुसाध्यत्ताव्या
प्यत्वेनेतिवाच्यं।एवंहिसाध्याभावव्याप्यज्ञानस्यतत्वेनैवप्रथमेवप्रतिवंधकत्वंवाच्यंनोक्तरू
पेणाऽक्तातिप्रसंगात्।तच्चनसंभवतिअन्यत्रतथाप्रतिवंधकत्वाकल्पनात्।किंचैवंसाध्याभा
वव्याप्यवुद्धौसत्यामाप्तवचनात्।किंचैवंसाध्याभावव्याप्यवुद्धौसत्यामाप्तवचनात्शाब्दंसा
ध्यज्ञानंनोत्पद्येत-नचेष्टापत्तिः।योग्यतादिज्ञानसत्वेशाब्दज्ञानोत्पत्तेरावश्यकत्वात्।ननुप्र १७७
177 त्यक्षस्थलेकोटिस्मृत्यादेर्निश्चयत्वावच्छिन्नसामग्रीत्वं-किंतुज्ञानसामग्रीत्वमेव।तद्वि
शिष्टज्ञानंप्रत्येवतत्कोटिस्मृतेर्जनकत्वात्।प्रतिवंधकाभावेसतिसानिश्चयंजनयतीतिनि
श्चयसामग्रीत्युच्यते तथाचसंशयस्यापिज्ञानत्वावच्छिन्नत्वात्तत्सामग्र्यातदुत्पत्तावविरोधः
व्याप्युपदर्शनंतुनज्ञानमात्रसामग्री किंत्ववधारणात्मकनिश्चयसामग्रीतिनतयाऽनुमित्य।

त्मकसंशयेस्यादनमितिचेन्नुःनः तृतीयलिंगपरामर्षस्यदकार्य्यतावच्छेदकमनुमितित्वंज्ञा
तिर्ल्लाघवान्नत्ववधारणात्मकनिश्चयत्वंगोरवान्मभिवारान्न।अनुमितित्वंचसंशयरूपायाम
प्यनुमितावितिकथंतेननतदुत्पादनं।यत्तुसाध्याभावव्याप्यत्वज्ञानंसाध्यानुमितिंप्रतिवध्ना
त्येवमन्यथापीतःशंखइत्यनुमितिरपिस्यात्पीतत्वाभावव्याप्यशंखत्वबुद्धेःप्रतिबंधकत्वा
त्प्रत्यक्षवदोषबलाद्विशेषादितिःतन्नुच्छं।पीतत्वव्याप्यधर्मपरामर्षेसंशयरूपपीतत्वानुमिते
रिष्टत्वात्ःतत्परामर्षेतुकारणाभावादेवपीतत्वानुमित्यनुत्पादइति।तदभावव्याप्यत्त्वेवगुरुस्या
पिप्रतिबंधकत्वेमानाभावः।ननुसाध्यतदभावनिश्चयस्यपरस्परंप्रतिबंधकत्वात्तत्सामग्रीत्वेन
परामर्षयोरपिपरस्परंप्रतिबंधकत्वमितिचेत्ःनःप्रत्यक्षस्थलेपिसंशयापत्त्यापत्तेःमेवं
संशयरूपाद्यनुमितिरनुभवबलाद्धास्वीकार्य्याविरोधिनिश्चयसामग्रीत्वेनसंशयजनकत्व

178

कल्पनात् सामग्रीबलाद्वा । नाद्यः । अनुमिनोमीत्यनुव्यवसायस्य सत्प्रतिपक्षस्थलेऽसिद्धेः । सं
देह्मीत्यनुव्यवसायस्यावश्यकल्पनीयकारणाभावकोटिस्मरणादिजन्यसंदेहविषयत्वेना
प्युपपत्तेः । नापि द्वितीयः । विरोधिप्रत्यक्षसामग्रीत्वेनैव संशयजनकत्वकल्पनात् । अन्यथा व्या
प्तिविशिष्टपक्षधर्मताज्ञानजन्यत्वस्यानुमितित्वप्रयोजकत्वात् संशयान्तरप्रत्यक्षस्थलेऽप्यनुमि
त्यापत्तेः । तत्रानुमिनोमीत्यनुव्यवसायाभावात् फलाभावेन निश्चिते प्रत्यक्षसामग्रीविरहसहकृत १७८
तत्तज्जन्यत्वमनुमितिप्रयोजकमिति यदा तदा प्रकृतेऽपि तादृशानुव्यवसायाभावाद्विरोधिप्रत्य
क्षसामग्रीजन्यत्वं संशयप्रयोजकमिति तुल्यं तस्मात्फलानुरोधेन कारणकल्पना न तु कार
णानुरोधेन फलकल्पना । अत एव विशेषणज्ञानविशेष्येन्द्रियसंनिकर्षादिसत्त्वे प्रकारणासत्त्वे
ऽपि पर्वते वह्निसाक्षात्कारानुभवाद्विशेषणसंनिकर्षस्यापि तत्र कारणत्वं कल्प्यत इति संक्षेपः ।

विरोधीति।यद्यपिनैकंविरोधित्वमुभयज्ञानेविषयः तथापियथासाध्याभावज्ञानंसाक्षात्प्रतिबंध
कंतथातदभावव्याप्यवत्त्वज्ञानमपीतितात्पर्य्यंविपरीतेति।ज्ञानपदंप्रमापरं।अपक्षधर्मइति।व्य
प्तिमत्तइतिलक्षणानुरोधेनाकाङ्क्षादिर्न्निविरुद्धइतिमतेनेदमुक्तं।नन्विदंबाधेपिगतमित्यत
आहबाधइति·तथाचविपरीतज्ञानकत्वंविरुद्धत्वंनतुविपरीतज्ञानविषयपक्षवृत्तित्वमतो।
नतत्राप्तिव्याप्तिरित्यर्थः।घटइति·अन्यतोपिविपरीतज्ञानसंभवादित्यर्थः।व्याप्तिबाधइति।
व्याप्यत्वपक्षधर्म्मताबाधइत्यपिद्रष्टव्यं·तथाचव्याप्तिपक्षधर्म्मतान्यतरबाधःफलमित्यर्थः।
प्रकृतेति।प्रकृतोभयसाध्यसाधककत्वेरित्यर्थः।व्याप्तीति।तादृशजिज्ञासाजनकोपस्थि
तिविषयत्वमित्यर्थः।नन्वेकपरामर्शादपितादृशजिज्ञासाभवतीत्यतिव्याप्तिरित्यतआह·नहीति।
ति।असतीति।लक्षणारीतिमणिन्यायेनविजातीयजिज्ञासायामस्यजनकत्वान्नव्यभिचारइति

भावः। अत्र हेतु समीचीनत्वमित्युपलक्षणं। साक्षात्त्वेत्यपि द्रष्टव्यं। अपरक्षेत्विति। क्वचिद्व्यादितिज्ञा
नेन क्वचित्पक्षधर्मताज्ञानेन। अग्निमद्विशिष्टज्ञानं स्वव्यक्तिव्याप्यप्यायमित्याकारकं। पर्वतवृत्ति
धूमेव ह्निव्याप्तिरित्याकारकं वा तदन्यतरोत्पत्तिकाले पूर्वपरामर्शविनाशादित्यर्थः। अन्य
थाविरोधिगुणत्वेन प्रथमज्ञानस्यैव परामर्शनाशकत्वात् ज्ञानाभ्यामित्यसंगतं स्यात्। ना
179 त्यन्यत्वमिति। सत्त्वादौ व्यभिचारवारणाय सत्यंतं घटरूपादौ व्यभिचारवारणाय द्वितीयवि १७९
शेषणं। ननु गुणत्वत्वाद्यावुपाधौ तथापि व्यभिचार इति चेन्न। तथापि सत्प्रतिपक्षत्वमस्त्वतमे
व। विशेषादर्शनकालेतेनापि तत्स्वीकारात्। अत एव वक्ष्यति विशेषादर्शनदशायामि
ति। अत एवाग्निमानुमानेपि पटान्योन्याभावादौ व्यभिचारेण न दोषावह इति भावः। पीनत्वाभा
ववाप्यतच्छुक्लत्वादिपरामर्शध्वंसत्वेन पीनत्वानुमानप्रतिबंधकः। अप्रामाण्यशंकास्कंदितत्वा

त्व।तदनास्कंदे तु सत्प्रतिपक्षत्वमिष्टमेवेति ध्येयं॥ वस्तुतस्त्विति॥ इदं च विशिष्टाभावस्य प्रत्येकाभा
वसमानसंवित्संवेद्यत्वमभ्युपेत्योक्तं। वस्तुतस्त्वखंडाभावस्य तस्य शशशृंगादिना केवलस्यापि
ज्ञानात्तज्ज्ञानस्य ग्राह्याभावज्ञानत्वाविशेषेणावश्यं प्रतिबंधकत्वात्। सोपि दोष एव यथाच
नं कृत्वाभासाधिक्यं तथा वक्ष्यते॥ व्यर्थेति॥ इदमप्यखंडाभावमनभ्युपेत्योक्तं। उपजीव्यत्वा
दिति। प्रत्येकाभावज्ञानेन जातस्यापि विशिष्टाभावज्ञानस्याप्रामाण्यशंकास्कंदितत्वेन स्व
कार्याक्षमत्वादिति भावः। कादाचित्काभिप्रायेणोपजीव्यत्वमुक्तमित्याहुः। नन्वेवं व्यभि
चारादेरसिद्ध्यंतर्भावित्वमत आह॥ व्यभिचारादाविति। उपजीव्यत्वं कादाचित्काभिप्रायेणैवेति ध्ये
यं॥ तत्रैति। इदं त्वनौपाधिकत्वव्याप्तिपक्षे तत्रोपाधिरेव व्याप्तिविरह इति ध्येयं। दुरूहत्वादि
ति। साध्यव्यापकत्वादिनानापदार्थघटितत्वेनास्य विलंबितप्रतीतिकत्वादित्यर्थः। ननु ज्ञाभाव

नुपजीव्यत्वेऽप्युत्पत्तावस्य तत्त्वं स्यादित्यत आह· यदि वेत्तस्मादिति। स एवेति ज्ञानमार्गहेत्वाभा
सलक्षणानुरोधादिति भावः। सिद्धोद्धयोरपि हेत्वाभासत्वादित्यत्र हेतुमाह व्यभिचारादेरिति। सद्धे
तौ सद्धेतुत्वदशायां सिद्धिदशायामिति यावत्। तथा च व्यभिचार्यादेर्हेतुत्वं तदा न स्याद्यदि
180 सिद्धिखंडनहेतुत्वं तन्निष्ठव्यभिचारादेः स्यात्। तत्त्वेनास्ति तदा तस्य न हेत्वाभासत्वं किंतु हे १८०
तुत्वमेवेत्यर्थः। अन्ये तु यत्र व्यभिचारादेर्हेतुदोषस्यासत्त्वं स हेतुर्यत्र तत्सत्त्वं स तदाभास इत्य
वहेतुतदाभासविवेकः स्यादित्यत आह व्यभिचारादेरिति। चकारोऽत्र भिन्नक्रमो व्यभिचारा
देश्चेत्यत्रैव योजनीयः सोऽप्यर्थः। तथा च व्यभिचारादेरपि सिद्धिखंडनप्रयोजकतया हेत्वाभास
त्वमिष्यते। सिद्धिखंडनं च यदि व्यभिचारादिराहितेत सद्धेतावपि स्वीकृतं तदा तत्र च सिद्धिखं
डनं तदकुर्वतस्तस्य सिद्धिखंडनाप्रयोजकत्वान्न हेतुदोषत्वं स्यात्· तथा च तत्सत्त्वासत्त्वकृतो

पि हेतुतदाभासविवेको न स्यादिति भावइत्याहुः। मनोयोगादिरपीति यद्दिमनोयोगादिकारणत्वेप्र
मानांतरमस्ति। तदातद्व्यतिरेकादपि अनुमितिव्यतिरेकस्यावश्यकत्वादसिद्धिवारकस्यापि हेत्वाभा
सांतरत्वं स्यादित्यनिष्टं वाध्यंकारणाभावस्याविशेषादिति। ननु न मनोयोगादिकारणमित्यभ्युपगं
तारं प्रत्याह सिद्धेरिति। तथा चोपसिद्धांत इति भावः। गमकतोपयिकपदेनावधितत्वासत्प्रतिपक्षत्वे
विवक्षितेतत्प्रतिद्वंद्वित्वं वाधसत्प्रतिपक्षयोस्तावदन्यतमत्वं वलक्षणमिति नाननुगमः। व्याप्तिविरह
नियतत्वेनेति। व्याप्तिविरहनियतावच्छेदकरूपेण व्यभिचारित्वादिनाज्ञातयोरित्यर्थः। विशेषदर्शन
स्येवेति। विरोधिविषयतामात्रेण साम्यं। यद्वा· भ्रमे ग्राह्याभावव्याप्यगुरुस्य प्रतिवंधकत्वदर्शनाद
नयोरपि व्याप्तिविरहव्याप्यत्वेनैवज्ञातयोः प्रतिवंधकत्वमित्यभिमानेनैतदुक्तं।। विवक्षितत्वादिति· अ
सिद्धित्वेनेति शेषः। तच्चेति। ननु व्याप्तिपक्षधर्मताविशिष्टाभावादिकमिति भावः। प्रत्येकमेवेति। एवं

कारोभिन्नक्रमः। प्रत्येकं दोष एवेत्यर्थः। न तु विशिष्टाभावमात्रमित्यर्थः। अत्र हेतुः पूर्वोक्तः प्रत्येक
स्य ज्ञानादित्यादिः। परामर्शविषयाभावो नेत्यत्र हेतुमाह· व्यर्थविशेषणत्वादिति। परामर्शस्य व्यर्थ
त्वादित्यर्थः। तस्य परामर्शांशस्येत्यर्थः। एतेन विशिष्टाभावो दोष एव विशिष्टस्यापि ग्राह्यतया तदभा
१०। वज्ञानस्यापि विरोधित्वात्। न च व्यर्थविशेषणतायामखण्डाभावेन तदभावात्। शब्दादिना प्रत्येकाभावानु
पस्थितावप्युपस्थितत्वाच्च न तेनैवान्यथासिद्धिः। तथा च प्रत्येकमेव दोषः। न तु विशिष्टाभाव इत्यसंग १८१
तमित्यपास्तं। तस्यापि दोषत्वस्वीकारात्। उक्तजैनैर्योयावगुंधिस्य संगतत्वात्। असिद्धेस्त्रिविधत्वोप
वर्णनमुपलक्षणं। अत एव पक्षे हेतुसंबंधविरहो व्याप्तिपक्षधर्मतासामानाधिकरण्यविरह इत्यादयो
ऽपि परामर्शविषयीभूततत्तत्पदार्थप्रतियोगिकाभावा असिद्ध्यन्तर्भूता एव। नन्वेवं हेत्वाभासाधिक्यं स्यादि
त्यत आह· परामर्शविषयाभावत्वेनेति। नन्वव्यभिचारसत्प्रतिपक्षयोः परामर्शविषयतया तदभावे व्यभिचारि

स्तद्वेवातिव्याप्तिः। साध्यस्यापितादृशतयातदभावरूपवाधेवातिव्याप्तिः। ननुयद्रूपोपस्थितव्याप्तिविष
यतयापरामर्षस्यानुमितिजनकत्वंतद्रूपावछिन्नतदभावोविवक्षितः। साध्यप्रतियोगिकव्याप्तित्वप्रका
रोपस्थितव्याप्तित्वप्रकारोपस्थितव्याप्तिविषयतयावपरामर्षस्तथा। अतोव्याप्तित्वावछिन्नाभावोभव
त्यसिद्धिः। ननुव्याप्तिशरीरप्रविष्टप्रत्येकाभावः। प्रत्येकविषयत्वेनवपरामर्षस्यजनकत्वेतत्तत्परामर्षा
दनुमित्यापत्तिरितिचेत्। एवंपक्षेहेतुसंवंधासिद्ध्यादेरसंग्रहापातः। नहिहेतुसंवंधत्वप्रकारोपस्थित
हेतुसंवंधविषयतयापरामर्षस्यानुमितिजनकत्वंहेतुसंसर्गास्यपरामर्षसंसर्गविधयाभातत्वेनतत्रप्र
काराभावात्। नवाव्याप्तित्वप्रकारोपस्थितव्याप्तिविषयतयापरामर्षस्यकारणत्वं। विशकलितव्यभि
चाराभावेसकृद्वारस्मरणानंतरंभाविनः पक्षेलिंगवैशिष्ट्यविषयकस्यलिंगेवतदुभयवैशिष्ट्यविषयकस्य
मानसादिपरामर्षस्यानुमित्यजनकतापत्तेः। व्याप्तित्वस्यपूर्वमनुपस्थितत्वेनप्रकारकत्वाभावात्। तदुभयवै

शिष्यस्येव व्याप्तिरूपतया तद्विषयतया तद्विषयतयाऽनुमितिं प्रति जनकत्वं तस्यापीति मैवं व्यभिचारा
दिवदनुपयभिन्नहेत्वाभासत्वस्य विभाजकोपाधित्वात्। अत एवेति। असिद्धेरेकरूपत्वाभावादेवेत्यर्थः
अन्यथा वक्तुवचनं ये इत्यत्र न स्यादिति भावः। नन्विति। व्योमकमलं मिति निषिध्यत इति सुरभिकमल
152 त्वादित्यादावेवाश्रयासिद्धिर्वाच्या· तत्र व्योमकमलादिकमप्रसिद्धमिति कथं तद्विरहउद्भावनीय इत्य
र्थः। व्योमकमलमिति। निषिध्यत इति शेषः। अपार्थकमिति। तथा च नाश्रयासिद्धिरुद्भाव्यते किं त्वपा १५२
र्थकमेवेत्यर्थः। नन्वेवमाश्रयासिद्धिः कुत्रेत्यत आह· आश्रयेति। सुवर्णमयो य ग्रिमान्। धूमवत्त्वा
दित्यादौ सुवर्णमयत्वादिविशेषणासिद्धिराश्रयासिद्धिरसंकीर्णेत्यर्थः। एवं व्योमकमलमदमपि य
दि प्रसिद्धकमलतात्पर्येण वाच्यते तदा तत्र व्योमीयत्वविशेषणासिद्ध्यासिद्धिरेव· अद्रौ सुवर्णमय
त्वासिद्धिवदिति ध्येयं। न चेदमपार्थकं। आश्रयासिद्धिस्तत्रोपजीव्यत्वात्· अत एव बाधस्यापि दोषत्वं।

यत्तु पक्षविशेषणं पक्षतातदसिद्धिराश्रयासिद्धिरिति। तन्न। तद्विरहस्य कारणाभावत्वेन स्वरूपसत्प्रति
बंधकतया हेत्वाभासत्वाभावात्। ननु पक्षतावच्छेदकसामानाधिकरण्यस्य परामर्शविषयतया तदभा
वज्ञानस्य तद्विशिष्टपरामर्शविघटकतया तद्विशिष्टावगाह्यनुमितिप्रतिबंधकत्वेन हेत्वाभास
त्वमिति वाच्यं। एवं हि साध्यपक्षतावच्छेदकसामानाधिकरण्यस्यानुमितिविषयतया पक्षतावच्छेदक
धर्मिताभावस्य ग्राह्याभावज्ञानत्वेनैव प्रतिबंधकतया तस्य बाधांतर्भावापत्तेः। न च साध्याभाव एव
बाध इति वाच्यं। पक्षतावच्छेदकसाध्यसामानाधिकरण्याभावस्यापि बाधबहिर्भूतत्वापत्तौ हेत्वाभ
साधिक्यापत्तेः। न च सोऽप्याश्रयासिद्धिरेवेति वाच्यं। परामर्शविषयाभावत्वाभावेनैतस्य तदविघटक
तयाऽसिद्धिबहिर्भूतत्वात्। अत्राहुः। हेतुपक्षतावच्छेदकसामानाधिकरण्यस्य परामर्शविषयत
यातदभावस्याश्रयासिद्धिरूपत्वं। तादृशसामानाधिकरण्यरूपस्यानुमितिविषयतया तदभा

वस्याश्रयासिद्धिरूपत्वं तादृशसामानाधिकरण्यरूपस्यानुमित्यविषयतया तदभावस्य बाध
त्वासंभवात् । पक्षतावच्छेदकाभावपक्षतावच्छेदकसाध्यसामानाधिकरण्याभावादयश्च ग्राह्या
भाववत्तयावधारितभूता एवेति । वयं तु पक्षतावच्छेदकाभावस्य ग्राह्याभाववत्तया यदि बाधत्वं तदा परा
183 मर्षविषयाभावातिरिक्तग्राह्याभावत्वं बाधत्वमित्यस्यापि सुवचत्वात् । न चैवं साध्यस्यापि परामर्ष
विषयतया तदभावोप्यसिद्धिरेव स्यादिति वाच्यं । लिंगोपहितलैंगिकभानपक्षे लिंगव्याप्यादेरपि १८३
ग्राह्यतया तदभावस्यापि बाधत्वापत्तिरिति तुल्यं । तस्माद्यज्ज्ञानं परामर्षविघटनद्वारानुमितिं
प्रतिबध्नाति स न बाधः । यज्ज्ञानं च परामर्षज्ञानेपि साक्षात्प्रतिबंधकं स एव बाधः । अत एव लिंगोप
हितलैंगिकभानपक्षे स्वरूपासिद्ध्यादीनां न बाधत्वं । प्रकृते चकाचनमयत्वाद्यभावज्ञानं तद्विशिष्ट
पक्षकानुमितौ तद्विशिष्टपक्षधर्मतावगाहिपरामर्षविघटनद्वारैव प्रतिबंधकं न तु साक्षात् । तादृशाप

रामर्षस्यपक्षेतद्वैशिष्ट्यविषयतयानियमेनतदनंतरंपक्षेतदभावज्ञानासंभवात्।पक्षेतदभावाज्ञा
नेयकांचनमयत्वविशिष्टपक्षधर्म्मतावगाहिपरामर्षाभावादेवानुमितिप्रतिबंधः।तथाचपक्षता
वच्छेदकाभावस्यग्राह्याभावत्वेपिनबाधकत्वंकिंत्वाश्रयासिद्धत्वमेवकदापिसाक्षात्प्रतिबंधकत्वा
भावादितिब्रूमः।पर्वतांशेऽनुमित्यप्रतिबंधेपिविशिष्टविषयानुमितिप्रतिबंधकत्वेनास्यहेत्वाभा
सत्वं।व्यर्थविशेषणस्थलेऽनुमित्युत्पादेप्युद्देश्यानुमितिप्रतिबंधकतयाहेत्वाभासत्वात्।एवंचकां
चनमयत्वविशिष्टत्वेनज्ञानेपिपर्वतत्वाभावज्ञानस्यपर्वतभिन्नत्वज्ञानपर्वतत्वसुवर्णमयत्वसामा
नाधिकरण्याभावज्ञानादीनामपिपरामर्षप्रतिबंधकत्वात्तद्विषयाभावानामाश्रयासिद्धत्वमेव·
स्वरूपासिद्धिव्याप्यत्वासिद्धिभिन्नासिद्धित्वेनतेषामनुगमात्त्रनविभागव्याघातइत्यवधेयं।व्या
प्तिविरहइति।असंकीर्णइतिशेषः।असादिपदाद्व्यर्थविशिष्यत्वपरिग्रहः।यथावात्रव्याप्यत्वासि

द्धिस्तथाग्रेवक्ष्यते।ननुव्यर्थविशेषणादावसंकीर्णता यथा तथास्तु सव्यभिचारादिर्हेतौ व्यभिचारा
दिसंकीर्णा व्याप्यत्वासिद्धिः कथं· यत्र किंचिद्व्याप्तिविरहस्य सद्धेतुसाधारणत्वात्।वह्न्यादिसमा
184 नाधिकरणात्यंताभावाप्रतियोगिधूमादिसामानाधिकरण्यरूपप्रकृतव्याप्तेरसिद्धेः।नवसाध
नसमानाधिकरणात्यंताभावप्रतियोगित्वं साध्ये व्याप्यत्वासिद्धिरितिवाच्यं।अव्यभिचरितसा
मानाधिकरण्यस्य व्याप्तित्वेन विशेषणांतर्भूताव्यभिचारविरहरूपतया तस्य व्यभिचारांतर्भूत १८४
त्वात्।विशेष्यसामानाधिकरण्यविरहस्य विरुद्धत्वात्।तथा च विशिष्टविरहस्य तत्त्वं वाच्यं· तत्र च
प्रसिद्धिरेवेतिचेत्·मैवं·हेतुसामानाधिकरण्यविशिष्टस्य हेतुसामानाधिकरणात्यंताभावाप्र
तियोगित्वस्याभावो व्याप्यत्वासिद्धिः।नव विशेष्यविरहज्ञानस्येव व्यभिचारज्ञानतया प्रतिबंधक
त्वमितिवाच्यं।हेतौ साध्यसामानाधिकरण्यगृह्यमाणे साध्येपि हेतुसामानाधिकरण्यस्य समान

संवित्संवेद्यतया ग्राह्यत्वेन तद्विशिष्टाभावग्रहस्यापि प्रतिबंधकत्वात्। न च प्रतियोग्यप्रसिद्धिः।
सव्यभिचारादिहेतुव्यापकप्रमेयत्वादौ तत्प्रसिद्धेः। न चाव्यवृत्ति विरुद्धे तथाप्यप्रसिद्धिः तद्व्यापका
प्रसिद्धेरितिवाच्यं। तस्य व्याप्यत्वासिद्धत्वेनासंग्राह्यत्वेनादोषत्वात् विरुद्धत्वादिनैव तस्य हेत्वा
भासत्वमितिदिक्। स्वोक्त एवाचार्यसंमतिमाह· तदुक्तमिति। ननु च नोपाधिकत्वस्य व्याप्तिरू
पत्वेन तदभाव उपाधिर्व्याप्यत्वासिद्धिः। न च नीलधूमादावुपाधिरस्तीति न च तत्र व्याप्यत्वासिद्धि
रित्यत आह· उपाधिस्त्विति ननु च प्रयोजकत्व एव किमित्यसांकर्य्यनोक्तमित्यत आह· अप्रयोज
केति। प्रतिकूलेति· न च तद्विषयस्य तर्करूपयेव ज्ञानं प्रतिबंधकमिति तस्य हेत्वाभासतापत्तिः
तज्ज्ञानस्य नियमतो ऽयथार्थत्वात् अनुमितिप्रतिबंधकत्वं यथार्थज्ञानविषयस्यैव हेत्वाभासत्वा
द्दितिकेचित्· अपरे तु यद्विषयत्वं ज्ञानस्य प्रतिबंधकतावच्छेदकं तस्यैव हेत्वाभासत्वमत एव सिद्धसा

धनस्यानुमितिप्रतिबंधकत्वेपि साध्यं न हेत्वाभासः। न चेह तर्कविषयकविषयत्वं तथा-तदर्थविष
यकज्ञानांतरादप्यनुमितिप्रतिबंधापत्तेः। किंतु विषयनिरपेक्षानिष्टप्रसंगत्वेनैव तर्कस्य तथात्व
मत एव समानविषयकादपि तर्कोद्दिष्टापादनदशायां न प्रतिबंध इत्याहुः। इत्थं यथा व्याप्तिविर
हज्ञानं पक्षधर्मताविरहज्ञानं च साक्षात्परामर्शविघटकं तथा व्याप्तिविरहव्याप्यवत्त्वज्ञानं प
185 क्षधर्मताविरहव्याप्यवत्त्वज्ञानं च विरोधिज्ञानत्वेनाविशेषात्। तथा च तदुभयविरहव्याप्यवत्त्वं १८५
कथं न हेत्वाभासांतरमिति चिंत्यमिति वदंति- मूलके चित्- तद्विरहव्याप्यवत्त्वज्ञाने व्याप्तिपक्षध
र्मताप्रत्यक्षादिविरोधितया तथा व्याप्त्याद्यनुमितिविरोधितया वक्ष्यमाणे ऽसंभवः। न हि व्या
प्त्यादिविषयके प्रत्यक्षे शाब्दज्ञाने च तदभावव्याप्यवत्त्वधीर्विरोधिनी प्रत्यक्षे ग्राह्याभावप्रत्य
क्षस्येव शाब्दज्ञाने ग्राह्याभावाज्ञानमात्रस्यैव प्रतिबंधकत्वात्। अंत्ये तु सत्प्रतिपक्षत्वमेव विरुद्धे।

भयव्याप्यज्ञानत्वात्। नचैवमुपाधिनाव्यभिचारानुमितिरपिविरोधिनीनस्यादितिवाच्यं। योग्यधर्म्मि
णिव्यभिचारस्यापियोग्यत्वेविशेषदर्शनानंतरं पुरुषप्रत्ययवद्व्यभिचारप्रत्यक्षस्यापितत्रोत्पत्तेः।
अयोग्यसत्प्रतिपक्षएवेतिवदंति। तन्न व्याप्त्याद्यमितिप्रतिबंधकत्वेनैवहेत्वाभासत्वात्। नचसत्प्रति
पक्षत्वमेववह्नौधूमव्याप्तिविरुद्धव्याप्यवत्त्वस्यधूमव्याप्त्यनुमितौसत्प्रतिपक्षतयाप्रतिबंधकत्वेपिवह्नि
नाधूमानुमितावसत्प्रतिपक्षत्वाद्धूमविरुद्धव्याप्यस्यैवतत्रसत्प्रतिपक्षत्वात्। ननुधूमव्याप्तिविरुद्धव्या
प्यस्य। तस्यव्याप्तिग्रहविघटनद्वाराधूमानुमितिप्रतिबंधकत्वात्। सत्प्रतिपक्षस्यसाक्षात्प्रतिबंधक
त्वात्ऽन्यथाव्याप्तिविरुद्धादेरपिबाधत्वापत्तेः। ग्राह्याभावस्यैवबाधत्वात्। नचव्याप्तिरूपग्राह्याभा
वोनबाधः। किंत्वनुमितिविषयाभावः। तस्यैवसाक्षात्प्रतिबंधकत्वात्ऽस्यचपरंपराविघटकत्वादि
तितुल्यं। तस्माद्यथाव्याप्तिग्रहेव्याप्तिविरुद्धज्ञानस्यबाधज्ञानत्वेनप्रतिबंधकत्वेपिनधूमाद्यनुमितौ

वाधत्वं तथा व्याप्तिग्रहे व्याप्तिविरहव्याप्तिवत्त्वग्रहस्य सत्प्रतिपक्षज्ञानत्वेन प्रतिवंधकत्वेपि न धूमा
द्यनुमितौ सत्प्रतिपक्षत्वं किंतु व्याप्तिविरहादिवद्धेत्वाभासांतरत्वमेवेति। अपरे तु तयोरपि व्याप्यत्वासि
186 द्धत्वमेवातो नाधिक्यं नवाननुगमः। स्वरूपाश्रयासिद्ध्याश्रयासिद्धिभिन्नासिद्धित्वेन स्वरूपसताए
केन रूपेण सर्वसंग्रहादित्याहुः। तन्न तत्र हेत्वाभासव्यवहाराभावेन वक्ष्यमाणदोषाद्धेत्वाभासत्वा
भावेन व्याप्यत्वासिद्धत्वाभावात्। वयं तु ब्रूमः। स एव हेत्वाभासो यस्य प्रत्यक्षज्ञाने सति अवश्यमनु १८६
मितिप्रतिवंधः। ननु तज्ज्ञाने सति कदाचिदनुमितिप्रतिवंधः सोपि तथा। उपाधेरपि हेत्वाभासतापत्तेः।
व्याप्त्यादिविरहव्याप्यवत्त्वज्ञाने सति नावश्यमनुमितिवंधः। तज्ज्ञाने सति अनुमितिरूपव्याप्तिग्रह
प्रतिवंधेपि प्रत्यक्षशाब्दव्याप्तिग्रहादनुमित्युत्पत्तेः। न हि ग्राह्यविरहव्याप्यज्ञानं प्रत्यक्षप्रतिवंधकं।
पीतत्वाभाववव्याप्यशंखत्वग्रहेपि पीतप्रत्यक्षोदयात्। न वा तज्ज्ञानं शाब्दज्ञानप्रतिवंधकं। योग्यतादि

ज्ञानाविरोधित्वात्। अत एव स्वाश्रयाप्रत्वाभावव्याप्यकरवरणाभ्रमानंतरं अयं स्वाश्रयाप्रकरेवेत्याप्तवचना
त्स्वाश्रयाद्युत्वनिश्चयोऽनुभवसिद्धः। अत एव बाधप्रतिपक्षातिरिक्तः परामर्शविषयाभाव एव हेत्वाभास
शास्त्रकाराभिसंधाने विषयः तादृशाश्चाग्रेऽश्रयासिद्ध्यादिरेव तेन व्याप्त्यादिविरहव्याप्यवत्त्वस्य
ज्ञायमानतया साक्षात्प्रतिबंधकत्वेऽपि न हेत्वाभासत्वं। न वा शास्त्रकारस्य तथाभिसंधाने मानाभा
वः। तत्र हेत्वाभासे व्यवहारस्यैवमानत्वादिति समाधानमनुपादेयं। उक्तेनैवोपपत्तेरिति। पक्षेसा
ध्यसिद्धौ सिद्धसाधनमेव तदभावसिद्धौ स्वरूपासिद्धिरेव तदसिद्धौ तु ज्ञानरूपासिद्धिरेवेति सा
ध्याविशेषस्य नाधिक्यमाशंकनीयं। साध्याभाववदिति। प्रतियोगिवैयधिकरण्यावच्छेदकावच्छि
न्नसाध्याभाववत्पक्षकत्वमित्यर्थः। एवमग्रिमलक्षणेऽप्यभावपदं तादृशाभावपरं बोध्यं। नन्विदं
बाधितत्वं केवलान्वयिन्यप्रसिद्धमित्यबाधितत्वमपि तत्र नास्तीति तत्र तद्बोधकनिगमनस्यानवका।

शास्यादित्यपरितोषादतिरिक्तविषयतावादिमतेन लक्षणांतरमाहुः पक्षनिष्ठेति।पक्षनिष्ठं य
त्प्रमाविषयत्वं विशेषणं।ता विशेषः तत्प्रकारीभूताभावप्रतियोगिसाध्यकत्वमित्यर्थः।बाधज्ञान
187 स्यहेतुविषयतया प्रतिबंधकत्वाभावात्तावन्मात्रविषयतयैव प्रतिबंधकत्वादितिभावः।प्रमा
त्वेनेति।तथा च तत्प्रमात्वं दोषस्तज्ज्ञानस्य प्रतिबंधकत्वादितिभावः।अप्रमायामित्युपलक्षणं।प्र
मायामप्रमात्वनिश्चयेऽनुमित्युत्पत्तेश्चेत्यपि द्रष्टव्यं।ननु पक्षे साध्याभावानुपस्थितौ विरोधाप्र १८७
वादप्रतिबंधकत्वं तदुपस्थितौ च हेतुविषयत्वे व्यभिचारः।तदविषयत्वे वासिद्धिरिति नासांकर्य
कुत्रापि बाधस्येति शंकते अथेति।आश्रयासिद्धिरिति संप्रदायमतेन बोध्यं।पक्ष इति।तथा च फल
बलात्पक्षीयव्यभिचारसंशयस्याप्रतिबंधकत्वेपि तन्निश्चयस्य तत्त्वं स्यादेवेति भावः।अनुमित्युत्पा
देनेत्युपलक्षणं।तज्जनकपरामर्षेणेत्यपि द्रष्टव्यं।विशेषेति।विरोधीत्यर्थः।एकदेशिमतेनासां

कर्यं शंकते अथेति। पुत्यक्षस्थले लाघवात्पुमाणतावच्छेदे नैवोपनयसहकारित्वकल्पनादिति
भावः। अत एवेति। विशिष्टपुसिद्ध्यातदभावापुसिद्धिः तत्पुयुक्तसंशयपयोग्यत्वाभावाभावेनाश्र
यासिद्धिरपिनेत्यर्थः। व्यधिकरणधर्मावच्छेदेनवाधवद्व्यभिचारोपिसंभवत्येवमतांतरेतुवाधो
पिनेत्याशयेनसमाधत्ते। वस्तुतइति अज्ञानादिति। विशिष्टवैशिष्ट्यावगाहिज्ञानेविशेषणता
वच्छेदकपुकारकविशेषणज्ञानस्यकारणत्वमितिमतेनेदमुक्तं। विशेष्येविशेषणंतत्रचविशे
षणांतरमितिन्यायेनविशिष्टवैशिष्ट्यावगाहिज्ञानसंभवादितिध्येयं। नन्वेवंधूमेनवह्न्यनुमितौ
वह्नित्वानुमितिरपिनस्यात् धूमेतन्निरूपितव्यभिचारादिसत्वात्। अथसाध्यतावच्छेदकावच्छिन्न
साध्यनिरूपितव्यभिचारादिकंदोषः तदापुकृतेपितुल्यमित्यपरितोषादाहनवेति। नवसाध्याभा
वइति। तथाचकांचनमयवह्न्यभावेनवाधइतिभावः। ननुसाध्यतावच्छेदकस्यहेतुनिष्ठव्याप्यनिरूप

कत्वेन तन्निरूपितव्यभिचारस्यादोषत्वेपि वह्नौ कांचनमयत्वाभावज्ञानस्याग्राह्याभावज्ञानत्वेन प्रति
बंधकत्वं स्यादेव तथा चान्यत्र साध्याभावस्यापि हेत्वाभासत्वं ग्राह्याभावत्वविशेषणात्तु ज्ञानस्या
पि प्रतिबंधकत्वादित्यस्वरसादाह-वस्तुतस्त्विति। तथा च वह्नौ कांचनमयत्वानुमितिसामग्रीवि
188 रहादेव न तद्भानं न तु बाधादिति भावः। नन्वेवं प्रत्यक्षमात्रस्यायथार्थत्वप्रसंगः। सर्वत्र पूर्वापरस्थि १८८
तसकलभानापत्तेः। न चादृष्टादिकं नियामकं प्रकृतेपि तुल्यत्वात्। फलव्यतिरेकस्यात्राप्यसि
द्धेः। लाघवेन प्रमाणत्वावच्छेदेनैवोपनयसहकारित्वकल्पनाच्च। अथोपनीतभानसामग्री
प्रत्यक्षादौ प्रत्यक्षादिप्रमाणसामग्रीसहायावाच्या। ननु स्वतंत्रा प्रत्यक्षादिसामग्र्यभावेपि ज
ननापत्ते। तथा चोपनीतभानेपि ज्ञानलक्षणेंद्रियप्रत्यासत्तिसत्त्वादस्तूपनीतांशेपि तत्प्रत्यक्षं।
अनुमितिसामग्री तु व्याप्त्यादिज्ञानादिका न चोपनीते षास्तीति कथं तदसहाया तत्रोपनीतभा

नसामग्री।कथंवासाधीरनुमितिः।विषयैक्यंविनासामग्र्योरन्योन्यसहकारित्वस्यातिप्रसंगेना
मानकत्वादितिचेत्‌·एवंक्वचिदीश्वरानुमानेकर्त्रैक्यमपिनभासेत·नवलाघवोपनीतभानसाम
ग्रीप्रमाणमात्रसहकारिणीतितदुपनीतंभासतइतिवाच्यं।तस्याअपिस्वतंत्रायाअजनकतया।
प्रत्यक्षादिसामग्रीसहितायाएवजनकत्वाभ्युपगमप्रसंगात्‌।तस्याश्चप्रकृतेव्याप्त्यादिरूपा
याअभावात्‌नचव्याप्त्यादिसाहित्यमात्रंविवक्षितंननुतद्व्याप्त्यादिसामग्रीसाहित्यंगौरवादि
तिवाच्यं·अत्रापितुल्यत्वात्‌।यथाचतत्रैकत्वंभासतेतथावक्ष्यतइत्यपरितोषादाह·अपिचेति·तु
ल्यमिति।तथाचोद्देश्यानुमितेराभासत्वाभावात्तदाभासत्वप्रयोजकत्वेनापितन्नोपनीतभानपक्षे
पिबाधोदोषः।उद्देश्यानुमितिप्रतिबंधकतयातदाभासताप्रयोजकतयाचाहेत्वाभासताभ्यु
पगमादितिभावः।तत्रबाधकानमिति।तथाचबाधकगताभासत्वस्यैवसामान्यतोदृष्टाभास

त्वप्रयोजकत्वाद्बाधरूपोदोषइतिभावः।वाधस्येति।वाधकगताभासस्येत्यर्थः।वह्नित्वादिकमे
मेति।वह्निरनुष्णइत्यनुमानइतिभावः।तर्हीति।हेतौसाध्याभावव्याप्यसामानाधिकरण्यभास
मानेपक्षेसाध्याभावव्याप्यवत्त्वस्यापिभानात्सामानाधिकरण्यस्यतदधिकरणाधिकरणत्व
रूपत्वात्।अन्यथाविरोधिविषयत्वाभावादितिभावः।अनैकांतिकत्वमेवेति।वस्तुतःसाध्याभाव
189 व्याप्यवुद्धेरनन्यथासिद्धत्वंनसाध्यव्याप्यवुद्धेरन्यथासिद्धत्वंविना।अन्यथासत्प्रतिपक्षस्येवसत्व १८९
प्रसंगात्।तथाचतद्देवतत्रदोषेनतूक्तरूपोवाधः।तेनरूपेणाक्तविदपिप्रतिवंधकत्वाकल्पनात्
एवंनमाणिमंत्रादिवत्भयप्रतिवंधकत्वमितिभावः।हेत्वाभासांतरतापत्तेः।पक्षनिष्ठसाध्याभा
वस्येतिशेषः।तस्यत्वदभ्युपगतवाधानंतर्भूतत्वादितिभावः।स्वरूपसतएवप्रतिवंधकत्वादिति।
साध्याभावप्रमावाधइतिमतेनेदंवोध्यं-अन्यत्रेतिप्रत्यक्षादावित्यर्थः।तत्रैवतथादूषकत्वकल्प

नेगौरवमिति भावः ज्ञानमात्रादिति ज्ञानमात्रस्यार्थनिश्चयरूपत्वे प्रामाण्यग्रहे वैयर्थ्यात् नित्रैवक्त
धाद्भ्रमकत्वे भ्रमत्वेनापि ज्ञायमानस्यार्थनिश्चयत्वप्रसंगश्चेत्यर्थः। तथा चेति। अत्र पक्षे साध्याभावनि
श्चयो यदि व्यभिचारज्ञानत्वेनैव दोषो वा तदा तदुपजीव्यतेन पक्षे साध्याभावज्ञानप्रामाण्यनिश्च
योऽपेक्षणीयः। यदि बाधत्वेनैव दोषो वा तदा तदुक्ताधिकबलरूपत्वेन सोऽप्यपेक्षणीय इ
त्याशयेनोपजीव्यत्वेनाधिकबलत्वेनेति विकल्पतर्कः। अधिकबलेन चेत्यत्राधिकं बलं दृढत्वं चेति
कर्मधारयः। न तु बहुव्रीहिः। तेनाधिकबलवत्त्वस्य प्रामाण्यनिश्चयधर्मलाभ इत्यवधेयमित्याहुः।
व्यभिचारो व्यभिचरेन्निश्चयः उपजीव्यत्वादिति। ननु पक्षे साध्याभावज्ञानस्य प्रामाण्यं साध्याभा
ववति साध्याभावप्रकारकत्वं तथा च तन्निश्चयोऽपि पक्षे साध्याभावनिश्चय एव अन्यथा पक्षे नि
ष्ठसाध्याभाववत्त्वांशाविषयत्वाभावेन तस्यानुमितिविरोधिताया अप्यसंभवात्। एतेन यत्र विशे

व्यावृत्त्यप्रकारकत्वादिरूपप्रमात्वग्रहादधिकबलवत्त्वं तत्र व्यभिचाराविषयत्वमित्यपास्तं । तथा
सति विरोध्यविषयकत्वेन प्रतिबंधकासंभवात् तस्मात्तस्यापि साध्याभावसहचरितहेतुविषयत
या व्यभिचारज्ञानत्वेनैव दोषत्वमुपेयं । ननु साध्याभावज्ञानप्रमात्वज्ञानत्वेन तथा प्रतिबंधक
190 त्वाकल्पनात् । तज्ज्ञानस्यैव व्यभिचारज्ञानतयाउपजीव्यत्वस्याप्यभावात् । यदि तन्निश्चये हेतुर्न
भासते तदाऽसिद्धिरेवेति चेत् । न । यत्र परामर्शानंतरं पक्षे साध्याभावज्ञानस्य प्रमात्वस्मरणं शब्दे १९०
न वा तत् ज्ञानं तत्र तस्य हेतुत्वविषयतया व्यभिचाराविषयत्वात् । न चैतदाऽसिद्धिसांकर्यमेवेति
वाच्यं । परामर्शस्य हेतुविषयकस्य तदानीमपि सत्त्वेन तदसंभवात् । किंच शाब्दादेः तज्ज्ञानस्य त
त्वेनैव प्रतिबंधकत्वकल्पनाद्व्यभिचारादिसांकर्यमपि न दोषत्वं । मणिमंत्रवदुभयोरपि प्रतिबं
धे तद्रूपसामर्थ्येन विनिगमकाभावात् । अपि च परामर्शानंतरकालीनस्य तज्ज्ञानस्य यदि न बाधकत्वेन

साक्षात्प्रतिवंधकत्त्वं कल्प्यते तदाव्यवहितोत्तरक्षणाविनश्यदवस्थेन परामर्षेणानुमितिजनकत्वं नापत्तेः·
व्यभिचारज्ञानस्य परामर्षविघटकस्य तस्मिन्सत्यकिंचित्करत्वात् न वा परामर्षोत्तरं व्यभिचारज्ञानावका
शोपि। अव्यभिचरितसामानाधिकरण्यरूपव्याप्तिविषयकपरामर्षस्यैव व्यभिचारग्रहपरिपंथिकत्वा
त्। भावाभावज्ञानयोरन्योन्यं प्रतिवंध्यप्रतिवंधकभावदर्शनात्। यत्र च पक्षतावच्छेदकसाध्यसामा
नाधिकरण्याभावग्रहस्य पांडुरवह्निमानित्यादौ पक्षीयवह्निमात्रविरहस्य वा ग्राह्याभावग्रहत्वेन
नुमितिप्रतिवंधकत्वं तत्र तज्ज्ञाने हेतुविषयत्वेपि साध्यतावच्छेदकावच्छिन्नसाध्याभावसामानाधि
करण्यरूपव्यभिचारविषयत्वासंस्पर्शाद्धारस्य व्यभिचारासंकीर्णत्वाच्च। एतेन पक्षे साध्याभाव
ज्ञानप्रामाण्यस्य ज्ञानं न प्रत्यक्षेण तस्य परतो ग्राह्यत्वात्। किंत्वनुमानेन· तच्च पक्षनिष्ठसाध्यव्या
प्यवत्त्वग्रहेण सत्प्रतिपक्षितं साध्याभाववत्त्वघटितस्य तत्प्रामाण्यस्य ग्रहे कथं समर्थं स्यात्। नच

नुमानयोः पक्षभेदे कथं सत्प्रतिपक्षत्वमिति वाच्यं। विषयविरोधस्यैव तंत्रत्वेन पक्षाभेदस्यातंत्रत्वा
दित्यपास्तं। स्मृत्यादिरूपस्य प्रमात्वग्रहस्य संभवात्। अत्रेदं चिंत्यं। भवतु बाधस्य व्यभिचारः सांक
र्य्यं तथापि तत्प्रमात्वज्ञानं नानुमितिप्रतिबंधकं मानाभावात्। विरोधिज्ञानस्य सत्प्रतिपक्षादौ
।९। तथा प्रतिबंधकत्वाकल्पनात्। किंतु स्वरूपसत्साध्याभावज्ञानमेव नन्वेवं पीतत्वमनुमानं तद
संखत्वादिनाऽपीतत्वानुमितिर्न स्यात्तया प्रामाण्यशंकाशून्यज्ञानं प्रतिबंधकं तच्छंकाया १८१
स्तत्रोत्तेजकरूपत्वात्। साध्यज्ञाने सिसाधयिषावत् पीतत्वभ्रमस्याऽप्रामाण्यशंकास्कंदितप
वऽन्यथा पीतत्वानुमितेरनुत्पत्तेरिति वाच्यं। एवं हि पीतत्वज्ञानेऽप्रामाण्यसंदेहो न स्यात्। त
स्याऽपि शंखे पीतत्वाभावसंशयपर्य्यवसन्नतया तत्पूर्वं तदनास्कंदितत्वेन पीतत्वज्ञाने नैव नि
वर्त्तनीयत्वात्। एवं चाप्रामाण्यानुमितिरपि सा न स्यात्। तस्मादनन्यगत्याऽप्रमात्वग्रह एव प्रति

वंधकइतिचेन्न॰ न॰ अप्रामाण्यग्रहसामग्र्या अप्युत्तेजकरूपत्वात्। उत्तेजकत्वप्रतिवंधकत्वयोः फल
वलकल्प्यत्वात्। तथा च तदसंवलितस्य साध्याभावग्रहस्य प्रतिवंधकत्वमतानोक्तदोषलेशाव
काशः। न चातादृशसाध्याभावग्रहापेक्षया तत्प्रमात्वग्रहस्य लाघवात् प्रतिवंधकत्वं तस्याभावा
घटितत्वादिति वाच्यं तस्य गुरुत्वेप्यावश्यकत्वात्। अन्यथा साध्याभावज्ञानप्रमात्वज्ञानं यत्राप्रा
माण्यशंकास्कंदितं तत्राप्यनुमितिप्रतिवंधापत्तेः। न च तत्प्रमात्वज्ञानमपि प्रमात्वेन ज्ञातं प्रति
वंधकमिति वक्तुं शक्यं। अनवस्थाप्रसंगात्। एवं रजतेनेदं रजतमिति ज्ञानेपि विशेषदर्शनेन यत्र
रजतत्वग्रहस्तत्रापि रजतत्वाभावग्रहस्याप्रामाण्यशंकास्कंदितत्वेनैवाप्रतिवंधकत्वं अन्यथा
रजतत्वग्रहानुपपत्तेः। ननु विरोधिविशेषदर्शनस्याप्युत्तेजकतया तत्संवलितस्याप्रतिवंधकत्वे
तथा सति वाधस्यानुमितिप्रतिवंधकत्वानापत्तेः। तृतीयलिंगपरामर्शरूपविशेषदर्शनरूपोत्तेज

192

कसंवलिततया तस्याऽप्रतिवंधकत्वात्। यदि नैवं तदाऽप्रामाण्यशंकास्कंदितस्यापि पीतत्वानु
मिताव प्रतिवंधकत्वाद्व्यभिचारज्ञानस्यानुपि प्रमात्वेनैव ज्ञानस्य प्रतिवंधकत्वं कल्प्येत। किंच-य
त्र योग्येऽयोग्ये वा लिंगेऽनुमितिरूपसामग्र्यनंतरं व्याप्यत्वासिद्धिनिश्चयस्तत्र तन्निश्चयस्य वा
धत्वेनैव प्रतिवंधकत्वं वाच्यं। तथा च तत्प्रमात्वाग्रहस्य व्याप्तिप्रतिवंधकत्वं न स्यात्। न स्याद्धेत्वा
भासतात्ज्ञाने सत्यप्यनुमित्युत्पत्तेः। तथा चासिद्ध्यादिष्वपि तज्ज्ञानप्रमात्वमेव तत्तद्धेत्वाभास: १९२
स्यात् ततश्च परामर्षविषयाभावत्वेन सर्वासिद्धिसंग्रहोऽपि साधुसमर्थितः स्यात् यदि च साध्या
भावग्रहस्य नानुमितिविरोधित्वं तदा विरोधिसामग्रीत्वेन सत्प्रतिपक्षस्याप्यनुमितिविरोधित्वं
न स्यात्. ननु प्रमात्वेनाग्रहीतमपि साध्याभावज्ञानं प्रतिवंधकं तद्ग्रहं विनाधिकबलत्वाभावादि
ति चेत्.न.ऽनन्यथासिद्धसाध्याभावग्रहत्वेनैव तदधिकबलत्वात्। न हि प्रमात्वग्रहाधीनमेवा

धिकबलत्वं अन्यत्र तथाऽदर्शनात्। किंतु स्वभावाधीनं· अत एवानुमानापेक्षया प्रत्यक्षस्याधिकब
लत्वेन तयोर्न सत्प्रतिपक्षत्वं· वस्तुतस्तु विरोधिविषयत्वे सत्यन्यूनबलत्वमेवानुमितिप्रतिबंधक
त्वतंत्रं। नत्वधिकबलत्वं अन्यथा सत्प्रतिपक्षज्ञानमपि प्रमात्वेनागृहीतं न प्रतिबंधकं स्यात्। नहि
संभवति विरोधिविषयत्वाविशेषेपि सामग्र्यादेव हि विरोधिविषयं साध्याभावज्ञानं तत्प्रतिबंधाय प्र
मात्वमपेक्षते न पुनः परंपरया विरोधिविषयं साध्याभावव्याप्यत्वज्ञानमिति नवतदपि गृहीतप्र
माण्यमेव प्रतिबंधकमिति वाच्यं। एवं च विरुद्धोभयव्याप्यद्वयज्ञाने प्रमात्वग्रहस्याशक्यत्वात्। अ
प्रसिद्धांताच्च अत एव साध्याभावज्ञानमुक्तरूपं बाधनिश्चयः स्यात्। तदा सत्प्रतिपक्षस्थल इव
नैकस्मिन्नपि फलोदयः स्यात् विरोधिज्ञानविद्यमानतायाः अविशेषात्। तथा च बाधेनाधिकब
लवत्त्वमन्यहेतोरित्यपि गतमित्यपास्तं। उक्तरूपत्वेनैव बाधस्याविकलत्वात् ननु यदि साध्याभ

वज्ञानंस्वरूपसदेवानुमितिप्रतिवंधकं।तदातद्धेत्वाभासोनस्यात्।ज्ञायमानप्रतिवंधकस्यैवहेत्वा
भासत्वेनग्रंथकृदभिमतत्वादितिवेत्।न-दुष्टत्वात्पक्षेसाध्याभावस्यैववाधत्वात्।तस्यवज्ञाय
मानस्यप्रतिवंधकत्वात्।अतएववाधेपिपक्षेविषयापहारइतिसिद्धांतप्रवादोपिअन्यथापराम
193 र्शानंतरमप्रामाण्यशंकाशून्यसाध्याभावग्रहेप्यनुमितिःस्यात्नवतत्प्रमात्वग्रहादेवतत्रानु
मितिप्रतिवंधइतिवाच्यं।तत्प्रमात्वग्रहस्यानुमितिरूपतयापक्षज्ञानपरामर्शाद्यधीनतयावि १८३
लंवितत्वेनानुमितिसामग्रीवलवत्तयावानुमितिरेवोत्पत्तेः।अतएवशाब्दादौतथादर्शनादित्या
प्यसंगतं।उक्तयुक्त्यातत्रापिप्रमात्वग्रहस्याप्रतिवंधकत्वात्।नचैवमत्रसाध्याभावप्रमेतिज्ञा
नादनुमितिप्रतिवंधोनस्यादितिवाच्यं।तज्ज्ञानस्यापिसाध्याभावविषयतयानियतत्वेनतेनैव
रूपेणाप्रतिवंधकत्वात्अन्यथाविरोधिविषयत्वाभावेनाप्रतिवंधकत्वादिति।एतमेवापरितं।

षंहृदि निधायाह॒ पक्षतावलेन प्रसिद्धमित्यादि। अत्र वाधपदं साध्याभावपरमतो नोक्तदोषावका
शः। अत्र व्यभिचाराद्यभावादेव वाधस्य न तज्ज्ञान सांकर्यशंकास्पदमिति भावः। अत्रवदंति। प्रसि
द्धस्य पक्षान्यवृत्तिसाध्यस्य सिद्धौ भ्रमरूपानुमितिः स्यात्। तथा च यवांकुरं प्रतिक ⁀ मरीज्ञस्येव
भ्रमरूपानुमितिविशेषं प्रतिसत्य परामर्शस्याकारणत्वादेव ततो न सिं प्रंद्ध साध्यानुमितिः। न
तु वाधात्। अन्यथा समान प्रकारकज्ञानस्य विरोधित्वाद्वह्नित्वेन रूपेणावाधानवगमात् प्रसि
द्धापि वह्निः पक्षे भासेतेव। पक्षान्यवृत्तिसाध्यं पक्षे नास्तीत्यादि रूपवाधस्य भिन्न प्रकारत्वात्
न च समान प्रकारकत्वमेव नेति वाच्यं। एवं हि पर्वते पर्वतेतर वह्निरत्र नास्तीति ज्ञाने लिंग परामर्षे
अनुमितिर्न्न स्यात्। पर्वतीयवह्नेरभावात्। पक्षातिरिक्त वह्नेर्वाधितत्वात्। न चेष्टापत्तिः। दृश्यमान
प्रवृत्त्यादिविरोधात्। तथा च तत्रानन्यगत्या तादृशं वह्निवाधमवधूय तद्धित्वेन रूपेणावाधित प्र

वपक्षातिरिक्तवह्निभिसितद्रूत्यकपेयं। तस्मात्सत्यस्थलेपि न तादृशबाधस्य प्रतिबंधकत्वं किंतु तादृश
साध्यविषयकत्वानुमितेर्भ्रांतत्वनियमेन तज्ज्ञानकदोषस्य वा यथार्थपरामर्षस्य तत्राभावान्न तदनुमि
तिरितिमेवं। अयथार्थपरामर्षस्य दोषत्वाभावात्। अन्यथाह्रिकर्तृके घटे कार्यत्वेन सकर्तृकत्वा
नुमितिर्लाघवभ्रमेण एककर्तृकत्वविषया भ्रांतिर्न स्यात्। धूमाव स्यात्। वह्निमति पर्वते वाष्पे
194 धूमभ्रमाज्जायमानानुमितिर्भ्रांता वह्न्यंशेपि स्यात्। अतएव न यथार्थपरामर्षस्य गुणत्वं। गंधप्रा १९४
गभावावच्छिन्ना पृथिवीत्यत्र बाधानवतारदशायामनुमितेर्भ्रांतत्वानुपपत्तेश्च। तस्मादबाधित
त्वप्रमागुणाः। तद्भ्रमश्च दोषः। न चैवं प्रसिद्धवह्नेरबाधितत्वभ्रमाभावादेव पर्वतेनमानं नतु
बाधादिति वाच्यं। बाधस्य तत्रोपजीव्यत्वात् अन्यथा व्यभिचारज्ञानादेरपि प्रतिबंधकत्वं न स्यात्
तस्मिन्सति परामर्षाभावादेवानुमितिप्रतिबंधात्। न चाबाधितत्वज्ञानस्यानुमितिजनकत्वे मानाभा

वः।बाधस्यप्रतिबंधकतयातदभावस्यैवहेतुत्वात्।प्रत्युतबाधितत्वज्ञानस्यसाध्यगुरुरूपपर्य्यवसन्नत
यासिद्धसाधनापत्तेरितिवाच्यं·संशयनिश्चयसाधारणस्यैवतज्ज्ञानस्ययोग्यताज्ञानवत्कारण
त्वाभ्युपगमात्।गुणानुरोधेनैवतज्ज्ञानकारणत्वकल्पनाच्च·अन्यथाऽयोग्यताज्ञानस्यशाब्द
ज्ञानप्रतिबंधकतयातदभावस्यैवतत्कारणत्वापत्तौयोग्यताज्ञानकारणत्वानुपपत्तेः।अभाव
कारणत्वापेक्षयाभावकारणत्वस्यलघुत्वाच्च।नचप्रत्यक्षेऽनवस्थाभियातज्ज्ञानस्याकारण
त्वाद्बाधज्ञानाभावस्यैवप्रतिबंधकाभावतयाकारणत्वकल्पनादन्यत्रापितथेतिवाच्यं·तत्रप्रत्य
क्षबाधमात्रस्यैवप्रतिबंधकतयातदभावस्यप्रत्यक्षंप्रतिकारणत्वकल्पनेपिबाधज्ञानसामान्या
भावस्यानुमितिप्रतिहेतुत्वमत्रैवकल्पनीयंतथाबलाघवावतारात्।अतएवाबाधितत्वादिबोध
नायनिगमनमितिसिद्धान्तेपितद्धेतुत्वानभ्युपगमेपिपक्षतावच्छेदकावच्छेदेनपक्षेसाध्याभावव

३ १ २
त्तिलिंगस्यज्ञानेदोषत्वंतद्वत्तिलिंगज्ञानस्यगुणत्वंतथाचप्रसिद्धानुमितिजनकदोषस्यसत्त्वाद्बा
धादेवप्रतिबंधः।समानविषयत्वेनचज्ञानस्यविरोधित्वस्यावश्यकत्वात् ननुसमानप्रकारकत्वे
105 नापिविरोधित्वंगौरवात् अन्यथापक्षेपक्षीयःपक्षातिरिक्तवृत्तिश्चर्ववह्निर्नास्तिवह्नौपक्षवृत्तित्वं
नास्तीत्यादिबाधानंतरमनुमितिःस्यादेववह्नित्वप्रकारिकाबाधस्यभिन्नप्रकारकत्वेनाविरोधात्
नचैवंभ्रमानुमितेरनुत्पत्तिः।पक्षान्यवृत्तिरेववह्निरित्यवधारणोदृष्टापत्तेः।तदनवधारणेतुवह्नि १८५
त्वेनज्ञानस्यतत्रारोपात्।वह्नित्वेनज्ञातंपर्वतत्त्वादिकंसंभवत्येव·ज्ञानंचसंशयादिसाधारणं।
वह्निमत्त्वेनज्ञातस्यअभेदारोपाद्वापर्वतस्यापिवह्निमत्त्वेनसंशयविषयत्वात्।यत्तुदोषप्राबल्ये
नबाधमवधूयभ्रमोत्पत्तेःपीतःशंखइत्यादावेवनिर्णयाद्बाधितोपिदोषबलाद्वह्निर्भासतइति।
तन्न·तथासतिबाधस्यप्रतिबंधकत्वेमानाभावात्।तस्मिन्सत्यप्यनुमितेः।तादृशदोषाभावादेव

सत्यस्थले प्रसिद्धाभानोपपत्तेः। अत एव नीतः शंखवदित्यत्रापीनत्वानुमितिरूपबाधस्याप्रतिबंधकतया
प्रत्यक्षबाधत्वेन प्रतिबंधकत्वं कल्प्यते। असाधकतायां वह्न्यनुपरागेणायद्यप्यस्तिलिंगत्वं प्रतिबंधकत्वेय
त्तद्धेयर्थ्यं तथापि यावद्विषयत्वेन दोषत्वं तावदंतर्भावो हेतावस्त्येवेत्येकस्य तथात्वमिति विभावनीयं॥
कल्पांतरमाह साध्याभाववन्मात्रसहचार इति। साध्याभाववन्मात्रे सहचारो हेतु साध्याभावयोरिति
शेषः। क्वचित्साध्याभावमात्रसहचार इति पाठः स च सुगम एव। एवं चेति। एवं च रूपप्रागभावावच्छिन्नो
घटो रूपवान् घटत्वादित्यादौ पक्षशरीरभूते धर्म्मिणि रूपात्यंताभावाभावान्न व्यभिचार इति प्राग
भावरूपसाध्यविरहज्ञानमेव तत्रानुमितिप्रतिबंधकं। अतो बाध एव तत्र दूषणमिति भावः। ननु रूप
प्रागभावविशिष्टो घटादिस्तत्र पक्षस्तत्र रूपात्यंताभावो न तु तत्प्रागभावः विशेषणांशे पक्षे वा तत्ते
तथा च तत्र व्यभिचार इति चेत्। न। प्रागभावपदस्य स्वसमयपरत्वात्। अत एवानुपदमेव तथा विभा

196

वयिष्यति॰ तथा च तत्समये रूपप्रागभाव एवातो न व्यभिचारः। अत एव रूपप्रागभावे विशेषणोद्घ
टत्वादेरभावाद्विशिष्टस्वरूपासिद्धिरेव॰ तस्य चोपलक्षणत्वे सिद्धसाधनमेवेति निरस्तं। तत्समय
स्य विशेषणत्वात् तत्र च घटत्वादेः सत्वात् यद्यपि तत्समयरूपविशेषणेपि रूपांतरसत्वाद्विशि
ष्टेपि न वाधः किंतु सिद्धसाधनमेव तथाप्येकस्य कस्यापि रूपस्य विशिष्टवृत्तित्वे तत्र वाधः। तद्घ
टत्वेन तद्घटीयरूपसाधने तथाप्यप्रतीकार एवेति भावः। ननु साध्यात्यंताभाववद्गामित्वं न व्यभि १८६
चारः। द्रव्यत्वेन गुणानुमानापत्तेः। न च साध्यतावच्छेदकावच्छिन्नतदत्यंताभाववद्गामित्वं तदिति
वाच्यं। एतद्घटसत्वादिना संयोगविशेषानुमानापत्तेः। न च प्रतियोग्यसामानाधिकरण्यमपि वि
शेषणं। तर्हि तादृशाभाववद्गामित्वमेव व्यभिचारोस्तु किमत्यंताभावपर्यंतग्रहणेन। रूपप्राग
भावस्य प्रतियोगिसमानाधिकरणतया तावतापि पक्षे व्यभिचारशंकावारणादिति चेत्॰ न॰ अत्यं

तामावपदस्यैवतत्रतात्पर्य्यात्। नवरूपप्रागभावसमयविशिष्टघटेकदापिरूपानुत्पत्तेः प्रतियो
ग्यसमानाधिकरणसाध्याभावसत्वाद्व्यभिचारइतिवाच्यं। एवंहिप्रथमक्षणविशिष्टसर्वगुणानुत्प
त्तेस्तादृशसाध्याभावसत्वाद्व्यभिचारप्रसंगेनद्रव्यत्वेनापिगुणानुमानभंगप्रसंगात्। तस्माद्विशे
षणांतरावच्छेदेनतादृशसाध्याभावोनव्यभिचारप्रयोजकः। अतिप्रसंगात्। ननुरूपप्रागभाव
समयावच्छेदेनरूपसाधकाभावादेवनरूपानुमितिर्नन्तुवाधात्। नवपक्षधर्मतायाः पक्षतावच्छे
दकविशेषणावच्छेदेनपक्षेसाध्यसाधकत्वात्तद्वलमेवतत्साधकमितिवाच्यं। पक्षधर्म्मताद्विलिं
गस्यपक्षेवृत्तिरेवसावसाध्यसामान्यव्याप्तिमतस्तस्यपक्षीयंसाध्यविशेषंविनानुपपन्नेत्यतोव्याप्या
सरूपरामृष्यमाणापक्षसंवद्धंसाध्यंसाधयति। ननुपक्षतावच्छेदकत्वेनयदुपादीयतेतदवच्छेदेन
साध्यस्यपक्षसंवंधंवीनाभावात्। तंविनातस्यानुपपन्न्यभावात्। तदवच्छेदेनपक्षेसाध्यसंवंधंविनाप्रकृ

तेघटत्वादिहेतोर्व्याप्तिपक्षधर्म्मतायाउपपन्नत्वात्।स्वभावादेव सा तस्य तं साधयतीतिराजनिदेशमा
त्रत्वात्।तथाचपक्षधर्म्मताबलेनसाध्यस्यपक्षतावच्छेदकधर्म्मिसामानाधिकरण्यमर्थवशात्संपन्नंसि
ध्यति।तत्कृतयोःपक्षेऽधिकरणेनानावच्छेदेनापिवृत्तौनिर्वहत्येवअतएवपक्षधर्म्मतानुपपत्तिनि
157 रासमात्रस्समेवसाध्यंपक्षधर्म्मताबलात्सिद्ध्यतिनचन्यायादृशामपीत्याचार्य्यचरणैरुक्तं।अत
एवचपरिमलेजगद्गुरुणोक्तं।उत्पत्तिकालीनोयंघटोरूपवान्घटत्वादित्यत्रहेतुर्वाधादेवदुष्ट १८७
इतिचेतन।अनुत्पत्तिकालीनस्यैवकदाचिद्रूपवत्त्वेनबाधाभावात्।पक्षविशेषणेनतुतत्सामानाधि
करण्यंसिध्यतीति।अतएवपक्षधर्म्मताबलात्पक्षतावच्छेदकधर्म्मिसामानाधिकरण्यंसाध्यस्य
सिध्यतीत्यत्राधिकरणेदेशकालावुभावपिविवक्षितौतेनयदायत्रपक्षतावच्छेदकंतदातत्रसाध्यं
सिध्यतिअन्यथातत्कालीनवह्न्यर्थिपुंवृत्तिर्नस्यादितिपरास्तं।तत्कालीनसाध्यंविनापक्षतायाउपप

न्नत्वेनतादृशस्वभावाकल्पनात् ।स्वकीयविवक्षामात्रस्यातिप्रसक्तिकरत्वात् तत्कालीनवह्निसिद्धेश्च
कालिकव्याप्तिग्रहादप्युपपत्तेः ।नचयथाशाब्देतात्पर्यवशेनक्वचिदेकस्यरूपयंञ्चविद्धिशिष्टवैशिष्ट्यं
चेतिरूपान्वयबोधेद्वेविधे · तथानुमित्सावशादनुमितावपिद्वेविधमितिवाच्यं ।सिसाधयिषायाः पक्ष
ताशरीरनिष्पादकत्वेनान्यथासिद्धतयाव्यभिचारेणावाऽनुमितावहेतुत्वात् ।नवानुमितिविशेषेत
द्धेतुत्वंमानाभावात् ।पक्षतायाश्चहेतुता ।।तात्त्वेतिचेत् ।अत्राहुः ।प्रमाणस्यायंस्वभावोयद्बाधकंविना
विशिष्टवैशिष्ट्यज्ञानमेवजनयति ।अरुणायेत्यादिशब्दस्थलेतथादर्शनात् ।तथावज्ञानसामग्रीबला
देवतदवच्छेदेनानुमितिः साध्यस्यस्यात्धिबाधोनदोषइति ।अवच्छेदकइति ।एतच्चयथाश्रुतमभिप्रे
त्योक्तं ।प्रागभावपदस्यस्वसमयपरत्वेऽप्रसिद्ध्यसंभवादितिद्रष्टव्यं ।तर्हीति ।सिद्धसाधनंस्यादुद्देश्यसिद्धे
भवतिःउद्देश्यंवात्रप्रागभावसमयावच्छेदेनघटेरूपवत्त्वंतत्रसिद्धिश्चेत्तदाप्रागभावप्रतियोगिनोरेकका।

ललापि स्यादित्यर्थः। प्रागभावश्च प्रध्वंसश्च प्रागभावप्रध्वंसं तच्च प्रतियोगीव प्रागभावप्रध्वंसप्रतियो
गिनोः तयोरित्यर्थः। अन्यथेति। एकवृत्तितामात्रेण परस्परावच्छेदेनापि वृत्त्यभ्युपगमे संयोगादि
198 नद्व्यत्यंताभावयोरप्यव्याप्यवृत्तित्वं भज्येतेत्यर्थः। ननु साध्याभावनिश्चये संशयादिघटितपक्षतावि
रहादसिद्धिरेव दोषं स्यात्। ननु बाधइत्यत आह। असिद्धेरपीति। असिद्धेः पक्षासिद्धेः। तथाबोपजी १९८
व्यत्वाद्बाधएव तत्र दोषो नासिद्धिरिति भावः। इदं च प्राचीनमतेन। वस्तुतो बाधेपि न पक्षताविरहइ
ति ध्येयं। सिसाधयिषितेति। एतदपि संप्रदायमतेनैव। ग्रंथकृन्मते तस्य साक्षात्प्रतिबंधकत्वेपि ज्ञा
यमानस्य न प्रतिबंधकत्वमिति न हेत्वाभासत्वं। ननु तथापि साध्यं हेत्वाभासोस्तु। तस्य ज्ञायमान
स्य प्रतिबंधकत्वादिति चेत् न। यन्निश्चयो ह्यनुमितिप्रतिबंधाय नान्यदपेक्षते तस्यैव हेत्वाभासत्वं। सा
ध्यं च न तथा। तन्निश्चयेन तदर्थं सिसाधयिषाविरहापेक्षणात्। अन्यथा श्रवणानंतरं मननाभावप्रसंगा

दित्यादिः। ननुवेति। तथा च रूपप्रागभावादिरूपो बाधोपि न दोष इति भावः। रजतनिश्चयादिति। विशेषदर्शनेनेति शेषः। प्रत्यक्षप्रमेति अप्रमा। संशयाकाङ्क्षाशून्यं प्रत्यक्षमित्यर्थः। अनुमितौ त्विति। प्रमाण्यग्रहणं वा स्तव्य बाधामि प्रायेण अप्रामाण्यशंकाशून्यमभावज्ञानेमात्रमेव प्रमा भ्रमसाधारणं ननु प्रमात्वमपितत्रनंत्रमित्यर्थः। बाधश्च यद्यपि साध्यात्यंताभावसाध्यप्रागभावसाध्यसंबंधाभावसाधारणत्वादिरूपतया नेकस्तथापि प्रतिरोधातिरिक्तत्वे सामान्यादनुमितिप्रतिबंधकज्ञानविषयतावच्छेदकत्वेन स्वरूपसतानुगतत्वात्सम्यमिवारवदेक एवेति बोध्यं। आगमेनेति। नारं स्पृश्द्यस्थिसस्नेहं सचेलो जलमाविशदित्यादिनेत्यर्थः। राजेति। स्वाराज्यकामो राजा राजसूयेन यजेत ब्राह्मणो वाजपेयेनेति श्रुत्या क्षत्रियकर्तव्यताबोधिकया अर्थाद्ब्राह्मणकर्तव्यतानिषेधादित्यर्थः॥ ॥

प्रसंगसंगत्याह हेत्वाभासानामिति। तथा बाधकत्वाज्ञानेसदुत्तरत्वापरिचयेहेत्वाभासनिर्वचन

मेवानिरर्थकमापद्येतेतिभावः।किमिति।तथावासाधकतासाधकत्वंनसदुत्तरत्वमितिभावः।परेति।
परेणायामनुमितिमुद्दिश्यप्रयोगःकृतस्तत्प्रतिबंधकइत्यर्थः।तत्राद्यमिति।तथाचतदर्थमिदमनैका
न्तिकमित्येवोद्भाव्यमित्यर्थः।द्वितीयंत्विति।इदमसाधकमनैकांतिकत्वादितिक्रमेणालिंगत्वेना
199 भिधानादित्यर्थः।तथाचकथवसंप्रदायानुरोधादत्यंताशक्तिरव्यापरणार्थंतदुद्देश्यमितिभावः।
पक्षधर्म्मेति।यद्यप्यसाधकतानुमानेविरुद्धत्वादित्यादिकमेवप्रयोज्यंनतुपक्षधर्म्मतापिधूमवत्त्वा १९८
दित्यत्रैवानाकांक्षितत्वात्।तथापिविरुद्धोपमितिप्रथमोद्भावनमभिप्रेत्येदंद्रष्टव्यं।विरुद्धंवेद
मित्यत्रापनयैकदेशैःपक्षधर्म्मतोपदर्शनायकार्य्यएवेत्याहुः।अबाधितत्वादिबोधनायकिमि
तिनिगमनंनक्रियतइतितुचिंत्यं।केचित्तुउदाहरणंविनाचत्वारोवयवाःकर्त्तव्याएव·पक्षधर्म्मताया
एवेतिएवकारव्यवच्छेद्याव्याप्तिरित्याहुः।अधिकेति।अनाकांक्षिताभिधानापत्तेरित्यर्थः।सभयेति।

एतेनसामयिकत्वप्रदर्शनेनयत्रनसमयस्तत्रासाधकासाधनंनक्रियतइतिसूचितं।आवश्यकत्वा
दिति।अन्यथावादिप्रतिवादिनोस्तादृशसमयकरणमेवासंभवि।असाधकताव्याप्येनदूषणेनतत्र
साधनासंभवादितिभाव।यस्त्विति।व्याप्यमात्रानंगीकर्त्ताचार्वाकादिरित्यर्थः।बाधस्येति।दूषण
स्येत्यर्थः।बाध्यतेऽनेनेतिव्युत्पत्तेः।दूषणत्वमिति।असाधकत्वव्याप्यत्वमित्यर्थः।कर्त्तव्यएवेति।एवका
रोभिन्नक्रमः।तथाचतंप्रतिदूषणत्वंप्रसाध्यैवपंचावयवप्रयोगःकर्त्तव्यः।विवादपदसाध्यसाधनायै
तिशेषः।तथाचासाधकतानुमानेऽत्रापिनोदाहरणंविधेयमितिभावः।स्वतोपिपरस्यकदाचित्परा
मर्षसंभवेनस्वकर्त्तव्यतयायथापंचावयवप्रयोगःक्रियतेतथाऽसाधकतानुमानेपिप्ररूपणंस्वव्यापा
रस्यकर्त्तुमुचितत्वादित्याह।यत्त्विति।कथेति।तथाचायसिद्धांतमपियापंचावयवप्रयोगस्तत्रनकार्य
इत्यर्थः।तेनविरुद्धादिनानस्वेनविरुद्धत्वेनेत्यर्थः।नत्वेतत्कालइति।दूषणज्ञानकालइत्यर्थः।त

थावत्कालीनं साध्यविशिष्टपक्षज्ञानाजनकत्वं असाधकत्वमिति लक्षणे तत्कालीनत्वभागस्य
विशेषणस्याग्रे सिद्धांतितया तत्कालीनत्वस्योपलक्षणत्वमालंब्य दूषयति· सद्धेताविति। सद्धे
तौ सत्प्रतिपक्षइति। असाधारणस्य संशयोत्थापकतापक्षे साध्यांशे तस्यापि प्रमात्वाद्व्याप्तिरे
वेति भावः। साध्याप्रसिद्धावव्याप्तिरित्यपि बोध्यं· अप्रसिद्धसाध्यके असिद्धावव्याप्तिरित्या
ह। साध्यप्रसिद्धाविति। इदमुपलक्षणं अवृत्तिसाध्यकेपि न दप्रसिद्धिरित्यपि द्रष्टव्यं। घटो मिथ् २००
यालोष्ठत्वादित्यादौ स्वरूपासिद्धे प्रकृतसाध्यानैकांतिकत्वाप्रसिद्ध्याऽसाधकत्वं न स्यादित्यर्थः
ह केवलेति। इदं वोपलक्षणं यत्साध्यनिरूपितं सत्प्रतिपक्षादिकं न जातं तत्साध्यकेऽप्रसिद्धसाध्य
केवासिद्धिदावव्याप्तिरित्यपि द्रष्टव्यं· अंशातइति। अनैकांतिकत्वाद्यनुतमत्त्वे साध्ये अनैकांतिक
त्वस्य साध्यांशस्य सिद्धस्यैव साधनादित्यर्थः। अथ तन्न सिद्धं तत्राह· साध्येति। असिद्धत्वेन साध्या

विशेषइत्यर्थः। यद्वा॰ ननु नानैकांतिकत्वाद्यन्यतमत्वं साधनीयं किंतु यत्रानैकांतिकत्वं तत्र तदेवासाधक
त्वं॰ यत्र वासिद्धत्वं तत्र तदेवासाधकत्वमिति न केवलान्वयिसाधनेऽनैकांतिकत्वाप्रसिद्ध्या कोपि दोष इ
त्यत आह॰ अंशात इति। असाधकत्वनिर्व्वचन इति शेषः। एवं सति सिद्धसाधनं साध्याविशेषश्चेत्यर्थः। य
त्विति। यत एव तत्कालपदेन व्यभिचारादिघटीकालो विवक्षितः। अत एव तत्पुरुषीयत्वमपि विशेषणं। ते
न सद्धेतु सत्प्रतिपक्षादौ पुरुषांतरीयतादृशाप्रमाकरणत्वान्नतिव्याप्तिः। अत एवाग्रे प्रतियोग्यप्रसिद्धि
वक्ष्यति। यद्यप्येतत्कालस्याभावविशेषणत्वेनाप्रसिद्धिस्तथापि जलह्रदे वह्निम। नित्यादौ पक्षविषयता
दृशाप्रमाया अप्रसिद्धिरेवेति। व्यधिकरणायोरिति। एतच्चतत्साध्यव्याप्यहेत्वंतरे यदा तत्पुरुषीयतादृशाप्र
माकरणत्वं नदावोध्यं॰ बाधेतदपि न संभवतीति ध्येयं॰ तन्मते नैव दूषयति॰ तन्नेति। तुल्यबलेति। विरुद्धाभ
यव्याप्तिपक्षधर्म्मताविषयतेत्यर्थः। तद्भ्रमस्येति। एकत्र विरुद्धाभयव्याप्तिपक्षधर्म्मतयोरभावात्तज्ज्ञा

नस्य भूमत्वनियमादित्यर्थः। हेत्वाभासलक्षणं च यथा सुस्थं तथोक्तं। धर्म्ममात्रस्येति। धूमादावपि व्यभि
चारिणमादायानयोरन्यतरांगवैकल्यमिति प्रामाण्यात्सत्त्वादनुमानमात्रोच्छेदापत्तिरित्यर्थः। नन्व
५७० न्यतरांगवैकल्यज्ञानं सत्प्रतिपक्षयोरसिद्ध्यादिसंशयाधायकत्वेन दूषणं स्यादेव। धूमादौ तु तज्ज्ञानं
न तत्संशयाधायकं विशेषदर्शनात् तद्दर्शनदशायां तत्रापि तज्ज्ञानादनुमितिप्रतिबंधकत्वस्येष्ट
त्वादित्यपरितोषादाह। अन्यतरेति अस्येति। यद्यपि हेत्वाभासत्वनियतमसाधकत्वं ज्ञानेनास्ति तथापि तद् २१
दशाज्ञानविषयत्वमसाधकत्वमिति मंतव्यं। एतदिति। एतद्धेतुविषयकानैकांतिकत्वज्ञानत्वादित्यर्थः।
अत एव तत्पुरुषीयेत्यपि विशेषणं। तेन परकीयतज्ज्ञानेन व्यभिचारः। केचित्तु तत्र साध्यसत्त्वान्न व्यभि
चारः। तस्यापि प्रतिबंधकत्वात्। न चैवं तथा सति तत्सत्त्वेऽनुमितिर्न स्यादिति वाच्यं। अत्र पुरुषे तादृशज्ञान
स्याभावादित्याहुः। अत्र च मते प्रकृतहेतोः प्रकृतसाध्यव्याप्यत्वस्य उभयसिद्धत्वाभावस्तादृशासमय।

भावादित्युदाहरणमपिकार्यमेव·मूलएवतत्रेषद्दर्शितमाह·एतदन्यत नवदिति।नव्ययत्रानेकांतिक
ज्ञानमन्यदानजातंतत्रद्दष्टातासिद्धिः।तत्रसामान्यव्याप्त्यभिप्रायेणतत्संभवादितिभावः।साध्येवेत
त्पक्षकेत्युद्देश्यसिद्धेः पक्षांतरेपितस्यानुमितिप्रतिबंधकत्वादित्यवधेयं।साध्यपक्षविषयानुमितीति
साध्यविशिष्टपक्षप्रत्ययेत्यर्थः।एकेति-गोत्वादिसाध्यकेत्यर्थः।अन्यतरत्वंभावत्वाभावत्वान्यतरत्व
त्लिंगतावच्छेदकंननुभावाभावान्यतरत्वंलिंगमित्यर्थः।प्रतियोग्यप्रसिद्धेरितिध्येयं तत्राप्तिमिति।
तद्धर्मावच्छिन्नव्याप्तिमित्यर्थः।साध्यव्याप्यत्वमेवेति।साध्यव्याप्यत्वमेवानुमितिविषयत्वेतंत्रं तथा
चभावोऽभावोवाउभयथापिप्रमेयमित्यनुमितोप्रमेयत्वव्याप्यत्वमेवविषयः स्यात्·तत्रचबाधो
नास्त्येवेत्यर्थः।वह्निव्याप्येति।इदंचाभ्युपेत्यसमाहितंवस्तुतोवह्निव्याप्याभेदेभासमानेवह्निव्या
पकत्वेनभासते·ननुकूटव्यापकेवह्नित्वंसामग्रीविरहादित्यवधेयं।नियमतइति।पक्षधर्मताविशिष्टयवि

षयत्वादित्यर्थः। तथा च येन रूपेण तादृशनिश्चयविषयत्वं तेन रूपेणानुमितिविषयत्वं साध्यं। अतः सं
देहविषयीभूते भावत्वादौ न व्यभिचारः। नियमत इति तादृशनिश्चयविषयोदासीनवृक्षादिव्यभिचारवा
२०२ रणाय। ननु तत्पक्षधर्मताज्ञाने नियमेन भासमानत्वं वृक्षादेरपि सर्वत्र तथात्वात्। पर्वतत्ववदित्यसंग
तमिति चेत्। न। यद्विषयत्वेन पक्षधर्मताज्ञानस्यानुमितिजनकत्वं तत्त्वस्य विवक्षितत्वात्। व्याप्तीति।
तत्रापि यद्विषयत्वेन व्याप्तिज्ञानस्य कारणत्वं तत्त्वस्य विवक्षितत्वान्न वृक्षादौ व्यभिचारः। एवमग्र २०२
पि। युक्तांतरमाह। किंचेति। अत्र मते पूर्वज्ञानोपनीतं वृक्षादिकमप्यनुमितौ भासत एवेति युक्तेस्तौ
ल्यात्। पूर्वकल्पे अनुकारणीभूतज्ञानविषयत्वेन यद्विषयत्वमिति तत्र न तद्विषयत्वमिति मंतव्यं।
शंकते विषयेति। ननु चरमकारणस्यापि पुनर्विबंधकसद्भावान्न फलजनकत्वं स्यादित्यत आह। पु
त्यक्षादीति तथा चानुमित्यनंतरमनुमित्यंतरमेव स्यान्न त्वनुमिनोमीत्यनुव्यवसायो न स्यात्। नुपन

यकाभावादितितन्नुक्तं-ज्ञानांतरोपनीतस्यापि धूमजन्यत्वस्यतद्विषयत्वसंभवात्। अन्यथालिंगभा

नपक्षेपिपरामर्षेणाधूमजन्यत्वानुपस्थापनात्तादृशानुव्यवसायासिद्धिप्रसंगात्। नचैवंवह्न्यषा

पश्यामिपदेनार्थमनुगच्छामीत्यनुव्यवसायवलाद्वह्न्यःपदयोश्चाक्षुषशाब्दज्ञानविषयत्वापत्ति

रितिाठ्ठ्मिति।लक्षणावाक्येसर्वांशसमीचीनसाध्यपुत्ययाजनकत्वमुक्तं-तच्चाक्षतमेवेत्य

र्थः। अस्तुतावदिति। अत्रेदंचिंत्यं। देवात्तत्रधूमसत्वेपिसनानुमितिविषयः।तस्यवह्निव्याप्यत्वेनापराम

र्षात्।तदुपनीतत्वेनवलिंगभानाभ्युपगमात्। अन्यथातस्यसद्धेतुत्वेनासंगाह्यत्वात्।तथाचवाष्पस्य

धूमत्वेनपरामर्षविषयत्वात्तदुपनीतस्यतस्यैवधूमत्वेनानुमितिविषयत्वं।अन्यथापरामर्षेपितत्रभ्रांते

नस्यादितितदंशेकथमनुमितेःसत्यत्वमिति। अत्रकेचित्।लिंगस्यानुमितौभानेमानाभावएव-नचो

क्तानुमानंतथाऽप्रयोजकत्वात्।नापिकारणीभूतज्ञानाभावत्वंतथाऽप्रयोजकत्वादेव-नन्वेकविशे

203

घणावत्त्वयाज्ञाने विशेषणांतरधीसामग्रीतएवविशिष्टवैशिष्ट्यप्रतीतीतिरित्युक्तमितियेतत्‌॰न॰पक्ष
विषयसाध्यानुमितित्वेनकार्यताव्याप्यत्वप्रकारकपक्षधर्मताज्ञानत्वेनकारणतां।।तथावलिं
गभानंप्रतिस्वरूपायोग्यत्वात्परामर्शस्यनततस्तद्विषयाऽनुमितिः।यथाप्रत्यक्षाद्युपस्थितमपि
शाब्दबोधेनविषयस्तथाप्रकृतेपिउक्तबाधकात्‌।नवलिंगविषयकत्वमपिकार्यतावच्छेदकमध्य
प्रविष्टंप्रमाणाभावादितिवदंति।तन्न॰एवंहिईश्वरानुमानेकर्तृकत्वमपिनविषयःस्यादित्युक्तं। २॰३
स्वसमानदशायामिति।विरुद्धाद्यन्यतमहेत्वाभासनोपाधिविशिष्टस्वप्रमादशायामित्यर्थः।।
श्रुतेविरुद्धत्वादिन्नमसादायसद्धेतावतिव्याप्तिः।सत्प्रतिपक्षस्थलेयेनसंबंधेनयथातत्प्रम
तथोक्तंहेत्वाभासलक्षणव्याख्यानावसरे।तद्दशावनोपलक्षणांकिंतुविशेषणं॰तेनसत्प्रतिप
क्षोत्तीर्णसद्धेतौनातिव्याप्तिः।तदासत्प्रतिपक्षत्वाभावेनतादृशप्रमाविरहात्‌।नवापदानतादृशप्रमा

किंतुविरुद्धोभयव्याप्तिपक्षधर्मतापरामर्षमात्रंतत्रतादृशप्रमाणविरहेणाव्याप्तिरितिवाच्यं।प्रतिप
क्षरूपदोषस्यपूर्वोक्तसंबंधनहेतुनिष्ठत्वेनतईश्वरप्रधानाऽप्यावश्यकत्वात्।एतेनतद्दशाविशे
षणत्वपक्षेऽनुज्ञायमानदशायांसव्यभिचारादोऽप्यव्याप्तिः।नचतदातस्यनासाधकत्वमितिवाच्यं।
तस्यहेत्वाभासत्वसमनियतत्वादितिनिरस्तं।अतएवनघटादिविरुद्धेकंदरादिवत्निविशेषेऽ
स्मदादावज्ञायमानेऽव्याप्तिः।नचैवंलिंगत्वभ्रमदशायांविरुद्धेऽव्याप्तिः।तदासाध्यप्रत्ययजन
कत्वादितिवाच्यं।किंचित्कालीनतज्जनकत्वाभावमात्रंसाध्यं।नचतत्रकिंचित्कालीनतज्ज
नकत्वविरहसत्वएवनिःप्रत्यूहं।एवंचयद्यपिवस्तुमात्रएवयथाकृतसाध्यसत्वाद्विरुद्धत्वादि
हेतोः।स्वरूपविवेचनेव्यर्थविशेषणत्वदोषप्रसंगस्तथापिहेत्वाभासत्वेनियतःपक्षगोचरसाध्य
प्रत्ययजनकत्वाभावःसाध्योऽत्राभिमतःसचनवस्तुमात्रनियतइतिनवैयर्थ्यमित्याहुः।तन्न।हेत्वा

भासत्वस्य साध्यप्रविष्टत्वेऽधिकस्य व्यर्थत्वात् । तद्धर्मा साधकत्वस्यानिरुक्तत्वात् तत्साधनेऽर्थान्तरा
च्च । अन्ये तु साध्यप्रत्ययाजनकत्वं साध्यप्रत्ययजनकतावच्छेदकरूपविरहः तत्प्रत्ययजनकताव
च्छेदकत्वं तु तत्प्रत्ययजनकज्ञानजनकतावच्छेदकत्वं तदवच्छेदकानि अव्यभिचारित्वादीनि
अबाधितत्वासत्प्रतिपक्षितत्वपर्य्यन्तानि । तज्ज्ञानकारणत्वस्य संप्रदायसिद्धत्वात् । अत एव २०४
निगमनमर्थवत् । एवं च सव्यभिचारित्वादिरेतत्पर्य्यवसितस्तथा सत्यपि यथा न साध्यविशेष
स्तथाप्याकार एव स्फुटः । एवमपि सद्धेतौ सत्प्रतिपक्षितत्वरूपतादृशावच्छेदकविरहस्य कद
चित्संभवेन सत्प्रतिपक्षितोत्तीर्णोऽप्यसाधकत्वं मा प्रसाङ्क्षीदिति तद्विरहः स्वज्ञानकालीनतया
विशेषितः । स च तादृशो नान्यदा । तथा ज्ञानरूपविशेषणाभावेन विशिष्टाभावात् । एवं च स्व
ज्ञानविरहकाले विशिष्टाभावाद्विरुद्धेऽपि व्यभिचारो माभूदिति अभिसंधिना साध्यं निःकृष्याह

तथाहीति। तथा च स्वज्ञानकालस्य पक्षता वच्छेदकतया तत्कालीनत्वं साध्यस्य न तु तस्यापि साध्यपु
वेशो येन व्यभिचारः स्यात्। न च व्यर्थविशेषणता विवक्षितसाध्यस्यासार्वत्रिकत्वादिति वदंति। तच्चि
त्यं तथा हि। स्वज्ञानकालस्य साध्यप्रवेशेपि न तदभावाधीनविशिष्टाभावाद्व्यभिचारः ईश्वरज्ञानमाद
मादाय विशेषणस्य सर्वदा सत्वात्। नह्यस्मदादिज्ञानघटितमेवैतल्लक्षणं। तथासत्यस्मदाद्यज्ञायम
ने व्यभिव्यभिचारिणि विरुद्धे वा व्यक्तिविशेषऽव्याप्तिप्रसंगात्। अस्मदाद्यज्ञायमानदशायां सर्व
त्रैव विरुद्धादावव्याप्तिप्रसंगात्। किंच स्वज्ञानविरहकाले विशिष्टाभावसत्वेपि न व्यभिचारः। प्र
तियोग्यसमानाधिकरणसाध्याभावसामानाधिकरण्यस्य व्यभिचारित्वात्। अन्यथा द्रव्यत्वेन
गुणानुमानापत्तेः। विरुद्धे च तादृशसाध्यासत्वस्वीकारे लक्षणाव्याप्तिरेव दोषः स्यात्। तस्मात्सा
ध्यप्रत्यायजनकत्वस्य केवलान्वयित्वेन हेतौ व्यर्थविशेषणत्वशंकायां स्तत्प्रमाकालीनत्वमपि सा

ध्येपूर्वस्यमेव·विशिष्टस्यैवासाधकत्वेनतत्साधनस्योद्देश्यत्वाच्च।तद्धेतुत्वाभासत्वसंमनियतमिति
नविरुद्धत्वादिहेतौव्यर्थविशेषणत्वमितिवयमालोचयामः।नन्वेवंविरुद्धाद्यन्यतमत्वविशिष्टस्य
205 पुमाकालीनत्वमेवलक्षणमस्तु·साध्यपुत्ययाजनकत्वस्यविवक्षितस्यकेवलान्वयित्वेनाव्याव
र्त्तकत्वात्।अपिचापुसिद्धसाध्यकेऽसिद्धादौपुतियोग्यपुसिद्ध्याऽव्याप्तिरित्यस्यतैर्लक्षणांतरमा
हुः·यद्धेति।यद्धत्वंवात्रतद्वर्त्तमानत्वंविवक्षितमितिनसत्पुतिपक्षोत्तीर्णोऽतिव्याप्तिः।इदंयद्धेत्वा २०५
भासत्वसमनियतमेवनसार्वत्रिकमितिनहेतौव्यर्थविशेषणत्वशंकेतिध्येयं।ननुव्यभिचारित्वा
दिकंनानुमितिपुतिबंधकंतत्सत्वेप्यनुमितिपुतिबंधाभावादित्यतआहुः·अनुमितीति।तथाचानु
मितिपुतिबंधकज्ञानविषयतावच्छेदकत्वमसाधकत्वमितिफलितोर्थः।सत्पुतिपक्षस्थलेयथा
तद्धत्वंतथोक्तंप्राक्।उक्तसाध्याविशेषपरिहारेयेननतुष्यंतितेषांमतमाहुः·अन्ये।त्विति।वाधितेति।

पक्षवृत्तिर्वा धितेत्यर्थः। एतन्मते गंधप्रागभावावच्छिन्नो घटो गंधवानिति न बाधितं। व्याप्यत्वासि
द्धइति। एतन्मते नीलधूमादौ व्याप्तिरस्त्येव न तत्र व्याप्यत्वसिद्धिरिति मंतव्यं। स्वरूपसिद्धेति। यद्यपि
स्वरूपासिद्धस्य हेत्वाभासत्वं सर्वदापि संभवति तथापि दशाविशेषरावतस्योक्तरूपासाधकता निव
त्तौ न कश्चिद्दोषः। यत्र हेत्वाभासत्वं तत्रावश्यमसाधकत्वमिति नियमो न तु यत्र यदा तत्त्वं तत्र तदाव
श्यमवश्यमसाधकत्वमिति केचिदाहुः। तन्न· एवं हि सर्वत्रैव तदेवासाधकत्वमनुगतमस्तु किमननु
गतासाधकनिर्वचनेन न ह्यनैकांतिकत्वादौ दशाविशेषेऽनुमितिप्रतिबंधकज्ञानविषयत्वं नास्ति।
तस्मादिदं सत्प्रतिपक्षादेरेव व्याप्यत्वासिद्धिआश्रयासिद्धिभिन्नासिद्धित्वमसाधकत्वं स्वरूपासिद्ध
इति धेयं। असाधारणेत्युपलक्षणं। अनुपसंहार्य्यपि द्रष्टव्यः। अनुगतासाधकत्वसंभवेनाननुगतं
तत्र। एवं वासाधकशब्दस्यनानर्थत्वापत्तिरित्यत्रास्वरससबीजमिति॥ ॥एवमियतापुर्वंधेन निरूपित

स्यानुमानस्यप्रयोजनंदर्शयति॥ ॥एवमिति।जगदिति।कार्य्यमात्रेत्यर्थः।ननुतदप्रसिद्धौसाध्याप्र
सिद्धेः कथंतदनुमानमित्यतआह॰ क्षित्यादाविति।तथाचपक्षधर्मतावलाज्ज्ञप्तिसिद्धिरितिभावः।मिलि
206 तमिति।एकपक्षतावच्छेदकावच्छिन्नमित्यर्थः।तयोरिति।संशयविषयत्वविवादविषयत्वयोरित्यर्थः।
ग्राहकाभावमुक्त्वा बाधाभावमाह॰ वादिनोरिति।संभवादिति।विशेषादर्शनदशायामितिभावः।त
थाचतस्यापिपक्षांतर्भूतत्वंतत्रचांशतः सिद्धसाधनमितितात्पर्य्यं।अभ्युपेत्याह॰ प्रत्येकमिति।क्षितिः २०६
सकर्तृकानवा॰ अंकुरः सकर्तृकोनवेतिप्रत्येकमित्यर्थः।विवादास्पदत्वेनेत्युपलक्षणं।तादृशसं
शयविषयत्वेनेत्यपिद्रष्टव्यं।अर्थांतरत्वादिति।विवादांगसंशयविषयतावच्छेदकेनरूपेणपक्षेसा
ध्यसाधनस्यतत्संशयनिवर्त्तकत्वेनप्रकृतार्थसंवद्धत्वं॰ रूपांतरेणतत्रतत्साधनस्यभिन्नप्रकार
कतयातत्संशयनिवर्त्तकत्वेनप्रकृतार्थासंवद्धत्वादितिभावः।जन्येति।जन्यात्मविशेषगुणेपिक्र

स्मदादिशरीरस्यकारणत्वात्।सर्गाद्यकालीनवेदादावप्यस्मदाद्यदृष्टोपार्जितेश्वरोपग्रही
तशरीरस्यकारणत्वादितिभावः।अप्रसिद्धेरिति।अप्रसिद्धेरित्यर्थः।अत्रहेतुमाह-अदृष्टेति।तथाच
सर्वासंग्रहइतिभावः।बाधेतरमतंदूषयति।नापीति।द्वितीयलक्षणेदोषमाह-घटादेरिति।चेष्टा
द्वाराजन्यकृतेस्तत्रजनकत्वादित्यर्थः।क्षितिरेवेति।तथाचनार्थान्तरमितिभावः।तस्यापक्षत्वेनेति।
परार्थानुमानेप्रतिज्ञाविषयस्यैवपक्षत्वंभवतीतिभ्रमवतइदमुत्तरंबोध्यं।पक्षत्वेप्रतिज्ञाविषयत्वे-स
र्गाद्येति।इदानीतनद्व्यणुकमस्मदादिनैवयोगजज्ञानवतासकर्तृकंस्यादित्यर्थान्तरशंकयास
र्गादीत्युक्तं।अत्रसंदिग्धानैकान्तिकमपिबोध्यं।साध्यंद्रूषयितुंपृच्छति किंचेति।व्यभिचारादिति।
क्षितिपूर्वमस्मदादिघटोपादानज्ञानस्यासंभवादित्यर्थः।घटेति।कुलालकृतेश्चेष्टाद्वाराजनकत्वा
दित्यर्थः।घटावति।उक्तस्यतत्कर्तृकत्वप्रयोजकस्यतत्रासत्वादितिभावः।चेष्टात्वस्येति।नवकृति

ध्वंसादौ साध्याव्याप्तिः। पक्षधर्म्मावच्छिन्नसाध्यव्यापकत्वादिति भावः। किंचैवमिति। यद्यशाद्वेपि
वाधे तत्तदुपादानत्वेनैवोपस्थितिर्वाच्या तदेत्यर्थः। ननूपादानगोचरत्वेन प्रत्यक्षादीनां जनकत्वं वि
वक्षितं तेन नयरूपेणानेषां स्वविषयसमवेतकार्य्ये प्रत्येव जनकत्वं तथा चान्योपादानप्रत्यक्षस्या
जनकत्वादेवनार्थान्तरमित्यत आहुः अपि चेति। इदं च नैयायिकमते नैव तस्य दूषणं दुष्टत्वं तद्व
207 तद्वृति। तदुपलक्षितस्येत्यर्थः। ननु विशिष्टस्य जनकत्वविवक्षितमत आहुः अदृष्टेति। यद्यपि योग २०७
जज्ञानस्य नादृष्टद्वारकतासंभवः क्षीणदोषत्वेन योगिनोऽदृष्टासंभवात्। तथाप्येतदनुमान
बलादेव धर्मिकल्पनात् इति न्यायाद्दोषं विनापि तस्य जनकत्वं भवत्विति अर्थान्तरापादनमेव
ति ध्येयं। अथेति। अत्र प्रत्यासन्न्यजन्यान्तं विशेषणं पक्षे पक्षासिद्धिवारणार्थं। साध्ये तु सिद्धसाध
नवारणार्थं। अदृष्टद्वारा योगजादिज्ञानानामपि जनकत्वस्योक्तत्वात्। पक्षधर्मतावलेन चविल

षणाज्ञानासिद्धिः। अत एव सिद्धान्तेऽपि तथैव भविष्यति। नन्विति। विवक्षितमित्यनुषज्यते। साध्यतावच्छेद
कप्रविष्टेनेति शेषः। पक्षसाध्ययोरिति। विशेषणासिध्याश्रयासिद्धिः। साध्यविशेषणाप्रसिद्ध्या ऽप्रसि
द्धिरिति वोध्यं। सिद्धो वेति। योगजधर्मादिजन्योपादानगोचरज्ञानादिसिद्धौ वा तस्याप्यदृष्टद्वाराक्षि
त्यादिजनकत्वसंभवात्। पक्षे तज्जन्यत्वस्यासिद्धेरित्यर्थः। सिद्धसाधनादिति। यत्किंचिदुपादाना मि
प्रायेणेदं। वस्तुतो ऽप्रयोजकत्वाद्विशिष्टसाध्येन व्यापकत्वमिति वोध्यं। साध्याप्रसिद्धेरिति। यद्यप
रोक्षज्ञानजन्यत्वं त्वत एवाप्रसिद्धं। अनुमितेरपरोक्षत्वाभावात्। तथा च किं सविकल्पकजन्यतोपवर्णि
नेन तथापि घटादेस्तादृशापूर्वजन्यत्वं नास्ति मानाभावादित्यपरोक्षपदमपास्य ज्ञानघटितमे
व साध्यं कर्त्तव्यं। एवं चानेन रूपेणाप्रसिद्धिरुक्तेति भावः। वस्तुतस्तु अनुमितित्वेन जन्यसविकल्प
कव्याप्तिगुरुत्वेन वेत्यर्थः। तथा च विशेषणविशेष्योभयविरहाद्विशिष्टसाध्याप्रसिद्धेरित्यर्थः। उ

क्रमिति। चयेतिशेषः। अथसर्गेति। तथाचतत्कालेऽस्मदादिज्ञानाभावात्तदाश्रयेश्वरसिद्धिरिभावः·
नवब्रह्माण्डांतर्वर्त्तिज्ञानादिकमादायार्थांतरं· तत्कालविशेषस्यसकलब्रह्मांडसाधारणत्वेन
युगपदेवतन्नाशासंभवेनतत्रमानाभावात्। अत्रचसर्गेतिरज्ञानादिसमानकालीनकालादिय
२०४ त्किंचित्कारणाजन्यत्वेनसिद्धसाधनवारणायसामग्रीपदं ननुतथापितादृशादृष्टजनकसाम २०८
ग्र्यार्थांतरमस्त्वित्यतआह· अदृष्टेति। नह्यदृष्टसामग्र्यदृष्टप्रागभावादिघटिताऽन्यत्रजनिके
त्यर्थः। यत्त्वनादृष्टसामग्रीध्वंसेऽदृष्टसामग्रीजन्यध्वंसेऽदृष्टसामग्रीजन्यस्वर्गेव्यभिचारइति
तन्न· सामग्र्यानित्यकारणाघटितत्वेनतद्ध्वंसासंभवात्। अदृष्टसामग्र्याः स्वर्गोत्पत्त्यजनकत्वा
च्च। अदृष्टजनकयागादेरेवस्वर्गजनकतयाबोधितत्वात्· यदप्यदृष्टसत्त्वकालादृष्टसामग्रीज
न्यत्वेनद्व्यणुकस्यनादृष्टत्वापत्तिरितितदपिन· लाघवाददृष्टसामग्रीजन्यत्वस्यैवादृष्टप्रयोजक

त्वादितिभावः।ननुमास्मज्ञानादीनांद्व्यणुकजननकत्वंतथा।पितदाश्रयत्वेनेश्वरसिद्धिःस्यादेवेत्य
तआह-उदासीनेति।कार्य्यकारणात्तर्काभावान्नोदासीनसिद्धिरितिभावः।उदासीनसिद्धावपिनल
भिमतप्रयोजकेश्वरसिद्धिरित्याह।द्व्यणुकासमवायीतिनद्व्यणुकासमवायीत्यर्थः।नवद्व्य
णुकान्तरेव्यभिचारः।तस्यपक्षसमत्वादितिभावः।अप्रसिद्धेरिति।परंप्रतीतिशेषः।नचादृष्टद्वा
राकृत्यर्हत्वंतन्मतेपीतिवाच्यं।तथापिध्वंसेनव्यभिचारादितिभावः।यत्त्विति।पक्षधर्मतावला
न्नित्यज्ञानादिसिद्धिः।साध्येएतत्पदमकिंचित्करं।अप्रयोजकत्वमेवविशदयति।अन्यथेत्यादि।
दृश्यतेतावदितिअनेनवक्ष्यमाणानुमानेनसाध्यप्रसिद्धिर्दर्शितेति।तथाचसर्गाद्येति।सर्गा
द्यकालीनंयच्छरीरंतज्जन्यंयज्ज्ञानंतद्ध्वंसानाधारोयःकालस्तदाधारंयद्ज्ञानंतज्जनकप्रयायआ
त्ममनःसंयोगःतज्जनिकामनःक्रियापक्षः।नचन्यायनयेसर्गप्रलययोरनादित्वात्सर्गाद्य

कालीनशरीरजन्यज्ञानध्वंसानाधारकालाप्रसिद्धेः। सर्गापदस्यैवतत्सर्गापरत्वात्। तथाच
सर्गाद्यकालीनज्ञानजनकमनःक्रियापक्षेइदानींतनक्रियाणामस्मदादिप्रयत्नजन्यत्वान्न
शतःसिद्धसाधनमितिभावः। नवमनःसर्गाद्यकालीनमनःक्रियेत्येवास्त्वितिवाच्यंसर्गाद्य
२०१ कालीनत्वस्यान्यविशेषणत्वात्। तन्मतइति। तन्मनोगोचरप्रयत्नानाधारःतन्मनोगोचर
प्रयत्नतद्ध्वाप्येतरसकलतन्मतःक्रियाकारणाधारःकालःतदनंतरकालनाधाराकृष्याद्य २०८
सन्नाकृत्पत्तिर्यस्याःसातथेत्यर्थः। क्रियाकारणीभूततादृशप्रयत्नाधारकालानंतरकाला
धारत्वसिद्धिप्रसंगवारणायतन्मनोगोचरप्रयत्नतद्ध्वाप्येतरसकलकारणाधारेतिविशेषणं
एवंचकारणीभूतस्यैवतस्यसिद्धिः। नहिसंभवतिइतरसकलक्रियाकारणसत्त्वेपिप्रयत्नव्यति
रेकेणान्तरक्षणेक्रियानजायतेऽथचनप्रयत्नजनोति·बाधवारणायतन्मनोगोचरप्रयत्नाना

धारेतिविशेषणं। तन्मतेगोचरप्रयत्नानाधारेचरमक्षणेतदुत्पादितक्रियासत्वादाधइत्यत उक्तं प्र
घेतिअर्थादिति। प्रकारांतरेवाधादित्यर्थः। दूषयतितत्रेति। तथाचपक्षासिद्धिरितिभावः। पूर्वेति।।
प्रलयकालीनक्रिययैवेत्यर्थः। इदंचोपलक्षणं। तत्कालीनसंयोगेनापिज्ञानसंभवात्। पूर्वसहका
रिविरहेणाजननात्। क्रियात्वस्येति। अत्रापिईश्वरवादिनामित्यनुषंजनीयं। तथाचतत्प्रयत्नमाद
यक्रियामात्रेसाध्यसत्वाद्व्यर्थविशेषणत्वमित्यर्थः। किंचैवमिति। अनुमितेर्व्यापकतावच्छेदकप्र
कारकत्वनियमादित्यर्थः। अर्थादिति। अनुमानांतरादित्यर्थः। तदनुकूलतयातूपन्यासेऽव्याप्त
कालत्वमितिधेयं। अदृष्टाद्वारकेति। अत्रोपादानपदंस्वोपादानपरं तथाचस्वोपादानगोचरजन्य
कृतिजन्याघटादयः प्रसिद्धास्तदन्यत्वेसतिजन्यत्वंपक्षतावच्छेदकं एतेनोपादानपदंयदियत्
किंचिदुपादानपरंतदाऽदृष्टाद्वारकस्वपाद्युपादानमृदंगादिगोचराऽस्मदादिकृतिजन्यानांशवृ

दीनांपञ्चतानस्यात्।क्षित्याद्युपादानपरत्वेऽप्रसिद्धिरितिपरास्तं।नन्वेवमदृष्टाद्वारकेनितिव्यर्थं।अ
दृष्टद्वारककृतिमादायप्रकृतेदोषासंस्पर्शादितिचेत्अत्रवदंति।कांस्यादौनौषधलेपादिजलेन
तप्यातज्ञोवरास्मरादिकृत्यादृष्टद्वारायज्वलनंजन्यतेतस्यचेश्वरमात्रकर्तृकस्यासंग्रहस्यादिति
तद्विशेषणमिति।तन्न।औषधलेपजनककृतेःअदृष्टजनकत्वेमानाभावात्।औषधसंयोगद्वारै २१०
वतस्याज्वलजनकत्वसंभवात्।नचतत्संयोगध्वंसानंतरमपिज्वलनोत्पत्तेस्तद्वारकत्वंनेतिवा
च्यं।अप्रसिद्धेः।तथासतिसंयोगध्वंसस्यैवजनकत्वापत्तेश्च।नहिसंयोगतद्ध्वंससमययोर्ज्वलनोत्प
त्तौमानमस्तीति।विषज्वलनादौमंत्रपाठादिसाध्येयद्यप्यदृष्टद्वारकत्वंसंभवति।कृतेस्तथापिन
तदुपादानविषादिगोचरत्वंकिंतुकंठताल्वादिगोचरत्वमेवेतितदर्थमपिनेतद्विशेषणमिति।अ
न्येतु।विष्णुप्रीतियोगिकस्वात्माभेदचिंतजनककृतिजन्यस्वस्वर्गादिस्यपरमेश्वरकर्तृकस्यासं

णादित्यदृष्टाद्वारकत्वं विशेषणं । तस्य स्वोपादानगोचरजन्यकृतिजन्यत्वात् । न चैवं तज्जनकादृष्ट-
स्येश्वरकर्तृकस्यासंग्रहः स्यात् । न ह्यदृष्टजननेपि अदृष्टं व्यापारस्तत्कृतेरिति वाच्यं अदृष्टाद्वारक-
पदस्यादृष्टप्रागभावव्याप्यप्रागभावाप्रतियोगित्वपरत्वादित्याहुः । तदपि न । अदृष्टजनककृति-
जन्यगंगास्नानादेरस्मदादिकर्तृकस्य पक्षान्तर्भूतत्वापत्तेः । न चेष्टापत्तिः । अंशतः सिद्धसाधनप्रसं-
गात् । न चोद्देश्यप्रतीतेरसिद्धेर्न तथा पक्षतावच्छेदकनानात्वप्रयुक्तस्य दोषत्वादिति वाच्यं । एवं सति
समवेतजन्यमात्रस्यैव पक्षत्वापत्तेर्घटादिवारकविशेषणानुपपत्तेः । तथा च प्राचीनमतेनेदं न वग-
गास्पर्शिस्येव दृष्टजनकत्वं न तु तज्जनककृतेरिति वाच्यं । एवं ह्यदं मे वितनस्येव स्वर्गादिजनकत्वं न
तु तज्जनककृतेरिति तुल्यत्वात् । अत्राहुः । कालीशरीरे यद्गौरं रूपमुत्पन्नं तत्कालीशरीरगोचर-
तपश्चरणादिकृत्या जन्यते । सा च कृतिरदृष्टद्वारिका । तद्रूपोपादानकालीशरीरगोचरा चेति तद्रूपे

ऽव्याप्तिवारणायैतद्विशेषणमिति। नचैवमपि निदिध्यासनादेरसंग्रह इति वाच्यं। तत्र तदुपादानगोच
रजन्यकृतेरेवानभ्युपगमात्। अभ्युपगमे वा अस्मदादिकर्तृकत्वेन। संग्राह्यत्वात्। अदृष्टद्वारकत
दुपादानगोचरकृतेरेव कर्तृत्वानिर्वाहकत्वात्। न वादृष्टद्वारकत्वमात्मगुणद्वारकत्वमिति वाच्यं
कृतिद्वारीभूतात्मगुणस्य वाप्यादेरिति। एवं चैतन्मते अभेदविज्ञानजन्यस्वर्गोत्पत्तिव्याप्तिवारणायै
तद्विशेषणं तज्जनकादृष्टत्वस्मदादिकर्तृकमेवेति संक्षेपः। ध्वंसेगोत्वादौ वाति व्याप्तिवारणाय स
मवेतजन्यपदे। अत्र अदृष्टजनकेत्यंशे वाधः। ईश्वरकृतेरपि अदृष्टजनकत्वादिति तद्वारणाय त
मेवार्थे भंग्यंतरेणाह अदृष्टेति। अत्र व्याप्तिश्च कालिक। ननूपादानपदं यत्किंचिदुपादानपरं प्रकृते
पादानपरं वा। नाद्यः। शब्दादिनाशानः सिद्धसाधनात्। न च तत्र ज्ञानेच्छयोर्न कारणत्वं किंतु कृतिमात्र
स्यैव। मिलितानां तेषां स्वविषयसमवेतकार्योत्पत्त्येव जनकत्वादिति वाच्यं। तथापि ज्ञानादिघटितंपु

त्येकं साध्यत्रयं बोध्यं तथैवाग्रे ग्रंथकृता विभावनात्। तथा वक्ष्यति मादाय यां शातः सिद्धसाधनता दवस्था

त्. नान्त्यः। अप्रसिद्धेरिति वेत्. मैवं। उपादानगोचरत्वेन यस्य ज्ञानादेर्जनकत्वं तादृशात् ज्ञान्यत्वं साध्यं

तेन रूपेण स्वविषयसमवेतकार्य्यप्रत्येवत स्य जनकत्वमिति नाशातः सिद्धसाधनं. नन्वेवमदृष्टप्राग

भावेत्यादि विशेषणं व्यर्थं. जन्मांतरीयज्ञानादीनां तेन रूपेणाजनकतया सांध्यं सिद्धसाधनानवकृ

शादिति वेत्. न कालीरूपे भेद वितन स्वर्गो वाशातः सिद्धसाधनवारकत्वादिति। अत्रादृष्टपदं स्वर्गादि

षयजनकादृष्टपरं. नवैवं क्षु वित्पसंसा विद्दृष्टांत इति पूर्वोक्ताननुगमस्तदवस्थ एवेति वाच्यं। सामान्य

व्याप्तेर्ग्रहेतस्यादोषत्वात्। तस्या एव प्रकृतानुमानांगत्वेनाभिमतत्वात्। द्वितीयसाध्ये स्वपदोपादाने

न तथैव ग्रंथकृतात्पर्य्यविनयनात्। अन्यथा स्वयपदानुपादानेपि जनकत्वगर्भं साध्यमनुगतमेव स्या

दिति। अत्र यद्यपि प्रत्यक्षे त्येव वक्तुमुचितं घट इति वाक्ये अनघट इत्यप्रयोगात्। प्रत्यक्षत्वस्येंद्रियजन्य

त्वबाधः। साक्षात्वेनज्ञातिपरत्वे परंपुत्यासिद्धिः। इत्युभयप्रसिद्धये अपरोक्षेत्युक्तं। तदर्थस्तु लिंगादिक
रणाकज्ञानान्यज्ञानत्वमुभयसाधारणमेवेति ध्येयं स्वजनकेति। तत्र स्वजनकेत्यादिविशेषणं पू
२१२ र्वोक्तकालीरूपादावंशतः सिद्धसाधनवारणाय। शब्दवपूर्वोक्तरूपेणांशतः सिद्धसाधनवारणं।
अपरोक्षेति। तादृशज्ञानविषयोपादानसमवेतानीत्यर्थात्। अर्थलब्धं योरविवक्षितत्वमत्रेति ध्ये
यं। ननु कालीरूपे अभेदचिंतनजन्यश्वर्गांशांशतः सिद्धसाधनमिति चेत्। स्वजनकादृष्टोत्तरापरोक्षज्ञा २१२
नादिविषयोपादानेसमवेतत्वस्य विवक्षितत्वात् न तादृशजनकोत्तरकालीनतादृशज्ञानादिविष
यत्वस्यापि संभवात् पुनः सिद्धसाधनमेवेति वाच्यं ज्ञानादेः स्वजनकत्वेनापि विशेषणीयत्वात्। उप
क्षिभेदाद्वन पूर्वसाध्याविशिष्यं। समवेतत्वदिति। ध्वंसे व्यभिचारवारणाय सत्यंतं। गोत्वादौ व्यभिचार
वारणाय प्रागभावेत्यादि। पूर्वं निदिध्यासनादेरभेदचिंतनजन्यादृष्टवस्वोपादानगोचरजन्यकृति

जन्यत्वानभ्युपगमादभ्युपगमे वाऽस्मदादिकर्तृकमेवेति न कोपि दोष इत्युक्तं। संप्रतिश्रुत्यक्तादृशाजन
न्यस्तुतिजन्यत्वेन्यैर्न पक्षानंतर्भूतत्वं मास्त्वस्मदादिकर्तृकत्वं तेषां जन्यात्मविशेषगुणानामीश्वरक
र्तृकत्वस्य पूर्वमुक्तत्वात्तथापि तमादाय पक्षत्वनिर्देशान्न कोपि दोष इत्यभिप्रेत्याह-उक्तेति। न
चजन्यत्वेति। दोषायेति शेषः। तदुपरक्तेति। उभयसिद्धप्रयोजनवत्त्वं तंत्रे। न च प्रयोजनस्योभय
सिद्धिरिति भावः। ननु सकर्तृकत्वे विवादात्साध्यांतरेऽर्थान्तरमित्यत आह उक्तेति। ननु स्तुतिज
न्यत्वमेव सकर्तृकत्वं न त्वदृष्टप्रागभावादिघटितमित्यत आह अतएवेति। एवं हि भोजकादृष्ट
राभोक्तृकृतिजन्येष्वदृष्टभोक्तृकर्तृकत्वमेव स्यादापत्तिरित्यर्थः। ननु यद्युक्तान्यतमत्वमेव सकर्तृ
कत्वं तदा ध्वंसः सकर्तृको न स्यात्। तथा चानुमानाज्जगन्निर्मातृकर्तृसिद्धिरित्यपि न स्यादित्यत आ
ह-यद्वेति। ननु पक्षेप्युपादानपदं कारणमात्रपरं यथाश्रुतमेव वा। आद्ये शब्दादेरसंग्रहापत्तिः। अं

त्यकृतिध्वंससंसर्गार्थंजन्येच्छाकृत्यजन्यत्वंविशेषणमनर्थकं।तस्यस्वोपादानाभावेनस्वोपाद
नगोचरजन्यकृतिजन्यान्यत्वेनैवसंगृहीतत्वात्।नचोपादानमधिकरणंविवक्षितं।मृदंगा
देर्ध्वनशब्दाधिकरणत्वंकिंत्वधिकरणतावच्छेदकत्वमितिवाच्यं।अधिकरणतासमवाये
213 नविवक्षितासंबंधमात्रेणवा।नाद्यः।उक्तदोषात्।नांत्यः।अवच्छेद्यावच्छेदकभावसंबंधेनमृदं
गादेःशब्दइतिप्रतीतिरितिचेत्।पक्षेप्युपादानपदंकारणमात्रपरमनुपादेयमेववा।जन्य २१३
कृत्यजन्यज्ञानेच्छेत्यर्थः।अन्यथाप्रतियोगितयेच्छयाविरोधिगुणत्वेनकृत्याचजनितेच्छाध्वं
सेपक्षतावच्छेदकाव्याप्त्यापत्तेः।एवंचशब्दादीनांसंग्रहएव।मिलितानांज्ञानादीनांस्वविषय
समवेतकार्यप्रत्येवजनकत्वात्।अतएवतत्रास्मदादिनानाशात्ऽसिद्धसाधनंनचैवमुक्तस्य
साध्यस्यध्वंसेबाधएवस्यात्तस्यासमवेतत्वात्।ज्ञानादीनांचस्वविषयसमवेतकार्यप्रत्येव

जनकत्वात्। ज्ञानादीनां च स्वविषयसमवेतकार्य्य मितिवाच्यं। अनित्यानामेव तेषां तथात्वावधार

णात्। ध्वंसे च नित्यानामेव तेषां जन्यत्वस्य साध्ये तात्पर्य्यावसायात्। न चैवं कुत्रापि महाक्षितिध्वंसा

दौ नास्मदादीनां कर्त्तृत्वं स्यादिति वाच्यं। तन्मते इष्टापत्तेः। अत एव ध्वंसमात्रस्यैवेश्वरकर्तृकत्वात्

ध्वंसोपि पक्ष इत्येव ग्रंथकृतोक्तं न तु ध्वंसस्य विशेष इति दिक्। अत्र च मते कृतिमात्रघटितं न साध्य

मिति शब्देनांशतः सिद्धसाधनं। तृतीयसाध्ये उपादानपदं कारणपरं न तु नदेयमेवेति। पक्ष इति

प्रतिज्ञाविषय इत्यर्थः। तयोरिति सप्तम्यां तस्य पक्षपक्षसमयोरित्यर्थः। तस्मादिति। यथा व्यभि

चारज्ञानस्य दूषणत्वं तथोक्तं साधारणानैकान्तिकलक्षणव्याख्यानावसरे। ननु सर्वत्र घटादेः प

क्षानंतर्भूतत्वात्तदुपादानगोचरत्वेन ईश्वरज्ञानसिद्धेर्न सर्वविषयत्वसिद्धिरित्यत आह। नियते

ति। उपादानगोचरेति विशेषणान्न। अप्रयासिद्धिः। तृतीयकोरभावान्नियतविषयज्ञानजन्यत्व

२ २ २ २.

रित्यर्थः सिद्धिः। एतच्चोपनीतभानवादिमते। ननु साध्यगतेनापादानपदेन न क्षित्याद्युपादानमेव
विवक्षितं किंतु घटाद्युपादानमपि तथा च घटाद्युपादानगोचरज्ञानादीनां क्षित्यादौ जनकत्वेपि
२१५ तदुपलक्षितास्मदादेर्जनकत्वसंभवादर्थान्तरं। न च तेषां न सर्वविषयत्वं अनादौ संसारे योगिन
स्तादृशज्ञानादेरपि संभवादित्यत आह· साध्येवेति। साधनत्वं जनकत्वं· तच्चेति। ननूपादानगोच
रत्वेन जनकत्वस्य पूर्वं विवक्षणाद् घटोपादानगोचरस्य तथात्वान्नेयं शंकेति चेत्· न· तेनैव रूपेण २१४
जनकत्वमत्राप्याप्तिनिरर्थान्तरापादनसंभवात्। ज्ञानादीनामिति· अस्मदादिज्ञानादीनां। मदृष्ट
द्वारकाणामिति शेषः। अत एवेति। बाधेन तत्पुंसंगाभावादित्यर्थः। द्रव्यत्वेनेति। प्रत्यासत्त्येति
शेषः। तद्विलक्षणामिति। तथा च सामान्यज्ञानप्रत्यासत्तिजन्यप्रत्यक्षयोः स्वरूपायोग्यत्वान्न त
ज्जन्यत्वेनार्थान्तरं· न च योगिप्रत्यक्षमादाय दोषः। तादृशज्ञानानां योगिकल्पने गौरवात् लाघवा

देकस्यैव सिद्धेरित्यर्थः। कर्तृत्वमिति। एतच्चयन्मते ज्ञानादीनां स्वविषयसमवेतकार्योत्पत्त्यैव जनक
त्वं तत्रेति ध्येयं। सकलेति ज्ञानानुरोधात्सकलेत्युक्तं। द्व्यणुकत्योरुक्तस्वंडक्षित्युपादानैकदेशविष
यत्वमपि नेति बोध्यं-अत एवेति। द्व्यणुकोपादानपरमाणुगोचरप्रत्यक्षादेरभावादित्यर्थः। स
पक्षत्वमेवेति। अत्र पुरुषिप्तजलबिंदुसमुद्रयोरेवावयवत्वेनोपादानगोचरज्ञानादिसंभवादस्मा
दादेरेव कर्तृत्वमित्यर्थः। नन्विति। तथा च घटादौ व्यभिचारोपीति भावः। आत्मेति-आत्मवृत्ति
त्वस्येत्यर्थः। यद्वा समवेतत्वपक्षधर्मावच्छिन्नसाध्यव्यापकोयमुपाधिरिति न ज्ञानध्वंसादौ सा
ध्यव्यापकत्वं-हेतुत्वादिति विशेषणात्वे बाधकं विनोपलक्षणात्वस्यायुक्तत्वादिति भावः। आत्मे
ति। तथा चात्मसंयोगस्य क्रियायामेव न हेतुत्वं कुतस्तद्द्वारा घटेपीत्यर्थः। क्रियेति-कपालरू
पजन्यघटरूपे व्यभिचारादाह-क्रियेति। स्यंद इत्यर्थः। गुरुत्वजन्ययतनक्रियायां वेगजक्रियायं

वव्यभिचारादाहुः॰व्यधिकरणेति।नन्वाभूादिपतनेव्यभिचारः।स्वव्यधिकरणस्वाश्रयावयवीया
215 म्रादिजन्यत्वात्स्वाश्रयावयवसंयोगाजन्यत्वाच्चेत्यतआहुः॰गुणेति।अत्रगुणाजन्यत्वंगुणाव्य
तिरेकाप्रयुक्तव्यतिरेकप्रतियोगित्वं तेनेश्वरज्ञानजन्यत्वेपिक्रियायांनेश्वरसंयोगसमवायिका
रणमितिव्यभिचारोनभवतीति।युक्तितोल्यात्तस्याप्यसमवायिकारणत्वमित्यप्याहुः।एतेनमं
त्रपाठजन्यशाखावलनेपिव्यभिचारोनिरस्तः।इष्टापत्तेः।अदृष्टाद्वारकत्वेनविशेषणाद्वा।मंत्र २१५
स्याशुविनाशित्वेनादृष्टद्वारकत्वात्।ननुतुलायामेकदिगवस्थिताधिकगुरुत्वजन्यापरदिगव
स्थितान्तमनक्रियायांव्यभिचारइतिचेन्न॰न॰तत्राधिकगुरुत्वाश्रयद्रव्यसंयुक्तसंयोगस्योन्नम
नहेतुत्वात्।पंकादौतस्यतद्धेतुत्वकल्पनात्।गुरुत्वस्यवोन्नमनहेतुत्वाकल्पनात्।अत्रकारणा
त्वाभ्युपगमेपिप्रत्यक्षत्वयदमपिगुणविशेषणंदेयं।नवैवंव्यधिकरणपदवैयर्थ्यमितिवाच्यं।वेगादि

जन्यक्रियायां तथापि व्यभिचारात्। न चादृष्टवदात्मसंयोगस्यैवं कारणतानस्यादिति वाच्यं॰ व्या
प्यंतरेणापि तत्संभवात्। तथा चानुपदमेव वक्ष्यामः। नन्वेवमपि क्रियायामात्मकारणत्वसि
द्धावपि व्यटेन तत्सिद्धिः। तथा च साध्यवैकल्यं न दवस्थमेवेति चेत्॰न॰ मूर्त्तवृत्तियत्कार्य्यं यद्गु
णानिमित्तकारणं तत्तत्समानाधिकरणं तत्तत्समानाधिकरणगुणजन्यमिति व्याप्त्या तत्सि
द्धेः। यदि चात्र व्यभिचारशंकातदा विशेषणांतरमपि पूर्वेभ्यं। न चात्र विपक्षबाधकाभावः। अपू
त्यासन्नस्य जनकत्वे ऽतिप्रसंगात्। पूर्वव्याप्तावपि तदेव विपक्षबाधकमिति संक्षेपः। विशेष्येति
क्रियायामित्यत्र क्रियापदेन कर्ममात्राभिधानमित्यर्थः। नेत्यर्थः। असमवायीति। असमवायीति
पूर्वाभिप्रायेणाकारणसंयोगाश्रयेत्यत्र तात्पर्य्यं। विशेष्यबाधे सत्येव सविशेषणोक्तीति न्या
यावतार इत्यापरितोषहेतुर्द्दिनिधायाह अन्ये त्विति। कृतीत्युपलक्षणं ज्ञाने च्छेत्यपि द्रष्टव्यं। अत एव

नुपदंतथैवविभावयिष्यति।साध्याप्रसिद्धिर्वेति।यद्युक्तदोषभियादृष्टांतस्त्यज्यस्तदासाध्याप्रसि
द्धिरेवदोषइत्यर्थः।ननूपादानप्रत्यक्षंविनापिशब्दार्थिप्रवृत्तेर्व्यभिचारइत्यतआह।प्रवृत्तिविष
26 यति।नह्युपादानप्रत्यक्षत्वेनकारणत्वंब्रूमः किंतुप्रवृत्तिविषयप्रत्यक्षत्वेन।प्रवृत्तिविषयंचनगगा
नादिकिंतुमृद्दण्डादिकमेव।तस्माच्छब्दादिप्रत्यक्षमेवेतिनव्यभिचारइत्यर्थः अत्रवायवीयशरी
रप्रत्यक्षाभावेनतद्द्वारप्रयत्नाभावात्तत्रकथंचेष्टेतिचिंत्यं।अदृष्टेति।नचादृष्टवदात्मसंयोगा २१६
देवतत्रक्रियोत्पत्तिरस्तुकिंप्रयत्नेनेतिवाच्यं।स्वतंत्रान्वयव्यतिरेकानुविधायित्वादितिभावः
नचभगवतीति।नचायथार्थैवसास्त्वितिवाच्यं।विशेषदर्शनवतईश्वरस्यतदसंभवादितिभावः।
ननुस्वसुखादिसाधनतानुमितित्वेननकारणता।किंतुस्वेष्टसाधनतानुमितित्वेनतत्रचनबाधः
विश्वस्येश्वरेच्छाविषयत्वादित्यपरितोषादाहनचेति।तथापितादृशानुमितित्वेननकारणत्वं

किंतुतादृशज्ञानत्वेन·तादृशंचतत्पुत्यङ्गमेवभवतीतिपक्षधर्म्मताबलात्तदनुमितावपिपुत्यङ्गतुल्य
त्वमेवसिध्यतीतिभावः।भगवतइति।इच्छावतइत्यर्थः।द्वेषस्त्विति।दुःखतत्साधनेवायतोद्वेषउत्पद्य
तेततस्तदभावइच्छाभवति।नत्वन्यथाद्वेषाविषयघटाद्यभावेइच्छाविशेषंरकात्।तथादुःखादि
द्वेषोदुःखाभावादाविच्छामुत्पादयति।ततःकृतिरितीच्छायामेवतदुपक्षयइत्यर्थः।इदंचप्रवृत्तिपु
यत्नमभिप्रेत्य·निवृत्तिपुयत्नेतुद्वेषजन्यत्वमेव।समानविषयतयालाघवेनप्रवृत्तिपुत्यवचिकी
र्षायाहेतुत्वात्।निवृत्तौतुसमानविषयतयाद्वेषस्यैवहेतुत्वंभिन्नविषयाचिकीर्षा।नचप्रवृत्तिवि
रहाएवनिवृत्तिः।वैपरीत्यापत्तेः।तदुक्तंकुसुमांजलौप्रवृत्तिप्रयत्नोरागान्निवृत्तिस्तुद्वेषादिति।
नन्वेवंकथंव्यभिचारोद्धारःनिवृत्तेःक्रियाविरहेहेतुत्वेनप्रवृत्तिसाध्यतानियमेनचकार्य्याणांचि
कीर्षाजन्यत्वनियमात्।नन्वेवंकुतइत्यादिग्रंथःकथंकारणांतरमेवनिवृत्तेःकल्प्यतामित्याक्षेपे

217

शत्रुद्वेष्मीत्यनुव्यवसायसाक्षिके॰ तत्र न ततोन्यत्कारणं कल्प्यमिति परिहार इत्यभिप्रायत्वादिति।
वस्तुतस्तु प्रवृत्तिविरह एव निवृत्तिः। ननु वै परित्यं॰ सुषुप्तिदशायामपि निवृत्तिविरहस्य सत्वेन प्रवृ
त्तिसाध्यत्वे घटादिकार्यापत्तेः। न च तदा निवृत्तिरेवास्तीति वाच्यं। तत्कारणद्वेषाभावेन तदभावात्
द्वेषाभावे च तत्कारणाद्दुःखतत्साधनत्वज्ञानाभावात् तथा च प्राचीनमते ग्रंथकर्तुरनुशय एवाय
मिति मंतव्यं। एवं च यथाश्रुत एवाग्रिम ग्रंथः सुकर इति। यत्र तु वह्निधूमादौ व्याप्तिग्रहः सर्वसिद्धस्त २१८
त्र साधारण्यं मान्यव्यतिरेकग्रहे। स्यय वेति न व्याप्तिग्रहस्तद्व्यभिचारीति दर्शयति वह्निमात्रेति। स
मवायिमात्रस्येति। आकाशात्मादेरपि व्यापकस्य समवायित्वाभ्युपगमादिति भावः। ननु द्रव्यगुण
कारणत्ववत्समवायिकारणत्वविशिष्टं न ग्राह्यं किंतु समवायित्वसमानाधिकरणकारणत्वमेव
कृतत्। तथा चोभयग्राहकसमानाद्युभयग्रह आर्थः समान इत्यपरितोषादाह॰ यद्वेति। बाधकं विनेति।

सामग्र्यैकरूपेणाव्यभिचारज्ञानाभावे सति तत्तोव्याप्तिग्रह इति भावः। सकलधूमगोचर इति स्वमते पुरसिद्धधूमगोचर इति परमते तत्र सामान्यलक्षणानंगीकारादिति ध्येयं। कार्य्यत्वस्येति। कार्य्यत्व स्य हेतो विपक्षवृत्तित्वनिवृत्तये सर्वत्रतृणादौ कार्य्येऽतीन्द्रियः कर्त्ता वेत्स्वीक्रियते तदा कापि त द्व्यतिरेकनिश्चयो नेति तद्ग्रहधुर्य्यात्कथं व्याप्ति र्जायेत: अथ तद्व्यतिरेकसिद्ध्यर्थं तया दृश्य एव कर्त्ता स्वीक्रियते। तदा तद्विरहेपि तृणादौ कार्य्यत्वमस्तीति तत्रैव विपक्षे तस्य व्यक्तमीक्षणामि त्यर्थः। दृश्यस्येति। योग्यस्येत्यर्थः। तथा वार्यिधनवह्नेरदृश्यमानधूमोत्पत्तिः समर्थिता तस्या पि योग्यत्वादिति भावः। व्यर्थविशेषणत्वेनेति। अखंडाभावानभ्युपगंतृमतेनेदं साध्याभाववति केवलान्वयी नास्त्येवेति भावः। अत्र केवलान्वयिव्यवस्थापनाद्व्यतिरेकव्याप्तिविरहेपि अन्वय व्याप्तिमात्रेणानुमित्यविरोधः। न वान्वयव्याप्तावेव व्यर्थविशेषणत्वान्न विशिष्टव्यापकत्वग्रहः।

विशिष्टकारणत्वेन विपक्षबाधकसंभवात्। अन्यथा आर्द्रेंधनवह्नावपि धूमव्यापकत्वं न गृह्येत नवत
त्ववह्निर्धूमानुत्पत्तेर्विशिष्टं कारणतावच्छेदकं। पूर्वक्लृप्तेवात्मत्वमेव तथा लाघवादिति वाच्यं। अ
न्यात्मनि ज्ञानादौ सत्यात्मनः कार्यस्य घटादेरुत्पत्तिप्रसंगभयेन ज्ञानादेरवश्यं कारणतावच्छे
218 दकत्वात्। न वत्तेषामपि कारणत्वान् अवच्छेदकत्वं अवच्छेदकत्वे वा न कारणत्वं दंडत्ववदिति वा
च्यं। उक्तहेतोरवच्छेदकत्वेपि ज्ञानाद्युत्कर्षेणाकार्योत्कर्षदर्शनात्। तेषामपि कारणत्वात्॥ २१८
अतएवात्मत्वेकरूपस्यावच्छेदकत्वेपि अभिव्यंजकत्वमिति सिद्धांत इति यद्यपि। तथाप्यभ्युपेत्या
क्तं यतइति। अन्ये तु। साध्येन व्यर्थविशेषणतया हेतुसमानाधिकरणात्यंताभावप्रतियोगित्वा
वच्छेदकत्वाभावस्य गुरुत्वेपि साध्यतावच्छेदके सुग्रहात् अवच्छेदकतायां। न भवति गौरवं दोषः।
यथा हेतुनिष्ठनीलधूमत्वादौ साध्यनिष्ठधर्मेत्वावच्छेदकत्वं ग्राह्यमेव न। किंतूक्तप्रतियोगिता

वच्छेदकत्वमेवसिद्धंस्यादित्याशंक्यअन्योन्याभावगर्भव्याप्तौसाध्यवत्त्वावच्छेदेनसाधनसमानाधिकर
णान्योन्याभावाप्रतियोगित्वस्यगृह्यमानयावत्कत्वमर्थविशेषणत्वमेव।तथानीलधूमत्वावच्छिदक
कोटिप्रवेशादित्याहुः।योग्येति।शरीराभावस्ययोग्यानुपलम्भेनगृह्यादिविशिष्टाभावस्यानुमानादि
त्यर्थः।क्वतर्हिविशेषविरोधादूषणमित्यपेक्षायामाह-लिंगेति।उपसंहारेति।यद्यप्येवंघटत्वपटत्व
योरपिविरोधोनस्यात्तथापितदुभयाश्रयैकसाधकमानाभावात्तन्नसिध्यतिप्रकृतेतुनतदभावइति
भावः।अतएवयत्रतत्साधकमानंतत्रविरोधज्ञानमकिंचित्करमित्याह-अतएवेति।साक्षात्साधन
त्वमिति-तथावक्तुर्नेत्रहस्तादिव्यापारोद्वारमितिभावः।तद्द्वारैवेति।यद्यपिसर्गाद्यकालीनघटा
द्विकंप्रतिशरीराविष्ठानुरीश्वरस्यबाधस्तथापिपरेणातदनंगाकारादितिभावः।बेष्टतरेति।यद्वि
वाभेदविंतनादावप्यस्मदादिकर्तृत्वंतदानद्वितरेत्यपिबाधं।तत्रापिबेष्टावाधादिति।एवंवेति।बेष्ट

219 नरकार्येपीदं वोध्यं॰ द्वारं विनेति। द्वारत्वस्य जन्यत्वगर्भत्वादिति भावः। प्रत्युतानुकूल्यमित्याह॰ विशे
षयोरिति। अन्यथेति। प्रतिबंधकाभावस्य निमित्तत्वादिति भावः। प्रतिबंधकाभावस्येति प्रतिबंधक
प्रागभावस्येत्यर्थः। अन्वयव्यतिरेकादिति। अन्यथा निराश्रयं रूपाद्युत्पद्येतेति भावः। तत्रापीति। न २१९
विनश्यद्वस्थेपीत्यर्थः। गौरवमिति। एतच्च वस्तुगतिमनुरुध्योक्तं। वस्तुतः सहभावगर्भेपि हेतुत्वे यत्र
सहभावो न स्वतस्तत्रास्तु हस्त्वादिव्यापारद्वारा प्रकृते तु नित्यकृतेः स्वत एव तत्सहभाव इति किं त
देपेक्षेयेति वोध्यं॰ इष्टापत्तिमाशंक्य प्रागभावहेतुत्वं साधयति॰ अन्यथेति। विश्रामादिति। एतेन प्रति
योगि प्रतिबंधकत्वाभ्युपगमेन सर्वत्र प्रतिबंधकाभावेपि न कार्यसहभूतत्वेन जनकत्वं॰ किंतु यत्र त
थान्वयाद्यनुविधानं तत्रैव तथेति भावः। अत एव विशिष्य सिद्धेः प्रतिबंधकत्वेपि तद्विरहरूपायाः प्रस
तायाः न तथाकारणत्वमिति। एकदेति संपातायातं। एकदैव जनयतीत्येव प्रकृतसंगतेरिति बुद्धिरिति।

एकमिति॰

कर्तृत्वनिर्वाहकं हेतुत्वं बुद्धेरिष्टाद्वारैवेति भावः। सत्प्रतिपक्षवदिति एतेन सत्प्रतिपक्षस्याप्यायेवास्य
व्याप्तेः प्रतिबंधकत्वे हेत्वाभासांतरशंकाऽनेति दर्शितं। दुर्लीयइति। तथा च न सत्प्रतिपक्षत्वं तुल्यबल
त्वाभावादिति भावः। विरोधित्वादिति। तथा च पक्षधर्मता विनाकृतायाः अपि तस्या विरोधित्वात्तुल्य
बलत्वमस्त्येवेति भावः। किं चेति। ज्ञानमनित्यमेवेति व्याप्तौ संसारिज्ञानत्वं नित्यज्ञानान्यज्ञानत्वं वि
रूपमुपाधिर्वा स्यः। सर्वेश्वरनित्यज्ञानयोर्व्यावृत्त्ययोरभावान्न संभवतीत्याकूतः। वयं तु ज्ञानमनित्य
मेवेति व्याप्तौ नित्यत्वरूपसाध्यव्यापकस्योपाधिर्ज्ञानत्वरूपसाधनाऽव्यापकत्वेनास्मदादिज्ञाने
ग्राह्यं। तत्रोपाधिसद्भावादेव। अनित्यत्वस्य तद्व्याप्यस्यास्मदादिज्ञाने सत्वात्। अन्यथा साध्याव्याप
कत्वेनैवानुपाधितापत्तेः। तथा च नित्यज्ञाने साधनाऽव्यापकत्वं ग्राह्यं। तत्र न संभवति। तदसिद्धेरत
आह तदव्यावर्त्तकतयेति। तत्र ज्ञानत्वरूपसाधनाव्यापकतया यदुपाधिस्तन्निश्चयस्तत्संशयो वा न।

स्तीत्यर्थ इति विभावयाम: । उपाधेरिति । शरीरव्यापारजन्यत्वरूपस्येत्यर्थः । ननु यथा ज्ञानादिकार्य
योः कार्यकारणभावस्तत्र विपक्षबाधकस्तथात्रापि निरुपाधित्वस्य व्यवस्थापितत्वात्तदेव विपक्ष
बाधकमस्त्वित्यपरितोषं हृदि निधायाह । वयं त्विति । यद्यपि ज्ञानत्वावच्छिन्ने सर्वत्रैवानित्यत्वावग
220 मः अन्यथा बाधोपि प्रतिबंधको न स्यात् । तथापि सामान्यलक्षणानंगीकर्तुस्तादृशं ज्ञानमेव न भ
वति भिन्नविषयकं च ज्ञानं न प्रतिबंधकं । क्वचिन्नास्तीति ज्ञानानंतरं क्वचिदस्तीति ज्ञानस्यानुभ २२०
वसिद्धत्वात् । अस्मन्मते तु विपक्षबाधकाभावेन तादृशव्याप्तेरेवासिद्धिः । नन्वेवं बाधेपि प्रतिबंधको
न स्यात् भिन्नविषयत्वादिति वाच्यं । सामान्यलक्षणानंगीकर्तुरिदमनिष्टं नास्माकमित्याशया
त् सामान्यरूपेण कार्यकारणभावे सति उक्तरूपं ज्ञानमप्रामाण्यशंकास्कंदितमिति न प्रति
बंधकसमर्थनमित्यपि वदंति । व्याप्तीति । व्याप्तेः पर्यवसायित्यर्थः । नन्वास्त्विति । ज्ञानमनित्यमेव

२२

कार्य्यज्ञानजन्यमेवेत्यनयोः स्वरूपतो विरोधावभासात्। द्वितीयव्याप्यपक्षधर्म्मतासहितया नित्यज्ञानो
पस्थापने सति सस्यात्। तथाच विरोधज्ञानमकिंचित्करमुपजीव्यविरोधादित्यर्थः। अत्रेदमनभिमत
वीतं। ज्ञानमनित्यमेवेत्यत्र ज्ञानत्वावच्छेदेनानित्यत्वावगमात्पक्षधर्म्मतावलादपि ज्ञानेन नित्य
त्वग्रहः। नित्यत्वानित्यत्वयोर्विरोधस्य पूर्व्वावधृतत्वादिति द्विपरस्याभिप्रेतं। ननु नित्यानित्यज्ञानयो
र्विरोधप्रतिसंधानं प्रतिवंधकत्वेनाभिमतं। धेनोपजीव्यविरोधः स्यात्। तथाच पूर्व्वोक्तमेव समाधानं
मत्रद्रष्टव्यं। साधनेति। यद्यपि समवेतत्वघटितं साधनं तच्च नविशेषितं। तथापि ध्वंससाधारणपक्षत्वे
जन्यमात्रत्वस्यैव साधनत्वमिति। तदभिप्रायेणोक्तं। साधनविशेषितवत् साधनैकदेशविशेषितेपि ना
पाधिरित्यभिप्रायेणेदं वोध्यं। आर्द्रेंधनेति। इदं च पक्षमात्रव्यावर्त्तकविशेषणास्य साधनविशेषितसा
ध्यकारणं वोध्यं। व्याप्यमिति। अभेदे व्याप्तिपरे स्वसंवंधाग्रहादिति भावः। विशिष्टेति। तथाच संवंधितावच्छेद

कभेदात्संबंधग्रहणेनानुपपन्नः। नीलघटयोरभेदसंबंधग्रहवदिति भावः। कारणजन्यत्वमिति। यद्यपि
पदांतरसमभिव्याहृतजन्यत्वस्य तत्कारणकत्वेन नात्र व्याप्यस्य व्यापककोटिप्रवेशः तथापि का
रणजन्यत्वं कारणप्रागभावव्यापकप्रागभावप्रतियोगित्वं प्रागभावप्रतियोगित्वमात्रं जन्यत्वं वि
वक्षितं। शरीरजन्यत्वोपाधौ तु शरीरकारणकत्वमेव विवक्षितमिति तस्य पूर्वोक्तसाधनविशेषितत्वो
द्भावनासंगतेति भावः। ननु स्वजन्यत्वं न स्वजन्यतावच्छेदकमुक्तं। किंतु स्वजन्ये शरीरसहकारीति २२१
तथा च स्वजन्यत्वं शरीरजन्यतावच्छेदकं। एवं च शरीरजन्यत्वस्य कर्तृजन्यत्वव्यापकत्वात्तदव्याप्य
त्वेन जन्यत्वस्यैव कर्तृजन्यत्वाव्याप्यत्वमनुमेयमित्यपरितोषादाह-कृत्स्नादिनापीति। साधनेति।
परमाणुवादीनामपीश्वरप्रयत्नसाक्षादधिष्ठितत्वेन तज्जन्यत्वस्य पक्षे संभवादिति भावः। न च चेष्टा
जन्यत्वमुपाधिः। चेष्टायामेव साध्याव्यापकत्वात् न च चेष्टाश्रयजन्यत्वं तथाऽदृष्टद्वारा क्षित्यादेरपि

तज्जन्यत्वात्।यद्यप्यदृष्टाजनकचेष्टाश्रयजन्यत्वोपाधौनोक्तदोषस्तथापिविपक्षबाधकतर्काभावा
न्नास्यसाध्यव्यापकत्वमितिभावः।उक्तोपाध्यभिप्रायेणैवसाध्यव्यापकत्वाग्राहकंशंकतेऽन्यथेति।शरी
रेति-चेष्टाश्रयेत्यर्थः।शरीरजन्यत्वेति।ननुशरीरजन्यत्वंशरीरकारणकत्वमुक्तमन्यथासाधन
विशेषितत्वापत्तेः।तथाचकथंतद्रूपेजन्यत्वगुरुत्वावश्यकमितिचेत्।अत्रकेचित्।शरीरजन्यत्वस्य
गुरुत्वाद्यावन्नतस्यव्यापकत्वग्रहस्तावदेवकर्तृजन्यत्वेजन्यत्वमवच्छेदकीकृत्यगृहीतमुपस्थिति
लाघवादित्याहुः।अन्येतु।सकर्तृकत्वगुरुःप्रथममवश्यंवाच्योऽन्यथाशरीरजन्यत्वस्यतद्व्यापक
त्वासिद्धेः।तत्रचावच्छेदकगुरुः।प्राथमिकत्वत्यवच्छेदकंलाघवाज्जन्यत्वमेवनत्वन्यत्।इत्यभिप्राय.
कोऽयंग्रन्थइत्याहुः।उक्तास्वरसेनैवाह-तुल्यन्यायत्वंनवेति।तद्विरोधेनेति।नहिसंभवतिशरीरजन्यत्वं
सकर्तृकत्वव्याप्यजन्यत्वाव्यापकंसकर्तृकत्वव्यापकंचेतिभावः।अतएवेति।सकर्तृकत्वव्याप्यज

न्यत्वाव्यापकत्वेनशरीरजन्यत्वस्यसकर्तृकत्वाव्यापकत्वेनानुपाधित्वनिर्णयादितिभावः। कर्तृज
न्यत्वेपीति। यद्विशेषयोरित्यादेर्व्याप्तिग्राहकस्योभयत्रापिसत्त्वादितिभावः। एवंशरीरेति। जन्यताव
च्छेदकस्यव्याप्यत्वनियमादितिभावः। उपजीव्यविरोधादिति। नन्वननुगतस्यापिव्यापकत्वाव
च्छेदकत्वाद्घटत्वाद्यवच्छेदेदनेकर्तृजन्यत्वंगृहीतंशरीरजन्यतावच्छेदकत्वेनगृह्यतां। अतएवनोप
जीव्यविरोधः। नचहस्तादिजन्यव्यभिचारान्नशरीरजन्यतावच्छेदकंकर्तृजन्यत्वमेवास्तांविनिगम
काभावादितिवाच्यं। तथापिजन्यत्वेसकर्तृकत्वव्याप्यत्वानिश्चयादितिचेत्· + मितिवाच्यं·शरीरपदस्य
पूर्वोक्तविशेषाश्रयपरत्वात्· नचशरीरजन्यतावच्छेदकमेवघटत्वादिकमस्तु· कर्तृजन्यतावच्छेदकंज
न्यत्वं + अत्राहुः। कर्तृजन्यत्वेनजन्यत्वमवच्छेदकंशरीरजन्यत्वेसकर्तृकत्वंवा· यद्विशेषयोरित्यादेर्ग्राहक
स्यसमानत्वादितिसंशयेलाघवाज्जन्यत्वस्यैवकर्तृजन्यतावच्छेदकत्वंकल्प्यतेनकर्तृजन्यत्वस्यगौरवात्·

नवैकप्रतियोगिकजन्यतावच्छेदकद्वयोपस्थितौ लाघवावतारो न स्यात् तथा उभयस्याप्युभयजन्यता
वच्छेदकत्वसंभवादिति वाच्यं । उभयनिरूपितोभयजन्यतावच्छेदकत्वस्य प्रकृते विरुद्धत्वेन एकत्रैवाव
च्छेदकत्वकल्पना प्रसक्तौ कुत्र तत्कल्पनामिति लाघवावतारसंभवादिति । शरीरजन्यत्वस्य रूपा
दावपि सत्त्वेन न तन्मते कर्तृजन्यत्वं न्यूनवृत्तितया तदवच्छेदकं भवतीत्यप्याहुः । अस्य प्रसिद्धेति । इदं
च सर्वसामान्यलक्षणानभ्युपगमेन परं प्रत्यापादनं तस्य गोत्वाद्येकभावाभावविषयत्वेन तत्त्वयाव
च्छ्यवास्वत्वादित्येवमर्थकतया परं प्रत्येव तस्येत्यादि फक्किकापि योज्येति न स्वसिद्धान्तविरोध इत्याहुः ।
अप्रतीतेति । यद्यपि परमते प्रतियोगितावच्छेदकप्रकारकज्ञानस्यैवाभावधीकारणत्वं न तु प्रतियोगि
ज्ञानस्यावश्यकत्वात् । अन्यथा बाधोपि तन्मते प्रतिबंधको न स्यात् । न स्याच्च घटादिसामान्याभावज्ञा
नं सामान्यलक्षणानभ्युपगमेन सकलप्रतियोगिज्ञानासंभवात् । तथापि स्वमतावष्टंभेनेदं दूषणं ।

वस्तुतस्तु स्थापनानुमानस्य तर्कसचिवत्वात् तस्य च तदभावात् न्यूनबलत्वान्न सत्प्रतिपक्षत्वमिति भा
वः ज्ञानमात्रेति। यद्यत्र जातिपदमर्पितं तदा नित्यमात्रवृत्तीति साध्यार्थो ज्ञानातिरिक्तादवृत्तित्वं च हेत्वर्थो
विवक्षणीयस्तथा चावृत्तौ व्यभिचारवारणाय तद्दृष्टव्यं। केचित्तु कालादिवर्त्तमानत्वेनाप्रसिद्धिः स्यात्
जातिपदोपादेने तत्र ज्ञातित्वनिर्वाहकसंबंधेन ज्ञानमात्रवृत्तित्वहेतुलाभ इत्याहुः। चेतनेति। रूपादौ
संख्यादौ च व्यभिचारवारणाय चेतनविशेषपदं। यद्यपि यथा श्रुत भावनायां व्यभिचारि परमाणुवृत्ति 223
नित्यस्थितस्थापकवृत्तिसंस्कारत्वजातिसत्वात्तस्याः तथापि हेतौ गुणपदं प्रत्यक्षत्वेन विशेष्यं एवं चा
त्मैकत्वप्रत्यक्षत्वपक्षे विशेषपदं। आत्मेति। यद्यपि नित्यविशेषगुणाधार इत्येव वक्तुमुचितं तथापि तन्मते
शब्दस्यनित्यतया आकाशे एव व्यभिचारस्यात्। अस्मन्मते चेश्वरात्मनः सिद्धसिद्धिव्याघातेनापक्षत
याऽस्मदाद्यात्ममात्रपक्षत्वे सिद्धिसाधनं माभूदिति तादृशजातिगर्भसाध्यमुपात्तमिति बोध्यं नत्वसूद

ष्टाजनकशरीराजन्यत्वंहेतुः। नबहूस्तादिजन्येतथापिव्यभिचारः। शरीरपदस्यचेष्टाश्रयपरत्वादित्य
परितोषादाहु॰अपिचेति। निर्विशेषणादिति। व्यभिचारवारकविशेषणशून्यइत्यर्थः। अन्यथेति॰ यदि
जातिःस्वतोनव्यावृत्ता किंतुव्यक्तिव्यावर्त्तनीयातदाव्यावृत्तपरस्परव्यावर्त्तनीयत्वेनपरस्परस्यान्यो।
न्याश्रयापत्तिरित्यर्थः। व्यभिचारावारकविशेषणाज्ञानंव्याप्तिग्रहपुतिबंधकमित्यभिपुत्यशंकते॰व्य
भिचारेति। विशेषणशून्येविशेषणाज्ञानशून्य ऽइत्यर्थः। अतएवोत्तरेपुमेयत्वेनज्ञायमानपर्य्यन्तमु
पात्तमिति। व्यभिचारादिति। आकाशादिपक्षकेजन्यत्वविषयकतयेवानुमितिजनकत्वादित्यर्थः। अ
तएवान्यथासिद्धिरपीतिभावः। धूमस्यापीति। आलोकविषयतयापि। तस्यतज्जनकत्वादित्यर्थः। अ
त्रयद्यपिव्यासज्यवृत्तिर्व्याप्तिर्यत्रविशेष्यवाधः तत्रवाच्या। यथाआर्द्रेंधनपुभववह्निमत्वादौ॰तच्चनसं
भवति। धूमादिसामानाधिकरण्यस्यसंयोगविशेषस्यवह्निधूममात्रनिष्ठत्वात्। अपिचार्द्रेंधनादेविशे

२२४

षणो व्याप्यभावनिश्चयेपि तदवच्छिन्नवह्निविशेषव्याप्तेर्ग्रहादनुमितिस्तथापि पृथमोक्तविशिष्टव्याप्त्यभि
प्रायेणाद्दूषयति॰नेति। ननु नीलधूमहेतौ साधनावच्छिन्नसाध्यव्यापकधूमवत्त्वमुपाधिः। तथा चानौपा
धिकत्वाभावसाधनेन बाधः इति शंकते नचेति। नीलधूमवति सर्वत्र धूमवत्त्वसत्त्वादित्यर्थः। केचित्तु उ
भयत्रोपाधिमाशंकते॰ नचेति। अदृष्टद्वाराशरीरस्य क्षित्यादावपि जनकत्वमिति मूल एव स्फुटमिति।
शरीराजन्यत्वं नित्यमात्रवृत्तीत्यजन्यत्वोपाधेः साधनव्यापकत्वमित्यर्थः इत्याहुः। तन्न॰ एवं हि व्या २२४
प्यत्वासिद्धिमुद्धरतः स्वरूपासिद्ध्यापत्तेः। तथा च शरीराजन्यत्वस्य पूर्वोक्तेतात्पर्यं। तच्च क्षित्यादिवृ
त्तीति न साधनव्यापकमिति। तादृशार्थविशेषणेन यात्वदभ्युपगतमपि अनुमानं न स्यादित्याह॰
किं चेति। उभयत्र वह्निरहितत्वमात्रस्यैव गमकत्वादिति भावः। वह्निरहिते ति। यदि चास्या योगोलके सा
ध्याव्यापकत्वान्नोपाधित्वं तदा धूमवत्त्वोपाधेः साधनव्यापकत्वमिति तुल्यमिति भावः। ननु गंधादिषु मध्य

इतिव्यभिचारवारकतापर्य्यवसन्नमेव:गंधमात्रव्यंजकत्वंक्षितिद्व्यावृत्तविशेषितंहेतूकर्त्तव्यं।अन्यथासंन्नि
कर्षव्यभिचारःस्यात्।तस्यचतेनव्यभिचारवारणं।तदायदिव्यभिचारःस्यात्सचतदायदिगंधमात्रव्यं
जकत्वंप्रसिद्धंस्यात्।तथाचगंधादिषुमध्यइतिप्रसिद्धिसंपाद्यसंनिकर्षपरंपरयाव्यभिचारवारणप्र
योजकमेवेत्यस्वरसादाह।अपिचेति।यत्त्विति।शरीरजन्यघटाद्यपेक्षयाजन्याःक्षित्यादयोबहवः।प्रतिये
गिबाहुल्यकृतंवाभावबाहुल्यमितिभावः।अन्यथेति।तथाचावच्छेदकलाघवंप्रयोजकंनव्यक्तिला
घवमितिभावः।प्रयोजनेति।प्रकृतेपक्षधर्मतायामुपयोगःशरीरपदस्येतिभावः।अथेति।नचयदि
तत्रव्याप्तिरस्तितदाप्रथमंव्याप्तिग्रहोजातस्ततःकिं।पश्चादपितद्ग्रहेणानुमितिसंभवादितिवाच्यं।य
त्रैवप्रथमंव्याप्तिग्रहस्तत्रैवव्याप्तिरित्यभिमानादिति।यत्रेति।निर्धूमोयमार्द्रेंधनप्रभववह्निरहितत्वा
दित्यत्रार्द्रेंधनरूपविशेषणाभाववतिविशेष्यवतितप्तायःपिंडेसाध्यंनिर्धूमत्वंतथावह्निरूपविशेष्य

भाववत्तिकेवलार्द्रेंधनवत्तिवन्हादौसाध्यंनिर्धूमत्वं।एवंचपृत्येकस्यधूमापृयोजकतयाविशिष्टस्यत
त्पृयोजकतयातदभावोविशिष्टाभावोहेतुः।नचैवंपूक्तेपिसिद्धंजन्यत्वरूपविशेष्यवत्तिशरीररूप
225 विशेषणाव्यतिरेकेण।कर्तृकत्वंरूपसाध्यसंबंधानिश्चयात्।क्षित्यादौपक्षेतस्यसंदिग्धत्वात्‌।तथा
चात्रविशिष्टाभावोनहेतुरित्यर्थः।यत्तुनसाध्यमितिपाठः।तथाचयत्रविशेषणविशेष्यान्यतराभा
ववत्तिसाध्याभावः।विशेषणाद्यन्यतराभावोव्यभिचारीतियावत्तत्रविशिष्टाभावोनहेतुरित्यर्थः।
यत्तुनसाध्यमितिपाठः।तथाचयत्रविशेषणविशेष्योरन्यतुनतथेतिनहेतुरिति।तन्नविशेषणाद्यन्य २२५
तराभावस्यव्यभिचारित्वेविशिष्टाभावव्यभिचारस्यचजुल्लेपत्वात्‌।अखंडएवेति।तथाचशरीरजन्य
त्वाभावेजन्यत्वपृतियोगिकत्वाभावात्तदवच्छेदेनतत्रव्याप्यग्रहेविशिष्टावच्छेदेनेवतद्ग्रहइतिनवै
यर्थ्यमितिभावः।अधिकमिति।अनुपयुक्तनीलाद्यंशोपादानादितिभावः।हेत्विति।हेतूद्धरण

धिकमधिकमितितल्लक्षणत्वादितिभावः। नर्हिनीलधूमस्यकथंनहेतुत्वमतआह- नीलत्वमपीतिविशे
ष्यतावच्छेदकस्यसंबंधितानवच्छेदकत्वएवविशेषणस्यापितदवच्छेदकत्वादित्यर्थः। अत्रदृष्टांतमाह•
दंडत्वेनेति। ननुत्वन्नैल्यंव्याप्यत्वावच्छेदकत्वेनहेतौमाप्रविशतुव्याप्यत्वेनैवतत्रप्रविशत्वित्यतआह•
धूमत्वंवेति। व्याप्यतावच्छेदकावच्छिन्नस्यैवव्याप्यत्वप्रक्तेवधूमत्वंतथा। तदवच्छिन्नत्वंचननैल्यइतिव्या
प्यतयापिननत्प्रवेशस्तत्रेतिभावः। इदंचवस्तुगतिमनुरुध्योक्तं। वस्तुतो धूमत्वस्यतैल्यवत्त्वेपिधूम
व्यक्तिस्थानीयंतदितिधूमएवहेतुर्नतुनीलधूमोनीलधूमत्वस्यानवच्छेदकत्वात्। नीलत्वस्यापिधूमत्वाव
च्छिन्नत्वेनवहेतुत्वादितिनैल्यधूमत्वासत्वोपवर्णनमप्रकृतमेव- प्रकृतंतुगौरवमितिध्येयं। ननुनीलत्वे
धूमत्वासत्वेपिनीलधूमेधूमत्वम- स्त्येव- तदवच्छिन्नत्वेनवतस्यहेतुप्रवेशः स्यादित्यतआह- नीलधूमइति•
तथाचनीलोपलक्षितधूममात्रस्यैवधूमत्वावच्छिन्नत्वान्नकेनापिप्रकारेणहेतौनैल्यप्रवेशइतिभावः।

226 ननु व्याप्यतावच्छेदकमस्तु धूमत्वमात्रं किंतु नीलधूमस्यापि व्याप्यत्वात्तेनापि रूपेण तस्य हेत्व-
वयवेन निर्देशः क्रियतामित्यत आह - किं वेति । व्याप्यतानवच्छेदकेन हेतुनिर्देशेऽतिप्रसंगादि-
ति भावः । ननु धूममात्रनिष्ठव्याप्तौ नीलधूमत्वं न्यूनवृत्तित्वादेव नावच्छेदकं न तु गौरवात् । नी-
लधूममात्रनिष्ठव्याप्तौ नीलधूमत्वमेवावच्छेदकं न तु धूमत्वमतिप्रसक्तत्वादिति चेत् । न ।
न्यूनवृत्तेरपि व्याप्यतावच्छेदकत्वात् । अन्यथालोकाद्यवृत्तित्वेन धूमत्वस्याव्याप्यवत्त्वापत्तेः । २२६
ननु गौरवेण नीलधूमत्वावच्छेदेन व्याप्त्यग्रहेऽज्ञानरूपासिद्धिरस्तु· ननु हेत्वाभासीभूतासा-
ज्ञायमानप्रतिबंधकत्वाभावात् । नवयतो गौरवान्नीलधूमत्वस्यानवच्छेदकत्वं तदेव व्याप्य-
त्वासिद्धत्वेन विवक्षितं । तस्य ज्ञायमानत्वेनैव प्रतिबंधकत्वादिति वाच्यं - परामर्शविषयाभावस्यै-
व सिद्धित्वेन ग्रंथः स्वदभिमतत्वात् । गौरवस्य वा तथात्वात् । तस्याव्याप्यत्वासिद्धिर्वैयर्थ्यविशेष

णादावपीत्यप्यसंगतमितिचेत्‌। अत्र केचित्‌। यत्संबंधितावच्छेदकरूपवत्त्वलक्षणा व्याप्तिर्ज्ञाय
वादनुमितिहेतुः सकलसाधनवतिसाध्यवत्त्वंदर्शयता उदाहरणेन प्रदर्शितं तु न तदभावो व्याप्य
त्वासिद्धिरवच्छेदकत्वाभावपर्य्यवसन्नो नीलधूमादौ नीलधूमे धूमत्वरूपावच्छेदकांतरसत्त्वेन नी
लधूमत्वस्य तद्घटितशरीरस्यानवच्छेदकत्वात्‌। एवंच परामर्षविषयाभावत्वमपि समर्थितं भव
तीत्याहुः। अत्र वदंति। संबंधितावच्छेदकलक्षणायां व्याप्तावच्छेदकं पक्षानतिरिक्तदेशावृत्ति
त्वं तदा तन्नीलधूमत्वेप्यस्ति। अथ तादृशधर्मांतराघटितत्वमपि तत्र विशेषणं तदा सर्वव्या
प्तिलक्षणातो गौरवादनुमित्यहेतुरेवेति तदभावज्ञानस्य क्व प्रतिबंधकता। तादृशधर्मांतरा
घटितत्वादेरुदाहरणादुपस्थितिशंकैव नास्तीति न किंचिदेतदिति। तस्मादिदमत्रतत्त्वं। नी
लधूमे धूमत्वावच्छिन्नव्याप्तिसत्त्वेपि नीलधूमत्वावच्छिन्नव्याप्तिविरहो व्याप्यत्वासिद्धिः सर्वविशे

षणावच्छिन्नविशेष्यविरहो वा संबंधविरहो वा इत्यन्यदेतत्। एवं यज्ज्ञानगर्भहेत्वाभासलक्ष
णं परामर्शाविषयभावत्वं तत्संगच्छते नवनीलधूमत्वावच्छिन्नव्याप्यप्रसिद्धेः कथमेवमिति वा
च्यं कस्तूरिकाचन्दनादिप्रतियोगिकविशेषव्याप्तेरेव तादृश्याः प्रसिद्धेः। नवतादृशी व्याप्ति
२२७ र्नीलधूमेस्त्येवेति वह्नित्वावच्छिन्नप्रतियोगिकनीलधूमत्वावच्छिन्नव्याप्यत्वाभावस्य वा व्या
प्त्वे पुनः सैव प्रसिद्धिरिति वाच्यं। नीलधूमत्वावच्छिन्नव्याप्तिप्रतियोगित्वलक्षणव्यापकत्वा २२१
भानस्य वह्नित्वावच्छिन्नव्याप्यत्वासिद्धिपदार्थत्वात् तज्ज्ञानस्यापि प्रतिबंधकत्वात् समान
वित्तिवेद्यतया व्याप्यत्वतद्व्यापकत्वस्यापि परामर्शविषयत्वेनोक्तव्यापकत्वाभावे परामर्श
विषयत्वाभाववत्त्वस्यापि सत्वाच्च। यद्वा धूमत्वावच्छिन्ने नीलधूमत्वावच्छिन्नव्याप्यभाव एव व्या
प्यत्वासिद्धिः। न स्यानीलधूमत्वावच्छिन्नासत्वेनान्यधर्म्मावच्छिन्ने विरहादिति। वस्तुतो व

क्तिनिरूपितधूमनिष्ठव्याप्तौ नीलधूमत्वं नावच्छेदकं किंतु धूमत्वमित्युभयवादिसिद्धं अवच्छेदक
त्वं च स्वरूपसंबंधविशेषो वा अन्यद्वेत्युभयवादिनिर्वक्तव्यं अन्यथा गौरवेणानीलधूमत्वावच्छे
देन व्याप्त्यग्रहे ऽज्ञानरूपाऽसिद्धिरित्यपि न स्यात्। गौरवज्ञानस्यावच्छेदकत्वग्रहप्रतिबंधकत्वा
त्। एवं च यत्समानाधिकरणात्यंताभावप्रतियोगितावच्छेदकावच्छिन्नसाध्यसामानाधिकर
ण्यावच्छेदकावच्छिन्नत्वं व्याप्तिस्तथा च नीलधूमत्वेन। दृशावच्छेदकत्वाभावः परामर्शविषया
भावतया भवत्यसिद्धिः। न च व्याप्तेस्तादृशावच्छेदकगर्भत्वे मानाभाव इति वाच्यं। व्यर्थविशे
षणे व्याप्तिग्रहप्रतिबंधस्यैव तत्प्रमाणत्वात्। गौरवज्ञानस्यावच्छेदकत्वातिरिक्तव्याप्तिघ
टकपदार्थग्रहाप्रतिबंधकत्वात्। तथा च व्यभिचरिते व्याप्तिग्रहप्रतिबंधक एवाव्यभिचारगर्भ
त्वे तस्य मानं। न च तस्य व्याप्तिग्रहप्रतिबंधो न भवत्येवेति वाच्यं। एवं ह्यज्ञानरूपाप्यसिद्धिर्न स्यात्।

तथा चैकामसिद्धिपरिहारतो द्वितीयापत्तिरिति सिद्धांतो मन्येत: तस्मात्परिहार एवात्रा ज्ञानरूपा
सिद्धिं स्वीकुरुष्वाव्याप्तेव च्छेदकगर्भत्वमति दिक् । अमत्वेनेति । ननु ज्ञायमानतयाऽनुमितिप्रतिबं
धकत्वाभावात्तथापि अस्य कथं हेत्वाभासत्वं । किं चैतत्प्रयुक्तत्वं तज्ज्ञान्यत्वं तज्ज्ञाप्यत्वं वा । न चालिं
११४ गोपहितभानपक्षेपि तद्भासते । उपस्थापकाभावात् । तत्कथं तद्विषयत्वेनानुमितेर्भ्रमत्वमिति चेत्
अत्राहुः । अनुमित्याभासता प्रयोजकत्वं हेत्वाभासत्वमिति संप्रदायमतेनास्याभिधानं । तत्प्रयुक्त २२८
त्वं चैतद्विशिष्टत्वं तथा चालिंगोपहितभानपक्षे व्याप्यत्वासिद्धा नीलधूमो व्याप्यत्वेनानुमितौ भा
सत इति तस्या भ्रमत्वं केचित्तु । वह्निव्याप्यनीलधूमवान्वह्निमानित्यनुमितौ व्याप्यव्यापकभाव
स्य संसर्गविधया भानान्नीलधूमवत्त्वेन स्वरूपेण । तदभावात्तद्विषयत्वेन तस्या भ्रमत्वमित्याहुः
वस्तुतोऽन्यथासिद्धधूमज्ञानादनुमितिसत्त्वेपि नीलधूमस्योद्देश्यानुमितिप्रतिबंधकत्वेनैव हेत्वा

भासत्वं। शरीरजन्यत्वादौ विशेष्यस्यासिद्धतया विशिष्टस्य व्याप्यत्वासिद्धतयाऽनुमितिसामान्य
प्रतिबंधकत्वमेव। एतदेव सर्वमभिसंधायाह· दिगिति। प्रकृते योजयति· एवमिति। शरीरजन्यत्वे
पीति। शरीरजन्यत्वाश्रयामात्रप्रतियोगिकयावदन्योन्याभावोपीत्यर्थः। पूर्वोक्तदोषं निरस्यति-
ननु सुरभिधूमत्वं न कार्य्यतावच्छेदकं प्रत्येकसामग्रीद्वयसमाजादार्थसमाजमहिम्नैव विशिष्टका
र्य्यसिद्धेर्नीलघटत्ववदिति चेत्‌· न· विशिष्टस्य कार्य्यतानवच्छेदकत्वेपि प्रत्येककारणतया एत
तयोर्व्याप्यनिश्चयमूलत्वसंभवात्‌। स्थापनानुमाने पूर्वोक्तं व्यापके व्यर्थविशेषणत्वमुद्धरति। व्याप
केवेति। विशिष्टस्येति। यद्यप्यदृष्टप्रागभावेत्यादिकृतित्वादिना प्रत्येकमेव कारणत्वं न तु तादृश
कृत्यादिविशिष्टात्मत्वेन कारणत्वं। कृत्यादीनां सहकारितया दंडचक्रवदवच्छेदकत्वाभावात्‌। त
थापि वस्तुगतिमनुरुध्यैतदुक्तं न तु तत्त्वेन जनकत्वं विवक्षितं। न चैवं न विशिष्टस्य व्यापकत्वमिति वाच्यं·

प्रत्येककारणतायामूलत्वसंभवात्।वस्तुतः प्रत्येकमेवव्यापकत्वमपि।अर्थसमाजमहिम्नाविशि
ष्टसिद्धिः।अतएवग्रंथकृतापितथैवविभावितं।धूमंप्रतितुआर्द्रेंधनप्रभववह्नित्वेनैवकारणत्वात्।वि
229 शिष्टस्यव्यापकत्वं।नचवह्निसंयोगआर्द्रेंधनसहकारीतिवाच्यं।तत्संयोगेसत्यपितत्प्रभववह्न्यु
त्पादनंविनाततोधूमानुत्पत्तेरितिवदंति।अखंडइति।तथाचप्रतियोगिविशेषणत्वान्नवैयर्थ्य
मितिभावः।अजन्यत्वमिति।एवंचाप्रयोजकत्वमपीतिध्येयं।सत्प्रतिपक्षोच्छेदादिति।समीची २२९
नप्रतिपक्षोच्छेदादित्यर्थः।यथाचैवंव्याख्यानंतथोक्तंप्राक्।किंचेति।एषामन्यतमःस्थापना
हेतुरपरस्यचविरहःप्रत्यनुमानोपाधिरित्यर्थः।अतएवेति।यतःसमवेतत्वादिघटितजन्य
त्वस्याभावउपाधि।ततस्तस्यध्वंसवृत्तित्वात्नसाध्यव्याप्तिरित्यर्थः।प्राचीनमतमाहुः।अन्यत्वि
ति।यन्निष्ठेति।यद्विशेष्यतावच्छेदकविशिष्टेत्यर्थः।अभावनिष्ठव्याप्तोअभावत्वरूपविशेष्यताव

छेदकविशिष्टव्याप्तावित्यर्थः। शरीरेति। अभावत्वावच्छिन्नेजन्यत्वाभावेशरीरंविनैवाकर्तृकत्व
निरूपितव्याप्तिग्रहात्तद्विशिष्टेव्याप्तिरितिभावः। अत्रदमनभिमतिवीजं। यन्निष्ठेत्यत्रलाघ
वेनव्यक्तिपरत्वंनतुविशेष्यतावच्छेदकावच्छिन्नपरत्वंगौरवत्वात्-एवंचशरीरजन्यत्वाभावनिष्ठ
व्याप्तिःशरीरपदंविनानगृह्यते-प्रतियोगितावच्छेदकंविनाअभावस्यैवाग्रहात्। तथाचनकथं
विशिष्टस्यव्याप्यतावच्छेदकत्वं-अन्यथाजन्यत्वाभावोपिव्याप्योनस्यात्। सकारणकत्वाभावा
दौजन्यत्वविशेषणंविनापिअभावत्वावच्छिन्ननिष्ठव्याप्तेर्ग्रहादिति। केवलव्यतिरेकिणिउभयसि
द्धसाध्यवत्वंकेवलान्वयिनिउभयसिद्धसाध्यवद्भिन्नत्वाप्रसिद्धमित्यन्वयव्यतिरेकीत्युक्तं। अन्योन्या
श्रयादिति। लाघवाज्ञानजन्यानुमितित्वस्यैवलघुत्वादित्यर्थः। यत्रप्रमाणाद्इति। नन्वेवंसंभवल्ल
घुविषयताकानुमितित्वंलाघवज्ञानकार्यतावच्छेदकमितिपर्यवसन्नं-तथाचयत्रलाघवप्रकार

कंज्ञानंनज्ञातं·वस्तुतोलघ्वोरेवानुमितिस्तत्रव्यभिचारः।नचलाघवज्ञानजन्यानुमितित्वमेवतथा।
अन्योन्याश्रयादितिचेत्·न·लाघवगौरवोपस्थितिकालीनलघुविषयताकानुमितित्वस्यकार्य्य
तावच्छेदकत्वात्।ननुतथापिलाघवज्ञानोपनीतमेकत्वंप्रकारीभूयानुमितौकथंभासतां।व्याप्त्या
१२४ द्युपनीतादन्यस्यानुमितौभानेमानाभावादितिपूर्वोक्तविरोधात्।नचवस्तुगत्यैकःसिद्ध्यतिनत्वे
कत्वमपीतिवाच्यं।एकत्वानेकत्वसंशयतादवस्थ्यादितिचेत्।अत्राहुः।व्याप्त्याद्यनुपनीतमपिला २३०
घवज्ञानोपनीतमनुमितौभासतेनान्यथेतिप्रसंगात्।लाघवज्ञानस्यप्रमाणमात्रसहकारित्वकल्प
नात्।तदिदमुक्तंतथाविधप्रमाणमात्रइति।अत्रलाघवोपनीतत्वस्यैवनियामकत्वान्नातिप्रसंगः।व्या
प्त्यादीत्यादिग्रंथः लाघवानुपनीतविषयकः।नन्वेकविषयकत्वेप्यनेकविषयकत्वसंभवात्संशय
तादवस्थ्यमितिवाच्यं।एकमात्रकर्तृकत्वएवलाघवावतारात्तस्यैवानुमितिविषयत्वात्।अतएवनाना

कर्त्तृकत्वघटेषु पश्चादेककर्त्तृकत्वज्ञानं बाधात् इत्यग्रे वक्ष्यते । अन्यथा नानाकर्त्तृकेष्वप्येककर्त्तृकता
ज्ञानस्य प्रमात्वेन बाधासंभवादिति । अन्ये त्वित्यत्रास्वरसबीजमुद्घाटयति अत्रापीति । किं वा तत्रानुमाने
क्षितिकर्त्तृकरकत्रोरभेदादनुमितावपि सागरादिकर्त्तरि तद्भिन्नत्वसंशयात् ईश्वरे नानात्वसंशयतादव
स्थ्यमिति । अनादिभावत्वादिति । यद्यप्यनुमितौ नानादित्वं विषयस्तथाप्यनादिकार्य्यप्रवाहविषय
त्वेन तत्सिद्धिरिति भावः । नव्यास्त्वित्यस्वरसोद्भावनं · तद्बीजं तु उपनीतभानानंगीकारात् नित्यज्ञान
जन्यत्वं पक्षधर्म्मताबलादपि न सिध्यतीति । ननु तथापि कथं सर्वविषयत्वासिद्धिरित्यत आह · नियमे
ति । एवं च पक्षतदुपादानाद्यतिरिक्तविषयत्वमपि सिध्यति । एतेन प्रथमकल्पे अस्वरसोपि दर्शितः । ए
तादि विषयत्वेपि तत्र सर्वविषयत्वासिद्धेरिति । नन्विति । तथा च जगन्निर्म्मातृत्वमितिभावः । नत्वांतइ
तानद्यसद्विषयत्वेन भ्रमत्वं किंतु व्यधिकरणप्रकारकत्वेनेति भावः । स्वेष्टसाधनतेति । तथा च प्रयत्नस्य

प्रयोजनज्ञानव्याप्यत्वमव्याहतं· प्रयोजनज्ञानजन्यत्वनियमश्च जन्यत्वोपाधिदूषित इति भावः। प्र
यत्नो। त्यक्तो प्रयोजनज्ञानापेक्षा न तु तत्सिद्धावपीत्याह· वस्तुत इति। करोतीति। ईश्वर इति शेषः·
२३। ननु तदिच्छायाः सिसृक्षारूपत्वे प्रलयो न स्यात्। संजिहीर्षारूपत्वे च सर्गो न स्यादित्यत आह·
सर्गेति। सुखादीति· भावकार्यस्य समवायिकारणजन्यत्वनियमात्। यथात्मादिजन्यत्वमि
ति भावः। मीनशरीरेति। तच्च शरीरं नेश्वरस्य तददृष्टोपगृहीतत्वाभावात् किं तु संसारिण ए २३१
वेति ध्येयं। अत एवाह· सोयं भूतावेशेति। न चैवं संसार्यात्मा न सिध्येत्। तच्चापाराणां भूतावे
शन्यायेन परमेश्वरदेव सिद्धेरिति वाच्यं। तथा सति मुक्त्वाभावेन शरीरासिद्धौ भूतावेशन्याय
स्याप्यभावात्· भगवत्पदस्य व्याप्यभावात्। ईश्वरानुमानश्चेति। यद्यपि मन्वादिशरीरारंभ
कत्वगुणकादिकर्तृत्वेनेश्वरानुमानं स्यादेव· तथापीश्वरस्यावश्यकत्वात् किं मन्वादिनेति भावः।

विश्वतश्चक्षुः विश्वविषयसाक्षात्कारवानित्यर्थः। विश्वतोमुखः विश्वविषयकवचनवानित्यर्थः
विश्वतोबाहुः विश्वविषयकप्रयत्नवानित्यर्थः। विश्वतः पात् विश्वव्यापीत्यर्थः। बाहुभ्यां धर्माध
र्माभ्यां पतत्रैः परमाणुभिः सधर्मात संयोजयति किमर्थमत आह द्यावाभूमी संजनयन् द्या
वेत्यूर्द्ध्वलोकसप्तकं भूमीत्यधोलोकसप्तकमुपलक्षितं संपूर्वद्वयं व्याकृताश्चेतिश्चांदस सूत्र
णाधमनजनाभ्यामन्वीयते। स्मृतिविरोधेन श्रुतेरन्यपरत्वशंकां तद्विरोधप्रदर्शनं निरस्यति
उत्तमइति॥ ॥पुंसंगादाह स्यादेतदिति। कार्य्येणेवेति। यथाक्षित्यादिलक्षणकार्य्यानुपपत्ति
रीश्वरे मानं तथा दाक्षादिलक्षणकार्य्यानुपपत्तिः ब्रह्मणो मानमित्यर्थः। अनुमीयत इति नैया
यिकदिशा। उपदर्शितार्थापत्तेः स्वयं प्रत्यक्षेन स्वीकारादिति ध्येयं। नन्वेवं न कार्य्येणात कुन्नय
नं किंतु कार्य्याभावेनेत्यत आह व्यतिरेकेति व्यतिरेकनिरूपकतया तत्प्रयोजकत्वमिति भावः॥

तस्यातदृष्टस्य तदर्थत्वात्। दृष्टसाद्गुण्यार्थत्वात्। तथाचदृष्टसाद्गुण्यमेवादृष्टसाद्गुण्यमेवंतं
त्रमानमित्यर्थः। परमाण्विति। खंडप्रलये परमाणुकर्म्माणि सत्यपि यथानद्व्यणुकारंभकः सं
योगइत्यर्थः। पूर्वादृष्टस्यनाशादग्रिमस्योत्पादकाभावाद्दाहानस्यादित्याह। मणिपप सारणे
९३४ ति। नचमणेरपसारणेनैवतदादृष्टमुत्पाद्यतइतिवाच्यं। तस्यविहितनिषिद्धेतरत्वेनतदजनक
त्वादितिभावः। मण्याद्यभावएवेति। इदंचादृष्टकारणतानिरासमात्राभिप्रायेण पातत:। व २३२
स्तुतो ऽस्यापिनकारणत्वमित्याग्रेवक्ष्यते। तदभावादिति। अदृष्टाभावादित्यर्थः। वंध्येत्युपलक्षणं
परमाणुकर्म्माणीत्यपिद्रष्टव्यं। नन्वदृष्टं दृष्टोपकारद्वारैवसर्वत्रजनकं नतुसाक्षादित्यतआह
अदृष्टंचेति। अन्यथेति। द्वारेपिसाक्षाज्जनकत्वंतस्यस्वकार्य्यमेव। तत्रापिद्वारांतरापेक्षायामन
वस्थानादितिभावः। नचेति। तथाचदाहेपितदेवजनकमितिभावः। अयेनेति। देशनालक्षणार्था।

धर्म्मइत्यत्रार्थपदेनश्रेयस्करार्थिकेनश्येनापूर्वमनर्थरूपंव्यावृत्तं-तस्यनिषिद्धशत्रुवधजनकत्वे
नाश्रेयस्करत्वात्तद्धृदयमपिनधर्म्मइत्यर्थः।दाहपुतिकूलेति।नियतामिसाध्यदाहपुतिकूलम्
वादृष्टमुत्पद्यतइतिनाग्नेतरजन्यदाहपुतिबंधइतिभावः।दोषांतरमाह-अदृष्टेति-अदृष्टवेतिचि
वा।मागमादौतथादर्शनादितिभावः।उभयसत्वेउत्तेजनकपुतिबंधकसत्वे-तद्धेति-कारणत्वमित्य
र्थः।मपिासद्भावइतिःउत्तेजकाभावविशिष्टमणिसद्भावइत्यर्थः।पुतियोगीति।यद्यपिपुतियो
गिभेदस्थलेपुतियोगितावच्छेदकभेदस्यावश्यकत्वात्तद्भेदादेवस्तथापिपुतियोगिभेदोयथाऽ
भावभेदव्याप्यस्तथापुतियोगितावच्छेदकभेदोपीत्यर्थः।पृयुक्तइति-विशेषणाद्विविरहान्यतम
व्याप्तइत्यर्थः।अनुगतेति।यद्यपिशब्दपुयोगरूपेव्यवहारेव्यभिचारोनानार्थशब्दानुगमेपिविष
यानानुगमात्।तथापिव्यवहारशब्देनज्ञानमेवविवक्षितं-नचैवमनन्वयः।ज्ञानेनविषयिणाविषय

स्योपलक्षणात्। तथा चानुगतज्ञानस्यानुगतविषयसाध्यत्वादित्यर्थो द्रष्टव्यः। ननु शक्तिरेवा
नुगता विषयोऽस्त्वित्यत आह- शक्तेश्चेति। श्यामध्वंसप्रयुक्तस्तन्नियतो ननु तज्जन्यः। समसमय
त्वादिति ध्येयाननुघटत्वेनेति घट आसीदिति प्रत्ययाभावादिति भावः। सोपमिति। उत्पादयिना
श्चवान्तुरीयः संसर्गाभावोऽस्तु ध्वंस एव वास्तु नान्यथापि शक्तिसिद्धिरिभावः। ननु तुरीयसंस
र्गाभावस्वीकारे विभागवाधात इत्यपरितुष्यन्नाह अस्तु चेति- ननु विनाशिनि ध्वंसपरिभाषैव संदि
ग्धेत्यसवेराह- यद्वेति। यदिह्यतीतेति। यद्यपि विशेष्यतावच्छेदकघटत्वाद्यवच्छिन्नघटादिप्रति
योगिनः प्रतिक्षणं ध्वंसो नेष्यते तादृशस्य नाशापादनमेव दोषावहं- तथापि विशेष्यप्रत्यभिज्ञा
यमानत्वात् समवाय्यसमवायिनाशाभावाच्च न घटादेर्विनाशः किंतु विशेषणस्यैव न च विशेषणना
नाशासामग्र्येव विशेष्यनाशिका- एवं हि नित्यमात्रापलापापत्तेः। श्यामेति। अत एव श्यामोऽयमासी

दितिप्रुत्ययोनत्वयमासीदितिप्रत्ययइतिभावः।ध्वंसस्येतितथाचोत्तेजकानयेपिदाहापत्तिः।उत्ते
जककालोत्पन्नस्यप्रतिबंधकध्वंसस्यतदाप्यनाशादितिभावः।ध्वस्तस्यतिक्क्वचित्पाठः।सचसुगम
एव।उत्पादविनाशशालीतुरीयःसंसर्गाभावएवविशिष्टाभावइतिनिरस्यति।नचेति।अत्यंता
भावएवासावितिपक्षंपरिहरति।नापीति।अत्यंताभावस्यनित्यत्वात्सदेवदाहापत्तिरितिप्रत्या
सत्तिः॰ हितस्यतस्यहेतुत्वंवाच्यं।प्रत्यासत्तिश्चविशेषणाभावादिरित्यननुगमइत्याह।सएवेति।
अथेति।उत्तेजककालेविद्यमानोयोत्यंताभावस्तदनुवृत्तावपीत्यर्थः।उत्तेजकाभावत्वेनेति।तस्यैतु
त्तेजकाभावविशिष्टमण्यभावत्वेनहेतुत्वंतथाचपूर्वानुवर्त्तमानतादृशाभावात्उत्तेजकापयनका
लेपिदाहापत्तिः।कारणतावच्छेदकावच्छिन्नयत्किंचित्सत्वएवकार्योत्पत्तेरित्यर्थः।तर्हीति।पूर्वो
क्तेष्टापत्तिमाशंकते।अथेति।विशेषणविशेष्याभावस्येति।अतिरिक्तविशिष्टाभावस्यानभ्युपगमा

दितिभावः। संवंधाभावादिति॰ ननु विशेषणविशेष्यस्य संवंधस्य तदुभयवृत्तित्वाद्भूतलादौ तत्सं
वंधाभावाद्दंडिनि सत्यपि दंडी नास्तीति व्यवहारापत्तिरिति चेत्॰ न॰ यादृशेन हि संवंधेन यत्र विशि
ष्टव्यवहारस्तादृशसंवंधाभावस्यैव तद्व्यवहारहेतुत्वं दंडपुरुषसंयोगस्य न तद्व्यवहारहेतुस्तस्य
भूतलावृत्तित्वेन तत्र दंड्यस्तीति व्यवहारानापत्तेः। किंतु परंपरासंवंधविशेषस्तथा तथा च तदभा
ववद्विशिष्टाभावव्यवहारहेतुरिति फलवलेन तथा कल्पनादिति। संवंधांतरं विनेति। संयोगा २३५
दावतिव्याप्तेराह॰ संवंधेति। असंभववारणायांतरेति॰ ननु स्वात्मविषयकज्ञाने स्वात्मना समं विष
यविषयिभावः संवंधः स्वरूपसंवंध एव वाच्यस्तत्र चेदमव्यापकं। तत्र समवायस्यैव संवंधांतस्य स
त्वादिति चेत्॰ न॰ उद्देश्यव्यवहारप्रयोजकसंवंधांतरं विनेत्यर्थात् न च समवाये विषयत्वव्यवहारप्रयो
जकः। घटादिविषयकज्ञानस्यापि स्वात्मनि विषयत्वव्यवहारप्रयोजकत्वप्रसंगात्। ननु घटाभावत्वम

नुपपत्तिः। योग्यतायाः फलबलकल्प्यतया तत्र विशिष्टज्ञानोत्पत्त्या योग्यतावश्यंभावात्। न च प्र
त्ययपदं प्रमापरं संबंधसत्वे तस्यापि प्रमाभावात्। अन्यथा संबंधाभावे तस्या प्रमात्वं म प्रमात्वे यत्र
संबंधाभावस्तत्र परस्पराश्रयात्। किं चातींद्रियाभावस्वरूपसंबंधे ऽव्याप्तिः। तत्र स्वरूपद्वयस्य वि
शिष्टप्रत्ययाजनकत्वात्। तत्प्रत्ययस्यानुमित्यादिरूपत्वे न विषयज्ञान्यत्वादिति चेत् न विशिष्ट
प्रत्ययजननयोग्यतावच्छेदकरूपावच्छिन्नस्वरूपस्य संबंधात्। योग्यतावच्छेदकाभावे योग्यत्वस्या
प्यभावात्। योग्यतावच्छेदकं चाभावप्रतियोगिदेशान्यदेशत्वं प्रागभावादौ प्रतियोगिदेशत्वे
सति प्रतियोगिकालान्यकालत्वं अन्योन्याभावे प्रतियोगितावच्छेदकदेशान्यदेशत्वं। न चान्यत्वमन्यो
न्याभाववत्वं तत्र च मत्वर्थीयोग इति वाच्यं तत्रापि तद्देशान्यत्वस्य सत्त्वात्। न चैवमनवस्था। वस्तुत
वस्थायाः प्रामाणिकत्वेनादोषत्वात्। प्रत्ययानवस्थाया असत्वात्। उक्तावच्छेदकोपलक्षितस्वरू

पस्यैवप्रत्ययविषयत्वेनतस्यतदविषयत्वात्।एवंचोक्तावच्छेदकावच्छिन्नरूपाभावेयत्राभावधीस्तत्रभ्र
मः।एतेनातींद्रियस्वरूपसंबंधाव्याप्तिरप्यपास्ता।नचोक्तावच्छेदकस्यप्रत्ययाविषयत्वेविषयेविशे
२३५ षाभावात्कथंभ्रमत्वप्रमात्वेइतिवाच्यं।एकत्रोक्तावच्छेदकावच्छिन्नस्यसंबंधत्वेनविद्यमानसंबंधवि
षयत्वादन्यत्रतदवच्छिन्नत्वेनतस्याविद्यमानसंबंधविषयत्वात्।ननुयत्किंचित्संबंधाभावेनविशिष्टा
भावेनविशिष्टाभावोऽतिप्रसंगादितिविशेषणविशेष्योभयप्रतियोगिकसंबंधाभावस्तथाचास्मा २३५
त्तदभावश्चयत्किंचिद्विशेषणविशेष्योभयप्रतियोगित्वरूपविशेषणाभावात्किंचिद्विशेष्यसंबंधाभा
वादित्यननुगमस्तदवस्थएवऽयानेवविशेषोयत्पुरुषादौविशेष्येदंडादिविशेषणानांसंबंधेनविशेषण
विशेष्योभयप्रतियोगिकत्वं।ननुदंडपुरुषोभयप्रतियोगिकसंबंधत्वमेकंप्रतियोगितावच्छेदकंतदव
च्छिन्नाभावएकएवेतिनाननुगमइतिचेन्न-तर्हिदंडावच्छिन्नपुरुषत्वमेकंप्रतियोगितावच्छेदकंतदवच्छि

न्ताभावोप्यनुगत एवेति किं संवंधाभाव विशिष्टाभावत्वोपवर्णनेन-न च विशेष्ये विद्यमानेन तदभावद्भुतिवा
च्यं-विशेषणावच्छिन्नानामन्येषामेवाभावाभ्युपगमेन दोषाभावात्. अत एवानुपदमेव वक्ष्यति-न हीदं
ङिनि सतीत्यादि। किं वान्यत्र यथा तथास्तु प्रकृते तूक्तजनकाभाव मणौ संवंधस्य तदुभय स्वरूपतया
तदभावो ननुगत एव न च तदुभयं न स्वरूप संवंधः किंतु तादृश विशिष्ट प्रत्यय जनन योग्यत्वमति
रिक्तमेव तथेति वाच्यं-विशिष्ट प्रत्यय विषयस्य संवंधत्वात्-विशिष्ट प्रत्यय घटितस्य च तस्य विशिष्ट
बुद्ध्य विषयत्वात्। अत एव संवंधस्य संवंधि भिन्नत्व नियमेन स्वरूप संवंधः परैर्न्नांगीक्रियते-अत एव
समवाय सिद्धिः। तन्न स्वरूपाणामनंतत्वेनास्वरूप संवंधेनार्थांतराभावात्। अन्यथा तेनैवार्थांत
रं स्यात्। न च संवंधत्वस्य मिलितवृत्तित्वेन संवंधत्वावच्छिन्नाभावस्यानुगतत्वमिति वाच्यं। एवं विशे
षणावच्छिन्न विशेष्याभावस्यापि विशिष्टाभावत्वे दोषाभावादित्युक्तं। अपि यदि संवंधाभावो विशिष्टभा

वस्तदाइहदंडीपुरुषेणान्यत्रनअर्थप्रतियोगित्वेनसंबंधएवभासेत·नचैवं·दंडावच्छिन्नपुरुषस्यैव
तत्त्वेनप्रतीतेः।अन्यथाघटाभावोव्यतिरिक्तोनसिद्ध्येत्।घटत्वतदधिकरणसंबंधाभावादेवतद्व्य
वहारसंभवात्·यदिचतत्रसंबंधस्यप्रतियोगित्वेनानुल्लेखात्तज्ज्ञानंविनापिघटत्वावच्छिन्नघट
236 ज्ञानादेवतदभावज्ञानात्तन्नतदभावेनान्यथासिद्धिः।तदाप्युक्तेपितुल्यमित्यपरितोषंहृदिनिधा
याह·यद्वेति।अयंचविशेषणावच्छिन्नविशेष्यप्रतियोगिकोऽत्यंताभावोनतुध्वंसोनवाविद्यमानप्र २३६
तियोगिकइतिनक्षणिकत्वशंका।तस्यचनित्यत्वेननप्रागपिकार्यापत्तिः।समयविशेषावच्छेदे
नसंसर्गित्वादितिभावः।ग्रंथकृतैवाभिधानादिति।दंडीपुरुषइति·तत्कालेदंडवानित्यर्थः·किंतुत
दन्यत्रैस्तत्कालेदंडाभाववानित्यर्थः।नहीति।युक्तमितियोजना।अन्यथेति।यदिविशेषणावच्छिन्न
विशेष्यप्रतियोगिकोनाभावः·किंतुविशेषणप्रतियोगिकएव·तदान्येषामितिपदस्यविशेष्यवाचिनोऽ

नुपादानपत्ते रित्यर्थः । यद्वा यदि तत्कालीनदंडाभाववानेव न पुत्तियोगितादा ऽन्यकालीनदंडा
भावमादाय तत्रस्थितदंडिनोपि मूदंडत्वेनाभावपुतियोगित्वादन्येषामिति व्यर्थमित्यर्थः । ननु
कार्यानुत्पादप्रयोजकत्वं पुतिबंधकत्वं· पुतियोगित्वं वयस्मिन्नसतीत्यादिगर्भं· ननु पूर्ववर्त्ति
त्वर्भगेमितिनान्योन्याश्रय इत्यत आह· तत्त्वेपि वेति । नन्वेवमन्योन्याश्रयाभावे तत्सामान्याभ
व एक एव लाघवाद्धेतुरस्तु ननु यावद्विशेषाभावादित्यपरितोषात्तदेव सिद्धांतयति· यद्वेति·
संसर्गाभाव इति· तत्रापि यत्रोत्तेजकमस्ति तत्रोत्तेजकाभावावच्छिन्नात्यंताभावमात्रं हेतुरन्य
त्र ध्वंसादिसाधारणात्संसर्गाभावमात्रं यथा विघ्नसंसर्गाभावः समाप्ताविति ध्येयं· अन्यथेति
तथा वान्योन्याभावव्यावृत्तं संससर्गाभावत्वमावश्यकमिति भावः । योनिषेधो ज्ञायत इति शेषः
नन्वभेदारोपादिस्थले तादात्म्यमपि संसर्ग एवेत्यन्योन्याभावे ऽतिव्याप्तिः । किंच संसर्गस्यारोप

त्वे रजतत्वादेरिव तत्वादेरिव तत्संसर्गोपि भासेत न चैवमित्यपरितस्यन्नाह - वयं त्विति प्रतियो
गिनमिति - अधिकरणविषयकप्रतियोग्यारोपजन्यज्ञानविषयाभाववृत्त्यर्थः । स - निषेधवृत्त्यर्थी
237 अन्योन्याभावे ऽतिव्याप्त्यभावं अन्योन्याभावभिन्नत्वं लक्षणांतरं वदर्शयितुमन्योन्याभावलक्षण
माह - यत्र वेति - अधिकरणविषयकप्रतियोगितावच्छेदकारोपजन्यनिषेधधीविषयवृत्त्यर्थ
नन्विदमुभयलक्षणमतीन्द्रियसंसर्गाभावान्योन्याभावयोरव्याप्तं तद्विषयज्ञानस्यानुमित्या २३७
दिरूपतयारोपाजन्यत्वात् - न च योग्यतापुरस्कारात्तथात्वं ईदृशारोपयोग्यतावच्छेदकं हि
नाभावप्रतीतित्वमतिप्रसंगादिति संसर्गाभावविषयत्वादिकं तथा वाच्यं । तथा चात्माश्रयः ।
न च प्रागभावादिविषयत्वमेव तथा - प्रागभावत्वादेरपि संसर्गाभावघटितत्वात् । एवं च जन्य
त्वस्यापि प्रागभावगर्भतया तस्य च संसर्गाभावागर्भत्वादन्योन्याश्रयोपि - किं च योग्यताया

अनिर्वचनेऽप्रत्यक्षेयोग्यध्वंसेप्यव्याप्तिरिति। अत्रवदंति। प्रतियोग्यारोपपूर्वकनिषेधावगमवि
षयतावच्छेदकत्वंसंसर्गाभावत्वं·एवमग्रेपीत्येतदुभयंलक्षणं। स्वरूपंतुविषयतावच्छेदकंसं
सर्गाभावत्वादि·तच्चस्वभावाभावत्वमस्वाभावाभावत्वंवतेननोक्तसर्वदोषावकाशः। अत्रिव
घटस्ययोत्यंताभावस्तदभावोघटोघटान्योन्याभावस्याभावोघटत्वमिति। नवसंसर्गाभावस्य
यान्योन्याभावस्तदभावोनसंसर्गाभावइतिस्वसंसर्गाभावाभावोलक्षणार्थोवाच्यइतिपुन
रन्योन्याश्रयत्वमितिवाच्यं·स्वाभावाभावत्वमित्यत्रवस्तुतोयद्यपिस्वसंसर्गाभावाभावएव
रन्योन्याश्रयत्वमितिवाच्यं·स्वाभावाभावत्वमित्यत्रवस्तुतोयद्यपिस्वसंसर्गाभावाभावएव
पर्यवस्यति·तथापिसंसर्गाभावत्वंनतत्रविशेषणभावत्वेनैवसंसर्गाभावउपस्थितइतिनका
दनुपपत्तिः। अन्योन्याभावेस्वप्रतियोगिकाभावमात्राभावत्वाभावादितिसर्वंसुस्थमिति। अ
त्रेदंचिंत्यं। स्वाभावाभावत्वंनसंसर्गाभावत्वं·अन्योऽन्याभावेऽतिव्याप्तेः। तथाहि·स्वंघटान्यान्या

भावस्तदभावोऽघटस्तदभावश्चतदन्योन्याभावः। ननु घटान्योन्याभावाभावो न घटः किंतु
घटत्वमिति चेत्. न. घटो घटान्योन्याभावो न इति। प्रतीत्या घटे घटान्योन्याभावान्योन्याभा
वो विषयीक्रियते स च घटस्वरूप एव. अभावप्रतियोगिकस्याभावस्याधिकरणानतिरे
कात्। न च संसर्गाभावाभावत्वं तत्त्वमिति वाच्यं। आत्माश्रयात्। केचित्तु. अखण्डयोः संस
र्गाभावत्वान्योन्याभावत्वयोरुभाभ्यां लक्षणाभ्यामुपलक्षणं. न च तयोः पदार्थान्तरता २३८
पत्तिः सामान्यान्तर्भावात्. सामान्यं हि द्विविधं उपाधिर्जातिश्च. तत्रोपाधिर्द्विविधः। सखं
डोऽखण्डश्चेत्युपाध्यन्तर्भावात् तत्रेदं तेद्वेति. तथा च रत्नकोषेतराणि मिश्रैरुक्तं एवमभा
वत्वध्वंसत्वादिकं बोध्यमितीत्याहुः। नेरमिद्धेति। ननु संसर्गाभावान्योन्याभावरूपविषयवैल
क्षण्येन ज्ञानवैलक्षण्यं. तस्माच्च व्यवहारवैलक्षण्यमित्यन्यथासिद्धं तन्नारोपहेतुतां व्यवस्था

पयतीतिचेत्‌मैवं॰यद्विनारोपोहेतुस्तदाभूतलेघटसंसर्गाभावान्योन्याभावसत्वेकदाचिन्नेद
मिहकदाचिन्नेदमिदमितिव्यवहारवैलक्षण्यानुपपत्तेरित्यर्थात्‌।प्रतियोगिज्ञानानुपलब्ध्यादी
नांकारणानांतौल्येकार्यवैचित्र्यस्याकस्मिकतापत्त्याकारणवैचित्र्यस्यकल्पनीयत्वेपारि
शेष्यादारोपहेतुतायामेवविश्रामादितिभावइत्याहुः।गुणेति।उक्तप्रतिबंधकाभावस्यतत्रास
त्वेतत्रप्रतिबंधकोपिनस्यात्‌।यत्रैकदाप्रतिबंधाभावस्तत्रैवान्यदाप्रतिबंधकसत्वादितिभावः।
प्रतिबंधकत्वानापत्तेरितिपाठेऽन्यस्येतिशेषः।तथाचगुणादेःप्रतिबंधकत्वमन्यस्यनस्यादितिगुणा
देःप्रतिबंधकत्वंनस्यादित्येवार्थःपर्यवस्यतीतिध्येयं॰संसर्गेति।यद्यपिसंसर्गस्याव्याप्यवृत्तित्वात्तय
वच्छिन्नाभावेपितथैव॰तथाचसोपितत्रास्त्येवतथापिव्याप्यवृत्तितादृशाभावस्यहेतुत्वमितिभावः।
एवंविद्यमानताविरोधित्वेनेत्यर्थःअन्यत्रविद्यमानेपिघटेतथाप्रतीतिदर्शनादितिभावः।योग्यइति॰

रत्नत्वस्यापि योग्यव्यक्तेर्योग्यत्वमेव पदविशेषवाच्यत्वज्ञानार्थं तत्रोपदेशापेक्षेति भावः। मंत्रविनाशाद् इति।
मंत्रस्याशु विनाशितया पुरुषांतरेपि दाहः स्यादित्यर्थः। संकल्पस्य विशेषणत्वामाल्लेख्य दूषयति। शंक
ल्पनाशाद् इति। तथा च संकल्पस्येच्छात्मकत्वात्तदभावे विशिष्टाभावोऽत एवेति भावः। विगीतत्वेनेति।
यद्यपि विगीतत्वं निषिद्धत्वमेवेत्यनिषिद्धत्वेनेति पूर्वोक्तेन विरोधस्तथापि विशिष्टपुरुषत्यविषयत्वं तद
भिप्रेत्यैतदुक्तं। यद्यप्येवं सति श्रुत्यनुमापकत्वैके श्रुनिषिद्धत्वरूपा विगीतत्वस्य न क्षतिस्तथापि भोजना २३९
द्याचारवारणाया लौकिकत्वमपि विशेषणमिदं तु मणौ। मंत्रौषधादिवत्कौ। किंकमेवेति भावः। यद्वावि
शिष्टाचारत्वस्यैतदनुमानांतमतिस्येवं सतिरिति भावः। उद्दिश्य त्वेति। ज्ञानं नं स्थिरमिति तद्विशिष्ट
भावः पुरुषाभ्यंतरेपि स्यादिति संस्कारेत्युक्तं। यत्किंचित्संस्कारविषयत्वं पुरुषान्तरमपीत्यत उक्तमुद्दे
श्यत्वज्ञानादिति। तथा च ज्ञानविषयमात्रं संस्कारविषय इति नोक्तदोषः। ननु रागादिना संस्कारवि

नाशे विशिष्टाभावसंभवात् पूहृताभ्यंतरेपि दाहः स्यात्। यत्रैव न संस्कारोदयस्तत्र वाकागतिरितिचेत्।
न तत्र दाहप्रतिबंधकत्वस्यैवासिद्धेः। यत्र दाहप्रतिबंधस्तत्रानन्यगतिककार्यदर्शनात्संस्कारोपि
कल्प्यत एव। कार्य्यान्नेयधर्म्माणां यथाकार्य्यमुन्नयनादिति सांप्रदायिकाः। वयंतुब्रूमः। संकल्प
विषयकालएव प्रतिबंधकः संकल्पस्यैव न विशेषणत्वं किंतु स्वविषयीभूतकालोपलक्षणत्वं
यथा मंगलस्यासन्नसमयसमाप्तिफलकत्वेप्यासन्नसमयस्य स्वव्यक्तिसमाप्त्युपलक्षकत्वं
ध्यानेव विशेषायत्तस्याधाराधेयभावसंबंधेन तथात्वंप्यस्यैव विषयविषयिभावसंबंधेनेति
न कश्चिद्विशेष इति। प्रतिबंधकत्वान्यथानुपपत्त्यानास्तिद्धिनिराकर्त्तुमुत्थापयति। नन्विति। कर्त्तरि
राबुला विधानादिति भावः। तस्येति। यद्यपि योगक्षेमसाधारणं जन्यत्वमत्रापि संभवत्येव तथापि स
त्वघटितजन्यत्वाभिप्रायेणेदमिति ध्येयं। स्वार्थिकेति। स्वार्थिकाः क्वचित्लिंगवचनान्यतिवर्त्ततेपी

तिवचनादोषध्वंपुत्तिवंधकमितिन सकालिंगत्वमित्तिभावः।ननुभवेदेवयदिमंत्रादीनांपुति
वंधकत्वमपिभवेदित्यतआह-पुतिवंधश्चेति।सामग्रीविरहः सामग्रीविघटककारणाविरह
240 इत्यर्थः।मुरारिमिश्रमतमाह-नचास्त्विति।भेर्य्यादेरिति।इदंचसमाधिसौकर्य्यादुक्तं।वस्तु
तस्तत्तत्कालपुतिवद्धेतरवह्नेरिवतत्तद्देशपुतिवद्धेतराकाशस्यजनकत्वंभवत्येव-अन्योन्याभा
वस्याव्याप्यवृत्तित्ववादिमतेनैवास्योक्तत्वात्पुतिवंधकाभावस्यैवावच्छेदकत्वस्वीकाराद्वातस्या २४०
व्याप्यवृत्तित्वात्।अन्यथावह्निभेर्य्यादेरपिकालांतरेकार्य्यानुत्पत्त्यापत्तिः।पुतिवद्धेतरत्वाभाव
दिति।यद्वातत्तत्कालपुतिवद्धान्यवह्न्यादयः पुसिद्धास्तदन्यवह्नित्वंजनकतावच्छेदकं-अ
कारेत्तुनतथेति।अनेनैवाभिप्रायेणोतदुक्तमिति।उभयस्यापीति।नत्वेवमन्वयव्यतिरेकतौल्ये
नदंडदृढत्वयोर्द्वयोरपिजनकत्वापत्तिः।नचदंडस्यचक्रादिसमवधानंसाक्षात्संवंधेनदृढत्वस्य

वपरंपरासंबंधेनतदित्तिविनिगमकमितिवाच्यं।वह्निप्रतिबंधकाभावयोरपितुल्यत्वात्।किंचैवं
विनिगमनयापरंपरासंबद्धस्यालोकरूपादेरपिप्रत्यक्षादिहेतुत्वंनस्यात्किंत्ववच्छेदकत्वमेव
स्याद्दृढत्ववत्।अपिचयस्मिन्सत्यपीतिनियमादपिदार्ढ्यस्यहेतुत्वमेव·दंडेसत्यपिदार्ढ्याभावेनका
र्याभावात्।नचादृढेनाप्यनेकदंडेनरज्जुबद्धेनघटोत्पत्तिदर्शनाद्विवक्षितविवेकेनभ्रमिजन
कत्वमेवदार्ढ्यं·तस्यचघटजनकत्वंजनकजनकत्वादितिवाच्यं।भ्रमिजनकत्वस्यघटजनकत्वे
विरोधाभावात्।तज्जनकत्वस्यतज्जनकत्वविरोधआत्माश्रयात्।किंचभ्रमिजनकतायामे
वदंडस्यकिमवच्छेदकं·ततावद्दंडत्वमेव·अदृढादपिभ्रम्युत्पत्त्यापत्तेः।नचदृढदंडत्वंतथा·
अवच्छेद्यभ्रमिजनकत्वातिरिक्तस्यदृढत्वस्याभावात्।भावेवातदेवघटजनकतावच्छेदक
मस्तु·अपियान्यप्रतीतिन्यायेनदंडस्यान्यथासिद्ध्यापत्तिः।कुंभकारपितृवत्।नवान्यमुपा

सीनंप्रतीतिविवक्षितं· अमिस्तुजनिकेवेतिवाक्यं· एवंकुंभकारपितुरपिजनकत्वंस्यात्· कुंभ
कारस्यापिजनकत्वेनोदासीनत्वाभावात् तस्मादत्रसमाधानंचिंत्यं· विपक्षबाधकमाह· नक्षीति·
तस्यप्रवृत्तिपूर्वमनिश्चयेकारणोकार्य्यार्थिनोऽप्रवृत्त्यापातादितिभावः। अन्यथेति· कार्य्या
यागव्यवच्छेदस्येकारणात्वइत्यर्थः। ननुप्रतिबंधकाभावोनकारणं· प्रतिबंधकसमानका
२४१ लीनकार्य्यप्रत्युत्तेजकरूपविशेषसामग्रीकल्पनेनैवसामंजस्येतद्धेतुत्वग्राहकान्वय
व्यतिरेकादेरन्यथासिद्धेरितिचेत्· न· यत्रप्रतिबंधकेनोत्तेजकंतत्रप्रतिबंधकाभावस्य २४१
कारणत्वकल्पनादन्यत्रापितस्यहेतुत्वेनतत्रावच्छेदकांतरौचित्यात्। ननुविशेषसाम
ग्र्यंतरंकल्प्यतेगौरवात्। किंचोत्तेजकमननुगतमिति· तदाहादिहेतु। तत्तदुत्तेजकयावद
भावविशिष्टमण्याद्यभावश्चानुगतइतिसएवहेतुः। अतएवपक्षतायामनुमितिहेतुत्वं· अ

न्यथासिद्ध्युत्तरानुमितित्वावच्छिन्ने सिसाधयिषारूपविशेषसामग्र्या एव हेतुत्वापत्त्या तत
स्या अहेतुत्वापातात् । नन्वेवं संशयोत्तरप्रत्यक्षत्वावच्छिन्ने विशेषदर्शनरूपसामग्र्यन्तरं
न कल्प्यते इति चेत् न दृष्टत्वात् विशेषादर्शनसहकृतसंशयाभावस्यैव हेतुत्वादिति कश्चि
दिति दिक् । ननु शक्तिरूपस्य ध्वापुसिद्धेर्नानुमानं स्यादित्यत आह तथाहीति । अवयवी
प्रत्यक्ष इत्यर्थः । अन्यथा वह्नित्वस्य परमाणुवृत्तित्वेनाव्यावर्त्तकत्वापत्तिः । अत्र च प्रतिबंध
कसमवधानदशायां यादृशदाह्यसंयोगादिमान् वह्निः प्रतिबंधकाभावकालेपि तादृशा
दाह्यसंयोगादिमानेव वह्निः स्थिरपदेन विवक्षित इति दाह्यसंयोगादिना नार्थान्तरं ननु या
वदजनकदशाव्यावृत्तत्वं शक्तेर्नास्ति यत्किंचिदजनकदशाव्यावृत्तत्वं दाह्यसंयोगादेर
पीत्यर्थान्तरमित्यपरितोषादाह यद्वेति । न चैवं भावभूतपदं व्यर्थं दुरदृष्टाभावादेरतीन्द्रिय

८

स्यवारणायतदुपगमात्। भट्टनये ऽनुपलब्धिगम्यतया ऽभावमात्रस्यैवातींद्रियत्वाद्वा॰ वस्तुत
स्तु संयोगजनकत्वादतींद्रियते ऽक्ष्यमानाभावः। अतिरिक्तपदार्थापत्तेश्चेत्यपरितोषादाह॰ अथे
वति। का+ गाद्यन्यतमप्रत्यासत्तिजन्यसाक्षात्काराविषयत्वयंपंतींद्रियत्वमभावमात्रएवेत्यनुपद
२५ मेवस्फुटं। ननुलोहविशेषस्यैवसातिशयच्छिद्रा+ र्य्यानुकूलत्वंवस्वकार्य्यानुकूलत्वं॰ तदपिस्वनि
मित्तकारणकानुकूलत्वंविवक्षितं॰ तेनकार्य्यानुकूलस्थितस्थापकेननार्थांतरं॰ कर्म्मणितुवह्निः २४२
समवायिकारणमितिनोक्तदोषः। वह्नौस्थितस्थापकाभावेकार्य्यानुकूलपदमुद्देश्यसिद्ध्यर्थं॰ अदृ
ष्टवदात्मसंयोगोक्तस्पर्शप्रतिबंधकाभावादिना ऽर्थान्तरवारणायाद्दिष्टादिविशेषणं। यद्यपिगुरु
मते ऽभावो ऽधिकोनास्त्येवेतिसमवायपदंव्यर्थंतथापिपरस्यार्थांतरंस्यादेवेतितद्वारणायतदु
पात्तं॰ ऐंद्रियकारणामपीति। वस्तुतस्तुसंयोगादिपंवकजन्यज्ञानस्याप्रसिद्धेःसाध्याप्रसिद्धिर्दृष्ट

व्या-तथापीति।यद्यपिजन्यांतंव्यर्थंतदजन्यसाक्षात्कारस्यव्यावर्त्याप्रसिद्धेः।तदुक्तिंतवपरमते
ऽप्रसिद्धंतथापिविशिष्टाभावेनवैयर्थ्यमितिध्येयं-भ्रूत्रसंयोगादित्यत्रविषयसंयोगादीत्यर्थः।
तेनात्ममतोयोगस्ययोगिप्रत्यक्षादावपिजनकत्वान्नपरंप्रत्यसिद्धिरितिमंतव्यं-नवाभावेति।ऽतक्ता
तींद्रियत्वस्यतत्रापिभावादितिभावः।तस्येति।गुरुमतेऽतिरिक्तस्यतस्यासिद्धेरित्यर्थः।नैयायिक
मतेयपारिभाषिकस्यनिरुक्तत्वादतींद्रियत्वस्याभाववत्तावपिनक्षतिरितिः।तदादापंर्थांतरशं
कायाःसमवायपदेनेववारणादितिभावः।परमाणोसाध्याव्याप्तेराह-नित्यत्वंवेति।वक्तोऽस्थित
स्थापकस्वीकारेयाद्दृशानुमानेतेननार्थांतरत्वशंकातादृशंतदाह-यद्वेति।यद्वाकार्य्यस्यविशेषस्व
परासिद्ध्यर्थमाह-यद्वेति।अदृष्टत्वस्यधर्म्मत्वादेरित्यर्थः।अनुकूलत्वेनेति।कारणतावच्छेदकसाध्य
रणास्यतस्याग्रेनिरुक्तत्वादितिभावः।यद्यपितन्मतेधर्म्मत्वादिकंनकारणतावच्छेदकंकिंतुशक्तिरेव

तथापिन्यायमतेधर्म्मित्वादिकमादायतन्मतेशक्तिमादायसाध्यमस्त्येवतत्रोपाधिश्च्यनेत्युभयसि
द्धसाध्याव्यापकत्वमितिभावः।नन्वद्दिष्टपदानुपादानात्साध्येलाघवंस्थितस्थापकेनचनार्थांतर
त्वशंकापीतिमनसिकृत्याह·अथिवेति।कार्य्यानुकूलत्वंस्वकार्य्यानुकूलत्वंतदप्युद्देश्यसिद्धये·
संयोगत्वेनार्थांतरवारणायअतींद्रियेति उक्तातींद्रियत्वस्यप्रतिबंधकाभावेपिसत्वात्परमतेऽर्थां
तरंमाभूदित्यतउक्तंसमवायीति।जनकत्वादिति।नवाभावेव्यभिचारःसमवायगर्भसाध्यस्यत
त्राभावादितिवाच्यं।परैरभावानंगीकारात्।ननुतथापिसमवायेव्यभिचारः।नवतत्रापिशक्ति २४३
समवायोस्त्येवेतिवाच्यं।अनवस्थानादितिचेन्न·निमित्तकारणातिरिक्तकारणताश्रयत्वस्य
हेत्वर्थत्वात्।तत्रयत्किंचित्कार्य्यप्रत्येवविवक्षितंनतुदाहलक्षणांकार्य्यप्रतीतिनासिद्धिरितिध्येयं·
अत्रसाध्येहेतौवदाहपदप्रक्षेपेणावह्निपक्षकानुमानमिवानुमानांतरमपिग्रंथकृदभिमतं·लेखक

प्रमादाद्व्यनप्रवर्त्तीतिप्रतिभाति।अत एवैतदंतर्भावेऽग्रेवक्ष्यति।अग्रिमवत्तुर्थ्यद्वित्रींद्रियाप्रत्य

क्षत्वमुपाधिरिति।अन्यथातदसंगतत्वापातादितिवक्ष्यते।नचात्मत्वमिति।नचद्व्यणुकादौसाध्या

व्याप्तिरितिवाच्यं।दाहजनकत्वस्वरूपपक्षधर्मावच्छिन्नसाध्यव्यापकत्वादितिभावः।शुद्धसाध्यव्या

पकमाह·द्रव्यत्वमितिः द्व्यणुकेति।नन्वेकत्वत्वस्यशक्तिजातीनातींद्रियद्व्यणुकैकत्वत्वद्व्यणुकस

त्वोपाधीचनसमवेतौतथाचतत्रसाध्यासत्वान्नसाध्याव्याप्तिरितिचेत्·अत्रकेचित्·अतद्गुणसंवि

ज्ञानवद्बहुव्रीहिणागुणत्वधर्मित्वादिकमुक्तंतत्रसाध्याव्यापकत्वमस्त्येवेत्याहुः।अन्येतुधर्मिशा

स्याविवक्षितत्वेनतत्समवायित्वस्यचतन्निरूप्यसमवायाश्रयत्वार्थकतयासमवायिद्व्यणुकमादाय

साध्यसत्वमितिवदंति·शक्तिवदुपाधिरपिसमवैति·अन्यथाऽनुपाधिरसंबद्धएवस्यात्तन्मतेविशेषणताया

अनभ्युपगमादित्यप्याहुः।नन्वनुकूलत्वंयदिजनकत्वंतदाशक्तौतदभ्युपगमेऽपसिद्धांतः।अन्यथा

वच्छेदकत्वंतदादृष्टांतासिद्धिः।आत्मन्यदृष्टमंस्वरूपतादृशाधर्मस्यजनकत्वादित्युभयसाधारणंतदाह-अनु
कूलत्वंवेति।उभयसिद्धेति।तथाचप्रतिबंधकाभावस्यैवदाहादिप्रयोजकत्वंकल्प्यते-धर्मिकल्पनातोध
र्मकल्पनायालघुत्वादितिदितितात्पर्यार्थः।घटेत्यार्थः-समानजातीति-ईश्वरकर्तृकत्वस्यन्यायप्राप्तत्वाद्
कुलालकर्तृकत्वस्यचघटत्वावच्छेदेनान्वयव्यतिरेकसिद्धत्वादितिभावः।समवायिकारणेति।यद्यपि
निमित्तकारणेपिशक्तिरस्त्येवेतितद्द्वाराप्यनवस्थाभवत्येव-तथाप्येकाधिकरणानंतशक्तिरूपानि २४४
ष्टप्रसंजनायसमवायिकारणेत्युक्तं-यद्यपिभावमात्रस्यसमवायिकारणजन्यत्वंपरेनमन्यते-तन्म
तेभावकार्यस्यापिसमवायस्यतथाभावाभावात्।तथापिसमवेतकार्यप्रतितथात्वंस्वीकार्यमेवेति
भावः।नचेयमनवस्थाप्रामाणिकी-प्रमाणाभावः।नचकार्याण्यन्यथानुपपत्तिरेवप्रमाणं।तस्याभय
सिद्धप्रतिबंधकाभावेनैवोपपत्तेः।नचाभावेनकारणं-भाववद्दाहकत्वोत्यात।एवंचगुणादिनिष्ठशक्तौ

गुणादीनांसमवायिकारणत्वापत्तौदृष्टहेतौनैवोपपत्तेः।नवाभावोनकारणं।भाववदुद्भूतव्यत्वापत्तिरित्य
पिदूषणंद्रष्टव्यं।नवनित्यैवशक्तिर्न्नकार्य्येतिवाच्यं।अनित्यभावहेतुजेतितत्सिद्धांतात्तदात्तज्जनना
नुकूलाशक्तिःशक्तावपिस्वीकार्य्या।एवंतत्राप्युद्भूतत्वजननानुकूलत्वंशक्त्यंतरमित्यनवस्थापत्तेः
उद्भूतत्वस्यैवशक्तिस्थानाभिषेवनीयतयानित्यशक्तौमानाभावश्चेतिभावः।प्रथमानुमान
मित्युपलक्षणं।अजनकत्वगर्भद्वितीयानुमानेपीतिदृष्टव्यं।अनुद्भूतत्वविशिष्टाशक्तिरज
नकदशायाद्वत्तैवेतिपूर्वपक्षएवोक्तमितिनवाधइतिचेत्।न।नित्यानित्यविकल्पेनपूर्वोक्तनो
द्भूतत्वेमानाभावइत्यवष्टंभेनैतस्यानुक्तत्वात्।वस्तुतःप्रतिबंधकालएवपरंशक्तौनोद्भूतत्वं।तथा
यसकृत्कार्यांतरविरहप्रयुक्तंयदावक्तौकार्य्यानुपधानंतथा।उद्भूतत्वविशिष्टायातस्याःसत्वाद्
धएवेतिभावः।अतीन्द्रियत्वगर्भेसाध्येप्रागुक्तंदृष्टांतासिद्ध्युद्धारंदूषयति।लोहेति।अग्निमेति।

यद्वा धर्म्मितीन्द्रियत्वं विशेषणामित्यादिष्वित्यर्थ इति केचित्. तन्न. कुठारे साध्याव्यापकत्वापत्तेः। तत्
दनुमाने कुठारस्यैव दृष्टान्तत्वेन साध्यसत्वात्। न च लौकिकविशेषणानामित्यनेन तत्र साध्याभावव्यव
स्थितेर्नैवमिति वाच्यं। एवं हि साध्यव्यापकताग्राहकस्थानाभावादेव नोपाधिः स्यात्। न चात्मैव तथे
ति वाच्यं। अदृष्टादेरजनकदशावच्छिन्नत्वेन तत्र साध्यासत्वात्। न च जनकदशामात्रवृत्तिपरणाव
द्धिसंयोगमादाय तत्रापि साध्यसत्वमिति वाच्यं. एवं हि तादृशसंयोगमादाय घटादावपि साध्य २४५
सत्वेनोपाधेः साध्याव्यापकत्वात्। न च गुरुत्वाभावरूपपक्षधर्म्मावच्छिन्नसाध्यव्यापकत्वमिति वा
च्यं। सौरालोकादावपि तादृशपरमाणुसंयोगादिसत्वेन साध्याव्यापकत्वात्। तस्मात्पूर्वोक्तसं
योगपक्षकयद्रूपघटितसाध्यकानुमानेन सहृवतुष्टमभिमतमिति। न चात्रापि स्थितस्थापकव
ति वस्त्रादौ साध्याव्याप्तिरिति वाच्यं। कार्य्यानुकूलेत्यस्य स्वनिमित्तकारणकानुकूलेति विवक्षय।

स्थितस्थापकस्य वा तथात्वेन वृद्धादौ साध्याभावात् । कार्य्यपदस्य वह्निकार्य्यपरत्वाद्वा । तथा च तादृशसाध्यमात्यन्येव । तत्र चोपाधिरस्त्येवेति न स्याद्व्याप्तिरिति भावः । अपरे तु वस्तुतस्तु मध्ये कार्य्यानुकूलेत्यादिघटितानुमानत्रये ऽयमुपाधिरित्यर्थ इत्याहुः । अपि चेति । त्वन्मते ऽन्वयव्यतिरेक्येव गमक इति भावः । तत्सिद्धिरिति । शक्तिसिद्धिरित्यर्थः । तथा च नैव दनुमानेनैव शक्तिसिद्धिर्येनान्यान्याश्रय इति भावः । परार्द्धसंख्यायामित्युपलक्षणं । परममहत्त्वपरमाणुपरिमानादावित्यपि द्रष्टव्यं । अप्रयोजकत्वादिति । ननु प्रयोजकत्वमेव न व्याप्तिग्राहकं । अतीन्द्रियानुमानस्थले तदभावात् । तथा च मानांतरेण साध्यहेतुव्यतिरेकग्रहो स्त्विति चेत् । अत्र प्रयत्नाभिप्रायेणोदमुक्तं । वस्तुतस्त्वन्यथोपपन्नतया सर्वमिवानुमानमप्रयोजकमिति भावः । अत्र केचिदाहुः । वस्तुतो मानांतरं न शब्दः सिद्धार्थत्वात् । नाप्यनुमानं कार्य्यानुकूलातींद्रियधर्माभावानुमाने हि जनकत्वाभावेनैव लिंगेन वाच्यं ।

जनकत्वसत्वेतादृशधर्मिसत्वस्यावश्यकत्वात्· जनकत्वाभावानुमानेवतादृशधर्मास्यजनकता
वच्छेदकरूपस्यसत्वेजनकत्वस्याप्यावश्यकत्वात् एवंवह्न्यभावेनसाध्याभावः।साध्याभावेन
२४६ हेत्वभावोऽनुमेयइतिव्यक्तौऽन्योन्याश्रयइतिभावः।यद्वातदनुमानमपिसाध्यसाधनाभावव्या
प्तिग्रहमंतरेणानस्यात्।तद्ग्रहश्चनतदुभयव्यतिरेकसिद्धिविनातदुभयव्यतिरेकश्चसाध्यसाधने
एवेतिसाध्यसाधनव्याप्तिग्रहेतदभावव्याप्तिधीस्तस्यांचसत्यांतदुभयव्याप्तिधीरित्यन्योन्याश्रय २४६
इतिभावः।एतेनपंडेति।नवपंडापूर्वादेःस्वध्वंससाक्षात्कारजनकत्वेनजनकत्वाभावएवनेतिवा
च्यं।अतींद्रियत्वेनयोगिज्ञानस्यविषयाजन्यतयाचसाक्षात्काराजनकत्वात्तन्मतेध्वंसस्याधि
करणादिरूपतयातदसाध्यत्वाच्चेतिभावः।तृणारणीतिभावः।तथाचवह्नित्वपुरस्कृतयातृ
णादीनामेकानुगतशक्तिसिद्धौअन्यत्रापितदनुमानमितिभावः।ननुवह्निनिष्ठाजातिःप्रमाण

सिद्धातथावधर्म्मिकल्पनात इतिन्यायात्तस्याश्रयावच्छेदकत्वंकल्प्यतेनशक्तिरित्यतआह-तृणार
णीति-तथाचजातित्रयमपिकल्प्यमेवेतितदपेक्षयैकशक्तिकल्पनमेवलघ्विति भावः॥ अत्रचेति।
तत्रोक्तन्यायावताराद्दितिभावः।शंकतेयदीति।वैजात्येवैजात्यपक्षेइत्यर्थाशंक्यतेत्यन्वयः
नन्वेवंतृणारणिनिर्म्मथनाभ्यामप्यग्न्युत्पत्त्यापत्तिः।कारणतावच्छेदकावच्छिन्नघटितसामग्रीसत्त्वा
दित्यतआह्यथाचेति।तथैवतत्त्वकारपीति।नन्वेवंकार्य्यवैजात्यमावश्यकं।एवजातीयकार्य्य
सहकारिनियमानुपपत्तेः।सहिफलविरोधेनपरंस्यात्।सचकार्य्यतावच्छेदकभेदेन-सचपुक्त
तेनकार्य्यवैजात्यंविना।एवंचनैकशक्तिमत्त्वेनजनकत्वमितिचेत्।अत्राहुः।तृणादीनांवह्नि
त्वावच्छिन्नंपुत्यैकशक्तिमत्त्वेनफूत्कारादीनांचतृणजन्यवह्नित्वाद्यवच्छिन्नंपुतिजनकत्वेनैव
शक्तिसिद्धिसहकारिनियमयोरप्युपपत्तिरिति।केचित्तु-यथाप्रागभावत्वेनकार्य्यमात्रंपुतिकार

247

त्वपि घटप्रागभावो न पटं प्रति स्वरूपयोग्यः। यथा वा जन्यविशिष्टज्ञाने विशेषणज्ञानत्वेन का
रणत्वेपि पटत्वज्ञानं घटत्वविशिष्टज्ञानं प्रति न स्वरूपयोग्यं॰ तथा फुत्कारादीनामेकशक्ति
मत्वेपि न तृणानिर्मंथनादिभ्यो वह्न्युत्पत्त्यापत्तिरित्याहुः। तृणफुत्कारसंबंधतरणिकिरण
मणिसंबंधादिष्वेकजातीयशक्तिमत्त्वं कारणतावच्छेदकं॰ तथा च तदन्यतमसंबंधाभावे तृण
निर्मंथनसमवधानेपि नाग्न्युत्पत्तिरित्यप्याहुः। स्वैकदेशिमतं दूषयति॰ यत्त्विति। तृणत्वेनेति॰ २४७
यद्यपि परमते तृणत्वेन न कारणता किं त्वेकशक्तिमत्त्वेन अन्यथा तदुत्पाद्ये कार्ये वैजात्यकल्पना
पत्तेः। तथापि तृणादिनिष्ठशक्तेर्न्न व्यासज्यवृत्तित्वं लाघवात्॰ एवं च कारणतापदेन वात्र शक्ति
रेव विवक्षिता। तथा च तृणत्वावच्छेदेन गृहीतशक्तिभंगप्रसंगादित्यर्थः। तृणादिशक्तेरेकजा
तीयत्वेनानुगमः। एकजातिप्रयोजकं च तत्त्वादृष्टादिकं न च गौरवं प्रामाणिकत्वादिति भावः। प्रति

व्यक्तीति। एतच्चानित्यभावहेतुजेतिसिद्धांतात्। नित्यशक्त्यभ्युपगमेचपूर्वोक्त एवदोषादुष्टव्यः
जातीति। नवमण्यादौकारणएवैकाजातिःकल्प्यतांलाघवादितिवाच्यं। पुरुस्तरत्वादिनासंकरा
पत्तेरितिभावः। पुत्यद्दसिद्धत्वादिति। तथाचधर्म्मिकल्पनातइतिन्यायेनतस्याजौ ऐवेतरवच्छेद
कत्वमात्रंकल्प्यते· नवशक्तिकल्पयित्वातदवच्छेदकत्वमितिभावः। एतपिजातेःप्रामाणिकतया
तदवच्छेदकस्यैवलाघवादेवित्यमित्यभिप्रेत्योक्तं। वस्तुतःकार्य्यतावच्छेदकाननुगमस्यादोष
त्वाज्जात्यभावेपितत्तद्वह्नित्वस्यैवावच्छेदकत्वसंभवान्नशक्तिसिद्धिरितिध्येयं। तन्मतेजातेःसंस्था
नमात्रव्यंग्यतयाशक्त्यैवजात्यभावेकथमनुगमइपि वोध्यं· वह्नित्वन्निजातौयोग्यानुपलब्धिंनिरा
करोति· तृणाजन्येति। अन्यथा विशुद्धमात्रपितृजन्यत्वेनेववृाह्मणानुगतवुद्धेस्तत्रापिजात्यभा
वःस्यादितिभावः। वैजात्यानंत्यमुद्धरति· गोमयेति। अन्यथाविरुद्धमात्रपितृजन्यत्वेनेववृाह्मण।

नुगतवुद्धेस्तत्रापिजात्यभावःस्यादितिभावः।वैजात्यानंत्यमुद्धरति·गोमयेति·यद्यपिगोमयव
ह्निकपुभवयोर्वह्निकयोर्वैजात्यद्वयमस्तितथापिवह्निकत्वमनुगतमप्यस्ति।तदेववागिनिमाग्निम
ग्निमवह्निकजनकतावच्छेदकमितिसर्वत्रवह्निकपुभवत्वमितिनानंत्यमितिभावः।वह्निजातीयस्या
कस्मिकतापुसंगंपुागुक्तमुद्धरति।वह्निमात्रइति।यद्यप्युदर्य्यवह्नेरनुद्भूतस्पर्शइतिलीलावत्या
३५४ दौव्यवस्थापनात्तत्रकथंवह्नित्वंपुयोजकाभावात्।तथापिभौमवह्निमात्रएवतत्पुतियोजकत्व २४८
मितिभावः।केचित्तुलीलावतीग्रंथस्त्वापाततोवस्तुतस्तत्राद्भूतएवस्पर्शइत्याहुः।एवनेति·त
दुत्कर्षेणावह्न्युत्कर्षादितिभावः।तटस्थःपुत्यवतिष्ठते·तन्विति।ननुतृणाजन्यत्वंतृणास्रुपादौपु
सिद्धं·तदभावश्चमणिजन्यवह्नौसुग्रहइतितदवच्छेदेनमणिजन्यत्वंग्राह्यमित्यतआह·वह्निमात्र
स्येति।व्यभिचारेणतृणास्याजनकत्वात्वह्निमात्रस्यैवतदजन्यत्वादित्यर्थः।तथाचपुनःसएवव्याभि

वारइतिभावः। उक्तग्रहकैरिति· अन्वयव्यतिरेकाभ्यांनियतेनान्वयेनवेति त्रित्वाद्बहुवचनोपपत्तेः·
अकार्य्यकारणेति। ननुकारणत्वसंशयेकथंतदवच्छेदकरूपवत्त्वनिश्चयस्तयोरेकनिश्चापकनि
श्चयत्वात्·किंचवह्निनिष्ठकार्य्यतायाःतृणनिष्ठकारणतायाश्चाग्रहेकथंतदवच्छेदकत्वेनज्ञानं
विशेषणाज्ञानसाध्यत्वाद्विशिष्टज्ञानस्य·अपिचकार्य्यतावच्छेदकत्वंकार्य्यताद्याश्रयमात्रवृत्तित्वं
तद्ग्रहेचकार्य्यताद्याश्रयत्वमवश्यंविषयः।नचकार्य्यताद्यपिगृह्यतएवेतिवाच्यं·व्यभिचारेणातद्ग्र
हस्याशक्यत्वादितिचेत्·अत्रवदंति·कार्य्यतादिकमप्यत्रगृह्यतएवतेननोक्तसर्वदोषावकाशः·
नचोक्तव्यभिचारनिश्चयेकथमव्यभिचाररूपनियमगर्भहेतुत्वग्रहइतिवाच्यं·समानप्रकारकवि
रोधिज्ञानस्यैवप्रतिबंधकतयातृणत्वावच्छिन्नस्यवह्नित्वावच्छिन्नेव्यभिचारग्रहेतदवच्छिन्नस्यतदव
च्छिन्नहेतुत्वाग्रहेपितदाश्रययोर्हेतुहेतुमद्भावग्रहस्याविरोधित्वात्।अतएवयागंविनापिदानात्स्व

गइति ज्ञानेपिस्वर्गजनकोयागइतिधीः स्वर्गत्वसामानाधिकरण्येन यागजन्यत्वं विषयीकरोति ॥
तदिदमाह । नतुलक्षणत्वेन हेतुत्वं वह्नित्वेन कार्य्यत्वं वेति · यद्धि कार्य्यकारणभावएवनगृह्यते तत
249 नहेतुत्वं कार्य्यत्वं वेत्येव ब्रूयात् । नचैवं वह्नित्वावच्छेदेन व्यभिचारग्रहेपि वह्नित्वसामानाधिकरण्येन रास
भजन्यत्वं गृह्यतमितिवाच्यं । ग्राहकाभावात् । अत्र वारणीमप्यभाववतीत्यादिना ग्राहकस्योक्तत्वात् ·
नचैवं लक्षणानिष्ठकारणतापूर्ति यागिककार्य्यताश्रयत्वं गृह्यतइत्येवास्तु · किंतदवच्छेदकरूपपरत्वप २४८
र्य्यंतेनेतिवाच्यं · मणिमविनिगमकगवेषणस्यसामान्यतावच्छेदकग्रहं विनानुपपत्तेः । सामान्यतोदृष्टा
वतारं विना परिशेषानुदयादिति · यत्तु ससंबंधिकप्रत्यक्षज्ञाने संबंधितावच्छेदकरूपवत्त्वज्ञानमावश्य
कमितितद्धियं विनानकार्य्यकारणभावग्रहः प्रत्यक्षेणश्रुतएवनशाब्दः स्वर्गजनकत्वज्ञानं प्रतिवंदीति ·
तन्न · इयं वह्निव्यक्तिस्तृणजन्येतिप्रत्यक्षेएतद्व्यक्तित्वादेरवश्यंभानात् । नचतस्यानवच्छेदकतयातदवच्छे

देनकार्य्यताबुद्धेर्भ्रमत्वापत्तिरिति वाच्यं· कार्य्यताबुद्धाववच्छेदकत्वस्याप्यभानात्। भाने वा तदंशे भ्रमत्वेपि
कार्य्यत्वांशे प्रमात्वादिति। अन्यथैवेति। अभावत्वप्रतियोगिकोव्यासज्यवृत्तिप्रतियोगिताक इत्यर्थः। अ
भावस्येति· तथा च तृणोत्कर्षणाद्यनुत्कर्षणं न स्यादिति भावः। एतेनेति· तृणस्य तदुभयत्वापत्तेरित्यर्थः। पूर्वं
मिलितानां तृणादीनामभावत्रयाभावत्वेन हेतुत्वमाशंकितमिदानीं तु प्रत्येकस्येति न पौनरुक्त्यमित्याहुः
रुभयसिद्धत्वमेव स्थापयति· कथमिति। तटस्थस्त्वाह· नन्विति· अवघातेन व्रीहेर्न्नष्टत्वात्तदन्वयः पुरोडाशे
न भवतीत्याह· अवयवेति· नन्विति· तथा च नतद्व्यापारत्वेनातिशयः कल्प्यत इति भावः। तटस्थशंकापरिहा
रमाह· मैवमिति। क्रमेणोपादीयमानेऽवघाताजनकेऽव्यभिचारादाह· प्रमाणात इति। नन्वकारणे कारणाका
रणे व्यभिचारः। न च कारणाकारणाकारणसाधारणमनुकूलत्वमात्रं साध्यं तदपि मध्यवर्त्तिघटितमित्य
तिशयसिद्धिरिति वाच्यं। एवं द्विजनकीभूतध्वंसजनकत्वेनापि साध्यस्य वसितार्थत्वे प्रतियोगिनो हेतुत्वाप

त्रैविद्यमाणाविरोधादितिवेदानांवेदमूलकावघातोद्देश्यकोपादानविषयत्वादितिविशेषणंव्याप्त्यैवसाधि
नात्·वस्तुतोव्यक्तिवचनान्यायेनावघातेप्रोक्षितव्रीहित्वयेप्रोक्षणस्यबाधकंविनाविशेषणत्वेनोपल
२५० क्षणत्वमिति·प्रतियोगिनइति·अभावतत्प्रतियोगिनोरेकत्राजनकत्वादित्यर्थः।व्यापारंविनैवप्रोक्षण
स्यावघातेजनकत्वमस्त्वितिशंकते·नवेति·अहेतुत्वादिति·प्रोक्षणस्यहेतुत्वंसाधितमितिभावः।ननु
यद्युपलक्षणमतीतजनकंतदानंतोव्यावृत्तबुद्ध्यादिकंनस्यादित्यतआह·कुरुणेति·तन्निमित्तत्यु २५०
पलक्षणंतद्योगसाधनेत्यपिद्रष्टव्यं·अन्यथासाधनवैकल्यापत्तेरित्यवधेयं·जन्मांतरीयेति·श्रुती
तोपलक्षणस्यापिजनकत्वाभ्युपगमादितिभावः।एतावताध्वंसातिरिक्तंव्यापारंसिद्धमुपसंहरति·
तस्मादिति·प्रमाणानइति·कार्यापेक्षयाविरध्वंसत्वेसतीतिविशेषणं·तेनस्मसाक्रनकेनव्यभि
चारः।अतिशयस्यभावत्वंचपक्षधर्मतावललभ्यं·ननुसाध्यतावच्छेदकप्रविष्टं·तेनविघ्नध्वंसद्वारा

समाप्तिसाधने मंगले मिथ्याज्ञानध्वंसद्वारा मुक्तिसाधने तत्त्वज्ञाने वा न व्यभिचारः। नन्वस्त्वतिशयः स च

पुरुषसमवेत एव तथा च नाधेयशक्तिसिद्धिरित्यत आह· स चेति· संस्कारत्वेनेति· न चैवमनेकव्रीह्युपादा

नं न स्यादिति वाच्यं· होमादिनिर्वाहार्थं तदुपगमात्। ननु य किंचिद्दव यवनाशात्सकलव्रीहिनाशेन

खंडव्रीहीणामुत्पत्तिस्तत्र का गतिरित्यत आह· अस्तु चेति· किंचिदिति· यावत्तुल्यभिन्न वस्तु स्थितिरि

ति स्वमतावष्टंभेनेदं यद्यप्यतिशयस्यैकत्वेनैव पुरुषनिष्ठत्वं सिद्ध्यति· अन्यथा लाघवेनाश्रयनाश

मात्रस्यैव कार्य्यनाशप्रयोजकत्वेनैकव्रीहिनाशे तन्नाशात् व्रीह्यंतराणामुपयोगी न स्यात्। तथा

पि प्रकारांतरमाह· तथा हीति। दृष्टद्वारेति· अत्र धर्म्मजनकत्वं साध्यं· तथा च निषिद्धकर्म्मणि व्यभिचा

रवारणाय विहितत्वादित्युक्तं। प्रायश्चित्ते व्यभिचारवारणाय कालांतरेत्यादि· ननु दृष्टाद्वाराभावे

सतीत्यस्य दृष्टान्यद्वाराभावे सतीत्यर्थः। तथा चासिद्धिः। परमते शक्तेरेव द्वारत्वात्· न चापूर्वस्य द्वार

७६।

भावेसतीतितदर्थः। औषधपानादौव्यभिचारात्। नचतत्रविहितत्वाभावादेवनव्यभिचारइतिवाच्यं
आयुर्वेदेनतस्यापिविहितत्वादितिचेत्-न-शत्रूतदुपजीविप्रमाणमात्रप्रयोज्यधीविषयद्वारेतरद्वा
रस्यदृष्टद्वारपदेनविवक्षितत्वात्। नचौषधादौव्यभिचारः। तदीयधातुसाम्यादिरूपातीन्द्रियद्वार
विशेषशत्रूनुपजीविप्रमाणासंभवादितिवाच्यं। अन्वयव्यतिरेकादिमूलकप्रमाणस्यापिकदा
चिदत्रप्रसरादितिभावः। कस्यादावितिनचविहितत्वाभावादेवनतत्रव्यभिचारइतिवाच्यं। पुत्रे २५९
कर्त्तृणिपायविभागविनावेश्यस्यकृत्विविधानादितिभावः। शत्रुवधमिति-एतच्चपरमते ऽस्म
न्मतेऽप्यनापूर्वस्यशत्रुनिष्ठत्वमेव-फलोपपादकमपूर्वफलाश्रयेकल्प्यतइतिवक्ष्यमाणयु
क्त्यातथाव्यवस्थितेः। अतएवगयाश्राद्धापूर्वस्यपितृनिष्ठत्वं-पंचमटीकायांतथाविभावनात्
स्वमतेनदोषमाह-विपक्षेति। नचफलसामानाधिकरण्यलाघवमेवविपक्षबाधकमितिवाच्यं-

नानार्थयोगेरवेणातत्क्लाघवानादरादितिभावः। हविस्त्यागेति। बहूद्देशेन हविस्त्यज्यते न बतेन तत्राति
शयोजन्यत इत्यर्थः। न च बर्हौ तदनुकूलः संयोगो जन्यत एवेति वाच्यं। एवं प्रोक्षणेनापि व्रीहौ जलसं
योगस्य जननात् सिद्धसाधनादितिभावः। पुरुषसमवेतातिशयस्य परस्य परस्परासंबंधेन स्वरूपसं
बंधेन साक्षादेव व्रीहिनिष्ठत्वस्याप्युपपत्तेर्नातिरिक्तस्य पदार्थकल्पनमिति तत्त्वं। अथोत्पन्नतत्वस्य
न वस्तुस्वरूपकृतप्रोक्षणेन दोषाभावाद् दृष्टानुत्पादे शक्तिसिद्धिरिति चेत्। न। तत्र फलानुत्पादाल्लोक
संग्रहार्थं तदाचरणादितिभावः। बर्हिष इति। बर्हिर्यागस्येत्यर्थः। यथा तस्य जनितादृष्टस्य न पुनः स
प्रयोगान्तरं तथा व्रीहेरप्यदृष्टजननोपयोगेन तन्नस्यादित्यर्थः। यद्वा व्यतिरेकदृष्टान्तोऽयं। यथा बर्हि
षः प्रणीतीति विधिवशात्तस्य पुनरुपयोगस्तथात्र न स्यादित्यर्थः। उक्तन्यायेनेति। व्यक्तिवचनान्यथा
येनावघाते प्रोक्षितस्यैवान्वये सर्वमिदमविरुद्धमितिभावः। ननु पुरुषे पातित्यादिदोषेणादृष्टेन्ते।

१५२ त्पद्यतइतिअनन्यगत्याव्रीहित्वनिष्ठातिशयःस्वीकार्यइत्यतआह·कर्त्तृकर्म्मेति।एवंव्रीहित्वनिष्ठोपि
मनस्यादित्यर्थः।पुरुषनिष्ठत्वेसाधकमुक्त्वाव्रीहित्वनिष्ठत्वेबाधकमाह·किंवेति·कार्य्येति।भावका
र्य्येत्यर्थः।आश्रयेति·समवायिकारणेत्यर्थः।एवंकिंचिदाश्रयनाशेप्रत्यभिज्ञानस्यतज्जातीयत्वं
विषयइतिभावः।संयोगस्येति।ननुफलस्योपलक्ष्यत्वेतत्तद्व्यापारमात्रस्यैवधात्वर्थत्वेत्यजगम्योः
पर्य्यायतापत्तिः।अवच्छेदकीभूतयोःफलयोर्विभागसंयोगयोर्द्धात्वर्थाप्रवेशात्।स्पंदमात्रस्यैवो २५२
भयधात्वर्थत्वात्·कर्म्ममात्रस्यैवजनकत्वेनपतनादिवदवांतरजातिमादायाप्यर्थभेदस्यदुरुपपा
दनत्वादिति·अत्रवदंति·व्यापारउपलक्षणीभूतस्यापिफलस्यप्रतीतौविशेषणस्यैत्वमेव·इष्टसा
धनताविधिपक्षेक्रियोपलक्षणस्यापिद्रव्यस्यज्ञानविशेषणत्ववत्·तदत्रफलविशिष्टोव्यापारोय
द्विवाच्यस्तदाशाब्दात्फलविशिष्टव्यापारधीरपरथाफलोपलक्षितव्यापारधीरित्युभयथापिफलांशे

पिशाचेऽ:क्षपुतीत्यविशेषायेनपर्य्यायतविशेषणत्वेपुक्तेकर्म्मत्वाननुपपत्तिरिति।उक्तवापु
क्षणजन्यापूर्वस्यसाक्षात्स्वरूपसंवंधेनैववृत्तिकर्म्मत्वंसाक्षाद्धीजन्यसंस्कारविषयतयाघ्घटादी
नामिवएवंवपुाप्पसंस्कार्य्यकर्म्मणोभेदोप्युपपद्यतइत्यभिपुत्याह-किंवेति।वक्तिमिति।नह्यत्र
कर्म्मणिद्वितीयानुमितौवक्तूरकारकत्वात-कर्म्मणश्चकारकविशेषत्वात्-किंतुसाधुविभक्ति
स्तथात्रापीत्यर्थः।नवेति।पुतिष्ठितंपुजयेदितिनिषेधास्वरसादितिभावः।ततएवतत्सत्वेपिचांडाल
दिस्पर्शेनापूज्यत्वादेवेत्यर्थः।देवताचैतन्यपक्षमालंव्यपरिहरति।पुतिष्ठाविधिनेति।अहंकारेति।
अहमियंपुतिमा-ममेदंशरीरमित्यादिज्ञानरूपमित्यर्थः।नन्विदंज्ञानंविषयवाधाक्रांतंस्यात्-नच
तत्संभवति-विशेषदर्शनादित्यतआह-स्वसादृश्येति।तथाचविशेषदर्शनसत्यप्याहार्य्यभ्रमोयमि
त्यर्थः।ननुदेवतायांसर्व्वज्ञत्वाभावेनव्यासंगदशायांव्यवहितनानादेशेतत्रतत्रपुतिष्ठायांकथ

कथमहंकारममकारः।संस्कारनाशोवाकथंपूज्यत्वं कथंवाज्ञानसंस्कारयोरननुगतयोप्यूज्ञापु
योजकत्वमितिप्रथमकल्प्यानुपपत्तिः।यत्रवव्यासंगवशान्नपुत्यभिज्ञानंतत्रपुतिष्ठितपुतिमापू
जापिनिःफलास्यात्पुतिष्ठितंपूजयेदित्यादिनावपुतिष्ठायास्तद्ध्वंसस्यवाहेतुत्वंबोध्यतेननुपू
त्यभिज्ञानस्यापीतिद्वितीयकल्पनानुपपत्तिःदृष्टेनेवोपपत्तावदृष्टकल्पनानुपपत्तिरितितृती
यकल्पनानुपपत्तिरित्यस्वरसादाह वयंत्विति।ननुयत्रमायांपुतिष्ठाजातादेवात्किंविदवयवनाश। २५३
दन्यापुतिमाजातातत्रपुतिष्ठारूपपुतियोगिनोध्वंसस्तद्ध्वंसस्यापिनवृत्तिः।पुतियोग्यधिकरण
एवध्वंसस्यवृत्तेः।तथावतत्पूजानिःफलास्यात्।नवेष्टापत्तिःआचारविरोधात्।अन्यथैतद्ध्वंकया
कस्यापिनवृत्तिःपुःस्यात्।नवतत्पुतिमावृत्तित्वेनध्वंसस्यनपुयोजकत्वं किंतुस्वरूपेणतच्चास्त्येवेति
वाच्यं एवंहितध्वंसस्यपुतिमांतरपूज्यत्वपुयोजकतापिस्यादविशेषादितिवेत्। अत्राहुः।इयंपुति

च्छितेति बुद्धेः खंडप्रतिमायामपि प्रतिमात्वव्यवहारात् तद्ध्वंसस्य तत्रापि वृत्तिरेव· प्रतिमांतरे तदभा
वात्तदभावः अत एव प्रोच्छितव्रीहीणां यत्किंचिदवयवनाशान्नाशेपि खंडव्रीहीणामुपयोगः। स
स्फुता व्रीहय एते इति प्रतीत्या तत्रापि पुरुषसमवेतसंस्कारसंबंधासिद्धेः। अन्यथा सर्वमिदं तत्रापि
त्यक्तुमिति। प्रतिष्ठाकालीनेति। अत्र स्वसमानाधिकरणेत्यपि विशेषणं· तेन तत्प्रतिष्ठाकालीनप्र
तिमांतरास्पृश्यप्रागभावाभावेन यावदर्थाभावान्नापूज्यतापत्तिः। न च प्रतिष्ठोत्तरमपि पूज्यता न
स्यात् प्रतिष्ठापूर्वकालीनास्पृश्यस्पर्शानां जाततया तत्प्रागभावाभावादित्यत आह· प्रतिष्ठाकालीने
त्यभावविशेषणं। न त्वेकस्पर्शानंतरमग्रिमस्पर्शप्रागभावसत्त्वात्पूज्यता स्यादित्यत आह· यावदिति· आ
दिपदमवयवविभागादिपरं स्फुटितप्रतिमायामपूज्यत्वात्· नन्वनादिसंसर्गपदमत्र किंचित्करमिति वि
ल· अत्राह· तावदभावसहितप्रतिष्ठाध्वंसहेतुत्वे तावंतोऽभावा हेतव इति ध्रुवं· तथा चानादित्वानंतभावे

साध्यभावानामपिजनकत्वमितिवह्नूनाजनकत्वेगौरवमित्यन्यजनकत्वेलाघवेनसादित्वावच्छिन्नार्थि
मनादित्वपदोपादानंएवमन्योन्याभावव्यावर्त्तनार्थंसंसर्गापदं·अन्यत्तुपुतिष्ठाकालीनत्वेऽपुतिष्ठाका
·लीनत्वंविवक्षितं·तदपिस्पर्शादिविशेषणं·नन्वभावविशेषणंएवंचपुतिमायामस्पृश्यस्पर्शेजातेपित
ह्रुसान्योन्याभावमादायापूज्यतापत्तिः।पुतिष्ठान्तरकालानानांयावदस्पृश्यस्पर्शानामभावस्यतत्रस
त्वादनादित्वपदसंसर्गापदोपादानेतुनोक्तदोषः।तन्निष्ठास्पृश्यस्पर्शव्यक्तेरेवानादिसंसर्गाभावस्यतत्रा २५४
सत्वातअत्यंताभावस्यपुतियोगिसमानाधिकरणत्वात्।पुागभावस्यपुतियोगिध्वंसासमानकालीन
त्वादित्याहुः।समयविशेषेवेति।सचविशेषःकार्यानन्तर्यायदनंतरंपुष्पमित्यर्थः।नन्वेवंचरमसंयोग
स्यकारणीभूतपुतियोगित्वेनपुतिबंधकत्वापत्तिः।नचेष्टापत्तिः।चिरसमयव्यापिसंयोगेसतिपुष्पा
नुत्पत्त्यापत्तेरित्यपरितोषादाह·चरणेति।तत्संयोगेति।अतएवान्नादिसंयोगजलस्खलनेनापनी

यतद्दृत्यर्थः।संस्कारएवेति।धर्म्मविशेषइत्यर्थः।अन्येत्विस्वरसोद्भावनंतद्बीजंतुदृष्टद्वारेणैवोपपत्तावदृ
ष्टकल्पनानुपपत्तिरिति।समयवशेषेति।नवैवंयागोप्यपूर्व्वेनकर्म्मविशेषइत्यर्थः।अन्येत्वित्यस्वरसोद्भा
वनंतद्बीजंतुदृष्टद्वारैणैवोपपत्तावदृष्टकल्पनानुपपत्तिरितिल्याभितिवाक्यं·तत्रविधिनाकार्य्यकारण
भाववोधनादत्रतुनतथेतिभावः।पाकजविशेषमानमाह·कार्य्येति।ननुवीजपूरादौला।क्षाद्यवसे
काकुसुमारुणयंदृश्यतेतत्रलाक्षादिरसस्यागलितत्वात्नकालांतरीयकुसुमारुणिमहेतुत्वं·नवास्व
त्यात्तस्मान्नाद्दगुत्कर्षः।तथावतत्प्रयोजकत्वेनाधेयशक्तिस्तत्रस्वीकार्य्येत्यतआह·एतेनेति।इत्या
दीति·दशरात्रेषितंकांस्यद्रुतंवापिविषायतेइत्यादिपदग्राह्यं·कठिनत्वंतोयप्रतिवद्धद्रुवत्वमित्यर्थः
तुलादौतुलाविधिजन्यामाधेयशक्तिंजयादिजनकत्वानुपपत्तिः।पापिनोपिसभाक्षोभादिनाया
परत्वज्ञानाभावेनिःपापत्वभ्रमेवाभंगानुपपत्तिश्चेत्यरुचेराह·अथवेति।तयेति।तुलारोहणासाम

ग्येत्यर्थः।ननुदृष्टद्वारेणैवोपपत्तावदृष्टकल्पनानुपपत्तिः लौकिकक्रियाऽपीष्टानिष्टफलजनक
त्वेनतादृशातुलारोहणेनश्रुत्युक्तपनासंभवश्चेत्यपरितोषादाह यद्वेति।अयंपापीनिःपापोवा
तुलारूढइतिज्ञानमेवतज्जन्यसंस्कारोवाऽत्रसन्निधिरित्यर्थः।ताश्चेति देवताइत्यर्थः।स्वस्वे
ति।अत्रयत्रकार्यस्यघटादेरभावस्तत्रदंडादेरभावइतिदेशिक्येवव्यापकता।यदाकार्याभाव
९५ स्तदादंडादेरभावइतिकालिक्यांसामग्रीकालएवव्यभिचारात्।एवंचदंडसत्त्वएवचक्राद्यभावे २५५
नघटाभावेव्यभिचारात्कथंव्यापकैतेतिव्यभिचारवारणायकार्याभावंविशिनष्टि।स्वेतरस
कलसंपत्ताविति तेनदंडेतरसकलसंपत्तौसत्यांयत्रघटाभावस्तत्रदंडाभावइतिनभवतिव्यभि
चारः।तावतिकृतेवाप्रसिद्धिः दंडेतरसकलमध्यपतितानांचक्रभ्रम्यादीनांसंपत्तौघटाभावा
प्रसिद्धिरतउक्तंस्वव्याप्येतितथाचचक्रभ्रम्यादीनांदंडव्याप्येति·तथाचचक्रभ्रम्यादीनांदंडव्या

प्यतयातदितरसंपत्तिकालीनकार्य्याभावंप्रतिव्यापकत्वमस्त्येवदंडाभावस्यस्वव्याप्यत्वंवस्वप्रागभावप्रति
योगित्वंव्यापकत्वंतुकालिकमितिभावः।अत्रवदंति·स्वेतरपदंस्वेतरतत्कारणपरंवा·स्वेतरमात्रपरंआद्ये
आत्माश्रयत्वं·अन्त्येऽसंभवः।घटाद्युत्पत्तौवेमादिसमवधानाभावात्।किंचयत्रस्वमप्यस्तितत्रापिस्वे
तरसकलसमवधानमस्तीतितत्रकार्य्याभावाप्रसिद्धिः।नचस्वेतरसमवधानेनस्वासमवधानंविवक्षि
तंजनकसाधारण्यात्।नहिस्वाभावेयत्रकार्य्याभावस्तत्रनस्वाभावाइतिसंभवति।तथाचघटेप्रतिव्याप्ति
पिहेतुतापत्तिःअपिचकुलालपितुरप्येवंघटजनकत्वापत्तिः।किंचआत्मादिकेतावव्याप्तिः।कार्य्याभाव
तिदेशकालेवातदभावाभावात्अपिचयत्रकार्य्याभावस्तत्रदंडाभावइतिनास्तिदंडाभावेघटाभावदिति
सर्वमिदमनुपपन्नमिति·अत्रब्रूमः।स्वस्वव्याप्येतरपदेनकार्य्यभागाव्याप्यप्रागभावप्रतियोगिसकल
संपत्तिर्विवक्षितेतिनासंकुचितंसकलपदं·यत्तुसमवधानेपिस्वेतरसमवधानमित्यादि·तन्नुच्छं·यत्रस्वेतर

सकलसमवधानेकार्य्याभावस्तत्रस्वाभावइत्यवक्तावितिकताकृशाभावप्रसिद्धेर्व्यभिचाराभावात्·यद्यपि
कुलालपितुरित्यादिनदपिन·इदंहिकारणसामान्यलक्षणंतथावकुलालपितृत्वेनान्यथासिद्धत्वेपि
256 कुलालत्वेनतस्यापिजनकतयाऽतिव्याप्त्यभावः।नवकुलालपितृत्वेनजनकत्वापत्तिः।यस्यकार्य्याभा
वव्यापकाभावप्रतियोगित्वंहेतुत्वमेवलक्षणार्थोनतुयदवच्छिन्नाभावप्रतियोगित्वमित्यापादकाभ
भावाद्येनकेनापिरूपेणोन्नधर्म्मत्वस्यैवजनकत्वरूपत्वात्·नवदंडरूपादावन्यथासिद्धेऽतिव्याप्तिः· २५६
तस्यस्वस्वव्याप्येतरदंडादिसकलसंपन्नावेककार्य्याभावाभावेनोक्तरूपाभावात्।अतएवदंडत्व
मपिनिराकृतं·तत्रदैतेव्याप्याप्रसिद्धेः।नचैवंनित्यमात्राव्याप्तिरग्रेनिरस्यत्वात्।ज्ञानेविंप्रत्याकाश
स्यकार्य्याभावव्यापकाभावप्रतियोगित्वमेवनास्ति·अप्याकाशाभावासंभवात्·नचशब्देप्येवमक्तेवुलाप
त्तिः।अग्रेनिरस्यत्वात्·गंधप्रतिरूपप्रागभावादीनांतुस्वस्वव्याप्येतरसकलसंपन्नौयत्रकार्य्याभावस्तत्र

स्वप्रागभावाभावएवोत्पन्नपुनरुत्पादस्थलेदृष्टोननुव्यापकप्रागभावाभावः।व्यापकप्रागभावा
नांतत्रापिसत्वात्कार्य्याभावव्यापकाभावप्रतियोगित्वंतुतादृशाभावप्रतियोगितावच्छेदकावच्छिन्न
त्वस्यहेतुत्वरूपत्वात् अस्तिवात्मत्वावच्छिन्नाभावस्यज्ञानाभावाव्यापकत्वेपिगुणावच्छिन्नाभावप्रति
समवायित्वावच्छिन्नाभावस्यव्यापकत्वंअस्तिवदिक्कालयोस्तत्वावच्छिन्नाभावस्याव्यापकत्वेपिआधा
राभावत्वेनतदभावस्यापिकार्य्याभावव्यापकत्वं-अतएवज्ञानंप्रत्याकाशमहेतुः।केनापिरूपेण
तदभावस्यकार्य्याभावाव्यापकत्वात्।यदभावस्ययेनकेनापिरूपेणायत्किंद्रूपावच्छिन्नयत्कार्य्या
भावव्यापकत्वंतस्यैवतद्धेतुत्वमितिप्रकृतलक्षणार्थित्वात्।नचैवमात्मत्वंहेतुतावच्छेदकमपिनज्ञा
नेहेतुत्वस्यकार्य्याभावव्यापकाभावप्रतियोगित्वरूपस्यतेनावच्छेदात्।सामान्यसामग्रीतएव
कार्य्यंनतुविशेषसामग्रीकार्य्यंवमितिवाच्यं-तत्तत्कार्य्यप्रतिस्वसमवायितयैवात्मत्वपर्यवसानात्:

नत्समवायिकारणतावच्छेदकं कथं समवायित्वमितिवाच्यं· समवायिकारणत्वस्य विशिष्टत्वा
नवच्छेद्यत्वात्· गौरवात्· नीलघटत्ववत् अपितु समवायित्वावच्छेदेन कारणत्वमित्यत एव तत्स
मवायिकारणं भवति। वस्तुतस्तु यदेतदात्मत्ववद्दृढदंडत्वादिकं कारणतावच्छेदकं तत्कार्य्याभा
२४ वव्यापकाभावप्रतियोगित्वं कारणत्वमितिमतेन किंतु सहकारिवैकल्यप्रयुक्तकार्य्याभावव
त्त्वं हेतुत्वमिति पक्षे तेषामेव सहकारिवैकल्यप्रयुक्तकार्य्याभाववत्त्वावच्छेदकत्वात् न हि निय २५८
तपूर्ववर्त्तित्वकारणत्वपक्षेपि दृढदंडत्वं कारणतावच्छेदकं· किंतु दंडत्वमेव लाघवात् किं चैवं प्र
मेयत्वादेरपि तद्धेतुतावच्छेदकापत्तिः। तस्मात्सहकारिवैकल्येत्यादिकारणतापक्ष एव तदव
च्छेदकमिति समवायित्वावच्छिन्नाभावस्य कार्य्याभावव्यापकत्वे सहकारिवैकल्येत्यादेरात्मत्वा
द्यवच्छेद्यत्वेन कोपि विरोध इति सर्वं सुस्थं। यत्तु घटाभाववति दंडावयवे दंडत्वाद्व्यभिचार इति· तन्न·

कार्य्याभाववतियत्संसर्गावच्छिन्नत्वस्यहेतुत्वरूपत्वात्‌-अस्तिचघटाभावव्यापकोयोदंडसमभिव्या
हाराभावःसदंडावयवेपि-नचेदेवंयत्रयदाधूमोधूमावयवेतत्रवह्न्यभावाद्धूमवह्निव्याप्तिरपिनस्या
दित्यलमधिकेनेति।नन्विदंकारणत्वमतींद्रियघटितसकलसंपत्तिगर्भतयादुर्ग्रहं-पूर्व्यलक्षणस्या
पूर्वत्यासाध्यापुसिद्ध्यादिनामानांतरस्याप्यपुक्तेरित्यस्वरसादन्यलक्षणमाह-अथवेति-य
त्रकार्य्याभावव्याप्यतादृतराभावसहकारावच्छिन्नातदवच्छिन्नंकारणत्वमितियावत्‌-तत्रयेन
दंडाभाववत्वंतत्रघटाभावंप्रतिदंडाभावनिष्ठव्याप्तौदंडाभावस्यैवावच्छेदकतयाजनकेदंडाभा
वादावतिव्याप्तिः।दंडत्वेकार्य्याभावव्याप्यजनकत्वाभावादसंभवः।नचसंभवतितत्रदंडाभाव
सहकृतत्वस्यानवच्छेदकत्वात्‌दंडत्वावच्छिन्नत्वस्यजनकत्वात्‌अतएवाग्रेवीजवीजत्वपदेवीज
त्ववीजत्वपरेतरतराभावेनइतराभावसहकृतत्वेनेत्यर्थः।शिलायांत्विति शिलात्वेतुशिलात्वे

वच्छिन्नकार्य्याभावव्याप्यत्वं १

तुशिलात्वत्वेनेत्यर्थः। ननुकार्य्याभावस्तज्ज्ञानकत्वाभावो वा तदभावेंतदुत्तराभावसत्कृतत्वेने
त्यर्थमात्रंवाआद्येअात्माश्रयः। अंत्येशिलायामप्यंकुरस्यसंयोगावच्छ्यासत्वेनतत्रापीतराभा
वसत्कृतत्वंशिलात्वस्यकार्य्याभावव्याप्यत्वात् किंचघटकारणेज्ञानादौकार्य्याभावव्याप्यत्वं
विवक्षितंसंयोगसंबंधस्योत्पत्त्यनंतरकालीनतयातदवच्छिन्नाभावमादायनशिलादौप्रसंगः
ज्ञानत्वत्वादिनेवावच्छिद्यतेदंडाभावसाहित्यस्यतत्रनीलधूमवद्व्यर्थत्वादिति। अत्रवदंति। उत्प
त्तिकालीनसंबंधेंद्वयमेवकारणतासमवायश्चतदवच्छिन्नांकुराभावश्चसमवायिनिबीजादाव
प्ययंवकारणमेवनैवंकारणागभत्विनात्माश्रयः। संबंधत्वेनतज्ज्ञानादिति। तच्चित्यंविषयविष
यिभावसंबंधस्याप्युत्पत्तिकालीनतयातदवच्छिन्नाभावस्येतराभावावच्छेद्यतयावह्न्यादेरनुमितिजन
कतापत्तिः। वरमकारणेकार्य्याभावाभावादव्याप्तिश्चेति। वस्तुतस्तुवीजांकुरइतिप्रतीतिवलाद

३ त्पत्तिकालीनसंबंधो ४

वध्यवधिमद्भावलक्षणः स्वरूपसंबंधविशेष एव विलक्षणः कार्य्यकारणयोस्तत्संबंधावच्छिन्नकार्य्याभा
वश्चकारणे तदाभावावच्छेदेन स्वरूपायोग्येन तादृशसंबंधाभावात्। स्वसाधारणशिलात्वादिधर्म्मावच्छे
द्यः। एवं च तादृशसंबंधावच्छिन्नकार्य्याभावव्याप्यत्वं। यत्र स्वासाधारणधर्म्मेतरावच्छिन्नं कारणमित्य
त्र तात्पर्य्यं चरमकारणे च यद्यपि तथाभावो न। अवच्छेदकस्तथाप्युत्पादकाल एव तथा। उत्पादनंतरमे
व कार्य्योत्पादेन तदा कार्य्याभावात्। यद्वा चरमकारणोपरामर्षादावपि प्रतिबंधकाभावविलंबेन
कार्य्योत्पत्तिविलंबवद्धितराभावावच्छिन्नत्वमेव· यत्र यदवच्छिन्न तथात्वं तत्र तज्जातीयत्वं लक्षणं वा
ध्यमित्याहुः। न चारण्यस्थदंडे दंडत्वादिनैव तदवच्छेदाद्व्याप्तिरिति वाच्यं। दंडत्वमादाय लक्षणस
त्वात्· एवं च घटकारणज्ञानादावपि तत्संबंधावच्छिन्नकार्य्यताकव्याप्तं दंडाद्यभावावच्छेद्यमेवेति न
तत्राव्याप्तिरिति ध्येयं। ननु दंडरूपादावपि प्रसंग इति चेत्· न· दंडाद्घट इतिवद्दंडरूपाद्घट इति प्रती

260

त्यभावेनतादृशसंबंधावच्छिन्नकार्य्याभावस्यदंडरूपत्वेनैवावच्छेदात्।अतएवव्योमादावपिनघटका
रणत्वप्रसंगः।अत्रवस्वभावएवशरणं·एवंचानन्यथासिद्धत्वेनविशेषणीयमतोनोक्तदोषइतिक
स्यचिद्व्याख्यानमनादेयं·उक्तेनैवोपपत्तेरिति।अन्यासमवधानावच्छिन्नेति।अन्यासमवधानाव
च्छिन्नंकार्यानुत्पत्तिव्याप्यत्वंयस्यतदवच्छिन्नत्वंकारणत्वमित्यर्थः।उत्पत्तिगर्भतयापूर्व
स्माद्भेदः।अत्रापिपूर्वोक्तसंबंधविशेषमादायउत्पत्त्यभावव्याप्यत्वंबोध्यं·उत्पत्तिश्चस्वसमान २६०
कालीनपदार्थप्रतियोगिकध्वंसानाधारसमयसंबंधः।ध्वंसत्वंचप्रागभावप्रतियोग्यभावत्वं
प्रागभावत्वंचनप्रतियोगिजनकाभावत्वंयेनान्योन्याश्रयस्यात्किंतुगंधानाधारसमायाना
धाराभावत्वंशेषंपूर्ववत्।अनन्यथासिद्ध ति।घटजातीयप्रतिरासभजातीयमनन्यथासि
द्धमितितत्रातिव्याप्तिवारणायनियतपदं·ननुनियतत्वंकालमपेक्ष्यदेशमपेक्ष्यवा·नाद्यः·र

समेपि गतत्वात्।घटपटादिकाले रासभजातीयस्य नियमेन सत्वात्. नान्य. साक्षात्संबंधेनाह

ष्टादेर्घटादिदेशमपेक्ष्य नियमात।साक्षात्परंपरासंबंधमात्राविवक्षायां रासभेपि घटादिदेशनि

यतत्वेनातिप्रसंगादिति मैवं. साक्षात्परंपरासाधारणैकजातीयसंबंधेन देशानियतत्वस्य विव

क्षितत्वात्. रासभादावेकजातीयसंबंधेन घटादिदेशनियतत्वाभावात्।घटादावेकजातीयसं

बंधेनाहष्टादेर्न्नियतत्वादिति वदंति।तच्चिंत्यं. किंयत्सु घटेषु रासभस्यैकजातीयसंबंधेन देश

नियतत्वादतिप्रसंगः।कार्य्यतावच्छेदकावच्छेदेनादृष्टव्याप्यतया तथात्वं. द्रव्यगुणाद्यनेक

कार्य्यएकजातीयतत्संबंधाभावादिति. भक्षितवीजसंग्रहार्थाय जातीयेति।जातीयपदं च पूर्व

वर्त्तितावच्छेदकधर्म्मपरं. भूतानाकाशाद्येकदेशव्यक्तिकारणेऽव्याप्तिः।पूर्ववर्त्तित्वं प्रागभावश्च

नविशेषणं. येन प्रागभावेऽव्याप्तिः किंतु द्रुतेपलक्षितकालविशेषवृत्तित्वं तच्चतत्राप्यस्ति. काल

स्यवस्थूलस्यैवाधिकरणतयाहेतुत्वं॰तस्यपूर्वक्षणावच्छिन्नत्वमस्त्येव॰नत्वधिकरणस्येतिनतद
व्याप्तिर्दोषः।प्रागभावत्वंचनप्रतियोगिजनकाभावत्वमन्योन्याश्रयात्नापिविनाश्यभावत्वं॰
विनाशस्यप्रागभावगर्भतयाऽन्योन्याश्रयात्॰उत्पत्तिगर्भतयातन्निर्वचनेचक्रकापत्तेःस्वसमा
261 नकालीनपदार्थप्रतियोगिकध्वंसानाधारसमयसंबंधरूपत्वेऽन्योन्याश्रयात्।किंतुगंधाना
धारसमयानाधाराभावत्वं॰ननुध्वंसप्रागभावात्मनिघटादावव्याप्तिःनचात्रतदलक्ष्यमेवेतिवा २६१
च्यंनहिप्रागभावलक्षणमिहप्रयुक्तं॰किंतुकारणत्वलक्षणेतच्चसामान्यतएवलक्ष्यं॰तथैवोप
क्रमात्तथाचध्वंसप्रागभावस्यालक्ष्यत्वेध्वंसकारणसाधारणंतल्लक्षणंनस्यादितिचेत्अभावप
दस्यभावाभावसाधारणविरोधिपरत्वात्यद्यप्येवंतद्वयध्वंसाभावत्वाभावात्तथापितत्प्रतियोगि
काभावत्वलाभार्थमभावपदं॰नहिप्रागभावसामान्यगर्भंकारणत्वंकिंतुतत्प्रतियोगिकप्रागभावा

भावावच्छिन्नसमयवृत्तित्वंतत्कारणत्वं तथाचतादृशकालावृत्तित्वादभावस्तत्प्रागभावइतिपर्य्यव
स्यति नवतादृशसमयाप्रसिद्धिः। गंधत्वंस्वाधिकरणानधिकरणसमयवृत्तिकादाचित्कमात्रवृत्ति
जातित्वाद्घटत्ववदित्यनुमानात्तत्सिद्धिः। ननुसिद्ध्यतु गंधानाधारसमयस्तथापिप्रागभावस्यकथं
तदनधिकरणत्वग्रहणं नह्यत्रप्रत्यक्षमागमोवासंभवति अनुमानांतरसंभवेनचप्रसिद्ध्युत्त
रं तथाचानुमानप्रवृत्तौप्रागभावत्वेनधीस्तस्यांचानुमानप्रवृत्तिरित्यन्योन्याश्रयइतिचेत्र न गंधा
नाधारसमयोनास्तीतिनिर्णायकतामीमांसकस्यभवतीतिबुद्धिर्न्निरुक्तातिरिक्तरूपेणतद्बुद्धिवि
षयत्वेनवोपस्थितस्यप्रागभावस्य लिंगाभासनादिनापितादृशसमयानाधारत्वानुमितिसंभ
वात् गंधस्येवदृष्टांतत्वाच्च यद्वा कादाचित्काभावत्वेनैवोपस्थितस्यतस्यतदनुमानं ध्वंसांशे
बाधादेवनानुमानंतदनवतारेतदंशेभ्रमत्वेपिक्षत्यभावात् ननुगंधानाधारसमयोनास्तीतिनि

र्णीयवतोमीमांसकस्येष्टसाधनतालिंगककार्य्यताज्ञानेनप्रवृत्तिदर्शनान्नैतत्प्रागभावत्वग
र्भंकारणत्वं·किंचकारणत्वबोधकशब्दादिरेवैवंमहाप्रलयकालेप्रमाणंस्यात्·तस्यतद्घटि
262 त्वात्·तथाचतदनुपगमोपितस्यव्याहन्येतेतिचेत्·न·गंधानाधारेत्यादिनाभविष्यती
तिप्रतीतिनिर्वाहप्रयोजकस्यगंधप्रागभावत्वस्योपलक्षणत्वात्अतएवमीमांसकंप्रति
जनत्वघटितस्यलिंगस्यनैयायिकेनोक्तावपिनान्यतरासिद्ध्यादिदोषइतिवदंति·तच्चिंत्यं २६२
तस्यैवानुगतस्यनिर्वक्तुमशक्यत्वात्·नवाखंडमेवप्रागभावत्वंतेनोपलक्षितमितिवा
च्यं·उपाधेरखंडत्वेजात्यपलापापत्तेः·जातेश्चाभावेनभ्युपगमात्·वस्तुतस्तुनेदंकार
णत्वंप्रवृत्त्यनुकूलंतथात्वस्वमतेनलक्ष्यतावच्छेदकतयाकारणपदप्रवृत्तिनिमित्ततयावा
निरुक्तेयस्मिन्सतीत्यादिनानिरुक्तक्षेमसाधारणंतत्साधकत्वज्ञानमेवप्रवर्त्तकंतदेवविध्य

र्थे: अन्यथा प्रागभावस्य प्रागभावाभावेन तत्पूर्ववर्त्तित्वाभावेन तद्घटितजनकत्वात्. दुःखप्रागभा
वार्थितया प्रायश्चित्तादौ पूर्वकृत्यभावापत्तेरित्यादि विधौ वक्ष्यते. तथा च नोक्तदोषः एतेन गंधानाधा
रगर्भ वृत्तीनानाधारगर्भतयापि तन्निर्वचनात्तद्धर्मकारणत्वमपि भिद्यते. तथा च विनिगम
काभावादुभयगर्भस्यैव साधनताज्ञानस्य पूर्ववर्त्तिकृतायां पूर्वकृत्यनुगम इत्यपास्तं. निरुक्तस्य पू
र्वत्तकत्वानभ्युपगमात्. यत्तु आकाशपदार्थकदाचित्कस्वाश्रयत्वेन कदाचिदष्टद्रव्यातिरिक्तदृ
व्यत्वेनेतिवत् कदाचित्तीलाघवानाधारत्वेनापि समयविशेषोपलक्षणात्र कापि क्षतिः तत्समय
विशेषावच्छ्यभावावच्छिन्नसमयसत्त्वस्यैव हेतुत्वरूपतया च न वृत्त्यनुगम इति निरुक्तमेव पूर्वकृत्य
नुकूलमिति. तच्चिंत्यं. तत्समयानभ्युपगंतुरेण तद्ज्ञानं विनैवान्यज्ञानादेव पूर्वकृत्तेरित्यननुगम
स्यैवमप्यपरिहारात् प्रायश्चित्ते पूर्वकृत्यनुपपत्तेः अत एव तत्समयाघटितस्यानुगतस्य प्रागभा

वत्वस्यनिर्वक्तुंशक्यत्वेपिनपुरुत्वानुकूलत्वमितिध्येयंयत्तुगंधानाधारसमयस्यमहाप्रलयत्वेमा
नाभावः।युगपन्नाशेमानाभावात्तथाचयावद्गंधनाशानंतरमपिवस्त्वंतरसत्वसंभावनयात
त्प्रागभावस्यगंधानाधारसमयानाधारत्वेसंशयेनतज्जन्यत्कारणेपितत्वेकर्मकारणलक्षणाव्या
263 प्तिसंदेहः एवंचपृथ्वीविशेषणानांसंदेहात्तद्वारणायविशेषणमप्युपादेयमेवेति-तन्न-यावद्गं
धनाशस्यदृष्टाभावात्अन्यथासंयोगविभागयोरन्योन्यनाश्यतयातद्वास्थितोसर्वयुक्त्यनुप
पत्तेश्चतथाचसर्वादृष्टाभावात्कार्याभावावाश्यइतियुगपदेवकार्यनाशइत्याहुः।नचकाश २६३
देरवृत्तितयापूर्वकालवृत्तित्वाभावादव्याप्तिरितिवाच्यं-समवधानवत्वस्योक्तत्वात् वस्तुतः
कालस्यजगदाधारतयातत्रापितद्वृत्तिः।ननुद्रव्यत्वेनरूपेणदंडरासभादेर्नियतपूर्ववर्त्तित्वस
त्वात्कारणत्वंस्यादितिचेत्-न-तेनरूपेणतस्यान्यथासिद्धत्वावश्यत्वात्-सामग्रीवनकारणलक्षणावि

शेषत्वात् कालोपाधेश्चाधिकरणत्वेनैव हेतुत्वात् न च कारणमेलकरूपायां तस्यामति प्रसंगः

दंडादीनां कारणस्वेष्टत्वात् मेलकस्यातिरिक्तस्यानभ्युपगमादभ्युपगमे वा दंडरूपवदन्यथा

सिद्धत्वात् परस्परप्रत्यासत्तिरूपस्येष्टत्वात् केचित्तु स्वरूपसंबंधविशेषः कारणता प्रतियोगि

त्वादिवत्तत्परिचायक एवायं धर्म्मविशेष उक्त इत्याहुः । ननु कारणत्वादन्येन रूपेणासिद्धभा

वोनन्यथासिद्धत्वमित्यन्योन्याश्रयः सिद्धिपदस्योत्पत्तिपरतायां नित्यमात्रेऽतिव्याप्तिः । ज्ञप्तिप

रत्वेऽसंभवः हेतोरपि प्रमेयत्वादिना ज्ञप्तेरिति योगार्थीनमहाय रूढमित्यन्यथासिद्धिपदार्थमाह

अन्यथेति यद्यपि कुसुमांजलिप्रकाशे पंचान्यथासिद्धिरुक्ता तथाप्यवच्छेदकयोरत्रैव प्रवेशान्न

तत्संग्रहाय प्रकारद्वयमुक्तं अत एव कुसुमांजलिमकरंदे तथैव विभावितमस्माभिरिति । एवम

ग्रे वक्ष्यति तेन तदन्यथासिद्धमिति शेषः । ननु शब्दादिना दंडपूर्ववर्त्तित्वग्रहं विनापि तद्रूपपूर्ववर्त्तित्वग्रहे

संभवान्नियमोऽसिद्धः।नचपुत्यस्थेणोतिविशेषणीयमतींद्रियेऽन्यथासिद्धेऽव्याप्तिः।नियमाविवक्षा
यांदंडरूपेणैवदंडस्यान्यथाःसिद्ध्यापत्तेरितिचेत्.न.रूपत्वमात्रस्यातिप्रसक्ततयादंडरूपत्वेनैव
पूर्ववर्त्तित्वग्रहाभावात्स्तत्रतत्साहित्यनियमात्नचैवंद्रव्यत्वादेरतिप्रसक्ततयादंडत्वेनैवदंडस्य
264 पूर्ववर्त्तित्वग्रहात्दंडत्वेनैवदंडस्यान्यथासिद्धिरस्त्वितिवाच्यं.येनपृथगन्वयव्यतिरेकवतासहैत्य
र्थात्.सूत्रपृथगन्वयादिमतइत्यपियस्येतिविशेषणादेयं.तेनदंडेनदंडसंयोगस्यनान्यथासिद्धिः. २६४
एतद्विशेषणमहिम्नैवयत्रोभयोरुभयविशेषणावच्छेदेनैवान्वयाद्यनुविधानंतत्रैकेनापिपरस्य
नान्यथासिद्धिः।यथोद्भूतरूपतेजसोरित्येके।यत्रोभयविशेषणावच्छेदेनैवान्वयाद्यनुविधानंत
द्भिन्नत्वेनविशेषणान्तुतादृशस्थलेऽतिप्रसंगइत्यन्ये.कुंभकारपितान्त्रैवांतर्भवति.कुंभकारत्वे
नतदन्यथासिद्धत्वस्येष्टत्वात्कुंभकारपितृत्वेनैवान्यथासिद्धत्वेवाच्यं.तत्रतत्साहित्यनियमात्न

न्वेवमङ्कुलरूपतेजसोरिवदृढत्वदंडत्वयोरपिनैकेनापरस्यान्यथासिद्धिःस्यात् ।उभयोरुभयवि
शेषणावच्छेदेनैवान्वयाद्यनुविधानात् ।नच त्वस्यचक्रभ्रमिजनकत्वस्यान्वयाद्यनुविधानमेवने
तिवाच्यं तथासतिदंडत्वेनैवहेतुतापत्तौदृढत्वस्यावच्छेदकतापिनस्यात् किंचदंडत्वेनदंडस्यदंडत्वे
नदंडत्वस्यान्वयाद्यनुविधानमितिउभयोरुभयविशेषणावच्छेदेनैवान्वयानुविधानमितिनैकेनाप
रस्यान्यथासिद्धिःस्यात् अपिचकुंभकारपितृत्वेनान्यथासिद्धस्यापिकुंभकारत्वेनैवदंडरूपत्वेना
न्यथासिद्धस्यापिरूपत्वेनान्यथासिद्धत्वमस्त्वननुतदतिप्रसक्तमितिचेत्·तत् किमतिप्रसक्तत्वमप्य
परान्यथासिद्धिः ।तथाचानन्यथासिद्धत्वनियतपूर्ववर्त्तित्वयोरप्रतिक्षेपे किंतेन· किंचफलानुपहित
वर्त्तित्वस्यातिप्रसक्तत्वस्यदंडत्वस्यदंडादिसाधारणत्वात् ।अतादृशस्यचाभावात् नचफलानुपहितनि
त्यवर्त्तित्वेनतथात्वंरूपत्वेननित्यरूपस्यापिघटजनकत्वाविरोधात्·उक्तरूपयोरप्रतिक्षेपात् ।जन्यरूपत्वे

नवाहेतुत्वमस्तु नचतेनरूपेणान्यत्रक्लृप्तत्यत्रांतर्भवतीतिवाच्यं·तर्हिदंडरूपत्वेनापितथास्तुकिंनिरू
क्तान्यथासिद्धेति।अन्त्यंप्रतीतिनतुशब्दो ऽष्टद्रव्यातिरिक्तद्रव्याश्रितो ऽष्टद्रव्यानाश्रितत्वेसतिगुणत्वादित्य
265 नेनाकाशासिद्धेःशब्दपूर्ववर्त्तितमज्ञात्वापिज्ञानादिकपूर्ववर्त्तित्वंतस्यज्ञायतएवेतिवेन्न·न·तत्रापिवि
पक्षबाधकतयाशब्दकारणतामुपजीव्यैवाकाशसिद्धेरित्याहुः।नचैवंसंयोगादिकमपिप्रत्याकाशस्या
न्यथासिद्धत्वप्रसंगः।आकाशत्वेनैकत्वात्तद्रूपत्वेशब्दपूर्ववर्त्तितामज्ञात्वापितत्पूर्ववर्त्तिताग्रहात्नचै २६५
वंयोगादेरपूर्वेणान्यथासिद्धत्वं पत्तिः।स्वर्गंप्रतिपूर्ववर्त्तित्वेज्ञानएवतस्यतत्प्रतितद्रूपादितिवेन्न·न·
साक्षादितिपूर्ववर्त्तित्वेविशेषणादित्याहुः।तत्पूर्ववर्त्तित्वानुपपादकंयस्यपूर्ववर्त्तित्वंगृह्यतेतदन्यथादि
त्यनेनपनवपरत्वादिपूर्ववर्त्तित्वग्रहानंतरमन्यकार्यादिक्कालयोस्तद्रूपद्रूत्यनन्यथासिद्धः।तद्रूपंविना
पाधिकरणत्वेनकार्यमात्रपूर्ववर्त्तित्वग्रहात्कुंभकारपितुरत्राप्यंतर्भावः।ननुकुंभकारपितृत्वेनतथा।

त्वेपिवेत्रत्वादिनातस्यानन्यथासिद्धत्वमस्त्विति चेन्न तेनापिरूपेणाकुंभकारजनकत्वंज्ञात्वैव घटंप्रत्य
न्वयादिग्रहात् तदानींतद्देशेतस्यासत्वनियमेनकुंभकारद्वारैवघटनियतपूर्ववर्त्तित्वग्रहादिति-न
न्वन्यंप्रतिपूर्ववर्त्तित्वेज्ञातएवेत्यत्र किंयेनकेन विशेषणावानाद्यः।द्वेडादावतिप्रसंगात्-नांत्यः।श
ब्दनित्यत्वानित्यत्वसंदेहेपिशब्दकारणतामनुपजीव्यशब्दाश्रयत्वेनाकाशप्रसिद्धोज्ञानादिपूर्वव
र्त्तित्वग्रहसंभवात् निरुपाधित्वादेरपिविपक्षबाधकत्वसंभवात् वस्तुतः शब्दनित्यत्वानर्णयवतोमी
मांसकस्यतत्पूर्ववर्त्तित्वमज्ञात्वैवज्ञानादिपूर्ववर्त्तित्वग्रहइतिनियमासिद्धिः। किंचद्रव्यत्वेनाकाश
स्यसंयोगाद्यवज्ञानादौहेतुत्वमस्त्वनचग्राहकाभावेनतेनरूपेणनियतपूर्ववर्त्तित्वाग्रहइतिवाच्यंग्रा
ह्यसत्वेग्राहकाभावासंभवात् नचतेनरूपेणान्यत्रैत्यत्रैपंतिभवतीतिवाच्यंतथासत्याकाशत्वेना
पितथात्वापत्तेः। अपिचैवंशब्दसाक्षात्कारंप्रत्ययितस्यान्यथासिद्धापत्तिः। नचशब्दपूर्ववर्त्तिताम

ज्ञात्वापीन्द्रियत्वेन तत्पूर्ववर्त्तित्वग्रहः इतिवाच्यं· श्रोत्रत्वेन तथाप्यन्यथासिद्ध्यापत्तेः। तस्याकाश
व्यवहितत्वादाकाशस्यैव शब्दपूर्ववर्त्तित्वग्रहं विनासिद्धेरनभ्युपगमात् अन्यथाज्ञानेपि तस्यान्य
266 थासिद्धत्वं न स्यात् एवं च पाञ्चभौतिकं शरीरं प्रत्यपि तदन्यथासिद्धं स्यात्· किं चेश्वरज्ञानादेः क्षि
तिपूर्वपूर्ववर्त्तित्वग्रहात्तत्राप्यन्यथासिद्ध्यापत्तिः। न च कार्यमात्रे कर्तृमात्रस्यैकदेव पौर्वापर्य
ग्रहस्य शब्दादिना संभवादन्यथासिद्ध्यभावापत्तेः। विभुत्वेन पूर्ववर्त्तित्वग्रहणेपि तत्संभवान्निया २६६
मकाभावात् अत एव परत्वादिना न दिक्कालयोरन्यथासिद्धिरिति· तन्न पूर्वोक्तेप्यन्यथासिद्ध्यभा
वापत्तेः। शब्दस्यापि वर्णध्वनिभेदेन नानात्वादन्यतरपूर्ववर्त्तित्वग्रहेणापि संभवेन नियमाभा
वात् तत्र तत्र शब्दत्ववदत्राप्यनुगतपक्षतावच्छेदकस्यान्यतमत्वादेः संभवादिति। अन्यत्रेति·
एतच्च प्रायिकं। अवश्यकॢप्तं यल्लघुनियतपूर्ववर्त्तितत्समवधाननियतत्वं तन्नमित्यवततात्पर्यं·

तेनगुणेनदोषाभावस्यसहकृतत्वेनानेवकुप्तत्वस्यान्येषांचगुरूणांपदार्थानामन्यथासिद्धिर्भवति।
ततएवपंचम्याहेतुत्वाभिधानेमात्वाश्रयइत्यपास्तंपूर्ववर्त्तिनइत्यत्रविधौपंचमीत्यन्येअतएवच
रासभादेरपियथाकृतान्यथासिद्धत्वभावेऽन्यथासिद्धपदेनैवतद्वारणेनियतपदंव्यर्थमित्यपा
स्तं·नियतस्यरासभेऽसत्वात्नत्वेवमपिदंडरूपाकाशादेरप्यत्रैवांतर्भावेतत्संगृहकान्यथासिद्धे
रानर्थक्यंकिंचात्रकल्पकत्वंनियतपूर्ववर्त्तित्वमात्रेण·कारणतप्रावानाद्यः।गंधपूर्तिरूपविशेष
प्रागभावस्यापितथात्वेनगंधप्रागभावान्यथासिद्ध्यापत्तेः।नांत्यः।गुरुत्वाश्रयात्।अपिचसहका
रिणांपरस्परस्यपरस्परेणान्यथासिद्ध्यापत्तिः।द्वयोरप्यवश्यकल्प्यत्वलघुनियतपूर्ववर्त्तित्वेनतत्व
मप्रधाननियतत्वात्।नचपृथगन्वयाद्यनुविधायित्वेसतीत्यपिविशेषणं·तद्धिपृथगन्वयादि
ग्रहविषयत्वंसमनियतत्वंवा·नाद्यः·रूपप्रागभावस्यापिशब्दादिनातादृशग्रहविषयत्वेनातथा

त्वापत्तेः। नान्त्यः। आलोकतद्रूपादेरीश्वरज्ञानादेश्चैवमपि परस्परमन्यथासिद्ध्यापत्तेः। एते
नावश्यकॢप्तपूर्ववर्त्तिन एव कार्यसंभवे तन्नियतसहभूतत्वमित्यर्थः। पंचमी कार्यावधित्वेन हेतु
267 तायामित्यपास्तमिति। ननु येन सहैवेत्यन्यथासिद्धिर्योगोप्यस्तीत्यत आह॰ योगेति। अपूर्वानुप
स्थितत्वापि विधिना यागकारणत्वबोधनात् न तु तेन सहेत्यर्थः। तदेवाह॰ नन्वेवगम्यमान इति॰
नन्वेवमपूर्वेणायागवत्कुलालपितान्यथासिद्धो न स्यादित्यत आह॰ यत्रेति। कुलालं प्रति पू २६७
र्ववर्त्तित्वे ज्ञात एव घटं प्रति कुलालपितृत्वेन पूर्वपूर्ववर्त्तित्वग्रहान्न तेनान्यथासिद्धत्वं स्यादिति
इत्यर्थः। नन्वेवं कुलालपितृवद्यागोप्यन्यथासिद्धः स्यादित्यत आह॰ यत्र वेति॰ पूर्वोक्तरीत्या
तत्रान्यथासिद्धेरभावादिति भावः। नन्वेवं चक्रभ्रमणेन दंडसंयोगस्यापि कुलालपितृवदन्य
थासिद्धिः स्यादत आह॰ दंडेति। तत्र तयोरपि संभवेन स्वातंत्र्येणापि नियतपूर्ववर्त्तिताग्रहसंभ

वेनाद्यं प्रति पूर्ववर्त्तित्वे ज्ञान एवेत्यवधारणासंभवादिति भावः। स्वस्वेति- स्वं कारणत्वेनाभिमतं दंडा
दि तदनंतरोत्पत्तिकं संयोगादितरसकलसमवधाने सतीत्यर्थः। यत्र स्वस्वानंतरोत्पन्नसकलसम
वधाने सतीति पाठः तत्र स्वपदमन्यपरं द्रष्टव्यमिति। तच्चोपलक्षणं यस्याभावादिपंचकस्याहेतुत्वा
र्थकत्वादात्माश्रयः। यदभावनियतः कार्याभाव इति विवक्षायां च स्वसत्वे स्वानंतरोत्पत्तिकव्य
तिरेकेण यत्र कार्याभावस्तत्र व्यभिचारः द्वितीयपाठे दंडानंतरोत्पत्तिकचरमकारणसमव
धाने चक्राद्यभावात्कार्याभावाप्रसिद्धेस्तत्राव्याप्तिः। उक्तानन्यथासिद्धत्वस्यैव कारणरूपत
याशेषवैयर्थ्यमुभयत्रेत्यपि द्रष्टव्यं। बाधकाभावेनेति। यद्यप्येकत्र लघुगुरुविषयतासंभवे ला
घवं सहकारि अन्यथामानांतरेण लाघवावतारसंभवे गुरुमात्रस्यासिद्धिप्रसंगात् तथापि य
त्रैकसिद्धिरपरसिद्धिविरोधिनी तत्रैव लाघवावतारस्य गुरुसिद्धिप्रतिबंधकत्वमित्याहुः॥ ॥

ननु निःश्रेयसानुकूलतया प्रमाणेन तत्त्वविवेचनमत्र प्रतिज्ञातं। न चानुमानस्य तद्धेतुत्वे मानमित
आह· परमेति। वक्ष्यर्थिपुरुषत्वादिकमपि तत्प्रयोजनमतः परमेत्युक्तं· यद्यपि श्रुतिर्न्न साक्षाद
पवर्गादिहेतुतामाह तथापि दुःखेनात्यंतविमुक्तश्चरतीत्यनुवादसमभिव्याहृतातथात्वेन बोध्या·
२६४ यद्यपि मंतव्य इत्येव प्रयुक्ततोपयोगितथापि पक्षज्ञानाभावे मननासंभवदिति श्रोतव्य इत्युक्तं· तस्य
चाशुविनाशिनो द्वाराकांक्षायां निदिध्यासितव्य इत्याद्युक्तं यद्यपि द्रष्टव्यः श्रोतव्यो मंतव्यो नि २६४
दिध्यासितव्य इत्याद्या कारिका श्रुतिः। तथाप्यग्निहोत्रं जुहोति यवागूं पचतीतिवद्दृष्टद्वारक
ताकल्पनाच्छ्रुतक्रमलंघनेनार्थक्रमोपादाने पर्य्यवसितार्थपरतया साक्षात्कर्त्तव्यव्यत्य
येन व्युत्क्रमेणाव निर्दिष्टव्य एवेति बोध्यं· ननु दुःखेनात्यंतं विमुक्त इत्यादिना दुःखात्यंताभावत्वे
न श्रूयते तस्य चासाध्यत्वान्नानुमानप्रयोजनमित्यत आह' सर्वेति· तथा च तदसहवृत्तित्वमेव श्र

तावात्यंतिकत्वमितिभावः। इदानींतनदुःखध्वंसातिव्याप्तिवारणायदुःखप्रागभावासहवृत्ति
त्वंध्वंसविशेषणं। दुःखप्रागभावासमानकालेत्यर्थः। संसारिदुःखप्रागभावसमानकालतया
शुकादिमुक्त्यव्याप्तिरतआह समानाधिकरणेतिप्रागभावविशेषणं। स्वसमानाधिकरणेत्यर्थः।
संयोगादिप्रागभावसमानकालतयादोषतादवस्थ्यादाह। आद्यदुःखपदं। एतच्चैकविंशतिप्रभे
ददुःखपरमतश्चरमभोगरूपदुःखप्रागभावसमानदेशकालतयानुपपन्नाद्दुःखध्वंसेनातिव्याप्तिः।
अतएवप्रागभावपदमप्यर्थवत्। चरमदुःखध्वंसस्यवर्त्तमानाद्यविरमनुभूयतइतिसिद्धांतेनभोगरू
पदुःखप्रागभावसमानदेशकालतयाऽसंभववारकत्वात्। केचित्तुदुःखप्रागभावासहवृत्तित्वंदुः
खविशेषणमतोनोयांत्यदुःखध्वंसेऽतिव्याप्तिरित्याहुः। रूपध्वंसादावतिव्याप्तेराह। चरमदुःखपदं।
नवतत्रसमानाधिकरणाद्दुःखप्रागभावाप्रसिद्धेर्नप्रसंगः। विषयत्वेनरूपादेरपिदुःखत्वात्। ननुस्तु

खात् मुक्तावव्याप्तिः। तेन ॥। सुखमत्यव इतिश्रुतेः स्मरणस्य दुःखाव्याप्तत्वसंभवात् न यतत्सुखपू-
र्वध्वंस एव मुक्तिः। तत्राप्युक्तलक्षणाव्याप्तिः। तत्सुखज्ञानस्यापि दुःखतया तत्प्रागभावमानदेशान्व-
269 त मुक्तस्य दुःखोत्पत्त्यसंभवाच्चेति वेत्तन्न तेन वाहृत्यादिश्रुतेरन्यापेक्षया मरणे ऽत्यदुःखभाजन-
त्वमत्र तात्पर्यात् न वानुपपत्तिं विना न मुख्यार्थत्याग इति वाच्यं दुःखविशेषहेतुत्व एव पाटनादि स-
त्त्वे दुःखोत्पादस्यावश्यकत्वात्। ननु मरणाद्दुःखं मे माभूदिति कामनया प्रवृत्तो ऽस्वतो यत्र मृतस्तत्र का- २६८
गतिरिति चेत्तन्न तत्र कामनैव बाधिता अन्यथा यत्र मुक्तौ दुःखं भवत्विति कामनया मृतस्तत्र का गतिः।
यदि कारणबाधात्तत्र सुखं बाधितमिति कामनाबाधः। तदा दुःखसामग्रीसत्त्वे तदभावो ऽपि बाधित इति
तुल्यं न च योगिना यत्र सकलदुःखमुपभुज्य सुखं भुक्तं तन्मुक्तावव्याप्तिः। तत्रापि शरीरनाशसमये
ऽवश्यं दुःखोत्पत्तेः। न च भोजकादृष्टं विना कथं दुःखोत्पत्तिरिति वाच्यं अदृष्टान्तस्य भोगेन क्षीणत्वेऽपि

अवस्यौत्प   मानमरणाद्दुःखमोजकादृष्टस्यसत्वात्-नचैवमीश्वरस्यापिशरीरत्यागकालेदुःखो
त्पत्तिःस्यादितिवाच्यं-अदृष्टादिकारणाबाधेनबाधादितिसंक्षेपः।असौदुःखध्वंसःननुकस्तस्या
तीतादावभावेनविकल्पासंभवादितिध्येयं-हेतावप्यतीतादिविकल्पेसत्येवाह-तदितिमिथ्याज्ञा
नेप्यतीतादिविकल्पसंभवादाह-सवासनेति।तथाचानागतस्याभावेवर्त्तमानस्यापन्ननिवर्त्यत्वेत
द्वासनैवनिवर्त्ततइतिभावः।ननुवासनापिमिथ्याज्ञानमुत्पाद्यपुनस्तद्वारामुक्तिविरोधिनीनस्वतःतथा
चमिथ्याज्ञानप्रागभावाभावेतदसंभवात्तत्सत्वेपिनक्षतिरिति।तन्निवृत्त्यर्थं किंतत्वज्ञानेननचतत्सत्वे
ऽशेषविशेषगुणोच्छेदलक्षणोनमोक्षइतिवाच्यं।चरमसंस्कारवत्तस्याअपिकालादिनाशसंभवादि
तिचेत्-न-अन्वयव्यतिरेकाभ्यांचरमदुःखंतद्ध्वंसंचप्रतितत्वज्ञानस्यहेतुत्वमस्फुटत्वात्तत्वज्ञानंविना
कायव्यूहाभावेऽनंतकर्मक्षयानुपपत्तेतदावश्यकत्वेविरोधितयातेनैवतद्वासनानिवर्त्यतइत्यर्थीति

इत्यादुःखध्वंसस्तत्त्वज्ञानोत्पाद्य इति सर्वमतमत आह· मुक्ताविति। दुःखध्वंस एवेति। लाघवादित्यभिमानः।
मिथिलानामिति। एवकारदानाद्दुःखानुत्पादेन तद्ध्वंसस्य तत्त्वज्ञानासाध्यत्वादित्यर्थः। ननु तन्मेलकं सा
२७० ध्यं स्यादित्यत आह· मेलकस्येति। तस्य मेलकस्य दुःखानतिरिक्तत्वे यावता मुक्तिरीत्यासाध्यत्वे यत्किंचि
दुःखध्वंसो मुक्तिरित्यस्मदादिरपि मुक्तः स्यादित्यर्थः। चरमघटितस्तोमस्य मुक्तित्वे लाघवात्स एव मु
क्तिरितिवाध्यं· सेवलन एवेति तत्रमितिनानामसाध्यत्वेपि तत्पदवाच्यत्वे दोषाभावादिति भावः। जनक २७०
त्वस्य स्वरूपयोग्यत्वस्याऽपुरुषार्थत्वादिति। यद्यपि प्रथमपक्षे नायं दोषस्तस्य संस्कारात्कालाद्वा विना
शद्वतिवार्य्यवर्त्तिक दर्शनेनासंभवः। स्वरूपयोग्यताविवक्षायां सुतरामिति दूषणोत्तात्पर्य्यं· प्रयोजनत्वा
दिति। मुख्यप्रयोजनत्वादित्यर्थः। तथा च दुःखसाधनध्वंसस्य स्वतः पुरुषार्थत्वाभावान्न मोक्षत्वमिति
भावः। कृतो सत्यामिति· एतच्चविपर्यं वितं प्रत्यक्षप्रकाशे अग्रिमग्रन्थ इति· तच्च प्रागभावेपीति भावः। ननि

ति॰तथावस्वतःपुरुषार्थत्वकल्पनात्स एव मोक्षइतिभावः।फलोपहितसाधननाशःपुरुषार्थत्वेनो
क्तइतिमन्यमानाद्देशयतिश्रुथितितथावतत्सत्वासत्वविचारोयुक्तएवेति भावः।किंतु पापांतरमितिान
न्वेवंकाशीमृतस्यकृतप्रायश्चित्तस्यकथंमुक्तिः।नचतत्रापिपापांतरोत्पत्तिः।काशी
मरणोत्पन्नतत्त्वज्ञानस्यतस्यदोषाभावेनदुत्पत्तेरसंभवादितिचेत्‌॰अत्रवदंति।तत्रदुःखप्रागभावो
नास्त्येव॰फलसंदेहपर्यवसिततत्संदेहाच्चप्रायश्चित्तेप्रवृत्त्युपपत्तौतत्रतस्याकिंचित्करत्वेपिनकापि
क्षतिः।नचनिःफलत्वेनतद्बोधकवेदाप्रामाण्यं॰सतिदुःखप्रागभावेतस्यतथाजनकत्वमितिवेदत
त्पर्यात्‌॰सतिदोषेनिसिद्धकर्मणःपापजनकत्ववत्सतिविघ्नेमंगलस्यध्वंसजनकत्ववच्चेति॰तन्न॰
पापादिजननेदोषादेःसहकारित्वमितिनिषिद्धकर्मादेःसांगत्वाभावान्निसिद्धत्वेपिनतद्बोधकवेद
प्रामाण्यं॰इहतुसांगस्यप्रायश्चित्तस्यनिःफलत्वेतद्बोधकवेदाप्रामाण्यंस्यादेव॰नहिदुःखप्रागभा

श्री।

वैफल्येदुःखप्रागभावस्यापिसहकारित्वंयेनतदभावेप्रायश्चित्तस्यसांगत्वंनस्यादिति·वयंतुब्रूमः
तत्रदुःखप्रागभावोनाक्ष्यैवकाशीमरणस्येवतत्रमानत्वात्।प्रवृत्तिश्चतद्भ्रमात्तत्संदेहाद्वा·नचैवंतद्बो
धकवेदप्रामाण्यं·यत्कामकर्त्तव्यतयाहिवेदेनयद्बोध्यतेसांगस्यतस्यावश्यंतत्फलजनकत्व
मित्येवनियमः।तद्विहपापध्वंसकामकर्त्तव्यतयाप्रायश्चित्तस्यवेदेनबोधनात्तदनुत्पादेपरंतद्बो
धकवेदप्रामाण्यं·नचात्रतदस्ति·तत्रापिप्रायश्चित्तेनपापस्यनाशितत्वात्·अत   वप्रायश्चित्ते २७१
पापध्वंसकामनयैवाधिकारः।ननुतद्दुःखानुत्पादकामना·तस्यास्तत्फलत्वात् नचैवदुःखा
नुत्पादस्यैवप्रयोजनत्वादित्यग्रिमग्रंथविरोधः।दुःखसाधनध्वंसएवस्वतःपुरुषार्थितयामोक्ष
इतिपूर्वपक्षेतत्रदुःखानुत्पादस्यैवस्वतःपुरुषार्थः।तथाचतदर्थतयापापध्वंसस्तत्रगौणप्रयो
जनं·ननुमुख्यइतिनसमोऽस्यइतितदर्थः।तदिदमुक्तंतस्यदुःखानुत्पादरूपत्वेनपुरुषार्थत्वादिति।

तथाच प्रायश्चित्तस्य पापध्वंसः फलं तत्फलं च स्वतः पुरुषार्थो दुःखानुत्पादः। तदिदं वक्ष्यति न च
प्रायश्चित्तस्य दुरितोत्पत्तिनिमित्तकत्वं पापनाशफलश्रवणादिति। न च परमपुरुषार्थानिष्पत्तौ वे
दबोधितफलजनयतो निष्फलत्वं तथात्वे विघ्नध्वंससमाप्तिवाजनितवतोपि मंगलस्य तत्साध्य
स्वतः पुरुषार्थसुखाद्यनुत्पत्तौ निःफलत्वापत्तेः तस्मात्प्रागभावासत्त्वेपि न तन्निःफलमिति न त
द्बाधकमिति वेदाशयमिति। अस्तु वा तत्र दुःखप्रागभावः पूर्वजन्मोत्पन्नपापांतरमासाद्य कायव्यूह
दशायां त्वेन दुःखजननेमोक्षियपत्तेः। नह्यतिजन्मकृतान्येव कर्माणि तदानुभुज्यंत इति नियमः।
तस्माद्यदि तत्सत्वं तदा पापांतरमावश्यकं। अन्यथा तत्सत्वेमानाभाव एव। पूर्वत्रि स्तु पूर्वोक्तरीत्या इति।
यत्तु तत्रापि दुःखप्रागभावोस्त्येव तथा च तस्य निःफलत्वं न प्रागभावस्य वानन्यगत्या ऽनियत देशक
त्वकल्पनात्। तं तं तेरेपापांतरमासाद्यतेनःदुःखोत्पादनं न चैवं दुःखप्रागभावसत्वे काशीमृतस्य कथं

मुक्तिरितिवाच्यं॰स्वसमवेतदुःखजनकप्रागभावस्यैवमुक्तिविरोधित्वात्।तद्ध्वंसमेववमुक्तिलक्षण
मिति॰तन्न॰प्रागभावस्यप्रतियोग्यसमानदेशत्वंप्रायश्चित्तप्रवृत्त्यन्यथानुपपत्त्यावाकल्प्यं॰स्थानां
२७२ तराद्वा॰नाद्यः।उक्तरीत्यातदन्यथोपपत्तेः।नांत्यः।तदसिद्धेः।एतेनसन्नपिदुःखप्रागभावःपापप्र
रूपसहकारिविरहान्नदुःखोत्पादकोऽतएवनमुक्तिविरोधीतिकस्याचिन्मतमपास्तं॰तादृशप्रा
गभावेमानाभावात्प्रतियोग्यनुपपत्तेः।अफलमिति।स्वतःपुरुषार्थप्रयोजकमित्यर्थः।दुःखानु २७२
त्पादेनेति।तावत्कालीनदुःखानुत्पादेनेत्यर्थः॰विद्यमानेतितथाचनिःफलत्वशंकानेतिभावः।वीक्षि
ति॰कृतेत्यर्थः।मुनिर्मोक्षप्रसंगमुद्धरति॰पापांतरेणेति।ननुविशिष्टंनार्थांतरंकिंतुविशेष
णाद्यात्मकमेवतत्रविशेषणस्यस्वतःपुरुषार्थत्वाभावाद्विशेष्यस्यासाध्यत्वात्तदुभयसंबंधस्या
पितदुभयात्मकत्वेनोक्तदोषतादवस्थ्यान्नोक्तःश्लोकसंदर्भइत्याशयेनाह॰अधर्मादीति॰उक्तत्वा

दिति॰ नतावदित्यादिनेतिशेषः।योगेति॰ पद्मत्वपंकजन्मकर्तृत्वोभयविशिष्टे यथा पंकजपदप्रयोगो यो-
गाद्दिनातथोक्तोभयविशिष्टरूढ्येवमुक्तिपदप्रयोगइत्यर्थः।अतएवेति।अनुत्पादस्यसाध्यत्वादेवेत्यर्थः
प्रतियोगीति।प्रतियोगिजनकनाश्यःप्रागभावः।तन्नाशस्यप्रतियोगिरूपत्वात्तज्जातीयत्वेनेत्यर्थः
यत्तुप्रतियोगिजनकत्वेनप्रतियोगिनाश्यत्वेनवेत्यर्थइति।तन्न॰ तन्नाश्यत्वं हि जन्यनाशप्रतियोगि-
त्वं॰ नवप्रागभावनाशः प्रतियोगिजन्योऽभेदेतदनुपपत्तेरिति।प्रायश्चित्तसाध्यति॰ तत्प्रयोज्येत्यर्थः
कलंजकरड्डुसुरादितिप्रसिद्धः पक्षिविशेषइत्याहुः।अभक्ष्यमांसमित्यपरे॰ तथापितुल्यायव्ययत्वंन
समाहितमित्युपसंहरति॰ तस्मादिति॰ तथाचविवेकिनं प्रतिनतुल्यायव्ययत्वमितिभावः।कस्यचिद्धि
ति॰ अन्यथामुमुक्षुप्रवृत्त्यभावेसुखमपिपुरुषार्थोनस्यादितिभावः।नन्वस्त्वज्ञानमित्यतआह॰ नचेति॰
शरीराद्यभावादितिभावः।पुरुषार्थइतिनिरुपधीच्छाविषयत्वस्यतथाप्यनपायादितिभावः।मुक्तिल

सगास्येति॰ पूर्वोक्तस्येत्यर्थः । अशेषविशेषगुणोच्छित्तिरुक्तनलक्षणानामिति भावः । दुःखत्वे व्यभिचारात्पू
२७३ त्यक्तमपि न सिद्ध्येदित्याशयेन सर्वमुक्तिं साधयन्नाह॰ दुःखत्वं चेति॰ स्वाश्रयत्वावच्छिन्नासमानकाली
नेत्यर्थः । दुःखत्वादेर्व्यभिचारादाह मात्रेति॰ यद्यपि ध्वंसे व्यभिचार॰ सद्भावकार्य्यविवक्षया परिहर्त्तुं
शक्यस्तथापि यथाश्रुते ऽपरितुष्यन्नाह॰ संततित्वाद्वेति । नन्वत्रापि दोषतादवस्थ्यमत आह॰ सं
ततित्वं चेति॰ नानाकालः पूर्वोत्तरकालः ध्वंसे च नोत्तरकालस्तस्यानंतत्वात् तथा च ध्वंसप्रतियोगि २७३
कार्य्यमात्रवृत्तित्वमित्यत्र तात्पर्य्यं॰ एवमिति॰ न च ज्ञानत्वादेः पक्षत्वे कार्य्यमात्रवृत्तित्वमसिद्धमि
ति वाच्यं॰ जन्यज्ञानत्वादेः पक्षत्वात्॰ सतत्युच्छेदश्रुतिपरत्वं वोपाधिशंकापि प्रत्युक्ता॰ रात्रीति । यथा य
त्र ता रात्रीरधीयीत तस्यापितरः । घृतकुल्यां मधुकुल्यां वा क्षरंतीत्यर्थवादोपनीतं फलं तथात्रापी
त्यर्थः । नशरीरीति । यद्यपि तत्त्वज्ञानवतोऽपि भोगार्थं शरीरं तथापि दोषानुषक्तशरीरवान्न भवतीत्यर्थः ।

तत्वज्ञानहेतुत्वमिद्धर्थमाह-इत्युपक्रम्यति।नेनेतिनचैवमपिखंडप्रलयकालमादायान्यथासिद्धि
रितिवाच्यंमुक्तिपुरस्करणोक्तातत्वेनतत्परत्वादित्याकुः।ननुयद्गुगंतत्वेवासतमितिस्यात्रनाभ्यस्त
स्तनुरितिनुम्निषेधात्-तथाचवाचेतिसंबोधनमतःक्षणमात्राशरीरत्वेनान्यथासिद्धिरितिचेत्-न-
खांदसत्वेनापत्तेः।एतदस्वरसादेवावार्थ्यास्त्वित्युक्तमित्यन्येसचेतिएवसत्वेपिमिलितनिषेधसंभवान्न
मुक्तोपुमाणानत्वमितिभावः।कृतपुत्येकमुक्तिपरतयाप्युपपत्तेः सर्वमुक्ताचुक्तानुमानमेवशरणमि
त्याहअतएवेति-अस्यकृतिपरामर्षभ्रमंनिवारयति-सर्वेतिदुःखत्वपक्षीकरणादित्यर्थः।लीलावती
कारमतंनिरस्यति-यद्विवेति-भट्टमतंनिरस्यतिनचेतियद्विवेतिनित्यस्यसुखस्याभिव्यक्तिरित्यर्थः॥
सुखमात्रेचेतिदृष्टांतार्थे।अस्येवासिद्धिमाशंक्याहः अतएवेतिउत्पन्नाभावत्वादेवेत्यर्थः।उत्पन्नेति-
इदानीमुत्पन्नंसुखमित्याद्यनुभवादितिभावः।स्वभिन्नत्वेनेतिअभेदेतद्वत्तानुपपत्तेरितिभावः।बाध

स्यविशेषविषयत्वेनसामान्यतोयोग्यतासंशयसत्वादन्वयःस्यादित्यतआहअथेतिस्वर्गवदिति।
अन्यथाअस्मदादिसुखस्यदुःखसंभिन्नत्वनिश्चयाद्बाधापत्तेरितिभावः।उक्तरीत्याप्रथममपिनित्य
सुखसिद्धिःसंभवत्येवेतिक्वान्योन्याश्रयइत्यस्वेराहयद्वेतिश्रुतिविरोधंपरिहरति·तस्मादितिय
द्यपिश्वादसत्वेतिलिंगव्यत्ययःभवतीतथाप्युक्तयुक्त्यातयोभेदेतद्वत्वपरतेवेतिभावः।एवंदंडिम
तंनिरस्यति·एतेनेति।यद्यपिमिथ्याज्ञाननिवृत्तिस्तत्वज्ञानव्यापारतयादुःखसाधनमेवतथापिदुः २७३
खप्रागभावस्यमोक्षत्वेनानभ्युपगमात्।मुमुक्षूणांतदर्थितयाप्रवृत्तिस्तन्मतेनस्यादित्याशयः
ननुत्वयःसंयोगोविनाशोवानित्यत्वविभुत्वाभ्यामसंभवीतिव्याचष्टे·न्वयश्चेति।तथाचजीवात्मन
यइत्यस्यजीवात्मसंबंधिलिंगशरीरध्वंसइत्यर्थः।लिंगशरीरमेवकिमित्यतआह·लिंगेति।चक्षुरा
दीनिबुद्धींद्रियाणिपंच·वाक्पाणिपादपायूपस्थात्मककर्मेंद्रियाणीत्येकादशेंद्रियाणि·स

स्मेति॰ किंचिन्मात्रया शरीरभावेनावस्थितानीत्यर्थः। उक्तव्याख्यायामानंदमयपरमात्मनीत्यल
ग्नकमेवेति दोषसत्वे राह॰ लिंगेति। दुःखसाधनेति॰ सूचिकंटकादिध्वंसस्य वानागतदुःखप्रागभा
वप्रयोजकतया प्रयोजकत्वं॰ न वदुःखप्रागभावो मुक्तस्येति न तस्य पुरुषार्थंगत्वमिति भावः॰ मुक्ते
रिति॰ परममुक्तेरित्यर्थः। इष्टापत्तिमाशंक्याह विरक्तस्येति॰ सर्वदुःखाभावमुद्दिश्यैव प्रवर्त्ततेन सुखो
द्देशेनेति तस्य स एव पुरुषार्थ इति भावः। पुंसंगादाह॰ मोक्षेति। ननु ब्रह्मचारी गृहस्थश्च वानप्रस्थो यति
रित्याद्युपक्रम्य सर्व एते पुण्यलोका भवंति ब्रह्मसंस्थोऽमृतत्वमेतीति श्रुत्या यतेरेवाधिकारबोधनमव्यवहितानंतर्यमिति
तत्पदात्तस्यैव परामर्शादित्यत आह॰ आकांक्षाया इति। आनंतर्यस्येति। अव्यवहितानंतर्यस्येत्यर्थः। बाध
कं विना संकोचानुपपत्तेरिति भावः। कथमिति एतद्बलादेव संकोच इति भावः। नन्वेतदेव कथमित्यत आ
ह॰ तत्वज्ञानेति। एवं स्थिते मननं विदधातीत्यन्वयः। गृहस्थादिरपीति शेषः। इति श्रुतेरिति॰ इत्यादिश्रुते

274 रित्यर्थः ।शरीरादिभिन्नमित्युपलक्षणां इष्टसाधनीभूतमननविषयत्वेत्यपि इष्टत्वं इतरभिन्नत्वानुमितौ
प्रतियोगिज्ञानद्वाराशास्त्रोपयोगं दर्शयति शास्त्रेणेति ।उपपत्तिबोधद्वारापितदुपयोगमाह तथा चेति
ज्ञानकर्मसमुच्चयमाक्षिपति एवं चेति ज्ञानहेतुत्वाभ्युपगमे तथैव कर्मणोपि हेतुत्वमिति तुल्यवदुभय
प्राधान्यमित्यर्थः ।केचित्तु एवं तत्वज्ञानमात्रं न प्रयोजकं किंतु प्राधान्येन कर्मणोपि तथात्वमित्याहुः एवं चे
ति ।तथा च सिद्धांतग्रंथ एवायं न तटस्थ पूर्वपक्षे अमकृते ज्ञानमात्रं तत्वपरं वा परद्वारा निरस्ते सिद्धांता २७४
वतार इत्याहुः ।संनिपत्योपकारकत्वं यदि तत्वज्ञानसहकारिता यासा तान्मुक्तिहेतुत्वं तदानां गांगिभा
वः किंतु समप्राधान्यमेव तच्च दूषितमेवेति प्रधानीभूततत्वज्ञानशरीरनिःपादकत्वमेव तद्वाच्यमेवं सत्या
ह तत्वज्ञानेति नापीति असंकल्पितफलमभिमतविषयसंकल्पा विषयफलं काम्यं कामनापूर्वकं
कृतं श्राद्धादि तत्समुच्चय इत्यर्थः ।भवतु वेति नव फलांतत्वं रार्थत्वेनांगाम अंगलस्य गुंथांगत्वं न स्यादिति भावः ।

जातिस्मरत्वेनेति। तत्समर्थं पूर्वकृतमेव कर्म्म स्मृत्वा न। क्ष द्वितानीत्यर्थः। आचार्यमतमाह अत्रेति सन्नि
पत्येति· कर्म्मापेक्षया सन्निपत्योपकारकमित्यर्थः। ननु जनेनावमतो योगीत्यादिना न तस्य तत्त्यागस्यपि
त्यक्तुं वेराकृ· तत्कर्मसाध्येति· अपूर्वद्वारेति प्रायश्चित्ते पापनाशफलकृते स्तथात्वमिति भावः। समुच्चय
वादी परमतं दूषयित्वा स्वमतमुपसंहरति· तस्मादिति· अत्रेति· नैयायिकादतिशेषः। मात्रपदव्यवच्छेद्यं क
र्म्ममात्रमित्याह तत्रेति मिथ्याज्ञानोच्छेदद्वित्यर्थः। तस्य तत्त्वज्ञानस्य· कर्म्मणामिति। तं विद्याकर्म्मणी स
मारभेते· विद्या वेवन पश्चेवेत्यादिश्रुतिश्चेवेत्यर्थः। यद्यपि तत्त्वज्ञानहेतुत्वमप्यदृष्टद्वारा तथा वतद्द्वारा
मुक्तिहेतुत्वमेवास्तु ज्ञानं प्रत्ययिहेतुत्वकल्पने गौरवात्तथा यिनं ब्राह्मणा विविदिषन्ति यज्ञेन दानेन त
पसेत्यादिश्रुत्या वेदनं प्रत्यपि यज्ञादेर्हेतुत्वसिद्धेः प्रामाणिकं गौरवमिति भावः। विपरीतात्तु न श्रुति
रित्याह· साक्षात्त्वस्येति। दोषाभावेनेत्युपलक्षणं· प्रागभावेनेत्यपि बोध्यं· अन्यथा प्रतियोग्युत्पत्ते

रावश्यकत्वात्. नान्विति। तथा च तत्प्राणान्यायेन मोक्षविशेषे ज्ञानकर्म्मणोर्हेतुत्वमिति भावः। ला
घवादिति। उभयहेतुत्वकल्पने गौरवादित्यर्थः। संप्रदायमतेन समाधत्ते. ज्ञानकर्म्मणोरिति। न
२७५ नु नैरपेक्ष्यमपि न श्रूयते इत्यस्वरसेनाह. साहित्यबोधकमिति। तमेव सानादित्यादौ च यत्कर्त्तृत्वं
तदनयासहेत्यादि साहित्यबोधकमेवास्तीति न विकल्प इति भावः। ननु नान्यः पंथा विद्यते यनाये
ति श्रुतिः प्रकृतेपि साहित्यबोधिकैवेति। न विकल्पादित्यस्वरसेनाह. वस्तुतस्त्विति. यद्यपि बाधकं २७५
विना सामान्यपरत्वमेव तथाप्युत्तरश्रुतिविशेषपरत्वेनाप्युपपत्तेर्न्निःसंदिग्धं श्रुत्यंतरमाकूल
मवेति. तं विदित्वेत्यर्थः। तदेवाह नान्य इति. अन्यस्तत्वज्ञाननिरपेक्षः। अन्यथेति तथा च यथोक्तसु
खत्वावच्छेदेन तद्धेतुत्वकल्पना तत्र शरीरकल्पना. तथा मुक्तित्वावच्छेदेन लाघवाद्धेतुत्वकल्प
नात्सर्वत्र तत्त्वज्ञानकल्पनापीति भावः नन्वेवं कर्म्मणो हेतुत्वबोधकश्रुतेः का गतिरित्यत आह कर्म्मणा

आह मित्यंतेति । एवंच पूर्वोक्तगौरवं निरस्यति प्राप्नोतीति तथापीत्यादिपूर्त्तिर्वदिमुद्धरति तन्त्वादिति त्वप्रा
र्थ्राणिमणिन्यायादितिभावः । नन्वनादिकर्म्मराशेरपक्षयानुपपत्तौ न मोक्ष इत्याशंक्य परमतं दूषयि
तुमुपन्यस्यति तत्त्वज्ञानादिति । दृष्टांतासिद्धिमाशंक्य निराकरोति नवेति ननु निषिद्धकर्म्मणां नि
रुक्तफलकत्वाभावात्तदुपपादकपापस्यैवाभावात्कुतः प्रायश्चित्तस्य तन्नाशकत्वमतः पुनरपि दृष्टां
तासिद्धिरित्यत आह अत एवेति वक्ष्यमाणहेतोरित्यर्थः । प्रायश्चित्तेति । नन्वतदेव कुत इत्यत आह दुः
खवेति । प्राणांतिक इति तत्र कर्म्मांतराभावेन तदधिकारार्थितया ऽप्रवृत्तेरित्यर्थः । ननु शब्दबलादित्य
सिद्धं तादृशशब्दाभावादित्यत आह श्रूयते हीति । हृदयग्रंथिर्मिथ्याज्ञानवासना कर्म्मादृष्टं तन्नि
धनं दोषः । कर्म्माणि अदृष्टानीत्यर्थः । शब्देति यद्विभोगोपि शब्दबोधितस्तदा तद्भिन्नत्वं नाशकविशे
षणं वाध्यं कीर्त्तनादिनापि तन्नाशादाह उत्सर्गात इति । प्रायश्चित्तेति प्रायश्चित्तादिविधिनेत्यर्थः । ।

पद्वति-पूर्वकायव्यूहेहेतुत्वमुक्तमिदानींतु योगभद्दमित्यपोनरुक्त्यं-विमतिपदमिति-एतद्ध्प्रायश्चित्त।
२पद्वति-तथाचतत्वज्ञानवतः कायव्यूहोऽसिद्धएव-तस्यज्ञानेनैवकर्म्मक्षयादितिभावः। योगपद्यंचेति।
276 पूलयेक्लान्तिनिरोधवत्त्वात्कर्म्मणामेकदाचन्तिलाभसंभवादितिभावः। त४ दिनाऽपकर्म्मभोगेवाधी
सिद्धिवारणार्थि-ज्ञानस्येति-तथाचज्ञानानाश्यत्वमपिभोगनाश्यत्वेतंत्रं-अन्यथाकर्म्मत्वमात्रस्यैवतंत्रे
तयाप्रायश्चित्तादिरपितन्नाशकोनस्यादितिभावः। ननुक्तनप्रधानेकथंव्यभिचारः। तत्रभोगासंभा
वेनतन्नाश्यत्वसंभवादित्यतआह-तस्येति। यागआदिर्यस्यतदपूर्वं-तथाचप्रधानापूर्वनाश्यत्वादित्यर्थः २७६
तस्ययागशरीरनिष्पादकतयातन्नाश्यत्वमेवेत्याहुः। अधिकृतेति अधिकृतस्याधिकारोयत्रतदधिक्र
ताधिकारमंगंतत्रेत्यर्थः। यागार्थितयाप्रधानापूर्वार्थितयेत्यर्थः। कृतियोजयति-तावदेवेति-प्रधानार्थि
तयेति-प्रधानापूर्वार्थितयेत्यर्थः। यद्यप्येवंतत्रप्रागुक्तंव्यभिचारोद्भावनमयुक्तंतथाप्येतदनुशयादेवतत्र

व्यभिचारांतरोद्भावनमितिध्येयं । यद्वा नहि प्रयोजनसापेक्षा तत्र सामग्री कार्यं जनयति तथा च यत्र सामग्री
तत्र तदुत्पत्तिसंभवात् । एतदनुशयादेवाह । तत्सत्त्वेपीति । क्षयश्चेति । क्षीयंते चास्य कर्म्माणीत्यत्रेत्यर्थः ।
कर्म्मण इति तथा चनाभुक्तमितिश्रुतिः तत्संगीतो भोगेन क्षयमाह । ज्ञानस्य च कर्म्मनाशकत्वं भोग
द्वाराप्युपपद्यत इति न तत्र तद्बाध इति भावः । अत्र पूर्वोक्तयुक्तिमाशंक्य निराकरोति नचेति । अन्वयव्य
तिरेकाभ्यां दुःखध्वंसविशेषइव तद्विशेषे तद्धेतुत्वमिति भावः । वस्तुतोऽनियमः । यत्कर्म्मजदुःखप्रा
गभावोस्ति तस्य भोगेनैव नाशः । तत्प्रागभावस्यादृष्टसहकारेण प्रतियोगिजनकत्वनियमात् । अन्य
था तन्नाशकाभावे तस्यात्यंताभावत्वापत्तेः । यत्कर्म्मजदुःखप्रागभावो नास्ति तस्यानन्यगत्याऽदत्त
फलस्यैव तत्त्वज्ञानान्नाश इति युक्तमुत्पश्यामः । अनुमानेति मतिपदमित्यत्र । उत्पन्नेति । क्षणमात्रस्थायि
त्वं च पदवाच्यत्वाभावादिति भावः । तथा चोक्तश्रुतिरपि अनन्यथासिद्धा तत्र प्रमाणमेवेति नान्यथैभूत

वशात्स्वमपितत्वज्ञानपूर्वकमुपपद्यते अन्यथातदग्रिमक्षणेमोक्षापत्तौतदसंभवादिति ।। ।। इतिसोदरपु
सं रुषोभूतमहामहोपाध्यायश्रीमद्रुचिदत्तविरचिते तत्त्वचिंतामणिप्रकाशे अनुमानपरिच्छेदः ।। ।।ः।। ।।ः।।
संवत १६२७ समये मार्गशीर्षसुधित्रयोदशी ।। ।। [redacted]

ग्रंथसंख्या सहस्र ०५५०० २११

पोथी केशवभट्टीयं

श्रीकाशीविजयते